[illegible]

बादरायण-[illegible]

# ब्रह्मसूत्रभाष्यनिर्णयः

आचार्य्य श्रीशङ्कर-भास्कर-रामानुज-निम्बार्क-मध्व-
श्रीकण्ठ-श्रीकर-वल्लभ-विज्ञानभिक्षु-बलदेव-
प्रणीत-भाष्यानुसारतः ।



श्री[illegible]नन्दपुरीविरचितः ।

[illegible]

[illegible] प्रकाशितः ।
[illegible]
[illegible] ।

काशीस्थ-
श्रीश्रीरामकृष्ण-सेवाश्रमतः
श्रीमच्चिद्घनानन्दपुरी-
प्रकाशितः ।

'सारदा' यन्त्रालये
श्रीनिरेशनाथ घोषेण
मुद्रितम् ।

# सूचीपत्रम्

## प्रथमो भागः



## द्वितीयो भागः

श्रीमद्-भगवद्

बादरायणव्याससम्मत-

# ब्रह्मसूत्रभाष्यनिर्णयः

## प्रथमः पादः—ब्रह्मसूत्रपरिचयः

### भूमिका

---

#### मङ्गलाचरणम्

उपास्यदेवताः पञ्च सम्पूज्य मनसा हृदि । दक्षिणां कालिकामिष्टां तासां मध्ये विशेषतः ॥
तन्मूलञ्च परं ब्रह्म स्वात्माऽभिन्नं विभाव्य च । देवीं सरस्वतीं व्यासं कृष्णाख्यं तं महामुनिम् ॥
शुकं तदात्मजं गौडं ततः शिष्यक्रमेण वै । गोविन्दं शङ्कराचार्यं भाष्यकारं जगद्गुरुम् ॥
पद्मपादादिकांश्चैव सम्प्रदायप्रवर्त्तकान् । तदन्वयेसमुत्पन्नं महान्तं भगवान् पुरीम् ॥
मौलीबन्धनकर्तारं ब्रह्मविद्याविशारदम् । तस्य शिष्यक्रमायातं तोतापुरीं तपोनिधिम् ॥
रामकृष्णं च तच्छिष्यं रामकृष्णात्मरूपकम् । युगावतारवर्य्यं च साक्षात् कैवल्यनायकम् ॥
विवेकानन्दनामानं तच्छिष्यं विश्ववन्दितम् । वेदान्ताद्वैतसिद्धान्त-प्रचार-जीवनव्रतम् ॥
तच्छिष्यं विरजानन्दं सन्यास-गुरुरूपिणम् । अच्युतानन्दमाराध्य दीक्षागुरुं सरस्वतीम् ॥
ततो विद्यागुरून् सर्वान् समभ्यर्च्य यथाक्रमम् । प्रमथनाथमाचार्यं लक्ष्मणशास्त्रिणं तथा ॥
योगेन्द्रनाथतीर्थञ्च पार्वतीचरणं तथा । सर्वशास्त्रप्रवक्तारं यत्कृपावशतो मया ॥
व्यासोक्तब्रह्मसूत्राणां यद्भाष्यं व्याससम्मतम् । तदेवात्र विनिर्णेतुं प्रयत्नः क्रियतेऽधुना ॥
सन्यासिचिद्घनानन्द पुरीनाम्नात्मशुद्धये । शास्त्रिलक्ष्मणपादोक्तमार्गेणैव यथामति ॥
ततोऽन्यभाष्यकारांश्च सम्प्रदाय-प्रवर्त्तकान् । भास्करं लक्ष्मणं चैव रामानुजापराभिधम् ॥
मध्वाचार्यं च निम्बार्कं श्रीकण्ठं श्रीपतिं तथा । विज्ञानभिक्षुकञ्चैव वल्लभं पुष्टिमार्गिणम् ॥
बलदेवं च गौडीयं पूजयामि यथाक्रमम् । आशीर्वादो मया तेषां प्रार्थ्यते करुणापि च ॥
येन तत्कृतभाष्याणां गुणदोषविनिर्णये । मतिमान्द्यं न जायेत पक्षपातादिकं तथा ॥
सत्यविनिर्णयादत्र न मे स्यात्स्खलिता मतिः । इत्यपि प्रार्थना तेषां सविधे क्रियते मया ॥
एतावत्कालपर्यन्तं सूत्राणामर्थनिर्णयः । सूत्रकृद्वचनशैलीमाविष्कृत्य न कैः कृतः ॥
प्रयत्नोऽयमपूर्वोऽतः स्खलनं तेन शंक्यते । तथापि करुणा तेषां सहायो जायतां मम ॥
भाष्योत्कर्षविचारेऽस्मिन् सुदुस्तरमहार्णवे । करुणैव कर्णधारोऽत्र भूयात्तेषामनुग्रहः ।

## ग्रन्थारम्भः

सर्वकारणकारणम् एकमेवाद्वितीयं सत्यज्ञानानन्दस्वरूपम् अनन्तम् असङ्गं नित्यं ब्रह्म, तज्ज्ञानजन्यमोक्षश्च—इत्यादिकं सर्वम् अलौकिकविषयान्तर्गतम्। एतादृशे अलौकिके विषये अनाद्यपौरुषेयश्रुतिरेव प्रमाणम्—इत्येव वेदान्तिनां शिष्टाणां मतम्। तच्छ्रुतिसिद्धान्त-ज्ञापनाय भगवन्नारायणावतार-कृष्णद्वैपायनापरनामा महर्षिर्बादरायणः ब्रह्मसूत्राणि विरचयामास, द्वापरान्ते कलेरादौ वा प्रायेण अद्यप्रभृति पञ्चसहस्रवर्षेभ्यः पूर्वम्।

## शाङ्करभाष्यावलम्बनेन ब्रह्मसूत्रपरिचयप्रस्तावः

तेषां ब्रह्मसूत्राणां शाङ्करभाष्यमेव इदानीम् उपलभ्यमानानां भाष्याणां मध्ये प्राचीन-तमम्। इतः प्राचीनतरं भाष्यम् इदानीं नोपलभ्यते। तत्र प्राचीनविषये प्राचीना एव यथा प्रमाणं, न तथा अर्वाचीना—इत्येव प्रायेण सर्वैर्मन्यते। अतो ब्रह्मसूत्राणां भगवद्-बादरायण-व्यास-सिद्धान्त-सम्मत-भाष्य-निर्णयार्थम् इदानीम् अधिगम्यमानानां भाष्याणां मध्ये यत् प्राचीनतमं शाङ्करभाष्यम्, यत् प्रायेण अद्यप्रभृति सार्द्धद्वादश-शतवत्सरेभ्यः प्राक् प्रणीतम् इति प्रसिद्धम्, तदेव भाष्यम् अवलम्ब्य ब्रह्मसूत्राख्यग्रन्थस्य आदौ किञ्चित् परिचयप्रदानं समुचितमेव।

## ब्रह्मसूत्रपरिचयः

तथा हि—शाङ्करभाष्यानुसारेण एतद्ब्रह्मसूत्रग्रन्थस्य ५५५-सूत्राणि वर्त्तन्ते। एतैः सूत्रैः तन्मतेन १९१-संख्यकानि अधिकरणानि भाष्यटीकाकृद्भिः ग्रन्थेऽस्मिन् सन्निवेशितानि।* अधिकरणञ्च विचारविशेषः, एतद्द्वारा तत्त्वनिर्णयो मीमांसादर्शनस्यैव वैशिष्ट्यम्।

## तत्र अधिकरणस्वरूप-परिचयः

तत्र अधिकरणं षड्ङ्गम्, यथोक्तं भाट्टदीपिकायां तट्टीकाभाट्टचिन्तामणौ च—"अधि-करणं तु वेदवत् षड्ङ्गं यदाहुः—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
प्रयोजनं सङ्गतिश्च प्राञ्चोऽधिकरणं विदुः॥

पञ्चाङ्गमिति प्रामादिकः पाठ इति" (माद्राज-संस्करण-५म-पृष्ठे द्रष्टव्यम्)।

## तत्र प्रथमाधिकरणपरिचयः

तद् यथा—अस्य ग्रन्थस्य प्रथमं यदधिकरणं तत् जिज्ञासाधिकरणं नाम। तत्र सङ्गतिस्तावत्, प्रथमा—श्रुतिमीमांसारूपा श्रुतिसङ्गतिः। द्वितीया—श्रौतब्रह्मणो विचाररूपा शास्त्रसङ्गतिः। तृतीया—तादृशब्रह्मणः श्रुतिवाक्येषु समन्वयरूपा अध्यायसङ्गतिः। चतुर्थी—

* मतान्तरेण ५५६-सूत्राणि १९२-अधिकरणानि कुत्रचिद् दृश्यन्ते।

स्पष्टब्रह्मलिङ्गकश्रुतिवाक्यानां समन्वयरूपा पादसङ्गतिः। अस्य प्रथमाधिकरणत्वाद् अधिकरण-सङ्गतिर्नाम षष्ठी सङ्गतिर्नास्ति।

अस्य विषयस्तावत्—वेदान्तवाक्यविचारः। अथवा तन्मूलम् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" (बृ: २।४।५) इत्यादि श्रुतिवाक्यजातम्।

संशयस्तु—ब्रह्म विचार्यं न वा इति।

पूर्वपक्षस्तु—ब्रह्म न विचार्यम्, तत्र हेतवोऽपि।

सिद्धान्तपक्षः पुनः—ब्रह्म विचार्यमेव, तत्र हेतवोऽपि।

प्रयोजनं अस्य पूर्वपक्षे—एतत् शास्त्रं न आरम्भणीयम्। सिद्धान्तपक्षे तु—शास्त्रमेतत् आरम्भणीयमेव। एतादृशो यः षड्ङ्गसंवलितो विचारः स एव अधिकरणम् इत्युच्यते। एतादृशानि अधिकरणानि अस्मिन् ग्रन्थे शाङ्करभाष्यानुसारेण १९१-संख्यकानि भवन्ति।

एतच्च अधिकरणं क्वचित् एकेन सूत्रेण, क्वचिच्च एकाधिकेन रचितं दृश्यते। तस्य च अधिकरणस्य पूर्वपक्षोऽपि क्वचिद् एकेन सूत्रेण, क्वचिच्च एकाधिकेन रचितः। सिद्धान्तपक्षोऽपि तथैव। कुत्रचित् अधिकरणे सिद्धान्तसूत्रमात्रं विद्यते, पूर्वपक्षस्तत्र ऊहनीयः। क्वचिद् एकस्मिन् सूत्रे एव पक्षद्वयमपि दृश्यते, तत्र एकाधिकसूत्रेण अधिकरणं रचितम्। एकाधिकसूत्रात्मका-धिकरणस्थले पूर्वपक्षस्तु अधिकरणारम्भे अधिकरणमध्ये वा सकृद् द्विर्वा दृश्यते। परन्तु कुत्रापि अधिकरणं न केवलं पूर्वपक्षमात्रावसानमिति। संक्षेपत इयमेव अधिकरणरचनाप्रणाली, विस्तरस्तु अग्रे वक्ष्यते। एवम् अस्य ब्रह्मसूत्रग्रन्थस्य भाष्यकृतां मध्ये सूत्रव्याख्याने बहुषु मत-भेदेषु सत्सु अपि अधिकरणविषयिणी अस्येयं रचनाशैली सर्वसम्मतैव, तत्र न कोऽपि भाष्यकारः परस्परं विवदते।

### ग्रन्थप्रकृतिविषये मतभेदः

शांकरभाष्यमतेन ग्रन्थस्य अस्य ५५५-सूत्रैः १९१-अधिकरणैः चत्वारोऽध्यायाः। परन्तु प्रत्यध्यायं चत्वारः पादा वर्त्तन्ते, तेन ग्रन्थोऽयं षोडशपादात्मको भवति इति सर्वसम्मतम्। अस्य अध्याय-पादसंख्यायाम् अध्याय-पादविभागे वा सर्वेषामेव भाष्यकृतां मध्ये कोऽपि मतभेदो न दृश्यते, तथापि सूत्रसंख्यायां सूत्रपाठे सूत्रार्थे अधिकरणविभागे पूर्वोत्तर-पक्षीय-सूत्रनिर्देशे च तेषां मध्ये महान् मतभेदो दृश्यते। ते च भाष्यकाराः प्राधान्येन शंकर-भास्कर-रामानुज-निम्बार्क-मध्व-श्रीकण्ठ-श्रीकर-वल्लभ-विज्ञानभिक्षु-बलदेवाचार्य्याः इति।

### शाङ्करभाष्यस्य व्याससम्मतत्वशङ्का

श्रीमच्छङ्कराचार्यपरभाविनाम् एतेषां भाष्यकृताम् ईदृशमतभेददर्शनेन आशङ्केयं मनसि जायते—किं शाङ्करसूत्रव्याख्यानं सूत्रकृद्भगवद्-व्याससम्मतं न वा? यतः श्रीमच्छङ्करमत-विरोधिभाष्येषु तत्तद्भाष्यकर्त्तारः सर्व एव स्वस्वभाष्यं भगवद्व्याससम्मतं भाष्यमिति वर्णयन्तीति।

अतः शाङ्करसूत्रभाष्यानां सर्वेभ्य उपलभ्यमानभाष्येभ्यः प्राचीनतममपि व्याससम्मतं न वा—इत्येव सन्दिह्यते।

### व्याससम्मतभाष्यनिर्णयस्य प्रयोजनम्

अतः सर्वेषां भाष्याणां मध्ये कतमत् कियद् वा व्याससम्मतमिति निर्णेतुं प्रयासोऽत्र क्रियते। यतो यद् भाष्यं सूत्रकृदभिमतं, तदेव प्रमाणं भवितुम् उचितं सूत्रार्थनिर्णये। वेदान्त-वाक्यार्थनिरूपणस्य व्याससूत्रार्थनिरूपणाधीननिरूपणत्वात्, व्यासस्यैव वेदार्थज्ञानसम्पन्नानां मध्ये श्रेष्ठतमत्वाच्च। ततश्च ब्रह्मज्ञानाय वेदान्तमतमेव अनुसरणीयं मोक्षकामैः। यथोक्तं मुण्डकोपनिषदि—

"वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥" (३।२।६)

अर्थाद् वेदान्तार्थविज्ञानं मोक्षहेतुः इत्यवगम्यते, तच्च ब्रह्मसूत्रार्थज्ञानाधीनम्।

### व्याससम्मतभाष्यनिर्णये बाधा

किन्तु सर्वैः भाष्यकृद्भिः सूत्रव्याख्यानकाले स्वस्वमतानुकूलम् एतादृशं दुश्छेद्यं युक्तिजालं विस्तारितं, यद् दृष्ट्वा "व्यासाभिमतनिर्णयः" असम्भव इति प्रतिभाति सर्वेषाम्। अत एतत् कल्प्यते,—अयं मतभेदश्चेत् निराकरणीयः, तदा व्यासशिष्यपरम्पराक्रमेण या व्याख्या अविच्छेदेन आयाता, तच्छरणं विना उपायान्तरं नास्तीति; यतो भगवद्व्यासेन अस्मिन् सूत्र-ग्रन्थमध्ये एतदर्थं किमपि इङ्गितं कृतम्—इति न दृश्यते, एतदर्थं किञ्चिदपि सूत्रादिकं रचितम्—एतदपि नैव उपलभ्यते। ततश्च "अयं व्याससम्प्रदायः" इति सर्ववादिसम्मतो न कोऽपि सम्प्रदायो दृश्यते लोके। अतो ब्रह्मसूत्राणां व्यासाभिमत-व्याख्यानिर्णयः कथमपि न सम्भवति इति यद्यपि प्रतिभाति—

### व्याससम्मतभाष्यनिर्णयसम्भावना

तथापि विशेषेण सावधानतया सत्यानुसन्धित्सया च सूत्राणाम् आलोचने कृते एवमेव प्रतीयते, यत् सूत्रकारैः एतदर्थं न किमपि इङ्गितं कृतम्—इति कल्पनं न समीचीनम्। यतः सूत्रकृतो भगवतः स्वकृतसूत्राणां व्याख्या नानाजनैः नानाविधा करिष्यते इत्येतत् न कदापि तस्य अभीष्टं भवितुमर्हति। मद्वचनं न कोऽपि बोद्धुं शक्नुयात्—एतादृशी इच्छा नैकस्यापि ग्रन्थकारस्य भवेत्। न कोऽपि इच्छेत्—मद्वचनम् आश्रित्य सर्वे विवदन्तामिति। अतो व्याससूत्राणां नानाव्याख्यानं निवारयितुं ग्रन्थकृद्भिः भगवद्व्यासदेवैः सूत्रमध्ये स्पष्टम् इङ्गिते अकृतेऽपि, तत् न तत्र सर्वथा विद्यते—इति कल्पनं न सङ्गतम्। एवमपि स्यात्—सूत्राणामर्थः शिष्यवर्गैः गुरुमुखाद् अधिगम्यताम् इत्युद्दिश्य सूत्रकृता भगवता तादृशम् इङ्गितं स्पष्टतया न कृतम्। यतो गुरुमुखाद् अनागता विद्या न सफला भवति—इत्येव प्रसिद्धं लोके।

यथाहुः—"सम्प्रदायविहीना ये मन्त्रास्ते विफला मता" इति। विषयेऽस्मिन् नास्त्येव विसंवादो नास्ति। अतो मन्यते—एतस्मादेव कारणात् सूत्रकृता भगवता ग्रन्थस्य ग्रन्थकर्त्तुः अध्याय-पादाधिकरणानाञ्च नामादिकं न ग्रन्थमध्ये सन्निवेशितम्, तथैव पूर्वोत्तरपक्षनिर्णायक-परिभाषासूत्रादिकमपि न कृतम्, एतत् सर्वं गुरुवक्त्रेभ्यः शिष्यसम्प्रदायैः अधिगम्यताम्—इत्येव तस्य आशय आसीत्। किन्तु तथापि सर्वासां चिन्तानां कश्चित् साधारणनियमो वर्त्तते एव, तेन सूत्ररचनाया अपि केनचित् साधारणेन नियमेन भवितव्यम्। ततः तन्नियमानुवर्त्तिभिः अपरैरपि प्रयत्ने कृते प्रागुक्तविषयादिनिर्देशः कर्त्तुं शक्यते। ये खलु "शाङ्करसम्प्रदाय एव व्याससम्प्रदायः" इति मन्यन्ते, तेषां शाङ्करभाष्यमेव व्यासमतानुसारि भाष्यम् इत्यवधारणे न कापि बाधा भवेत्। ये तु अत्र विप्रतिपन्नाः, नूनं तेषां कृते स्वातन्त्र्येण न अनावश्यकी एतन्निर्णयचेष्टा।

### व्याससम्मतभाष्यनिर्णयस्य दुरवगाहत्वम्

नूनमेतत् कार्यम् अतीव दुरवगाहम्। इयद् दुरवगाहं यत् स्वयं भगवन्तं सूत्रकारं विना येन केनापि एतत् कार्यं करिष्यते, तेनैव भ्रमितव्यम्। यत एकस्य चिन्तितं नान्यैः सम्यग् ज्ञातुं शक्यते, सर्वान्तर्यामिणं विना। न ज्ञायते एतस्मादेव कारणात् किं महामहा-पण्डित-सिद्धमहापुरुष-सङ्काशैः आचार्यवृन्दैः एतद् ब्रह्मसूत्रग्रन्थभाष्यरचनायां कृतायामपि व्यासाभि-मतसूत्रार्थनिर्णयाय पृथग् वा विशिष्य कश्चित् प्रयासो न कृतः। "अयमेव व्यासाभिमत-सूत्रार्थ इतोऽन्यो न कश्चित् अर्थः सम्भवेत्" इत्येवं किमपि प्रयत्नादिकं न तैः कृतम्।

### शङ्करवृत्तिकारयोः सम्बन्धः

विभिन्नभाष्यसन्दर्भसन्दर्शनेन सर्वेषां मनसि ईदृशी चिन्ता स्वाभाविकी। यतः शाङ्करभाष्ये दृश्यते—भगवद्-भाष्यकृता शङ्कराचार्येण ततोऽपि सुप्राचीनवृत्तिकारस्य व्याख्यानं बहुषु स्थलेषु खण्डितम्, तदर्थं युक्तिरपि प्रदर्शिता, यथा आनन्दमयाधिकरणे दृश्यते। परन्तु वृत्तिकारात् प्राचीनं व्याख्यानम् अवलम्ब्य नैतत् कृतम्। तथैव शङ्करभगवतः प्राक्तनानां बोधायनोपवर्षादीनां मतम् अनुवर्त्तमानैः शङ्कराचार्यपरभविकैः भास्कर-रामानुजादिभिः आचार्य्यैः सह यत्र अधिकरण-पूर्वोत्तर-पक्षविभागादिषु सूत्रार्थनिर्णये च शङ्करभगवतो मतभेदो दृश्यते, तत्र फलतः बोधायनादिभिः सह शङ्करभगवतोऽपि मतभेदः सञ्जातः—इति कल्पयितुं शक्यते; तथा सति तत्र बोधायनादीनां वाक्यम् अवलम्ब्य एतादृशानभीष्टमतनिरसनं शङ्करभगवता कर्त्तुमुचितम् आसीत्, परन्तु तेन नैतत् कृतम्। न वा भास्कर-रामानुज-परवर्त्तिभिः शाङ्करभाष्यटीकाकृद्भिः कैरपि एतत् समाचरितम्, येन शङ्करभगवतस्तत्र तथैव आशय आसीत्—इत्यपि अनुमातुं शक्येत। एवं वृत्तिकृन्मतखण्डनस्थले ततोऽपि प्राचीनभाष्यादिकं प्रमाणतया प्रदर्शनीयमेव आसीत्, तदपि न भाष्यकृता कृतम्—इति तु प्रागेव उक्तम्। तात्त्विक-मतभेद-निरसनाय केवलम् एकस्मिन् स्थले वृत्तिकृतोऽपि प्राचीनतर-स्वसम्प्रदाय-प्रवर्त्तक-शुकशिष्य-गौडपादाचार्य-

कथितमेकं कारिकावाक्यमुद्धृत्य प्रमाणत्वेन उपन्यस्तं शङ्करभगवता। परन्तु बहुषु स्थलेषु नैतत् कृतम्। अन्यत्र भगवदुपवर्षाचार्यस्य वाक्यमुद्धृत्यैव विरुद्धमतं निराकृतम्। एवं च पूर्वाचार्याणां मतं तेषां वाक्यावलम्बनेन न स्थापितं, न वा ततोऽपि पूर्वाचार्यवचनप्रमाणैः खण्डितं भगवत्पादैः। एतस्य को हेतुरिति—नैव बोद्धुं शक्यते।

## वृत्तिकारादीनां नामानुल्लेखकारणम्

अथ किं ब्रह्मसूत्रस्य प्राचीनवृत्तिभाष्याणां तदा विलोपः सञ्जातः, अतः शङ्करभगवतः तेषां सम्यक् उपलम्भो नाभवत्, तेन तेषां वचनादिप्रमाणं नोपस्थापितम्, अथवा सुलभत्वाद् अतिप्रसिद्धत्वाद् अनावश्यकत्वाद् वा, तेषां भाष्यादीनां मतानां च अनुकूलवचनादिकं न प्रदर्शितम्, अथवा भास्कर-रामानुजादीनां व्याख्यानं बोधायनोपवर्षादिप्रणीत-प्राचीनवृत्तिभाष्यानुगं न भवति, अतः शाङ्करभाष्यस्य तत्परवर्त्ति-भास्कर-रामानुजादिभाष्यैः सह विरोधेऽपि बोधायनोपवर्षादिप्रणीत-प्राचीनभाष्यादिभिः सह अविरोधात् शाङ्करभाष्ये बहुषु सूत्रव्याख्यानादिस्थलेषु भास्करादीनां मतबीजखण्डनार्थं स्वबुद्ध्युद्भावितं तर्कादिकं सन्निवेशितम्, भास्कर-रामानुजादि-मतोपजीव्यत्वेन प्रथितबोधायनोपवर्षादीनां वाक्यानि प्रमाणत्वेन न प्रदर्शितानि भाष्यकृद्भगवता, असम्बद्धत्वाद् असम्भावितत्वाच्च—इति निर्णेतुं न शक्यते। शाङ्करभाष्ये पूर्वपक्षत्वेन उपन्यस्तानां मतवादानां प्रायेण भास्कर-रामानुजादिभिः सिद्धान्तरूपेण परिग्रहः कृतः। ते खलु मतवादा न सर्वत्र बोधायनोपवर्षादीनां सम्मता—इति शाङ्करभाष्यटीकादिभ्य उपलभ्यते। यतः शाङ्करभाष्ये वृत्तिकार-मतखण्डनस्थले भाष्यटीकाकृद्भिः तन्नाम्नः सर्वत्र समुल्लेखः कृतः, अन्यत्र न—इति दृश्यते। अतः शाङ्करभाष्ये पूर्वपक्षत्वेन उपन्यस्तानां मतवादानां कियन्तो मतवादा अपरैः पूर्वाचार्यैः उद्भाविताः, कियन्तो वा बोधायनोपवर्षादिभिः प्रकल्पिताः, कति वा भाष्यकृद्भिः स्वयं समुद्भाविता—इति निर्णेतुं न शक्यते। अतो बोधायनोपवर्षादिभिः सह भास्कर-रामानुजादीनां सम्बन्धो यथा दुर्निर्णेयः तथा वृत्तिकारादीनांमपि इत्येव गम्यते।

## भास्करादीनां भाष्यप्रमाण्यविवेचनम्

अथ पुनः यथैव शङ्करभगवता वृत्तिकार-मतखण्डनाय प्राचीनतर-वृत्तिभाष्यकृतां वाक्यादिकं न प्रदर्शितम्, तथैव शङ्कर-परमविक-भाष्यवृत्तिकृतोऽपि भास्कर-रामानुजादयः अधिकरण-विभागादिविषये सूत्रार्थनिर्णये च शाङ्करभाष्येण सह यत्र भिन्नमतावलम्बिनोऽभवन्, तत्र शाङ्करव्याख्यानादिखण्डनाय शङ्करपूर्ववर्त्ति-भाष्यादिकं न तैः प्रमाणत्वेन प्रदर्शितम्। भास्कराचार्यः रामानुजाचार्यश्च शङ्कराविर्भावानन्तरं शाङ्करभाष्यप्रतिवादम् अतिप्रबलतया कृतवन्तौ, तथापि उक्ताधिकरण-विभागादिषु तौ आचार्यवर्यौ शङ्करं नानुसरन्तौ अपि शङ्कर-पूर्ववर्त्ति-भाष्यादि-प्रमाणेन शाङ्करव्याख्यानं न खण्डितवन्तौ, स्वावलम्बिताधिकरणविभागादीन् एव सर्ववादिसम्मतान् इव कृत्वा तौ स्वमतेन विवृतवन्तौ एव। एतस्यापि को हेतुरिति नैव बोद्धुं शक्यते।

### रामानुजादीनां वृत्तिकारानुसरणे संशयः

रामानुजाचार्येण वृत्तिकारवाक्यं सकृद् द्विर्वा उद्धृतम्, तदपि साक्षाद् वृत्तिकारवाक्यं न वेति सन्दिह्यते। यामुनाचार्यादिभिः यद् वृत्तिकार-वाक्यत्वेन वर्णितम्, तदेव नूनं रामानुजाचार्येण उद्धृतम्। भास्कराचार्येण तु एकमेव उपवर्षवाक्यम् उद्धृतम्। तत्रापि सन्देहावसरो वर्त्तते। अतः ताभ्यां वृत्तिग्रन्थो न दृष्ट—इत्येव प्रतीयते। रामानुजाचार्येण स्पष्टतया उक्तम्—"विस्तीर्णां बोधायनवृत्तिं पूर्वाचार्याः सञ्चिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते" इति। यदि तेन बोधायनवृत्तिः दृष्टा स्यात्, तदा तेन "तन्मतानुसारेण" इति न लिखितं भवेत्, अपितु तेन "तदनुसारेण" इत्येव लिखितं स्यात्। अतो भगवता रामानुजाचार्येण बोधायनवृत्तिः न उपलब्धा इत्येव स्पष्टतया प्रतीयते।

### भास्करादीनां वृत्त्यनुसारित्वे संशयः

भगवता शङ्कराचार्य्येण तु वृत्तिग्रन्थो दृष्ट एवेति सम्भाव्यते। यतस्तेन मतभेदस्थले आदितोऽन्तपर्यन्तं सर्वत्र भाष्ये वृत्तिकारमतं निरस्तम्। यत्र तेन वृत्तिकारमतं न खण्डितं, तत्र वृत्तिकारेण सह शङ्करभगवत ऐकमत्यमेव आसीद्—इत्येव अनुमीयते। वृत्तिग्रन्थम् अनवलोक्य भाष्यमध्ये आदितः अन्तपर्य्यन्तं तन्मतखण्डनं न सम्भवति। तेन भास्कर-रामानुजादीनां यत् सूत्रव्याख्यानं तद् वृत्तिकाराविरुद्धं शाङ्करसूत्रव्याख्यानमेव, अथवा शङ्करभगवत्प्रत्युक्तं वृत्तिकारव्याख्यानमेव। अतः तैर्वर्णितं यद् वृत्तिकारमतं तत् शङ्करवर्णितवृत्तिकारमतमेव। तेषां वृत्तिकाराभिमत-सूत्रार्थोपलम्भमूलं शाङ्करभाष्यमेवेति प्रतिभाति। भास्कर-रामानुजादयो वृत्तिग्रन्थम् अनुपलभ्य यथा शाङ्करभाष्यत एव वृत्तिकारमतं तन्मतेन सूत्रार्थादिकं च विदितवन्त—इति वक्तुं शक्यते, न तथा शङ्करभगवान् वृत्तिग्रन्थम् अनुपलभ्य वृत्तिग्रन्थाद् अन्यतः कुतश्चित् भाष्यान्तरतो वृत्तिकारमतं तन्मतेन सूत्रार्थादिकं च अधिगतवान्—इति कल्पयितुं शक्यते। तेन भास्कर-रामानुजादीनां मतं सूत्रव्याख्यानं च सर्वथा वृत्त्यनुसारि—इत्यत्र न निश्चयः।

### व्यासवृत्तिकारयोः सम्बन्धः

तथैव वृत्तिकारमतमेव व्याससम्मतम् इत्यपि वक्तुं न कोऽपि समर्थो भवेत्, वृत्तिकारेण सह व्यासस्य एतदनुकूलसम्बन्धाभावात्। वृत्तिकारस्य ऋषित्वकल्पनमपि न तत्र आनुकूल्यं विदधाति, ऋषीणामपि मतभेददर्शनात्। अतः कतमत् सूत्रव्याख्यानं व्यासमतानुसारि इत्यस्य निर्णयः सुदूरपराहत एवेति प्रतिभाति।

### व्यासमतस्य दुर्निर्णेयत्वे हेतुः

किं बहुना, व्यासमतवर्णनम् एवमेव सुदुष्करं विवादास्पदीभूतञ्च, यत् सूत्रकर्ता साक्षादुपदेशं विना कृतः सूत्रार्थो न सर्वैः स्वीकरणीय—इति भास्करादिभाष्यकृद्भिः सर्वैः भाष-

धारितम्। अत्र मुख्यकारणम् एकं यद् वर्त्तते, तद् ग्रन्थकर्त्तुः ग्रन्थमध्ये विषयसन्निवेशो न केवलं युक्तिम् अनुसरति, किन्तु ग्रन्थकर्त्तुः इच्छामपीति। अतो भगवद्व्यासाद् अन्यैः व्यासमतनिर्णयः अतीव दुष्करो भवति। अतएव "एतदेव व्यासमतं नान्यत्" इति न केनापि अवधारयितुं शक्यम्। वस्तुतस्तु एकस्मात् सर्वज्ञाद् ईश्वराद् अन्यः कोऽपि सम्पूर्णतया सर्वज्ञो न भवितुम् अर्हति। तेन अन्यः अपरस्य हृद्गताशयम् आविष्कर्त्तुं न सर्वथा सम्पूर्णतया समर्थो भवेत्। अतः सिद्धमहापुरुषाणाम् अवतारकल्पानाम् आचार्याणाम् अपि व्यासमतनिर्णयः अतीव दुःसाध्यः— इत्यत्र सन्देहावसरो नास्ति, का कथा स्वमत-प्रख्यापनार्थिनाम् व्याससम्प्रदायबहिर्भूतानां भाष्यकर्त्तृणाम्—इति प्राचीनभाष्यकर्त्तारोऽपि विदितवन्तः।

## व्याससम्मतभाष्यनिर्णयसम्भावनाहेतुः

तथापि ब्रह्मसूत्रस्य सूत्रकाराभिमतार्थनिर्णये नैराश्यं न भजनीयम्। यतो ग्रन्थरचनायां विषयसन्निवेशक्रमादिकमेव ग्रन्थकारस्य सर्वथा इच्छाधीनं भवति। विषयादिकं तु प्रायेण युक्त्यधीनमेव। ततश्च ग्रन्थरचनायां ग्रन्थकर्त्तुः इच्छानुसारि-विषयसन्निवेशादिमध्ये युक्तिभागोऽपि संगतो भवति। अस्य व्याससूत्रस्य तादृशयुक्तिभागमात्रम् अवलम्ब्य अस्माभिरपि व्याससूत्रस्य व्यासाभिमतार्थः निर्णेतुं शक्यते। युक्तिः खलु सर्वेषां सम्पत्तिः, युक्त्यनुसरणं हि अस्माकं स्वभावः, सा तु न इच्छाधीना, इच्छया न युक्तेः सामर्थ्यम् अन्यथाकर्त्तुं शक्यते, अतो युक्तिसहायैः अस्माभिः व्याससूत्रस्य युक्तिमूलकाभिप्रेतांशाः तथा तस्य इच्छामूलकांशा अपि कथञ्चित् आविष्कर्त्तुं शक्येरन्। उपक्रमोपसंहारादि-षड्विधतात्पर्य-निर्णायकलिङ्गैः सर्वेषां ग्रन्थानां तात्पर्यनिर्णयः सम्भवति। व्यवहारोऽपि तथैव दृश्यते। एवं च एतादृशभागद्वयं निरूप्य एतेनैव उपायेन व्याससूत्रस्य व्यासाभिमतार्थनिर्णयप्रयासो न व्यर्थो भवेत् कथञ्चन। एवं रीत्या सूत्रार्थनिर्णये कृते व्यासेच्छामूलक-सूत्रार्थमध्येऽपि संशय-विपर्ययादीनां सम्भावना स्वल्पा एव अवशिष्येत। अतो विषयसन्निवेशादिरूप-व्यासाभिमताधिकरणविभागादि-समालोचनेन तथा तात्पर्यनिर्णायकलिंगबलेन सूत्रार्थनिर्णये अस्माकं नैराश्यं न शोभनम्, परस्परविरुद्धभाष्याणि एव अत्र सहायतां गमिष्यन्ति।

## निबन्धरचनायाः प्रवृत्तिहेतुः

नूनं मादृश-स्वल्पबुद्धीनाम् एतादृशं कर्म सुतराम् अशोभनं, किमधिकम् असङ्गतमेव। तथापि एतदर्थं योऽयं मे प्रयत्नः, तस्य अयमेव आशयः—यदि ममेमां व्यर्थचेष्टां दृष्ट्वा असन्तोषवशात् अनुकम्पावशाद् वा कोऽपि महात्मा विषयेऽस्मिन् प्रवर्त्तेत, स यदि ब्रह्मसूत्राणां व्याससम्मतार्थनिर्णयकार्ये प्रवृत्तो भवेत्, तदैव अहं सफलप्रयासो भवेयम्। यतस्तदा कदाचित् व्यासाभिमतसूत्रार्थनिर्णयः पूर्णतां प्राप्नुयात्।

### ग्रन्थनामादिनिर्णयप्रस्तावः

एतदर्थम् आदौ अस्माभिर्द्रष्टव्यम्—एतद्ग्रन्थस्य किं नाम भवितुम् उचितम्, कथम् एतस्य ब्रह्मसूत्रं नाम समभवत्, कश्च ग्रन्थकर्त्ता, को वा अस्य प्रतिपाद्यविषय इति। यतो भगवद्व्यासैः कुत्रापि सूत्रमध्ये एतस्य नामादिकं न सन्निबद्धम्। दृश्यते च ग्रन्थोऽयं बहुभिः नामभिः प्रचलितो लोके। तथा—भिक्षुसूत्रम्, ब्रह्मसूत्रम्, शारीरकमीमांसा, ब्रह्ममीमांसा, शारीरकसूत्रम्, व्याससूत्रम्, वेदान्तदर्शनम्, उत्तरमीमांसा चेति। ततश्च ग्रन्थकर्तृविषयेऽपि महान् मतभेदो वर्त्तते। कस्यचिन्मतेन ग्रन्थोऽयं बादरायणव्यासेन प्रणीतः, अन्यैरुच्यते—अयं कृष्णद्वैपायन-व्यासप्रणीत इति। बहुभिर्मन्यते—तौ द्वौ अभिन्नौ पुरुषौ, अन्यैश्च तयोर्भेद एव अनुमन्यते। पाश्चात्यभावापन्नैः आधुनिकैश्च बहुभिः मन्यते—गौतमबुद्ध-परभविकेन केनचिद् व्यास-नामधारिणा ग्रन्थोऽयं विरचित इति। अस्य प्रतिपाद्यविषयेऽपि तथैव मतभेदो दृश्यते। केषाञ्चिन्मतेन अस्य प्रतिपाद्यं ब्रह्मज्ञानम्, अन्येषां—ब्रह्मोपासनम्, अपरेषाञ्च उभयमेव। एवञ्च एतद्ग्रन्थविषये बहवो मतभेदा वर्त्तन्ते। अत एतद्विषयादिकम् आदावेव अस्माभिर्निरूपणीयम्।

### ग्रन्थरचनाकौशलनिर्णयप्रस्तावः

ततश्च द्रष्टव्यम्—ग्रन्थस्यास्य कीदृशं रचनाकौशलमिति। अत्र ये अध्याय-पादाधिकरण-सूत्रविभागा दृश्यन्ते, तत्र कीदृशं कौशलम् अवलम्बितं सूत्रकृद्भगवता? पूर्वोत्तर-पक्षीय-सूत्ररचनायां च कौशलं कीदृशम् अनुसृतम्? एतेषाम् अध्याय-पादाधिकरणानां प्रतिपाद्य-विषय-निर्णयोपायश्च कीदृशः? एतस्य ग्रन्थस्य रचनाकौशल-निर्णयावसरे सर्व एते विषया निर्णेयाः। यत एवंप्रकारेण अस्य रचनाकौशले आविष्कृते सति अस्य सूत्रार्थ-निर्णयश्चापि सुगमो भविष्यति। तथा सति अस्य सूत्रार्थनिर्देशे सूत्रार्थनिर्णेतॄणां स्वेच्छाचारिता स्वातन्त्र्यं वा न सम्भविष्यति, भाष्य-वृत्तिकृतामपि कतमः कियत्परिमाणं व्यासमतानुसारी इत्यपि बोद्धुं सर्वैः शक्यम्। सर्वे व्याख्यातारः प्रायेण मतविशेषं मनसि निधाय तदेव मतविशेषं प्रतिपिपादयिषवः सन्तः सूत्रार्थं वर्णयाञ्चक्रुः, न तु सूत्राक्षरानुसारेण सूत्रार्थं प्रादुष्कृतवन्तः। परन्तु नैष सूत्रार्थनिर्णये सम्यक् पन्थाः। सूत्राक्षरानुसारेण सूत्रार्थनिर्णये कृते सति सूत्रार्थनिर्णयः सुष्ठु भवेत्, सूत्रकाराभिप्रायश्च सफलो भविष्यति, श्रुत्यर्थोऽपि विनिर्णीतो भवेत्।

### अलौकिकविषये वेदप्रामाण्यम्

एतदर्थम् अस्माभिरादौ मुख्य एको मीमांसादर्शनसिद्धान्तः स्मर्त्तव्यः। स च अस्मिन् ब्रह्ममीमांसाग्रन्थेऽपि उपयुज्यते। यतः कर्ममीमांसा ब्रह्ममीमांसा च इति ग्रन्थद्वयं श्रुत्यर्थनिर्णयार्थं जैमिनि-व्यासमुनिभ्यां रचितम्। तेन बहवः सिद्धान्ताः, ये कर्ममीमांसायाम् उपयुक्ताः तेऽपि ब्रह्ममीमांसायामपि अवलम्बनीयाः। तयोः अयमेकः सिद्धान्तः—यत्, एकस्मात् [illegible]

वेदाद् वा अन्यो न कोऽपि सम्पूर्णतया सर्वज्ञो भवितुम् अर्हति । देवता वा ऋषिर्वा मनुष्यो वा वेदज्ञानं विना न कोऽपि सम्पूर्णतया सर्वज्ञपदवीम् आरोढुं शक्नोति । अपौरुषेयः तथा अनाद्यन्तः अयमेव वेदो यागादिरूप-कर्मसु तथा निर्विशेषाद्वैतब्रह्मणि एवम् अलौकिकविषयेषु एकमेव प्रमाणम् । अलौकिकविषयेषु वेदादन्यो न कोऽपि प्रमाणत्वेन गण्यते । वेदभिन्नानि यानि प्रमाणानि प्रत्यक्षादीनि तानि चेत् वेदानुकूलानि, तदैव प्रमाणानि भवन्ति, न तु तानि स्वातन्त्र्यतया अनयोः कर्म-ब्रह्मविषययोः प्रमाणानि भवन्ति । कर्ममीमांसाया अयमेकः सिद्धान्तो ब्रह्ममीमांसायामपि गृहीतः अस्ति । अतः अलौकिकविषये वेदा एव प्रमाणम् ।

**धर्मब्रह्मणोः वेदैकप्रमाणगम्यत्वम्**

वस्तुतस्तु युक्तिरपि इमं सिद्धान्तम् अनुगृह्णाति समर्थयति च । यतो यागादिकम् अद्वैतब्रह्म च न लौकिकविषयौ भवतः । लोकैः स्वातन्त्र्येण एतयोः अस्तित्वमपि कल्पयितुं न शक्यते, वेदभिन्नेन केनापि उपायेन एतयोः स्वरूपम् अवगन्तुं न पार्यते । यत "एतन्मन्त्रेण अनुष्ठितस्य यागस्यास्य एतत् फलम्" स्वातन्त्र्येण एतत् कल्पयितुम् अनुसन्धातुञ्च न कस्यापि प्रवृत्तिर्भवितुम् अर्हति । तथैव सर्वविध-विशेष-विरहितम् अप्रमेयम् अद्वैतब्रह्मवस्तु न कस्यापि कल्पनाविषयो भवति । कल्पना हि दृष्टानुरूपा, दृष्टविपरीतं कल्पनं न कस्यापि मनसि उदेति । निर्विशेष-ब्रह्मवस्तु हि सर्वथा दृष्टविपरीतम् । अतः सर्वविशेष-विरहितं ब्रह्मवस्तु सर्वेषां दृश्यानाम् अदृश्यानाञ्च मूलं कारणं भवेदिति न कोऽपि कल्पयितुम् इच्छेत् शक्नुयाद् वा । तेन कर्म च ब्रह्म च उभयमपि सर्वथैव अलौकिकं वस्तु । अनाद्यपौरुषेयवेदादेव अस्मिन् अलौकिक-विषयसद्भावे अवगते सत्येव अस्य सम्भावनाऽसम्भावने युक्तिविचाराभ्याम् अनुसन्धातुं वयं प्रवृत्ता भवेम, अन्यथा एषा अनुसन्धानप्रवृत्तिरपि अस्माकं मनसि न उदीयात् । अतो युक्तिरपि समर्थयते—यत् अलौकिकविषये वेदा एव प्रमाणम्, अन्यानि प्रमाणानि तेषां सहायभूतान्येव इति ।

**अलौकिकविषये वेदान्तकर्ममीमांसयोर्भेदः**

वेदान्ते तु सिद्धान्तोऽयं प्रकारान्तरेण परिगृहीतो दृश्यते । तन्मतेन एक ईश्वर एव सर्वज्ञः, वेदा हि अस्य ईश्वरस्य ज्ञानज्ञापकाः शब्दराशय एव । अयमेव अत्र मीमांसा-द्वयमध्ये एको विशेषः । अपरश्च कर्ममीमांसामतेन कर्मविषये वेदा एव प्रमाणम्, अनुमानादिकम् अप्रमाणम् । ब्रह्ममीमांसामतेन तु ब्रह्मविषये वेदा एव प्रमाणम्, अनुमानादिकं तत्र सहकारीति विशेषः, ब्रह्मणो भूतवस्तुविषयत्वात् । कर्मणः भूतवस्तुविषयत्वं नास्ति । ततोऽयम् अनयो-र्द्वयोरेकः प्रभेदः । यथोक्तं शांकरभाष्ये—"न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्म-जिज्ञासायां, किन्तु श्रुत्यादयः अनुभवादयश्च यथासम्भवम् इह प्रमाणम्, अनुभवावसानत्वाद् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ।" ( २य सूत्रभाष्यम् ) ।

### श्रुत्यर्थमीमांसार्थं ब्रह्मसूत्रम्

अत एव कारणात् अलौकिकब्रह्मविषये अभ्रान्त-सत्य-तत्त्वोपदेशाय सम्पूर्ण-सर्वज्ञ-नित्येश्वर वाणीं वेदमेव अवलम्ब्य भगवन्नारायणावतार-सर्वज्ञभगवता बादरायणव्यासदेवेन अयं ब्रह्मसूत्रग्रन्थो विरचितः, न पुनः स्वोद्भावित-सिद्धान्तस्थापनार्थं सिद्धमहापुरुष-मतविशेषस्थापनार्थं वा स्वपराभिज्ञतासहायेन ग्रन्थोऽयं विरचितः । लौकिके विषये अभिज्ञजनस्य वाक्यम् आप्तवाक्यं वा अभ्रान्तसत्यत्वेन आद्रियते, अलौकिकविषये तु ईश्वरादन्यस्य कस्यापि मतम् अभ्रान्तत्वेन न समाश्रीयते विद्वद्भिः । यत ईश्वरवाक्यादन्यत्र तादृशी सम्भावनापि न विद्यते ।

### ऋषीणां वेदनिरपेक्षस्वातन्त्र्यम् अप्रामाण्यसूचकम्

ये खलु ऋषयः सिद्धयोगिनो वापि, तपसा सर्वज्ञाः सञ्जाताः, अथवा आजन्मसर्वज्ञा आसन्—इति पुराणादिषु प्रथितं दृश्यते, तेऽपि वेदज्ञानसहाया एव सन्तः तथा अभवन् । भगवद्-व्यासात् पूर्वम् अपरे ये ऋषयो, यथा कपिल-कणाद-गोतम-प्रभृतयो महर्षयः, यद् यत् तत्त्वोप-देशादिकं कृतवन्तः, तेषां तत्तदुपदेशादिकं न केवलं तेषां वेदोक्ततपःप्रभावफलं, किन्तु स्वातन्त्र्येण तेषां योगसिद्धिमूलकम्, अतस्तेषां तेषु उपदेशेषु तेषां मतविशेषाः लब्धावसराः । तेन तेषां मतेषु वेदातिरिक्तं स्वानुभूत-विषय-विशेषरूपं किञ्चित् वर्त्तते एव । अतः अलौकिकविषये ते सर्वे ऋषयः सिद्धयोगिनो वा न एकमतावलम्बिनः सर्वथा भवन्ति । न वा तेषाम् ऐकमत्यं सम्भवति, बुद्धिभेदात् । एवञ्च तेषां मतभेदः, तत्तन्मतानाम् अप्रामाण्यं सूचयत्येव । यथा—

"निर्दोषत्वैकवाक्यत्वं क्व वा लोकस्य दृश्यते ।
सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति ॥" इति । (श्लोकवार्त्तिकः १।६)

### वेदानुसरणमेव ऐकमत्यहेतुः

अतो वेदमताद् अन्यत्र अलौकिकविषये ऐकमत्यं सत्यप्रकटनं वा न सम्भवति कथञ्चन । ईश्वरवाक्यभूत-नित्यवेदानामेव अलौकिकविषये तादृशम् ऐकमत्यं सम्भवत्येव । ईश्वरे भ्रमप्रमादादि-दोषविरहात्, तस्य अद्वितीयत्वाच्च । "सत्ये नास्ति मतान्तरम्" इत्यपि आभाणकम् अलौकिकविषये विभिन्नमतानाम् अप्रामाण्यं सूचयति । तथा च भिन्नानि मतानि न सत्ये सम्यक्तया प्रमाणानि भवन्ति—इत्येव प्रमाणयति । अतो वेदानुसरणमेव अलौकिकविषये ऐकमत्यहेतुः ।

### ब्रह्मसूत्ररचनायाः प्रथमं कौशलम्

एतस्मादेव कारणात् भगवान् बादरायणः स्वमतेन तत्त्वोपदेशम् अकृत्वा वेदमतेनैव तत्त्वोपदेशं कृतवान् । तत्रापि वेदशिरोवेदान्तमीमांसाच्छलेनैव तेन एतत् कृतम् । यत उपनिषदपरनामवेदान्तेष्वेव तत्त्वनिर्णयो दृश्यते, वेदस्य उत्तरभागरूपत्वात् अयं वेदान्तः । पूर्वभागे यागहोमादिमूलक-कर्मकाण्डस्तावत् वर्त्तते । तेन वेदस्य अन्तिमभागरूपो वेदान्तः

एव तत्त्वोपदेशार्थम् अवलम्बितो भगवता बादरायणेन। एवञ्च अभ्रान्त-तत्त्वोपदेशोऽपि सम्भावितो जातः। व्यक्तिविशेषस्य मतावलम्बनेन नायं सम्भवः—इति प्रागेव उक्तम्। अतो ब्रह्मसूत्ररचनायां बादरायण-भगवताम् इदमेकम् उद्दिष्टम् आसीत्—यत् वेदान्तवाक्येषु आपात-दृष्टविरोधानां निरासमुखेन तत्त्वोपदेशः कृतः स्यात्। अतो वेदान्तार्थमीमांसापि ब्रह्मसूत्र-ग्रन्थस्य एकम् उद्देश्यम्, तेनैव तत्त्वोपदेशश्च अस्य एकं रचनाकौशलम्। तथा सति उपनिषदां मध्ये यत्र यत्र तात्पर्यसंशयः प्रायेण बहूनां भवति, तत्रत्य-संशयापनोदन-सहकारेण वेदान्त-सिद्धान्त-प्रकाशनमपि ब्रह्मसूत्र-ग्रन्थस्य प्रथमं रचनाकौशलं भवति।

### उपनिषत्सिद्धान्त एव व्यासमतम्

अथ इदमेव चेत् ब्रह्मसूत्ररचनाकौशलं, श्रुत्यर्थनिर्णय एव यदि अस्य उद्देश्यम्, तदा एतदपि वक्तुं शक्यम्—अस्य उपलभ्यमानानां बहूनां भाष्याणां मध्ये यद् भाष्यं मुख्यतया उपनिषत्-प्रमाणावलम्बनेन औपनिषदार्थ-स्पष्टीकरणाय रचितम्, तदेव भाष्यं व्यासाभिमतं ब्रह्मसूत्राणाम् इति। व्यासाभिमत-सूत्रार्थो न कदापि उपनिषत्-सिद्धान्तविरोधी उपनिषन्मत-निरपेक्षो वा भवितुम् अर्हति। सूत्राणां योऽर्थः उपनिषत्सिद्धान्तानुकूलः, स एव व्यासाभिमत-सूत्रार्थः। व्यासाभिमतं हि न कदापि उपनिषत्-सिद्धान्ताद् अन्यद् भवितुम् अर्हति।

### शाङ्करमतस्य औपनिषदत्वं व्यासानुसारित्वञ्च

मतञ्च एतद् एतादृशदृढतरं शङ्करभगवता अवधारितं समाश्रितञ्च, यद् व्याससूत्राणां व्याख्यानकाले, यथा आनन्दमयाधिकरण-व्याख्यायां, तदधिकरणान्तर्गतसूत्राणाम् आपातप्रतीतार्थानाम् अन्यथासाधनमपि कृतम्। यतः तत्र सूत्राणाम् आपातप्रतीतार्थानुसरणे श्रुतिसूत्रयोः मध्ये विरोधशङ्का अवश्यम्भाविनी, तत्परिहारार्थं शङ्करभगवता सूत्राणां तम् आपातप्रतीतार्थं परित्यज्य श्रुत्यर्थानुकूलोऽर्थः प्रकटीकृतः, एतेन श्रुत्यर्थमीमांसारूपा श्रुतिसङ्गतिरपि तत्र संरक्षिता। आनन्दस्वरूपस्य ब्रह्मण आनन्दमयत्ववर्णने तु आनन्दधर्मवत्त्वमेव सिध्यति, तत्र श्रुतितात्पर्य्यम्; "आनन्दो ब्रह्मेति व्यजानात्" "विज्ञानमानन्दं ब्रह्म" "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" "सच्चिदानन्दं ब्रह्म"—इत्यादि श्रुतयः ब्रह्मण आनन्द-मयत्वरूपाम् आनन्दधर्मिताम् अतिस्पष्टतया वारयन्ति। अतः सूत्रव्याख्यानकौशलेन शङ्करभगवता तत्र ब्रह्मण आनन्दस्वरूपत्वं प्रतिपादितम्, श्रुत्यर्थमीमांसारूप-व्यासाभिप्रायश्च प्रकटीकृतः। ततश्च

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" ( महाः आः १म अः २६७ )

इति सर्वसम्मतिम् अनुरुध्य—

"तथाऽऽनन्दमयश्चापि ब्रह्मणान्येन साक्षिणा। सर्वान्तरेण सम्पूर्णो ब्रह्म नान्येन केनचित्॥ ४।३।४५
यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानाद्वयात्मकम्। स रसः सर्वदा साक्षाज्जानन्ति सुरपुङ्गवाः॥" ४।३।४६

(सूतसंहिता मुम्बा ७९४ पृष्ठः)

इति सूतसंहितावचनानुकूल्यम् आकलयता भाष्यान्तरप्रणेतॄणाम् उपबृंहणविरोधश्च स्फोटितः। वाक्यं च इदं कठवल्ल्युपनिषत्स्वपि पठ्यते इति तासामपि आनुकूल्यं; सुवर्णे सौगन्ध्यमिव। एवं च शङ्करकृत-व्यासभूत्रव्याख्यान-दर्शनेन सूत्ररचनायां व्यासस्य श्रुत्यर्थानुसरणमेव मुख्यम् उद्देश्यं प्रकाण्डं कौशलं वा आसीत्, न तु स्वमतानुसारेण तत्त्ववर्णनं व्यासाभिप्रेतम्—इत्येव अवगम्यते। अतः शङ्करमतस्य यथा औपनिषदत्वं तथैव व्यासमतानुसारित्वमपि—इत्येव कल्प्यते। एतेन व्याससूत्रस्य श्रुत्यर्थाविष्करणमेव लक्ष्यम् आसीत्—इत्यपि निश्चीयते। अतः श्रुत्यर्थानुसरणमेव ब्रह्मसूत्ररचनाकौशलम् इति शंकराचार्य्यकृतब्रह्मसूत्रव्याख्यानसन्दर्शनेनापि प्रतीयते।

### तत्र प्रतिकूलमतवादिनां समर्थनम्।

एतदेव प्रतिकूलमतवादिभिश्च समर्थितं दृश्यते। यतो बहवो, यथा वाराणसीय-पण्डितवर-महामहोपाध्याय-राममिश्र-शास्त्रिमहोदयाः, तथा तदनुसारिणः काशी-संस्कृत-विद्यालयाध्यक्ष-डाक्तार-थिवोप्रभृतयः प्रोचुः—"ब्रह्मसूत्राणां रामानुजभाष्यमेव सूत्राणां स्पष्टार्थानुमततया व्यासमतानुगतं, शाङ्करभाष्यन्तु वेदान्ततात्पर्यानुकूलम्, न तु सूत्राणां स्पष्टार्थानुसारि, अतो न व्यासमतानुगतम्" इति। शाङ्करभाष्यस्य आङ्गल-भाषानुवादभूमिकायां डाक्तार-थिवो एतदेव मतं प्रकटीकृतवान्। तद्दर्शनेन तदा बहवः पाश्चात्यभावापन्ना एतद्देशीया विद्वांस एतदेव सत्यमिति अमन्यन्त। तत्र नूनं राममिश्र-थिवोप्रभृतयो विशिष्टाद्वैतवादानुरागिण आसन्। ते खलु अद्वैतमत-विगानेन स्वमतपरिपोषणार्थं तथैव प्रोक्तवन्त इत्येव प्रतिभाति। परन्तु एतेन तैः अनिच्छद्भिरपि शाङ्करभाष्यं व्याससम्मतत्वेन अनुमोदितम्। यतो व्याससूत्राणि श्रुत्यर्थमीमांसामुखेनैव तत्त्वोपदेशार्थं विरचितानि इत्यपि तैः प्रतिपादितम्। सत्यं खलु एवमेव स्वयं प्रकाशते। एवं च अनुकूलमतवादिभिः शाङ्करमतविरोधिमतवादिभिश्च सर्वैः एतत् स्वीकृतं भवति—यत् श्रुत्यर्थमीमांसाद्वारा तत्त्वोपदेश एव ब्रह्मसूत्रविरचने सूत्रकृताम् अभिप्रायः। अतः श्रुत्यर्थानुसरणमेव मुख्यतया ब्रह्मसूत्ररचनाकौशलम्।

### स्मृतेः श्रुतिवत् प्रामाण्यशङ्कानिरासः

तत्र केचित् प्राहुः—शङ्करभगवतो यत् सूत्रार्थान्यथाकरणं तत् अनवद्यातम्; यतः स्मृतिरपि प्रमाणं भवति। यथोक्तम्—"श्रुतिः स्मृतिः सदाचारस्तयो धर्मस्य लक्षणम्" इति। भगवदवतारो व्यास ईश्वरवत् सर्वज्ञः, तन्मतञ्च स्मृतिरेव। तेन तन्मतमपि श्रुतिवत् प्रमाणं कथं न भवेत्? अतः श्रुत्यर्थानुरोधेन शङ्करभगवतो यत् सूत्रार्थान्यथाकरणं तन्न समीचीनम्। व्यासमतमपि श्रुतिवत् समादरणीयमेव इति। एतत् तु नैव वक्तुं शक्यते, यतः "श्रुतिस्मृति-विरोधे तु श्रुतिरेव गरीयसी" इत्येव शास्त्रनिर्णयः। भगवता व्यासेनापि स्वग्रन्थमध्ये द्वितीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रे "स्मृत्यनवकाश-दोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाश-दोषप्रसङ्गात्" इत्यत्र सर्वज्ञ-कपिलस्मृति-सिद्धान्त-निरसनावसरे इदमेव सिद्धान्तितम्। अतो

वेदाविरुद्धस्मृतिरेव प्रमाणम्। तेन व्यासमतमपि यदि श्रुतिविरुद्धं भवेत्, तथापि नादरणीयं भवितुं युक्तम्। अतो व्याससूत्रग्रन्थे यत्र येषां सूत्राणाम् आपातप्रतीयमानोऽर्थः श्रुत्यर्थविरुद्धत्वेन प्रतीयते, तेषाम् अन्यथाव्याख्यानं शङ्करभगवतः सङ्गतमेवेति प्रतिभाति। एतेन यथा छात्रेण गुरोः दोषाच्छादनं क्रियते, येन स छात्रपदवाच्यो भवेत्, तथा शङ्करभगवता स्वगुरोरपि गुरोः व्यासभगवतः शङ्करसम्प्रदाय-प्रवर्त्तकस्य तत्कृतसूत्रेषु आपात-प्रतीत-न्यूनतापरिहारः कृतः, अथवा भगवतः व्यासस्य स्वेच्छाकृत-ग्रन्थग्रन्थि श्लथीकृत एव इति सिद्धम्। अतः सूत्राणां क्वचित् क्वचित् आपातप्रतीतानाम् अर्थानाम् अन्यथाकरणं शङ्करभगवतः समुचितमेवेति प्रतिभाति। नैतत् तस्य दोषाय भवितुम् अर्हति कथञ्चन।

## शबरादिना सूत्रान्यथाकरणसमर्थनम्

नापि शङ्करभगवत एतदाचरणम् अनन्यसाधारणम्। जैमिनीय-कर्ममीमांसायाम् उपवर्षवृत्तौ शबरभाष्ये च जैमिनीयसूत्राणां श्रुत्यर्थानुरोधेन वृत्तिभाष्यकृद्भिः अन्यथाकरणं दृश्यते। "लोके येषु अर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थानि एव सूत्रेषु इति अवगन्तव्यम्" इत्युक्तं भाष्यकृता शबरस्वामिना। व्याख्यातञ्च एतत् भगवता वार्त्तिककारेण भाष्योपोद्घाते—

"वैदिकं जैमिनीयञ्च यत्र वाक्यं विरुध्यते। यथाश्रुतगृहीतेऽर्थे तत्रेदमुपदिश्यते॥
अध्याहारादिभिः सूत्रं वैदिकञ्च यथाश्रुतम्। नेयं, विरोधेऽन्योन्यस्य वैदिकानां भवन्तु ते॥"

इत्यादिकं द्रष्टव्यम्। अत्र सुचरितमिश्रटीकापि द्रष्टव्या। शङ्करभगवता एतस्यैव अनुसरणं कृतम्, नान्यत् नवीनं किञ्चिदपि समाचरितम्। किमु वक्तव्यम्—शाङ्करभाष्यस्य भाषाभङ्गीप्रभृतयः सर्वे शबरस्वामिपादानां लेखशैलीम् अनुसृत्यैव। अतः एतदाचरणं शङ्करभगवतो न दोषाय भवति।

## सूत्राणां दुरधिगम्यत्वं व्यासेच्छाकृतं वा

अथवा एतदपि कल्पयितुं शक्यते,—यथा महाभारते भगवद्व्यासरचितानि किञ्चिदधिकाष्टसहस्राणि कूटार्थबहुलानि वाक्यानि दृश्यन्ते, तथा तस्य ब्रह्मसूत्रेऽपि तथाविधानि कानिचित् सूत्राणि तेनैव सन्निवेशितानि इति। खण्डन-खण्डखाद्यकृता श्रीमता श्रीहर्षाचार्येणापि स्वेच्छया बहुषु स्थलेषु ग्रन्थयो ग्रथिता इति तेनैव उद्घोषितं ग्रन्थान्ते, यथा—

ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया,
प्राज्ञम्मन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु।
श्रद्धाऽऽराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्तर्करसोर्म्मिमज्जनसुखेष्वासञ्जनं सज्जनः॥ इति।

अतो यदि भगवता व्यासेनापि अनधिकारिणां सूत्रार्थव्यवहारभिया क्वचित् सूत्रमध्ये ग्रन्थयः सन्निवेशिता—इति कैश्चित् कल्प्यते, तत्र न दोषावहं भवेत्।

वस्तुतस्तु शङ्करभगवता व्याससम्मतसूत्रार्थ एव प्रकटीकृतः, तत्र तेन न कुत्रापि प्रतिपादितं, यत् सूत्रकृताम् अयम् आशयः, मया तु एवम् अन्यथा उच्यते इति। अतः इदं स्वीकर्तव्यं यत् यदेव श्रुत्यभिप्रेतं तदेव व्यासेन सूत्रितं, यदेव च व्यासाभिप्रेतं तदेव भाष्यकृता भाष्यमुखेन विवृतम् इति न कस्यचित् आक्षेपस्य अवकाशः।

## श्रुत्यर्थानुसरणमेव सूत्ररचनायाः कौशलम्

अतः श्रुत्यर्थानुरोधेन व्याससूत्राणाम् आपातप्रतीयमानार्थस्य अन्यथाकरणं यथाप्रयोजनं समुचितमेव प्रतिभाति, तेन श्रुत्यनुसारेण तत्त्वोपदेशप्रदानमेव व्याससूत्ररचनायां सूत्रकृन्मतम् मुख्यमेकं कौशलम् इत्यत्र न सन्देहावसरः कश्चिदपि वर्त्तते। लौकिकालौकिकविषयेषु सर्वत्र पौरुषेयत्वकल्पनम् अवैदिकानां पाश्चात्यानामेव शोभते। अतो ब्रह्मसूत्रेषु स्वतन्त्रस्य व्याससम्मतस्य अनुसन्धानं प्रतिपादनञ्च तेषामेव शोभनं, न तु अस्माकं वेदापौरुषेयत्ववादिनाम्। अतः श्रुत्यनुसारि-व्याख्यानमेव व्यासस्य सम्मतम्। श्रुत्यर्थानुसरणमेव सूत्ररचनायाः कौशलम्।

## सूत्रेषु व्यासमतानुप्रवेशशङ्कानिरासः

तत्रापि केचिन्मन्यन्ते—व्यासेन भगवता स्वकीयब्रह्मसूत्रमध्ये केवलं वेदान्त-सिद्धान्तानुसरणं कृतम्, तत्र तस्य तपःसिद्धस्वानुभवस्य लेशोऽपि न प्रविष्टः—इत्यत्र किं प्रमाणम्? तस्मिन् अलौकिकब्रह्मतत्त्वविषये सूत्रकृता उपनिषदतिरिक्तं प्रमाणं स्वानुभवरूप-योगिप्रत्यक्षादिकं न किञ्चिदपि उपन्यस्तम्—इत्यत्र किं गमकम्? अतः सूत्रकृन्मतमपि तत्र प्रदर्शितम्—इत्येव समीचीनकल्पनम्। तथा हि—सर्वैः सर्वं न समानाकारं गृह्यते। यद् यस्य ज्ञातं भवति, तत् तस्य भावविशेषानुविद्धं सद् गृहीतं भवेत्। घटमेकं दृष्ट्वा यज्ज्ञानं जायते, तन्न सर्वेषां समानाकारं भवति, कश्चित् तं हेयम् अन्यः उपादेयं मन्यते। यथोक्तं—

"गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः।
यथास्थितश्च बालाभिः दृष्टः शौरिः सकौतुकम्"॥ इति।

एवं वेदान्तेषु यद् ब्रह्म उपदिष्टं भवति, तत्र केषाञ्चिद् द्वैतबुद्धिः, अन्येषाम् अद्वैतबुद्धिः, अपरेषां विशिष्टा-द्वैतबुद्धिः उदेति। कर्मोपासनविषयेऽपि तथैव बुद्धिभेदो भवत्येव। तेन व्यासस्यापि वेदार्थ-विषयिणी या बुद्धिः, सापि तस्य संस्कारानुरूपैव भविष्यति। संस्कारं विहाय न कापि सामान्याकारा बुद्धिः उदेति कुत्रचित्। अतो वेदान्तार्थम् अनुसरतापि भगवता व्यासेन ब्रह्मसूत्रमध्ये तस्य स्वमतमेव दर्शितम्। तेन ब्रह्मसूत्रं वेदान्तार्थनिर्णये व्यासमतमेव, नान्यद् भवितुम् अर्हति,—ब्रह्मसूत्रं न केवलं वेदान्तार्थवर्णनेन वेदान्तसिद्धान्तप्रदर्शनार्थं प्रवृत्तम् इति वक्तुं शक्यते।

नैतद् युक्तम्। यतः सर्वत्र ज्ञेयवस्तुषु धर्मद्वयं दृश्यते, ज्ञेयनियतम् ज्ञातृनियतं च। यथा, घटे घटत्वं ज्ञेयनियतम्, क्षुद्रत्वबृहत्त्वादिकं हेयोपादेयत्वादिकं च ज्ञातृनियतं ज्ञाने

सर्वेषाम् ऐकमत्यं दृश्यते। हेयत्वादौ तु ज्ञानभेदः प्रसिद्ध एव। तेन वेदान्तानाम् अद्वैतब्रह्मणि यदि तात्पर्य्यं स्यात्, तदा तत्र अद्वैतबुद्ध्युदय एव समुचितः, तत्र कश्चित् संस्कारानुप्रवेशः न कल्पनीयः। ज्ञात्रधीनधर्मेण न वस्तुस्वरूपान्यथा-कल्पनं युक्तम्। एवं यदि वेदान्तानां द्वैतब्रह्मणि वा विशिष्टाद्वैतब्रह्मणि वा तात्पर्यं स्यात्, तदा तथैव तत् कथं न प्रतिभायात्? एवं कर्मोपासनादिविषयेष्वपि बोद्धव्यम्। संस्कार-प्रभावेण न कोऽपि घटं पटयितुम् ईष्टे। संस्कारानुप्रवेशवशात् न वस्तुस्वरूपान्यथात्वं भवति। अथ चेद् एवं कथञ्चिदपि भवेत्, तदा अविदुषामेव तथा भाव्यम्, न तु प्रेक्षावतां विचारशीलानाम्; का कथा व्यासादीनां निर्मलबुद्धीनां भगवदवताराणाम् ऋषिप्रभृतीनाम्। अतो व्याससूत्रमध्ये केवलं वेदान्तसिद्धान्तवर्णनं सूत्रकृतां पक्षे न असम्भावितम्। सूत्रकृतापि द्वितीयाध्याय-प्रथमपादस्य श्रुत्यर्थनिर्णयाय सर्वत्र श्रुत्यर्थानुसरणं कर्त्तव्यम् इति मत्वा सर्वज्ञ-भगवत्-कपिलमतस्य निरवकाशत्व-शङ्कायाम् "अन्यस्मृत्यनवकाशदोषप्रसङ्गः" (२।१।१) इत्युक्त्वा वेदान्तार्थे पौरुषेयत्व-गन्धलेशानुप्रवेश-शङ्कापि निवारिता। एतेन निश्चीयते वेदान्तार्थ-निर्णायक-व्याससूत्रेऽपि व्यास-मतलेशानुप्रवेश-शङ्कापि न कर्त्तव्या। श्रुत्यर्थनिर्णयार्थं यो लोकवेद-साधारण-नियमो मीमांसकैः आविष्कृतः अवधारितश्च, तेनैव नियमेन श्रुत्यर्थनिर्णयः कर्तव्यः—इत्येव भगवद्व्यासस्य अभिप्रायः। अतो व्याससूत्रमध्ये स्वातन्त्र्येण व्यासाभिमतं न किञ्चिदपि वर्त्तते। वेदान्तसिद्धान्त एव तत्र वर्णितः। यथोक्तं भाष्यकृता शङ्करभगवता "वेदान्त-वाक्य-कुसुम-ग्रथनार्थत्वात् सूत्राणामिति।" (१।१।२ सूत्रभाष्यम्)

### व्यासस्य श्रुत्यर्थज्ञानवत्त्वे शङ्कानिरासः

अथात्र कैश्चित् शङ्क्यते—किं व्यास एव श्रुत्यर्थम् अधिगतवान्, नान्यः!—इत्यत्र किं प्रमाणम्? यतः श्रुत्यर्थमेव अवलम्ब्य ऋषीणां मध्ये मतभेदो दृश्यते। अत एव कल्प्यते श्रुत्यर्थविषये ऋषीणां मध्ये यो मतभेदः स तु सर्वमान्य-श्रुत्यर्थेषु अपरिहार्य्य-स्वस्वमतानुप्रवेशजन्यः; यतो यदेव अधिगम्यते, तदेव सर्वेषां स्वमत-प्रभाव-प्रभावितं सद् अधिगतं भवति। तेन श्रुतीनां सर्वमान्यार्थ-निर्णयो निश्चितमेव असम्भवी। अतएव व्यासमतमेव तदीय-ब्रह्मसूत्रमध्ये प्रकटीकृतं, स्वेच्छया अनिच्छया वा—इत्येव प्रतिभाति इति?

एतदपि न सङ्गतम्। यतः सर्वमान्यश्रुत्यर्थज्ञानं प्रमाणसापेक्षम्, न तु इच्छासाध्यम्, आकस्मिकं वा। आत्म-संयुक्त-मनःसंयुक्तेन्द्रियसन्निकृष्टे घटे तज्ज्ञानम् अवश्यम्भावि सर्वेषाम्। यथा घटज्ञाने सर्वघट-साधारणं घटत्वज्ञानमपि भवति, तथा श्रुत्यर्थमध्ये श्रुतितात्पर्य्यरूपेण किञ्चिज्ज्ञानमपि भवत्येव। अतः संस्कार-प्रभाव-विमुक्तं सर्वमान्यं ज्ञानं न असम्भवि। साम्प्रदायिकाग्रह-वर्ज्जनपूर्वकं सत्यानुसन्धित्सामात्रम् अवलम्ब्य यदि कोऽपि एतदर्थं यतेत तेनैतद् उपलम्भनीयम्, नैतत् दुष्करम् असम्भवि वा; तेन व्यासमतमेव ब्रह्मसूत्रमध्ये प्रकटीकृतमिति न कल्पनीयम्।

### ऋषीणां श्रुत्यर्थानभिज्ञत्वशंकानिरासः

यदि उच्येत—किं तदा कपिल-कणाद-गोतम-पतञ्जलि-जैमिनि-प्रमुखाः महर्षयः श्रुत्यर्थविरोधिन आसन् ? व्यासेन भगवता यदा तेषां मतानि स्वकीय-ब्रह्मसूत्रमध्ये खण्डितानि, तदा व्यास-मतानुसारेणैव नूनं तेषां मतानि श्रुत्यर्थाननुगतानि, अथवा व्यासमतमेव न श्रुतिसम्मतम् । अतः एतदेव वरं, यत् सर्वसम्मत-श्रुत्यर्थ एव असम्भवी ।

अत्रेदं वक्तव्यम्—व्यासोक्तमेव सर्वथा श्रुत्यर्थानुगामि—इत्येव समीचीनम्; यतः कपिल-कणादादि-महर्षयः श्रुतिभिन्नं योगिप्रत्यक्षम् अनुमानादिकञ्च जगत्-कारण-ब्रह्म-तत्त्व-विनिर्णये प्रमाणत्वेन मन्यन्ते । भगवता व्यासेन तु तत्र श्रुतेरेव प्रामाण्यम् अवादि । अनुमानादिकञ्च तस्याः सहकारित्वेन गृह्यते । अतो व्यासोक्तं यावत् श्रुत्यर्थानुसारि, न तावत् अन्येषाम् ऋषीणां मतम् । कपिलादीनां मते, अनुमानादीनां ब्रह्मविषये प्रमाणत्वेन गृहीतत्वात् तेषां सिद्धान्तमध्ये स्वाभिमत-प्रवेशो लब्धावसरः सञ्जातः । व्यासमते तु अनुमानादीनां श्रुत्यनुसारित्वेन श्रुतेरेव च प्राधान्येन गृहीतत्वात्, व्यासोक्तश्रुत्यर्थमध्ये पुरुष-बुद्धि-प्रवेशावसरः न कल्पनीयः । एतेन भगवता व्यासेनैव श्रुतेः सिद्धान्तकीर्त्तनं यथा कृतम्, न तथा अन्यैः कपिलादि-महर्षिभिः । तथापि कपिल-कणादादीनामपि श्रुत्यर्थाविरोधि-ज्ञानवत्त्वं न असिद्धम्, न वा सर्वसम्मत-श्रुत्यर्थ एव असम्भवी ।

### ऋषीणाम् अभ्रान्तत्वम्

किं तदा सांख्यादि-दर्शनकर्त्तारः कपिलादि-महर्षयो यथार्थश्रुत्यर्थानभिज्ञा, भ्रान्ता वा आसन् ? व्यासमतस्य श्रुत्यर्थानुकूलत्वात्, व्यासेन च कपिलकणादादिमतखण्डनात्, श्रुतेः अनन्यपरत्वाच्च ।

नैतत् कल्पयितुं शक्यते । तेषां भ्रान्तत्व-श्रुत्यर्थानभिज्ञत्व-कल्पनम् अनावश्यकम् । तैः खलु प्रत्यक्षादि-प्रमाणानुरागिणां श्रुति-स्वरूपानभिज्ञ-पृथग्जनानां कृते मोक्षमार्गप्रदर्शनार्थं सहज-बुद्धि-ग्रहणोपयोगि यावन्मात्रं प्रयोजनं, तावन्मात्रम् उपदिष्टम् । प्रत्यक्षानुमानादि-प्रमाणेभ्यः श्रुतिप्रमाणं बलवत्तरमिति प्राकृतजना न बोद्धुं शक्नुवन्ति, न वा अभिनन्दन्ति । तत्त्वज्ञानं हि मोक्षस्य उपायभूतम्, उपेयस्तु सर्वदुःख-निवृत्तिरूपो मोक्षः । स एव सर्वेषां परमपुरुषार्थः । तत्र ऋषीणां मतभेदः प्रायेण नास्त्येव; योऽप्यस्ति सोऽपि बोधसौकर्यार्थ एव, अतः [illegible] । कपिलादयो दर्शनकर्त्तारः सर्वे तत्र अनावृत्तिरूप-दुःख-राहित्यविषये [illegible] । परन्तु उपाय-भूत-तत्त्वविषये अधिकार्यनुरोधादेव तेषां न ऐकमत्यम् । श्रुतिभिन्न-प्रत्यक्षादि-प्रमाणानुरागाधिक्यात् ते द्वैतवादिनो भवन्ति । तत्र [illegible] सदसत्-कार्यवादिनस्तु [illegible] [illegible] च । ये तु विशिष्टाद्वैत-द्वैताद्वैतादि-मत-वादिनः, तेऽपि [illegible] द्वैतवादिन एव । विशेषण-विशेष्ययोर्भिन्नत्वात्, द्वैताद्वैतयोर्भिन्नत्वाच्च । तेऽपि [illegible]

विषये योगिप्रत्यक्षानुमानादिकं श्रुतिवत् प्रमाणं मन्यन्ते। तेन तेऽपि द्वैतवादि-समानाः प्रत्यक्षादि-प्रमाणशरणाः। वेदान्ते यादृश-सूक्ष्मदृष्टि-चित्तैकाग्र्य-गुरुभक्ति-वैराग्य-शास्त्र-विश्वासादिकं श्रुतितात्पर्यभूत-निर्विशेष-ब्रह्मज्ञानाधिकार-सम्पादनार्थम् अपेक्षितम्, अन्यत्र तादृशम् अनावश्यकम्। तथा च प्राकृतजनानां कृते सानुकम्पा सर्वज्ञ-कपिलादि-महर्षयः तत्त्वविषये श्रुति-निरपेक्ष-प्रमाण-सिद्धानि मतानि प्रचारयामासुः। तेन तेषु मतेषु क्वचित् क्वचित् श्रुत्यननुमत-सिद्धान्तः प्रविष्टः। तेषामेव मतानां व्यासेन भगवता स्वकीयब्रह्मसूत्रग्रन्थमध्ये खण्डनं कृतम्। अतस्तेषां कपिल-कणादादि-महर्षीणां भ्रान्तिकल्पनं श्रुत्यर्थानभिज्ञत्वानुमानं वा नैव युक्तम्। न वा सर्वसम्मतश्रुतिसिद्धान्तनिर्णयः असम्भवः।

### प्रत्यक्षादीनां श्रुतिवत् प्रमाणत्वशंकानिरासः

अथ चेत् मतम्—श्रुतिवाक्यतः श्रुत्यर्थनिर्णये प्रत्यक्षानुमानादि-प्रमाणानां यथा प्रयोजनं भवति, तथा श्रुतिप्रतिपाद्यविषयेऽपि तेषां प्रयोजनं भवत्येव। तेन श्रुतिप्रतिपाद्ये अलौकिकविषयेऽपि प्रत्यक्षादीनामपि उपयोगः कथं न भवेत्? प्रत्यक्षादिभ्यः प्रमाणेभ्यः श्रुतेर्बलवत्तरत्वं न स्वीकार्यम्। ब्रह्मसाक्षात्कारादेव संशयादीनां समुच्छेदस्य उपदेशात् "भिद्यते हृदयग्रन्थिः" इत्यादिश्रुतिभ्यः। अतः श्रुत्यर्थब्रह्मनिर्णये प्रत्यक्षादिप्रमाणानामपि उपयोगः अस्ति एव इति?

नैतदपि सङ्गतम्; श्रुतिप्रतिपाद्यब्रह्मविषये प्रत्यक्षादीनां गतिर्नास्ति। यतः श्रुतिवाक्यतः श्रुत्यर्थनिर्णयो न अलौकिकविषयः। तेन तस्मिन् लौकिकविषये लौकिक-प्रमाणानि आवश्यकान्येव। लौकिकविषये लौकिकप्रमाणानि त्यक्त्वा अलौकिक-प्रमाण-शरणीकारो न समर्थनीयः, आदरणीयश्च। श्रुतिप्रतिपाद्यस्य अलौकिक-विषयस्य तु लौकिक-प्रमाणानाम् अगोचरत्वात्। यतः श्रुतिप्रतिपाद्यं ब्रह्म असङ्गं निर्विशेषम् अद्वैतवस्तु। परमार्थतः न तज् ज्ञेयं प्रमेयं वा। ज्ञेयत्वं प्रमेयत्वं च ज्ञातृ-ज्ञेय-प्रमातृ-प्रमेय-भेदसत्ताधीनम्। तत्र श्रुतेरपि यत् प्रमाणत्वं, तत् तु निषेधमुखेनैव, न विधिमुखेन। अद्वैतब्रह्मज्ञानं न घटादि-ज्ञानवज् ज्ञानम्। ब्रह्म तु वृत्तिव्याप्यं, न तु फलव्याप्यम्। घटादिकन्तु उभयमेव। वृत्तिविषयता हि वृत्तिव्याप्यता, भग्नावरणचिद्विषयता हि फलव्याप्यता। ब्रह्मणि फलव्याप्यता नास्ति, ब्रह्मणः सर्वावभासकत्वात्, स्वप्रकाशत्वाच्च। तत्रापि ब्रह्मविषये या वृत्तिः सापि आत्मघातिन्येव। वृत्तिर्यदा ब्रह्माकारा भवितुम् ईहते, तदा क्रमेण सा विलुप्यते, ब्रह्मणो निराकारत्वात्। एवम् अंशतः वृत्तिविलोपानुभवजन्यसंस्कारबलेन अद्वैतब्रह्मज्ञाने सम्यग् जाते वृत्तेः निरवशेष-विलोपः अनुमीयते, कल्प्यते वा। श्रुतिप्रमाणेनैव वृत्तेः एतादृशी विलोपात्मिका पुनरावृत्तिपरिशून्या अद्वैत-ब्रह्माकारता सम्भाविता। युक्त्या तस्याः सम्भावना न सिध्यति। एतदपि श्रुतौ निषेधमुखेन ब्रह्मपरिचायकं यद् असङ्गम् अद्वैतम् अखण्डम् अनन्तं निर्गुणं निष्क्रियम् अवाङ्मनसोगोचरम्

[illegible] निर्विशेषम् इत्यादिकं वाक्यजातम्, तेनैव ब्रह्मण एतादृशी [illegible] सम्पादिनी। एवं श्रुतितात्पर्यभूताद्वैत-ब्रह्मवस्तुनि श्रुतेरेव प्रमाणत्वम्। एतेन ब्रह्मणः अप्रमेयत्वं श्रुतिप्रमाणकत्वञ्च न व्याहन्यते। अतः श्रुत्यर्थनिर्णये प्रत्यक्षादिप्रमाणानां यादृशी उपयोगिता, तादृशी न श्रुति-प्रतिपाद्य-विषये इति सिद्धम्; "तद् ब्रह्म उपनिषत्परम्", "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्यादि-श्रुतेः "शास्त्रयोनित्वात्" इति न्यायाच्च।

## सूत्रेषु व्यासमतानुप्रवेशाशङ्कानिरासः

अथ चेत् अत्र शङ्क्यते—ब्रह्मसूत्रमध्ये व्यासेन भगवता जैमिनि-कार्ष्णाजिनि-बादरि-काशकृत्स्नात्रेयौडुलोमि-प्रभृति-महर्षीणां मतमपि नामग्रहणपूर्वकमेव प्रदर्शितम्। बादरायण इति स्वनामग्रहणपूर्वकं स्वमतमपि उद्घोषितम्। तत् कथं ब्रह्मसूत्रमध्ये वेदान्तमतमेव वर्णितं, न तु व्यासस्य स्वमतमपीति?

नेयं शङ्का सङ्गता। यतः शिष्यबुद्धि-वैशद्याय पूर्वपक्षतया मतान्तरं प्रदर्श्य तत्तन्मत-खण्डनं कृतं व्यासेन भगवता। तेन तेषां मतं न तत्र गृहीतम् आसीत् इति स्पष्टमेव। नामग्रहणपूर्वकं स्वमतोल्लेखश्च, ऋषीणां विभिन्नमतैः सह श्रुतितात्पर्यस्य अविरोधस्थले एव स्वमत-प्रदर्शनार्थः, नान्यत्र। अन्यत्र ऋषयो यत्र परस्परं न विवदन्ते, तादृशस्थलेषु सर्वत्र तु श्रुतितात्पर्यमेव ब्रह्मसूत्रमध्ये विवृतम् इत्यनेन एतदेव प्रमाणितम्। तत्र स्वमतोल्लेखश्चापि न कृतः, अतो व्यासेन तु यत्र स्वमत-प्रदर्शनं कृतं, तत्र अन्यैरपि तथा कर्त्तुं शक्यं, यदि श्रुत्यनुकूल्युक्तियुक्तं स्यात्—इति तत्रापि व्याससम्मतिरस्ति—इत्यपि तत्र सूचितं भवति। अतो ब्रह्मसूत्रमध्ये श्रुतितात्पर्य्यप्रकटनादृते व्यासस्य स्वमत-प्रदर्शनं न व्यासस्य अभिमतम् इति। एतेन एतदपि बोद्धुं शक्यते—यदि अन्येन केनापि व्यासस्य श्रुतिसिद्धान्त-विरुद्धता कथमपि प्रदर्शयितुं शक्यते, तदा तन्मतमपि व्यासस्य आदरणीयमेव भवेत्। यतः श्रुतितात्-पर्य्यमेव व्यासमतम्, नान्यत् किमपि। अतः ब्रह्मसूत्रमध्ये वेदान्तमतमेव वर्णितं, न तु व्यासस्य अन्यत् किञ्चित् स्वमतमपीति।

## शङ्करव्याससाक्षात्कारतः समर्थनम्

वस्तुतस्तु एतदनुकूलः प्रवादोऽपि वर्त्तते। हिमालयप्रदेशे उत्तरकाश्यां यदा शङ्कर-व्यासयोर्मध्ये सूत्रार्थालोचनं जातं, तदा व्यासेन शाङ्करभाष्यं दृष्ट्वा उक्तम्—"अहो मम सूत्रानन्त-दोषयोगः कृत इति क्वचिद् दृश्यते। तथाप्येवं न दुनोति माम्, यतो भवता मदाशय एव समुद्-घाटितः" इति। एतादृशी उदारता सत्यनिष्ठस्य भगवतो व्यासस्यैव सम्भवति शोभते च। अतो वेदान्तमतमेव ब्रह्मसूत्रमध्ये उपन्यस्तं भगवता व्यासेन न स्वमतम्—इति निश्चितम्।

## ब्रह्मसूत्रस्य औपनिषदमतानुसारणम्

[illegible] शङ्कराचार्य-प्रभृतिभिः [illegible]

वेदान्तमतम् अनुसृत्यैव च स्वमतस्थापनं कृतं, न तु केवलं युक्तिसाहाय्येन कल्पनाबलावलम्बनेन वा कृतम्, अथवा स्वकीय-तपःसिद्धालौकिकाभिज्ञता-प्रभावेण कृतम्। एतेन ब्रह्मसूत्रमध्ये वेदान्तानुसारि-युक्ति-विचारस्यैव प्रामाण्यं सर्ववादि-सम्मतमिति प्रतिभाति। तेन व्यासस्य तत्कृतसूत्रमध्ये स्वमत-प्रदर्शनं सर्वथा श्रुत्यनुकूलं श्रुत्यधीन-युक्तिमूलकमिति सिद्धम्। सांख्य-योग-वैशेषिक-बौद्ध-जैन-शैवानां मतखण्डनं तेषां वेद-तात्पर्य-विरुद्धत्वं निश्चित्यैव। जैमिनि-बादरि-कार्ष्णाजिन्यौडुलोम्यात्रेय-प्रभृतीनां मतखण्डनं तेषां वेदान्त तात्पर्य-विरुद्धत्वं संशय्येति विशेषः। सांख्यादिमतखण्डने श्रुतेर्युक्तेश्च उभयोरपि प्राधान्यं, जैमिनीयमतखण्डने श्रुतेरेव प्राधान्यमित्यपि बोद्धव्यम्। अतो वेदान्त-मत-वर्णनमेव ब्रह्मसूत्रमध्ये कृतं भगवता व्यासेन, न तु स्वमतवर्णनमिति ध्येयम्। अतः श्रुतिव्यासमतयोः न भिदाशंकापि।

### बौद्धादिमतखण्डनाद् ब्रह्मसूत्रस्य आधुनिकत्वशङ्का

अत्र केचिद् आहुः——वेदान्तार्थमीमांसैव न केवलं ब्रह्मसूत्र-रचनाया उद्देश्यम्, यतः तस्मिन् बौद्ध-जैन-प्रभृतीनां वेदबाह्यानामपि मतखण्डनं दृश्यते। बौद्ध-जैनादिमतं वेदान्तेषु न हि दृश्यते ; अतः तत्-सम्बन्धिनी मीमांसा न वेदान्तार्थमीमांसान्तर्गता ; तेन दार्शनिकरीत्या स्वातन्त्र्येण जगत्तत्त्वादि-निर्णयोऽपि तस्य उद्देश्यं वस्तु भवति। एवञ्च ग्रन्थोऽयं न कलेरादौ व्यासेन रचितः, किन्तु कलेः सार्द्धद्विसहस्र-वत्सरेषु समतीतेषु गौतम-बुद्धाविर्भावानन्तरं——किमधिकं नागार्जुन-दिङ्नाग-वसुबन्धु-धर्मकीर्त्तिभ्यः अपि परं, केनचिद् व्यास-नामधारिणा विदुषा विरचितः। इदानीमपि कथक-सम्प्रदायमध्ये विदुषां व्यासोपाधिः दृश्यते एव। अतो न ब्रह्मसूत्रं केवलं वेदान्तार्थ-मीमांसारूपम्, किन्तु स्वातन्त्र्येण जगत्तत्त्वादि-निर्णयपरम्, न वा पञ्चसहस्र-वर्षप्राचीन-व्यासविरचितमिति ?

### ब्रह्मसूत्रस्य आधुनिकत्वशङ्कानिरसनम्

नैतत् सङ्गतम्, यतो बौद्ध-जैनादीनां मतं सार्द्ध-द्विसहस्र-वर्षप्राचीन-गौतमबुद्ध-महावीरयोः पूर्वस्मिन् कालेऽपि आसीत्——इति उभयवादि-सम्मतमेव। तथा हि——बौद्ध-ग्रन्थेषु दृश्यते——गौतमबुद्धाविर्भावात् प्राक् द्वाविंशतिः बुद्धाः समभवन्। गौतमस्तु त्रयोविंशः। तत्पश्चात् चतुर्विंशः मैत्रेयो बुद्ध आगमिष्यति इति। बौद्धजातकादि-ग्रन्थेषु इयं कथा सुप्रसिद्धा एव, सुविदिता च सर्वेषां विदुषाम्। जैनमतेऽपि गौतम-बुद्ध-समकालीन-महावीरात् पूर्वं ऋषभदेवात् आरभ्य त्रयोविंशतिः तीर्थङ्करा आविर्बभूवुः, महावीरः तत्र अन्तिमः। ऋषभदेवस्य कथा श्रीमद्भागवतेऽपि दृश्यते। तत्र तस्य भगवदवतारत्वं च उक्तम्। एतदपि सर्वेषां सुविदित-मेव यत् पञ्चसहस्र-वर्षेभ्यः प्राक् कलेरादौ व्याससमकालीनः क्रकुच्छन्दनामा कश्चिद् बुद्ध आसीत्। ततः कनकमुनिः ततः कश्यपः, ततो गौतमो बुद्धः सञ्जात इत्यपि प्रसिद्धम्। एतदर्थं लङ्कावतारसूत्र-महावस्तु-ललित-विस्तरप्रभृतयो ग्रन्था द्रष्टव्याः। ब्रह्मसूत्रे प्राचीन-बौद्ध-जैनादि-

मतस्यापि [illegible]। अतो बौद्धादिमत-खण्डनेन ब्रह्मसूत्रस्य आधुनिकत्वं न [illegible]।

### विष्णुपुराणतो बौद्धजैनादिमतानां प्राचीनत्वम्

बौद्ध-जैनमतानां प्राचीनत्वं वैदिकग्रन्थेष्वपि दृश्यते। तथा हि—विष्णुपुराणे बुद्धावतारनिर्माण-सम्बन्धिनी एका कथा दृश्यते। तत्र आसुरस्वभावान् देवस्वभावापन्न-जनपीडनपरान् यागदानादि-वेदोक्त-कर्मानुष्ठानजन्यापूर्व-बलेन बलीयसो जनान् तादृश-पथ[illegible] निवर्त्तयितुं भगवान् विष्णुः देवस्वभावापन्नजनैः प्रार्थितः सन् स्वशरीरात् मायामोह-नामकं कञ्चित् पुरुषं जनयामास। कर्मफल-क्षयिष्णुत्व-हिंसामयत्वादि-दोषान् वैदिक-कर्मकाण्डे प्रदर्श्य तेन पुरुषेण वेदान्तसम्मत-ज्ञानफल-निर्वाण-प्रशंसारूपः परवर्त्ति-विज्ञानवाद-शून्यवाद-बीजभूतः उपदेशः तेभ्य आसुरस्वभावापन्नेभ्यः सर्वेभ्यः प्रदत्तः। तदनुसारेण ते आसुरभावापन्ना जना यागदाना-द्यनुष्ठानादिकं कर्म्मकाण्डं विहाय निर्वाण-साधनपरा बभूवुः; कर्म्मादिना चित्तशुद्ध्यभावात् तु ते विज्ञानवादिनः तथा शून्यवादिनः बौद्धाः सञ्जाताः। यागादि-जन्य-शुभादृष्ट-विरहिताश्च सन्तो दुर्बलाः जाताः, तेन देवगण-वध्याश्च बभूवुरिति। तद् यथा विष्णुपुराणे तृतीयांशे—

पराशर उवाच—

इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः। समुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान्॥ १७।४१

श्रीभगवानुवाच—

मायामोहोऽयमखिलान् दैत्यांस्तान् मोहयिष्यति। ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः॥ ४२

पराशर उवाच—

अर्हथेमं महाधर्मं मायामोहेन ते यतः। प्रोक्तास्तमाश्रिता धर्ममार्हतास्तेन तेऽभवन्॥ १८।११

पराशर उवाच—

पुनश्च रक्ताम्बरधृङ् मायामोहोऽजितेक्षणः। अन्यानाहासुरान् गत्वा मृद्वल्पमधुराक्षरम्॥ १८।१४

मायामोह उवाच—

स्वर्गार्थं यदि वाञ्छा वो निर्वाणार्थमथासुराः। तदलं पशुघातादि-दुष्टधर्मैर्निबोधत॥ १८।१५
विज्ञानमयमेवैतदशेषमवगच्छथ। बुध्यध्वं मे वचः सम्यग् बुधैरेवमुदीरितम्॥ १८।१६
जगदेतदनाधारं भ्रान्ति-ज्ञानार्थतत्परम्। रागादिदुष्टमत्यर्थं भ्राम्यते भवसङ्कटे॥ १८।१७

पराशर उवाच—

एवं बुध्यत बुध्यध्वं बुध्यतैवमितीरयन्। मायामोहः स दैतेयान् धर्ममत्याजयन्निजम्॥ १८।१८

इति। अत्र श्रीधरस्वामिकृत-टीकायाम्—

"आर्हतमतम् उक्त्वा बौद्धमतम् आह—"पुनश्च" इति सप्तभिः। "रक्त" इत्येकं [illegible] [illegible]। अत्र हि "विज्ञानमयं [illegible]" इत्यादिना [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। [illegible]

तदर्थश्च तत्परं तन्निष्ठम् ।१७। एवं बुध्यत इत्यत्र पुनरुक्तिः बौद्धपर्यवसितत्वार्था" ॥१८॥ इति ।

एवं च स मायामोहो वेदान्तोक्त-विज्ञानस्वरूप-ब्रह्मज्ञानोपदेशेन जगतो भ्रान्तिरूपत्व-प्रदर्शनेन, तथैव "तद् यथा कर्मचितो लोकः क्षीयते" इत्यादि कर्मनिन्दासूचक-मुमुक्षूपदेशेन च कर्मपरान् दैत्यान् यागाद्यनुष्ठानात् प्रतिनिवर्त्तयामास । ते खलु पश्चात् चित्तशुद्ध्यभावात् ब्रह्ममार्गपरिभ्रष्टाः सन्तो बौद्धा इति नाम्ना प्रसिद्धिं गताः । वैदिकानां दैत्यानां बुद्धिमोहोत्पादनाय आदौ वेदम् आश्रित्य दुर्युक्ति-प्रदर्शनस्य आवश्यकत्वात् । एतेन वेदप्रामाण्यवादि-प्राचीन-बौद्धसद्भावः कल्पयितुं शक्यते ।

### भागवतवचनेन तस्य समर्थनम्

श्रीमद्भागवते भगवदवतार-ऋषभदेवस्य कथा श्रूयते । स एव जैनानाम् आदि-पुरुषः मतप्रवर्त्तकश्चेति तैरपि स्वीक्रियते । कीटकदेशे भगवदवताररूप-बुद्धस्य आविर्भावकथा तत्रैव उपलभ्यते । अपरेषु पुराणेष्वपि भगवतो बौद्धावताररूपत्वं वर्णितम् । तेन गौतम-महावीराभ्यां पूर्वमपि बौद्ध-जैनमत-सत्त्वं तथा तेषां मतानां वैदिकमत-मूलकत्वं वैदिक-पुराणादि-ग्रन्थेभ्योऽपि अवगम्यते ।

### वेदान्तसारवचनेन तस्य समर्थनम्

ततो वैदिक-धर्मानुसारि-वेदान्तसारादिषु बहुषु प्राचीनार्वाचीनग्रन्थेषु बौद्ध-विज्ञानवाद-शून्यवादयोः बीजभूतानि वेदान्त-तात्पर्य-पूर्वपक्षरूपाणि श्रुतिवाक्यानि प्रदर्शितानि सन्ति यथोक्तं वेदान्तसारे—

"बौद्धस्तु 'अन्योऽन्तर आत्मा विज्ञानमयः' ( तै २।४।१ ) इत्यादिश्रुतेः, कर्त्तुः अभावे करणस्य शक्त्यभावात्, 'अहं कर्त्ता' 'अहं भोक्ता' इत्याद्यनुभवाच्च बुद्धिः आत्मा इति वदति । अपरो बौद्धः 'असदेव इदम् अग्र आसीत्' ( छाः ६।२।१ ) इत्यादिश्रुतेः, सुषुप्तौ सर्वाभावात् 'अहं सुप्तः, सुषुप्तौ न आसम्' इति उत्थितस्य स्वाभाव-परामर्श-विषयानुभवात् च "शून्यम् आत्मा" इति वदति ।"

तत्र तयोरपि खण्डनप्रसंगे उक्तम् अस्ति—

"एतेषां पुत्रादीनां शून्य-पर्यन्तानाम् अनात्मत्वम् उच्यते । एतैः अतिप्राकृतादि-वादिभिः उक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्त-श्रुतियुक्त्यनुभवाभासानाम्, उत्तरोत्तर-श्रुति-युक्त्यनुभवाभासैः आत्मत्व-बाधदर्शनात पुत्रादीनाम् अनात्मत्वं स्पष्टमेव इति । किन्तु 'प्रत्यक् अस्थूलः अचक्षुः अप्राणः अमनाः अकर्त्ता चैतन्यं चिन्मात्रं सत्' इत्यादि-प्रबलश्रुति-विरोधात्...पुत्रादि-शून्यपर्यन्तम् अखिलम् अनात्मैव ।"

एतेन बौद्ध-जैनमतद्वयं तथा चार्वाकाद्यपर-नास्तिकमतान्यपि वेदमूलकानीति प्रतीयन्ते । तानि च वेदान्त-तात्पर्योपकारार्थं तस्मिन् पूर्वपक्षतया सन्निवेशितानि इति । अत

सांख्य-योग-माहेश्वर-पाञ्चरात्र-भागवत-मतानि अंशतः अवैदिकानि, वैशेषिक-बौद्ध-जैन-[illegible] तु ततोऽपि तथा—इत्यादि सूत्रभाष्यतः अवगम्यते—इति विशेषः। अतो वेदान्तसार-[illegible] बौद्धादीनां वैदिकमत-मूलकत्वं सिध्यति।

### उपवर्ष-शबरादिभाष्येणापि बौद्धानां प्राचीनत्वम्

ततः "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थे अनुपलब्धे, तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" इति पूर्वमीमांसायाः १।१।५ सूत्रस्य शबरभाष्येऽपि [illegible] वृत्तिकारोपवर्षवाक्यं यद् उद्धृतं, तत्र बौद्ध-क्षणिकविज्ञानवाद-खण्डनावसरे [illegible] पूर्वपक्षभूत-वाक्यबलेन बौद्धविज्ञानवादं प्रदर्श्य तस्यैव सिद्धान्तवाक्येन तन्निरसनं कृतमिति दृश्यते। उपवर्षाचार्य्यस्तु बहूनां मतेन गौतम-बुद्धादपि प्राचीनः। अस्माकमपि तथैव निर्णयः।*
एतेन प्राचीनबौद्धा वेदप्रामाण्यं स्वीकुर्वन्ति स्म—इत्यपि अवगम्यते।

तत्र पूर्वमीमांसासूत्रे (१।१।५) उपवर्षधृत-बौद्धमतम् अनूद्य शबरस्वामिना उक्तम्—"अथ अस्मिन् अर्थे ब्राह्मणं भवति, विज्ञानघन एव एतेभ्यः भूतेभ्यः समुत्थाय तान्येव अनुविनश्यति, न प्रेत्य संज्ञास्ति" इति (६५ पृः पुणा सं १८५० शकाब्दे मुद्रितपुस्तके)। ततः [illegible] उपवर्षाचार्यमतम् अनूद्य शबरस्वामिना प्रत्युक्तम् "अथ यदुक्तम्—'विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येव अनुविनश्यति न प्रेत्य संज्ञास्ति' इति, अत्र उच्यते—'अत्रैव मा भगवान् मोहान्तम् अपीपददिति परिचोदनोत्तरकाले अपहृत्य मोहाभिप्रायम् अस्य वर्णितवान्—'न वा अरे मोहं ब्रवीमि, अविनाशी वा अरे अयम् आत्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्तु अस्य भवती'ति। तस्मान्न विज्ञानमात्रं, तस्माद् वैषम्यम्" (बृ० ६।५)। (७१ पृः पुणा सं १८५० शकाब्दे मुद्रितपुस्तके)। एतेन वैदिक-दार्शनिक-ग्रन्थतोऽपि प्राचीन-बौद्धमत-सत्त्वम् अनुमीयते।

### बौद्धग्रन्थादपि बौद्धानां प्राचीनत्वम्

ततो बौद्ध-शान्तरक्षितकृत-तत्त्वसंग्रहाख्य-ग्रन्थे वैदिक-निमित्त-शाखीयं बौद्धमतमेकम् उपलभ्यते, तेन वेदप्रामाण्यं स्वीकुर्वाणाः केचन बौद्धा अपि आसन्—इत्यपि अनुमातुं शक्यते, तद् यथा—
"किन्तु वेदप्रमाणत्वं यदि युष्माभिरिष्यते। तत् किं भगवतो मूढैः सर्वज्ञत्वं न गम्यते॥ ३५११
"निमित्त-नाम्नि सर्वज्ञो भगवान् मुनिसत्तमः। शाखान्तरे हि विस्पष्टं पठ्यते ब्राह्मणैर्बुधैः॥" ३५१२

तत्र टीका—"तथा हि निमित्तं नाम शाखान्तरम् अस्ति। तत्र [illegible] भगवान् शाक्यमुनिः सर्वज्ञः पठ्यते। तत् किमिति मूढैः वेदं प्रमाणयद्भिरपि [illegible] [illegible] क्षिप्यते।" (तत्त्वसंग्रहे ९०१ पृः)। एतेन बौद्धदार्शनिक-ग्रन्थतोऽपि वेद-[illegible] प्राचीन-बौद्धमत-सत्त्वं अनुमीयते। ततश्च वेदप्रामाण्यं केषाञ्चिद् बौद्धानां स्वीकृतमेव [illegible]

---

* [illegible]

इत्यपि प्रतीयते ; यतो ये खलु ब्राह्मणा निखिल-शास्त्र-मतवादे पुरुषा [illegible] [illegible]स्तात्, नूनं ते वैदिकानां दृष्टौ बौद्धा एव, यतोऽन्यत्र वैदिकानां मध्ये निखिल-शास्त्र [illegible]त्वम् उद्घोषितम्। बौद्धानां मध्ये बहुभिः तेषां बौद्धत्वं स्वीकृतम्—इत्येव ज्ञायते।

### वेदस्य सर्वज्ञानमूलत्वम्

ततो वेदादेव सर्वविध-मनुष्योचित-लोकव्यवहारो वर्णात्मकभाषा-प्रयोगादयश्च सर्वे आविर्भूता मनुष्यसमाजे, वेदादेव एतत् सर्वम् अस्माभिः उपलब्धम्—इत्यपि ज्ञातुं शक्यते। जगत्कारण-तत्त्वानुसन्धानं सर्वरहस्यादृश्य-वस्तुतत्त्वनिर्णयः सर्वविध-दार्शनिक-मतवादा इत्येतानि सर्वाण्येव वेदादेव अस्माभिः अधिगतानि इति युक्तितः शास्त्रतश्च अवगम्यते। तत्र शास्त्रम्—

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥"

"नामरूपं च भूतानां कर्मणां च प्रवर्त्तनम्। वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः॥"

"सर्वेषां चैव नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥"

इति महाभारत-मनुसंहिता-विष्णुपुराणादिषु उक्तमस्ति। अतः सर्वज्ञानमूलं तथा सर्वव्यवहारमूलं हि वेदा एव—इति शास्त्रादपि अवगम्यते।

### युक्त्यापि तस्य समर्थनम्

युक्तितश्चापि एतत् प्रमाणयितुं यथा शक्यते तद् इत्थम्—अस्माकं सर्वे व्यवहाराः सर्वाः चिन्ताश्च वर्णात्मकभाषामूलकाः। इयं वर्णात्मक-भाषा सर्वैः सर्वथा कुतश्चित् पुरुषात् शिक्षणीया। नेयं कदाचित् स्वयं परिस्फुरति। यस्य इयं वर्णात्मक-भाषा कदापि न श्रुतिगोचरीभूता, तस्य इयं न स्वयं विकशति। शाखामृग-शृगाल-शार्दूलादिभिः अपहृता बहवः शिशवो यदा मनुष्यसमाजे कथमपि पुनरानीताः, तदा ते मानवोचितभाषा-ज्ञानविरहिता दृष्टाः। ततः यथाकालं मानवभाषा-श्रवणानन्तरं ते मानवभाषाभाषिणः अभवन्—इत्यत्र बहवो दृष्टान्ताः सन्ति। बधिरता-रोगापगमे सति मूकत्वं विलुप्यते—इत्यपि दृश्यते। सान्निपातिक-ज्वररोग-वशात् भाषा-विस्मरणे जाते तदानीं श्रुतभाषानुरूपं भाषाज्ञानं जायते, न तु पूर्वभाषा-स्फुरणं भवति। अकवर-नृपतिना परीक्षितं चेदम्। तेन सद्यः-प्रसूत-शिशुद्वयं धात्री-साहाय्येन मनुष्योच्चारित-शब्द-श्रवण-सुयोग-विरहितं कृत्वा पालितम्। तयोः [illegible] न [illegible] वर्णात्मकभाषा स्फुरिता; ततः सा भाषा यदा तयोः श्रुतिगता जाता, तदा [illegible] तौ [illegible] वर्णात्मक-भाषाभाषिणौ जातौ। एवं बहुविधैः प्रमाणैः इयं भाषा सर्वथा शिक्षिता भाषैव, न तु हास्य-क्रन्दनादिवत् स्वयं विकाश-शीला सहजा वा इत्येव प्रमाणितम्। [illegible] विना न कोऽपि मनुष्योचित-व्यवहारः कस्यापि सम्भवति, का कथा गुरु[illegible]क्रमेण [illegible]दानप्रदान-शास्त्राभ्यासादि-मूलक-व्यवहारादीनाम्। [illegible] वेदेष्वेव [illegible]पूर्विका सृष्टिः उक्ता। यथा—"स भूरिति [illegible]" [illegible]

तस्य नित्यत्वादिकम् अभिहितम्; यथा "विरूप नित्यया वाचा" इत्यादि। [illegible] [illegible]—वेदकारेण भगवता ऋषिशरीरिणा, देवर्षिमनुष्यसमाजे इयं वर्णात्मकभाषा प्रत्येकं सृष्टौ आदौ उपदिष्टा प्रचारिता च। नापि ईश्वरस्य इयम् अपूर्वा सृष्टिः, तस्य सर्वज्ञत्वात्। तेन वेदभाषा नित्या तथा अपौरुषेयी एव। वेदभाषातः पूर्वं कापि भाषा नासीत्—इत्यपि प्रायः सर्वैः स्वीक्रियते च आधुनिकैः पाश्चात्त्यभावापन्नैः अवैदिकैश्च। तस्मिन्नेव वेदे सर्वविधाः मतवादाः दृश्यन्ते। अद्वैतवादाभासरूपं विज्ञानवादि-शून्यवादि-बौद्धानां मतमपि तत्रैव दृश्यते। यथोक्तं भट्टपादैः कुमारिलैः—"विज्ञानमात्र-क्षणभङ्ग नैरात्म्यादि-वादानामपि उपनिषदर्थवाद-प्रभवत्वं, विषयेषु आत्यन्तिकं रागं निवर्तयितुम्" इति। ( तन्त्रवार्तिकम् १।३।१ सूत्रम्, पुणा-संस्करणम् १६८ पृः )

## अद्वैतमतस्य वेदमूलकत्वम्

अद्वैतमतस्य आविष्करणम् उद्भावनं वा वेदनिरपेक्षं सत् न सम्भवति, असत्त्वतया अद्वैते वेदान्य-प्रमाणाभावात्। अतो बौद्ध-जैनादि-मतवादाः अपि साक्षात् परम्परया वा सर्वे वेद-मूलकाः। यतो वेदतात्पर्य-विरुद्ध-मतवादाश्च पूर्वपक्षतया तत्र उपन्यस्ताः। वेदतः एतान् पूर्वपक्षान् सर्वान् अवगम्य पूर्वसंस्कारवशात् बौद्धादयो भिन्नमतावलम्बिनः अभवन्। अतो वेदस्य सर्वज्ञानाकरत्वे पूर्वोद्धृतशास्त्रवाक्यं युक्त्यापि समर्थितं भवति। तेन शास्त्र-युक्तिभ्यामेव समर्थितम् एतत्—यद् गौतम-बुद्धात् पूर्वमपि बौद्ध-जैन-मतादिकम् आसीदेव। तदेव प्राचीन-बौद्धमतम्। तन्मत-खण्डनाय आस्तिक-दर्शनकारैः ऋषिभिः दर्शनसूत्राणि रचितानि। महर्षि-व्यासेन तदर्थं ब्रह्मसूत्र-ग्रन्थः विरचितः।

## ब्रह्मसूत्रतः प्राचीनबौद्धमतसत्त्वम्

प्राचीन-बौद्धमत-सद्भावानुकूलम् एतद् अनुमानं ब्रह्मसूत्रशाङ्कर-भास्करादि-भाष्यैरपि समर्थयितुं शक्यते। तत्र "आकाशे चाविशेषात्" २।२।२४, सूत्रे भाष्यकारेण आदौ श्रुति-प्रमाणेन आकाशस्य अवस्तुत्वं खण्डितम्। ततस्तर्केण, ततः सुगतबुद्धवाक्येनेति दृश्यते। यथा शङ्करभाष्यम्—

"यच्च तेषामेवाभिमतं निरोधद्वयम् आकाशञ्च निरुपाख्यमिति, तत्र निरोधद्वयस्य निरु-पाख्यत्वं पुरस्तात् निराकृतम्। आकाशस्य इदानीं निराक्रियते। आकाशे च अयुक्तो निरुपाख्यत्वाभ्युपगमः, प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेः अविशेषात् आगम-प्रामाण्यात् तावत् "आत्मन आकाशः सम्भूतः" ( तैः २।१ ) इत्यादिश्रुतिभ्यः आकाशस्य च वस्तुत्वसिद्धिः। विप्रतिपन्नान् प्रति तु शब्दगुणानुमेयत्वं वक्तव्यम्। गन्धादीनां गुणानां पृथिव्यादि-वस्त्वाश्रयत्व-दर्शनात्। अपि च आवरणाभावमात्रम् आकाशम् इच्छताम् एकस्मिन् सुपर्णे पतति आवरणस्य विद्यमानत्वात् सुपर्णान्तरस्य उत्पित्सतः अनवकाशत्व-प्रसङ्गः। यत्र आवरणाभावः तत्र पतिष्यति इति चेत्? येन आवरणाभावो विशिष्यते, तत् तर्हि

वस्तुभूतमेव आकाशं स्यात्, नावरणाभाव-मात्रम्। अपि च आवरणाभाव-मात्रम् आकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगम-विरोधः प्रसज्येत। सौगते हि समये—"पृथिवी भगवः केंसन्निश्रया ?" इत्यस्मिन् प्रश्न-प्रतिवचनप्रवाहे पृथिव्यादीनाम् अन्ते "वायुः किंसन्निश्रयः" इत्यस्य प्रश्नस्य प्रतिवचनं भवति—"वायुराकाश-सन्निश्रयः" इति। तत् आकाशस्य अवस्तुत्वे न समञ्जसं स्यात्। तस्मादपि अयुक्तम् आकाशस्य अवस्तुत्वम्। अपि च निरोधद्वयम् आकाशं च त्रयमपि एतत् निरुपाख्यम् अवस्तु नित्यं चेति विप्रतिषिद्धम्। न हि अवस्तुनो नित्यत्वम् अनित्यत्वं वा सम्भवति, वस्त्वाश्रयत्वाद् धर्मधर्मिव्यवहारस्य। धर्मधर्मिभावे हि घटादिवद् वस्तुत्वमेव स्यात्, न निरुपाख्यत्वम्।" भाष्यान्तराणामपि एवमेव आशयः।

## सुगतबुद्धस्य कृतिः

एतेन सुगतापरनामगौतमबुद्धात् पूर्वं निश्चितं कोऽपि बुद्ध आसीत्, यस्य मतं सूत्रकारेण भगवता व्यासेन निराकृतम्, सूत्रकारस्य प्राचीनतरत्वात्। तदेव शाङ्करभाष्य-वचनेन विज्ञायते। बुद्धवाक्येन बुद्धमतनिराकरणं बुद्धद्वयस्वीकाराद् ऋते बुद्धस्य एकत्वे तस्य स्वविरुद्धवादित्वाङ्गीकरणं विना वा कथमपि न सम्भवति। वस्तुतः बुद्धस्य बहुत्वं प्रसिद्धमेव ! यथोक्तं लङ्कावतारे—

"काश्यपः क्रकुच्छन्दश्च कनकश्च विनायकः। अहं च विरजोऽन्ये सर्वे ते कृतिनो जिनाः" ॥८०२

"अहं चान्ये कृतयुगे शाक्यसिंहः कलौ युगे। सिद्धार्थः शाक्यतनयो विष्णुर्व्यासो महेश्वरः" ॥७९.४

तत्र क्रकुच्छन्दस्य आविर्भावकालः कलेरादौ ३१०१ शकपूर्वाब्दे; यथोक्तं विश्वकोषे। अत्र प्राचीनबौद्धसम्मतं यद् आकाशस्य अवस्तुत्वं, तन्न सुगतगौतम-बुद्ध-सम्मतमिति सुस्पष्टमेव। तेनेदम् अनुमीयते, यत् कपिल-कणाद-गोतम-व्यासादिभिः प्राचीनबौद्धमते निराकृते सति सुगतापरनाम्ना गौतमबुद्धेन, ऋषिभिः अनिराकृतांशम् अवलम्ब्य बौद्धमतं पुनरुज्जीवितम् इति। बुद्धेन वेदादिशास्त्रं सर्वं वैदिकगुरुभ्य एव अधीतम्—इत्यपि बौद्धगणैरेव स्वीकृतमस्ति। दृष्टं चैतद् अश्वघोषादिकृत-बुद्धचरितादि-ग्रन्थेषु। तेन तदखण्डितांशस्य ज्ञानं बुद्धस्य पक्षे न असम्भावितमिति। तदखण्डितांशमेव गौतमबुद्धेन प्रचारितम् इति च। इयमेव गौतमस्य कृतिः।

## बौद्धमतप्रचारकाः

तदेव बुद्धेन पुनरुज्जीवित-बौद्धमतं बुद्धशिष्यैस्तथा तत्परभविकैः नागार्ज्जुन-दिङ्नाग-धर्मकीर्त्ति-वसुबन्धु-प्रभृतिभिश्च वैदिकशास्त्रपरिमार्जित-बुद्धिभिः अदृष्टवशात् स्वधर्मं त्यक्त्वा बौद्धमतं समाश्रयद्भिः सम्यक् परिपुष्टिं प्रापितम्। तैरपि त्यक्तस्वधर्मद्वेषवशात् खलु सांख्य-न्याय-वेदान्तादि-वैदिक-सिद्धान्तादिकं खण्डितम्। तेन योगभाष्यकारव्यास-न्यायभाष्य-कारवात्स्यायन-पूर्वमीमांसाभाष्यकारशवर-वेदान्तवृत्तिकारोपवर्ष-सांख्यमतप्रचारकेश्वरकृष्णाचार्य-

प्रभृतिभिः वैदिकाचार्य्यैः सर्वैः प्राचीनार्वाचीनबौद्धमतं सांख्य-न्याय-मीमांसा-वेदान्तादि-सूत्रव्याख्यादि-मुखेन बहुशः खण्डितम् ।

### नवीनबौद्धमतखण्डनकर्त्तारः

तदनन्तरम् उद्योतकर-कुमारिल-मण्डन-प्रभाकर-शङ्कर-वाचस्पत्युदयनादिभिः वैदिकाचार्य्यैः एतद्बौद्धमतखण्डनयज्ञे पूर्णाहुतिः प्रदत्ता । एवं च वैदिकाचार्य्यैः शङ्करादिभिः बौद्ध-जैनमत-खण्डनार्थं तत्तन्मत-व्याख्यानकाले महावीर-बुद्धाद्यस्तनानां समन्तभद्र-दिङ्नाग-धर्मकीर्त्ति-वसुबन्धु-प्रभृतीनां वाक्यमपि क्वचिद् उद्धृतं क्वचिद् अनूदितं वा दृश्यते तेषां ग्रन्थादीनां मध्ये । नैतावता ब्रह्मसूत्रस्य आधुनिकत्वं सिध्यति ।

### अनभिज्ञपाश्चात्यादीनां मतनिरासः

परन्तु एतेषां जैन-बौद्धाचार्य्याणां वाक्यादीनि वेदान्तादि-सूत्रव्याख्यान-मध्ये अवलम्बितानि दृष्ट्वा पाश्चात्त्यैः "किथ"-प्रभृतिभिः तदनुवर्त्तिभिश्च सर्वैः, ततश्च अस्मद्देशीय-शास्त्रि-गुप्त-प्रभृतिभिः वैदिक-दर्शनादीनि पुराणादीन्यपि शास्त्राणि सर्वाणि बौद्धदिङ्नागादीनां परवर्त्तीनीति कल्प्यते । वेदस्य सर्वज्ञानाकरत्वम् अपौरुषेयत्वादिकं च अजानद्भिः अस्वीकुर्वद्भिश्च तैः, गौतम-बुद्धात् पूर्वं बुद्धमतास्तित्वं न कल्पयितुं शक्यते । सूत्रकारस्य व्यासस्य गौतमबुद्धात् अर्वाचीनत्वं न युक्तं, पाराशर्याभिन्नकृष्णद्वैपायनस्य व्यासस्य बादरायणस्य सूत्रकारत्वात् । उक्तं च एतत् यथास्थानं, नात्र पुनरालोचनीयम् । आस्तां तावत्, एतेन प्रतिपादितं—बौद्धादिमतं वेदान्ते न दृश्यते—इति यदुक्तं तद् असङ्गतम्, नापि ब्रह्मसूत्रादिकं न कलेरादौ रचितम्—इति यद् उक्तं, तदपि सङ्गतम् । एवं च ब्रह्मसूत्राणि न श्रुत्यर्थमात्रमीमांसा-रूपाणि परन्तु व्यासस्यैव मतविशेषप्रतिपादकानि—इति यद् आशङ्कितं तन्न क्षोदक्षमं भवति ।

### गौडपादीयमतस्य बौद्धमतत्वशङ्कानिरासः

अत्रापि केचित् पाश्चात्त्य-मतावलम्बिनो मन्यन्ते—अद्वैतवेदान्त-सिद्धान्तो नागार्जुन-दिङ्नागासङ्ग-वसुबन्धु-प्रभृति-प्रवर्त्तितं बौद्धशून्यवादं विज्ञानवादं च अनुसृत्य आदौ वेदान्ताचार्य-गौडपादाचार्य्येण प्रचारितः, ततस्तत्-प्रशिष्य-शङ्कराचार्य्येण प्रस्थानत्रय-व्याख्यान-मुखेन प्रपञ्चितः । नायं सिद्धान्तः श्रुति-स्मृतिसूत्रेषु दृश्यते, गौडशङ्करादिभिः श्रुत्यादीनां व्याख्यान-कौशलेनैव एतस्य श्रौतत्वं प्रतिपादितमिति । एतदर्थं तैः गौडपादीयागमाख्य-ग्रन्थस्य चतुर्थ-परिच्छेदस्य तात्पर्य्येण सह बौद्धमत-सादृश्यं प्रदर्श्यते । प्रायेण बौद्धव्यवहृत-शब्दानां प्रयोगश्च तत्र वर्त्तते इति च तेषां जल्पनम् । मङ्गलाचरणश्लोके "द्विपदांवरम्" इति पदेन बुद्धस्य प्रणतिः कृता इत्यपि तैः प्रतिपाद्यते । ततः वेदान्ताचार्य-गौडपादेन तदीयवेदान्तग्रन्थे बुद्धमत-[illegible] हेतुः, तैः यः प्रदर्श्यते, स तु बौद्धानां विज्ञानवाद-शून्यवादानाम् आलोचनम् एकस्मिन् [illegible] [illegible] साधारणविषयान्तर्गतत्वेन परिगणितम् आसीदिति । यथा—[illegible]

(१।१।५) सूत्रभाष्ये, श्लोकवार्त्तिके निरालम्बवादः शून्यवादश्च (पृः २१७-२४५), तथा ब्रह्मसूत्रे २।२।२८-२९ सूत्रभाष्ये, बौद्धमतालोचनमिति। एवं च योगदर्शनस्य व्यास-भाष्येऽपि बौद्धमतालोचनं दृश्यते। गौडपादीयागमस्य चतुर्थपरिच्छेदस्य यत् शङ्करभाष्यं, तदपि न प्रसिद्धशङ्कराचार्यविरचितमिति। अतो गौडपादेन तदीयग्रन्थे यः ब्रह्मवादः परिकीर्त्तितः, स न श्रौतब्रह्मवादः, किन्तु तत्र बौद्धविज्ञानवाद-शून्यवादवर्णनमेवेति बोद्धव्यम् इति।

नैतत् सङ्गतम्। ब्राह्मण्य-शास्त्रेषु यद् बौद्धमतालोचनं, तत् तस्य खण्डनाय, न तु तस्य प्रचयगमनाय, न वा तस्योपादेयत्व-प्रतिपादनाय। शावर-भाष्यादिषु सर्वत्र बौद्धमत-खण्डनमेव दृश्यते। तदर्थं यथाप्रयोजनं बौद्धमत-वर्णनं कृतम्। अतस्तत्र बौद्धमत-वर्णनं न ब्राह्मण्यशास्त्राणां साधारण-विषयान्तर्गतत्वेन संवृत्तम्। अत्रापि गौडपादीयागमे स्वमत-वर्णनेन बौद्धमतं प्रत्युक्तमेव। ततश्च अन्तिमश्लोके "नैतद् बुद्धेन भाषितम्" इत्युक्त्या बौद्धमतात् स्वमतस्य भेद एव प्रदर्शितः। निर्विकल्पावस्थायां बुद्धस्य भाषणं न सम्भवेद् इति कृत्वा तस्य समर्थने, "एतत्"-पदस्य व्यर्थतापत्तेः, एतत्-पदस्य विशेष-बोधकत्वात्, निर्विकल्पावस्थायां भाषणसामान्यनिषेधस्यैव उचितत्वात्। चतुर्थपरिच्छेदस्य भाष्यं न शङ्करकृतमिति यदुक्तं तत् तु साहसमात्रम् अप्रामाणिकोक्तिरेव च।

### श्रौतबौद्धविज्ञानवादयोर्भेदः

ततश्च अत्र यो विज्ञानवादो वेदान्ताचार्येण प्रपञ्चितः, स न बौद्धविज्ञानवादः। उभयोर्मध्ये महान् प्रभेदो वर्त्तते खलु। वेदान्तिनां विज्ञानं "सत्यं ज्ञानमनन्तं ब्रह्म" (तै २।१)। "विज्ञानमानन्दं ब्रह्म" (बृ ३।९।२८) इत्यादि श्रुतिचोदितं नित्यं सद् वस्तु। बौद्धानां विज्ञानं क्षणिकम्। तन्मते साकार-निराकारोभयविध-विज्ञानमेव[1] क्षणिकम्। "यत् सत् तत् क्षणिकम्" इत्यनुमानात् "क्षणिकं क्षणिकम्" इत्यादि बुद्धवचनाच्च[2]। ततश्च तद् विज्ञानं सद्वैतमेव, न तु अद्वैतम्। तेषां या "अद्वयलक्षणो"क्ति[3] दृश्यते सा ग्राह्य-ग्राहकाभावरूपत्व-बोधनाय आलय-विज्ञानस्य। एतादृशं बहुविज्ञानं प्रत्येकं भिन्नम्, तस्य धारा-स्वीकारात् पुरुषभेद-स्वीकाराच्च। तेन तस्य संख्याबहुत्वमेव सिध्यति। वेदान्तिनां यद् विज्ञानं, तत् नित्यम् एकम् अद्वैतम्। अतः श्रौतबौद्धविज्ञानवादयोः महान् भेदो वर्त्तते एव।

ततश्च गौडपादीयागमस्य चतुर्थपरिच्छेदस्य यदि बौद्धत्वं स्यात्, तदा कथं नैकस्मिन्नपि बौद्धग्रन्थे गौडपादस्य, तदीयागमाख्य-ग्रन्थस्य वा बौद्धानुसारित्वम् उद्घोषितं? न वा तन्मतं तद्वचनं वा बौद्धग्रन्थे स्वमतानुकूलतया उद्धृतं दृश्यते श्रूयते वा? तेन एतत् कल्पनं सुतराम् अमूलकमेव। शङ्करपरवर्त्ति-वैष्णवाचार्यवृन्दः शङ्करमतस्य बौद्धमतत्व-प्रतिपादनाय बद्धपरिकरो

(१) अद्वयवज्रसंग्रहः तत्त्वरत्नावली (१७-१८ पृः)। (२) सर्वदर्शनसंग्रहः। (३) [illegible] (२६)।

दृश्यते, तैरपि एतद्ग्रन्थस्य बौद्धत्वं न प्रतिपादितम्, प्रत्युत माध्वमतेन एतदागमस्य श्रुतित्वम् अङ्गीक्रियते। ततस्तेषां मतानामेव बौद्धमतत्वप्रतिपादनं सुकरम्। यतः तैः विज्ञानस्य विज्ञेयत्वम् अङ्गीक्रियते, केश्चिद् वा असतो दृश्यत्वं च स्वीक्रियते इत्यादि। अतो वैष्णवाचार्याणां गौड-पादस्य बौद्धत्वप्रतिपादनं न सङ्गतम्। अन्यदेतत्, प्रकृतम् अनुसरामः।

### गौडपादस्य बौद्धत्वं न सम्भवति

गौडपादीय-मतेन सह बौद्धमत-सादृश्यं न गौडपादीयमतस्य बौद्धत्व-प्रतिपादकम्। गौडपादस्य बौद्ध-सम्बन्धाभावात्, एतदनुकूल-प्रवादाभावाच्च। गौडपादस्य व्यासपुत्रशुकशिष्यत्व-प्रसिद्धः गौडपादस्यैव प्राचीनत्वं सिध्यति। तेन गौडपादस्य बुद्ध-नागार्जुन-दिङ्नागाद्यनुसरणं न सम्भवति। ततश्च प्रायेण स्वाच्छन्द्यकामिनः स्वधर्मभ्रष्टाः प्रलुब्धा जनगणा एव बौद्धा बभूवुः, न कोऽपि आजन्मतो बौद्धो वैदिकधर्मं समाश्रित्य वैदिकसमाजे प्रविष्टोऽभवदिति श्रूयते। विप्रभिक्षोः धर्मकीर्तेर्मातुलः पितृव्यो वा मीमांसाचार्य्यः कुमारिलः। स तस्य गुरुरासीत्। अस्य कुमारिलस्य बौद्धमतसमाश्रयो बौद्धमत-खण्डनाय, धर्मकीर्त्त्या सह विचारे पराजितस्य विजेतृधर्म-ग्रहणरूपप्रतिज्ञा-रक्षणाय च, न तु वैदिक-धर्मपरिपोषणाय। तेन बौद्धेन सता बौद्ध-न्यायं परिज्ञाय बौद्धमतम् अन्ते खण्डितम्। एवं च कुत्रापि वैदिकमते बौद्धमत-प्रवेश-सम्भावना नाभवत्। अतो बौद्धा गौडपादमतमेव अनुसृतवन्तः, न तु तद्विपरीतं सम्भवति कदाचित्, गौडपादस्य प्राचीनत्वात्, बौद्धानां वैदिकमतसमाश्रयभावात्, बौद्धानां वेदबाह्यत्ववैदिकसमाज-बहिर्भूतत्वादिदोष-वशेन गुरुशिष्यादि-सम्बन्धाभावाच्च।

बौद्धव्यवहृत-शब्दप्रयोगश्च गौडपादीयागमे न तत्र विनिगमको भवति, शब्दव्यव-हारस्य स्वेच्छामूलकत्वात्। बौद्धैर्न संस्कृतभाषा उद्भाविता। तादृशशब्दानां गौडपादतोऽपि प्राचीनशास्त्रेषु श्रुत्यादिषु प्रसिद्धत्वाद् बौद्धैरेव अत्र गौडपादस्य अनुसरणं कृतमिति सम्भाव्यते, गौडपादस्य प्राचीनत्वात्, वेदान्ताचार्यत्वेन प्रसिद्धत्वाच्च।

### मङ्गलाचरणश्लोकविचारः

गौडपादीयागमस्य मङ्गलाचरण-श्लोके यद् 'द्विपदांवरम्' इति पदं, तस्य महाभारते रामायणेऽपि भूरिशः प्रयोगो दृश्यते। महाभारत-रामायणादीनां बुद्धादपि प्राचीनत्वं प्रसिद्धमेव; नल-भीमार्जुन-भीष्मादिषु मनुजश्रेष्ठेषु तस्य प्रयोगात्। द्विपदांवरार्थकं 'द्विपदांवरिष्ठ'-पदं नारायणेऽपि प्रयुक्तं महाभारते नारायणीयपर्वाध्याये दृश्यते। तथैव व्याख्यातं शङ्करभगवता तत्पदव्याख्याने प्रवृत्तेन आगमभाष्ये। न वा एतत् पदं वैदिकानां बौद्धानां वा कोशादौ बुद्धपरत्वेन गृहीतम्। यौगिकः शब्द एवैषः, न तु योगरूढः। कोषादौ [illegible] व्यवहारस्तत्र योगरूढत्व-कल्पनं न समीचीनम्। अतस्तस्य योगरूढत्वकल्पनं [illegible] निरर्थकमेव।

### स्वधर्मभ्रष्टविशेषाणां बौद्धत्वम्

अत्र ये खलु वैदिका बौद्धा अभवन्, तेषां विवरणं यथा विद्याम्बुधिना नैयायिक-शिरोमणिना उदयनाचार्येण प्रदत्तम्, तस्य कुसुमाञ्जलिग्रन्थे तथा आत्मतत्त्वविवेके, तदत्र स्मर्त्तव्यम्। तस्य किञ्चिन्मात्रम् अत्र उद्घ्रियते, यथा—

"सम्भवति चैते हेतवो बौद्धाद्यागमपरिग्रहे। तथा हि—भूयस्तत्र कर्मलाघवम् इति अलसाः। इतः पतितानामपि अनुप्रवेश इति अनन्यगतिकाः। भक्ष्याद्यनियम इति रागिणः। स्वेच्छया परिग्रह इति कुतर्काभ्यासिनः। पित्रादि-क्रमाभावात् प्रवृत्तिरिति पाषण्ड-संसर्गिणः। "उपयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते" इत्यादिश्रवणाद् अव्यग्रताभिमानिनः। सप्तघटिकाभोजनादिसिद्धेः जीविका इति अयोग्याः। आदित्य-स्तम्भनं, पाषाणपाटनं, शाखाभङ्गो, भूतावेशः, प्रतिमाजल्पनं, धातुवाद-इत्यादि बन्धनात् कुहक-वञ्चिताः। ततस्तान् परिगृह्णन्ति इति सम्भाव्यते। अतो न ते महाजन-परिगृहीता इति विभागः" ( कुसुमाञ्जलिः ३३१ पृः )। आत्मतत्त्वविवेके कीर्तिनाम्ना बौद्धनिन्दनमपि दृश्यते। ४र्थः परिच्छेदः ४३१ पृष्ठः द्रष्टव्यः।

एवं सति यत्र एतादृशम् अवज्ञान-हतादरादिकं बौद्धान् प्रति वैदिकानां, तत्र तयोर्मध्ये विद्यादानादान-सम्बन्धादिकं तथा वैदिकधर्मज्ञानयोर्मध्ये बौद्धमतानुप्रवेश-कल्पनम् उन्मत्तानामेव शोभते।

### विवरणवाक्येन तस्य बौद्धविज्ञानवादितानिरासः

ततश्च विज्ञाने प्रतिभास्यमानत्वं बौद्धानां भास्करादीनां च, न तु अद्वैतिनाम्—इत्यपि एकं महद् वैलक्षण्यम् अद्वैतबौद्धमतयोः। उक्तं च पद्मपादिकाकृद्भिः—

"तदेव अहंकर्त्तुः सदैकरूपावगमात् स्थायित्वेऽपि अर्थक्रिया-सम्भवात् न नीलस्य स्वगतापरोक्षत्व-मात्रेण माहायानिकपक्षः समर्थ्यते, किन्तु ग्राहकस्य अहं-कर्त्तुरात्मनः स्थायिनोऽभावे"—इत्यादिकम्।

विवृतञ्च एतद् विवरणकृद्भिः—"ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम्। सत्यम्। विज्ञाने प्रतिभास्यमानत्वं च तव ( भट्टभास्करस्य ) तस्य च तुल्यम् इति विज्ञानवादस्त्वदीयं ( भास्करीयं ) दर्शनं किं न स्यात्? सत्यपि प्रतिभास्यत्वे सत्यमिथ्या-विभागोऽस्ति इति चेत्? इहापि सत्यपि मिथ्यात्वे अर्थक्रियासमर्थ-सत्त्वासत्त्व-विभागोऽस्त्येव। कल्पितत्वे नेयं विभागसिद्धिरिति चेत्? प्रतिभास्यत्वेऽपि न सत्यमिथ्या-विभागसिद्धिः" इत्यादि।

एतेनापि अद्वैतबौद्धमतयोः प्रभेदः प्रतीयते। एतेन भट्टभास्करस्य समयोऽपि अवगम्यते। स तु शङ्कर-समसामयिक एवेति इत एव सिध्यति—इत्यपि अत्र ध्येयम्, पद्मपादेन भास्कर-मतस्य उल्लेखात।

### गौडपादमतस्य शून्यवादत्वशङ्कानिरासः

न वा गौडपादमतं बौद्धानां शून्यवादः। केषाञ्चिद् बौद्धानां मते तत्त्वं शून्यं, तच्च शून्यम् असदेव। अपरेषां बौद्धानां मते तु शून्यं सदेव। अन्येषां बौद्धानां मते पुनः चतुष्कोटि-विनिर्मुक्तं निरुपाख्यम् अवस्तु एव शून्यम्। एतेषां नैकमपि मतं गौडपादाभिमतम्, तन्मते तु अज-नित्यैकाद्वैत-सद्वस्तुस्वीकारात्। ततश्च असच्छून्यवादोऽपि असङ्गतः, असतः सत्त्वेन प्रतीत्यर्हत्वं न सम्भवति। यत्र किञ्चित् तत्त्वमपि नास्ति, तत्र तादृशी प्रतीतिः असम्भाविनी। दृश्यजातस्य स्वरूपं यदि असत् स्यात्, तदा तत्र किञ्चित्त्व-प्रतीतिर्न सङ्गता। युक्त्यादिभिः यत्र सिध्यति, तत्र असत्त्वं वा शून्यत्वं वा कल्पयितुं न शक्यते। अतः असच्छून्यवादो न युक्तिसहो न वा श्रुतिसम्मतः। गौडपादीयमतस्य श्रुतियुक्तिसिद्धत्वं प्रसिद्धमेव। अतो न असच्छून्यवादो गौडपादस्य मतम्। न वा बौद्धानां सच्छून्यवादः तस्य मतं भवति, बौद्धमते सतः क्षणिकत्व-स्वीकारात्। "यत् सत् सत क्षणिकम्" इत्येव तेषां तत्र अनुमानम्। वेदान्तिनां यत् सद् वस्तु तन्नित्यं निष्क्रियम् अजम् एकमेवाद्वितीयम् स्वप्रकाशं श्रुतिसिद्धमेव। श्रौतस्य तस्य युक्त्या सम्भावना-मात्रं कल्पयितुं शक्यते। अतो वेदान्तिनां सद् वस्तु न बौद्धोक्तं सद् भवेत्। बौद्धैः सतोऽक्षणिकत्वाद्वैतत्व-स्वप्रकाशत्व-स्वीकारे तैः औपनिषदं मतं समाश्रितम्, उपनिषदां प्राचीनत्वात् बौद्धानामपि औपनिषद-ज्ञानसद्भाव-स्वीकाराच्च। मैत्रायणि-नृसिंहतापनीयोपनिषदोः 'शून्य'-पदं ब्रह्म-परत्वेन व्यवहृतम्, अविचारितप्रपञ्चाक्षेपात्। उपनिषदां पौरुषेयत्वार्वाचीनत्वकल्पनेन एतस्य परिहारप्रयासो वैदिकशिक्षाविरहितानां म्लेच्छानां एव वा शोभते, तेन नास्माकं काचिदपि क्षतिः। शून्यासत्त्ववादिनां कृते एतदेव पुष्कलं यत्—असतो भावोत्पत्तिः, सत्त्वेन प्रतीत्यर्हत्वं वा सत्तादात्म्यं विना न सम्भवति कथञ्चन। अतो गौडपादमतेन सदधिष्ठानत्वेन दृश्यानां प्रतीतिः इत्युच्यते ; यथा गौडपादीयागमे—

"उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम्" ॥४।३८ इति

इत एव स्पष्टं प्रतिभाति—शून्यासत्त्व-वादिनां मतं न गौडपादमतम्। * अथ चतुष्कोटि-विनिर्मुक्तं निरुपाख्यम् अवस्तु शून्यमपि न गौडपादेन उपदिष्टम्। चतुष्कोटि-विनिर्मुक्तत्वं नाम "न सत्त्वं, नासत्त्वं, न सदसत्त्वं, न सदसद्भिन्नत्वम्"। अत्र तु द्वौ पक्षौ सम्भवतः। अथः—अर्थक्रियाकारित्वं सत्त्वम्, तद्भिन्नम् असत्त्वम् इति कृत्वा तादृश-चतुष्कोटि-विनिर्मुक्तत्वं साधितम्। एतन्मते चतुष्कोटि-विनिर्मुक्तत्वं यत्किञ्चिद् अस्तित्व-मात्रमपि भवेत्। अन्यत्तु—न अर्थक्रिया-कारित्व-राहित्यम् असत्त्वम्, किन्तु अवस्तुत्वमेव असत्त्वम्। अथवा अनस्तित्वमेव तत्। अन्यथा चतुष्कोटि-राहित्यं न निरुपाख्यम् अवस्तु भवेत्। वेदान्तिनां मते तु अर्थक्रिया-कारित्व-राहित्यं सद्ब्रह्म-वस्तुनोऽपि सम्भवेत्। अतो बौद्धैः चतुष्कोटि-विनिर्मुक्तत्वेन वस्तु

---

* एतदर्थं पण्डितप्रवर श्रीहाराणचन्द्रशास्त्रिपादानां प्रबन्धादिकम् अनुसन्धेयम्।

सत्त्वस्य निषेधः कृतः, तत् सत्त्वं न अर्थक्रियाकारित्वं, परन्तु तद् अस्तित्वमात्रमेव। एवं च बौद्धानां चतुष्कोटि-राहित्यं शून्यम्—इति मते न गौडपादस्य शून्यवादित्वं कल्पनीयम्। तच्च अजाति-वादेन न सम्भवति। तन्मते निष्क्रियं शुद्धं सद्वस्तु एव केवलम्। गौडपादस्य अजातिवादेन न एतादृशम् अजं साम्यं सदेव वस्तु स्वीकृतं भवति। वस्तुतस्तु द्वितीयकल्पानुसारि-चतुष्कोटि-विनिर्मुक्तत्वम् असत्त्वस्य नामान्तरमेव। अतो गौडपादीयमते काचिदपि बौद्धशून्यवादिता-कल्पना सुदूरपराहतैव।

## बौद्धानां गौडपादीयमतानुसरणम्

श्रीमदुदयनाचार्य-वाक्येनापि एतस्य समर्थनं कर्तुं शक्यते। तेनोक्तम्—शून्य-वादिभिः कुत्रापि शून्यस्य स्वप्रकाशत्वं न स्वीकृतं नापि सूचितम्। अनुमानकुशलैरपि बौद्ध-शून्यवादि-वाक्यतः शून्यस्य स्वप्रकाशत्वम् अनुमातुं न शक्यते। अत एव आत्मतत्त्वविवेक-ग्रन्थे शून्यवाद-निराकरणावसरे अभिहितम् उदयनाचार्यैः—

"अस्तु तर्हि शून्यतैव परमनिर्वाणम्—इति चेत्? न। सा हि यदि असिद्धा, कथं तदवशेषं विश्वम्? परतश्चेत् सिद्धा, परोऽपि अभ्युपगन्तव्यः। स च परो यदि संवृतिरेव, विश्व-शून्यतयोर्न कश्चिद् विशेषः, कथं तदपि अवशिष्येत? असंवृतिश्चेत् परः, परत एव सिद्धा, अनवस्था। स्वयम् असिद्धा चेत् कथं शून्यत्वमपि साधयेत्? स्वतःसिद्धा चेत्? आयातोऽसि मार्गेण", इत्यादि।

एतेन गौडपादस्य मतं न बौद्धशून्यवादः कथमपि भवति। श्रुतिप्रामाण्यम् अनादृत्य गौडपादीय-श्रौत-सद्ब्रह्मवादं च विकृत्य बौद्धैः शून्यवादः परिकल्पित एवेति। प्रागुक्त-विष्णुपुराणवाक्यमपि समर्थयति चैतत्। एवं च गौडपादस्य बुद्धादपि प्राचीनत्वम् अव्याहत-मेव, गौतम-बुद्धमतादपि प्राचीनबौद्धमतसत्त्वं च सिद्धम्। तेन ब्रह्मसूत्रादि-दर्शनशास्त्राणां गौतमबुद्धादपि प्राचीनत्वं प्रमाणितम्। तेषां कलेरादौ आविर्भावश्च अबाधित एवेति। तेन च ब्रह्मसूत्रस्य श्रुत्यर्थ-मीमांसा-रूपत्वादिकं सुसिद्धमेव। कथं तर्हि गौडपादीयवाक्यं "नैतद् बुद्धेन भाषितम्" (गौः आः ४ प्रः ९९ श्लोः) इति संगच्छते। तत्र ब्रूमः—सुगतगौतमबुद्धात् पूर्वतनबुद्धमतेन सह औपनिषदसिद्धान्तस्य भेदप्रदर्शनार्थम् एतत्। अतः प्राचीनबुद्धमतसत्त्वं प्रामाणिकमेव।

## ब्रह्मसूत्रस्य श्रुत्यर्थमीमांसकत्वे शंकानिरासः

अथापि यद्यत्र शङ्क्येत—तत् कथं भगवत्पादैः शङ्कराचार्यैः स्वकीय-ब्रह्मसूत्रभाष्ये द्वितीयाध्याय-द्वितीयपादे बौद्धादिमत-खण्डनावसरे वेदतात्पर्य-पूर्वपक्षभूतानि बौद्ध-जैनादि-मतमूलकानि श्रुतिस्मृति-वाक्यादीनि न प्रदर्शितानि? यतः तत् न कृतं, तेन ब्रह्मसूत्रमध्ये सर्वत्र न श्रुतिमीमांसा कृतेति कथं न अनुमीयते?

नैतत् सङ्गतम्। बौद्धादिमतं श्रुतिमूलकमपि न श्रुत्यनुगतम्। गौतमादिभिः बौद्धैः श्रुतिर्न प्रमाणत्वेन समाश्रिता, प्रत्युत तदप्रामाण्यमेव उद्घोषितं तैः। यद्यपि प्राचीनैः बौद्धैः वेदप्रामाण्यं स्वीक्रियते स्म, तथापि तद् गौतमादिभिः बौद्धैः नाङ्गीकृतम्। पक्षान्तरेण बहुभिः बौद्धैः वेदप्रामाण्यं खण्डितं निन्दितमपि। एतदर्थं तत्त्वसंग्रहादयो ग्रन्था अनुसन्धेयाः। अतः प्रायेण तर्कबलेनैव एतेषां मतानां खण्डनं कृतं भाष्यकारैः। (शं० भा० २।२।२८ सूत्रं द्रष्टव्यम्।); तत्त्वबुभुत्सुभिः बौद्धादि-मतमूलानि पूर्वपक्षभूतानि श्रुतिवाक्यानि आविष्करणीयानि इत्येव खलु भाष्यकाराणां तत्र आशयः। अतोऽत्रापि श्रुतिमीमांसा प्रकारान्तरेणैव साधिता, तेन नात्र व्यभिचाराशङ्का करणीया। एतदर्थं वेदान्तसाराख्यः ग्रन्थः द्रष्टव्यः।

### बौद्धमतं सांख्यवैशेषिकवेदान्तमतमिश्रणफलम्

वस्तुतस्तु यदि बौद्धमत-विश्लेषणं कृतं स्यात्, तदा सर्वास्तित्व-वादिबौद्धमतं तथा विज्ञानवादि-शून्यवादि-मतद्वयम्—एतत् मतत्रयमेव सांख्य-वैशेषिक-वेदान्तमत-संमिश्रण-रूपमेवेति प्रतिभाति। नात्र एतदतिरिक्तं तत्त्वं किमपि तत्र विद्यते। बुद्धेन भगवता नूतनं किमपि नाविष्कृतम्। यत् तु नूतनं तत् तेषां संमिश्रणमात्रं तस्य उपपत्तिरूपमात्रं च तेन तेषां मतानां विकृतिमात्र-साधनं कृतम् इत्येव सिध्यति। तथा हि वैशेषिकाणां मते यः कार्याणां निरन्वयविनाशः, सांख्यानां मते यच्च धर्मधर्मिपरिणामादिकम्, तदेतत् सिद्धान्तद्वयम् एकीकृत्य बौद्धानाम् आन्तरबाह्यपदार्थानां क्षणिकत्वं, सन्तानादिकञ्च कल्पितम्। बौद्धानां सांख्य-मतानुसारित्वं सप्तमाष्टम-शतकीय-बौद्ध-शान्तरक्षितकृत-तत्त्वसंग्रहाख्य-ग्रन्थतोऽपि प्रमाणयितुं शक्यते। तत्र वसुमित्र-प्रभृति-सुप्रथित-बौद्धाचार्य-चतुष्टयानां मतं सांख्य-परिणामवादानुविद्धम् इति उक्त्वा तत्त्वसंग्रहकार-शान्तरक्षितेन तट्टीकाकार-कमलशीलेन च खण्डितम् आस्ते इति दृश्यते। बुद्धभगवत उपदेष्टा अराडकालमः कश्चित् सांख्याचार्य आसीत्—इत्यपि अश्वघोषकृत-बुद्धचरितादि-ग्रन्थे दृश्यते। अतो बौद्धमत-खण्डनं सांख्य-वैशेषिकादीनां मत-खण्डन-सदृशमेव। तेन यथा सांख्यादि-मतखण्डने ब्रह्मसूत्रस्य श्रुतिमीमांसारूपत्वं संभवेत् तथा बौद्धजैनादि-मतखण्डने अपि तस्य श्रुतिमीमांसारूपत्वं न व्याहन्येत। तथैव बौद्धानां क्षणिक-विज्ञानवादो वेदान्तिनां ब्रह्मणो विज्ञानस्वरूपत्वं विहाय वृत्तिज्ञानस्य क्षणिकत्वम् अवलम्ब्य उद्भावितः। दृश्यानां मिथ्यात्वम् अनिर्वचनीयत्वं वा यद् वेदान्तिनां मतं, तदेव आश्रित्य बौद्धैः शून्यवादः प्रवर्तितः। तेन केचिद् बौद्धाः सत्शून्यवादिनः, केचिच्च असत्शून्यवादिनः जाताः। वैभाषिकाणाम् असत्कार्यवादः, सौत्रान्तिक-योगाचाराणां सत्कार्यवादश्च वैदिक-दार्शनिक-मतानुकरणमेव, यतस्तन्मते असत्-कार्यवादः सत्कार्यवादः सत्कारणवादश्च इति वाक्यत्रयेण सर्वे दार्शनिकमतवादाः संगृहीताः। शून्यस्य सत्त्ववादि-बौद्धानां मते सत्कारणवादः स्वीकृतः स्यात्। असत्-शून्यवादः एव वेदान्तिभिः निरस्यते। वैदिक-देवतादीनां प्राचुर्यं बौद्धमते दृश्यते एव। उपासनं च तेषां वैदिक-[illegible]

प्रधानुसरणेन। योगदर्शनात् तेषां साधनपद्धतिः उद्भाविता। एवं च बौद्धमतं वैदिकमतस्य विकृतरूपमेवेति निश्चीयते। पाश्चात्त्यपण्डित-वर्गाणां यद् वैदिकानां बौद्धमतानुसरणता-प्रतिपादनं, तत् तु तेषाम् अनभिज्ञताया निदर्शनमेव। तेन बौद्धादि-मत-खण्डनेन ब्रह्मसूत्रस्य न श्रुतिमीमांसादिरूपत्वं बाध्यते।

## ब्रह्मसूत्रे मतविशेषाभावशङ्कानिरासः

अथात्र केचन मन्यन्ते—ब्रह्मसूत्रं न किमपि मतवाद-विशेषं समाश्रित्य रचितं भगवता व्यासदेवेन। शैव-शाक्त-वैष्णवादयः सर्वे उपासका निःश्रेयसाभिलाषिणो ज्ञानिनो योगिनो वापि यथा अष्टादश-पुराणादिषु स्वस्वमतानुकूल्यं लभन्ते, शैवाः शिवपुराणादिषु, वैष्णवा विष्णुपुराणादिषु, तथा सर्वे दार्शनिक-मतवादिनो द्वैत-द्वैताद्वैत-विशिष्टाद्वैतवादिनो ब्रह्मसूत्रेषु स्वस्वमतानुकूल्यं लभेरन्—इति कृत्वा ब्रह्मसूत्रं रचितं भगवता व्यासदेवेन। सर्वे सम्प्रदाया ब्रह्मसूत्रेभ्यः स्वाभीष्टं प्राप्नुयुः—इत्येव ब्रह्मसूत्रकृताम् आशय आसीत् इत्येव युक्ततरम्। अतो ब्रह्मसूत्रेषु व्यासप्रोक्तश्रौतमतविशेषस्य सद्भावासद्भाव-निर्णय-प्रचेष्टा अत्र निष्फला एवेति प्रतिभातीति।

नैतत् कल्पनं समीचीनम्, यतः पुराणादिवत् न एतद् ब्रह्मसूत्रं भवति; पुराणादीनां संख्या-बाहुल्यात्, ब्रह्मसूत्रस्य तदभावात्। महापुराणानि संख्यया अष्टादश, उपपुराणानि च, ब्रह्मसूत्रं तु एकमेव। नैकं ब्रह्मसूत्रं परस्परविरुद्धवादिनां सर्वेषाम् अवलम्बनं भवितुम् अर्हति। विभिन्नग्रन्थस्य विभिन्नं तात्पर्यम्—इत्येव समुचितम्, न तु एकस्य ग्रन्थस्य तद् युक्तम्। अत एतत् कल्पनम् असङ्गतमेव। न वा अधिकारिभेदेन एतत् समाधातुं शक्यते। यतः अधिकारिणां मध्ये अत्र श्रेष्ठत्वाश्रेष्ठत्व-विवेचनं न असङ्गतम्। सर्वेषाम् उपासकानां स्वस्वेष्टदेवता प्रशस्यतमा इति मन्तव्येऽपि साधनावस्थानुसारेण सामर्थ्यानुसारेण च अधिकारिणां मध्ये श्रेष्ठत्वाश्रेष्ठत्वं वर्त्तते एव। उपासकानां मध्ये सर्वश्रेष्ठाधिकारिणः कृते यन्मतं, तद्धि जीवब्रह्मणोः भेदाभेद-विषयकं, तन्न निकृष्टाधिकारिण उपयोगि। निकृष्टाधिकारिणः कृते यन्मतं स्यात् तन्न पूर्णं सत्यं भवति। उत्तमाधिकारिणम् उद्दिश्य यन्मतम् उपदिश्यते, तदेव अविमिश्रं पूर्णं सत्यं च भवति। एवं चेद् एतद् ब्रह्मसूत्रं न हृदयतो नानाविरुद्ध-मतोपजीव्यं भवेदिति। * विचारशीलानां मनन-निदिध्यासन-पराणाम् उत्तमाधिकारिणां कृते एतस्य प्रयोजनम्। अतः सर्वे सर्वाणि मतानि प्रमापयितुं शक्नुयुरिति व्यासाभिमतं न कदापि सम्भवति। तेन च ब्रह्मसूत्राणां व्यासाभिमत-निर्णय-प्रयासो न व्यर्थ इति सिद्धम्। तथापि नैतत् तत्त्वविषयकं, परन्तु ग्रन्थरचना-कौशल-विषयकमेव। तत्त्वविषयकं यद् व्यासमतं तत् तु श्रुतितात्पर्यमेव।

---

* ब्रह्मसूत्र-श्रीकण्ठभाष्यटीका-शिवार्कमणिदीपिकारम्भे आचार्य्यश्रीमदप्पयदीक्षितैरेव एवमेव उक्तं दृश्यते।

## श्रुत्यर्थमीमांसैव ब्रह्मसूत्रप्रयोजनम्

एवं च यावद् आलोचनं करिष्यते, तावदेतत् स्पष्टं भवेत्, यद् ग्रन्थेनानेन ग्रन्थकर्त्रा भगवता व्यासदेवेन श्रुत्यर्थ-मीमांसाच्छलेन सर्वमूलालौकिक-तत्त्वविषये वेदान्तसिद्धान्त एव प्रकटीकृतः। युक्तितर्काभ्यां स एव सिद्धान्तः समुद्वलितः, न तु तद्विषयक-स्वमत-स्थापनार्थं रचितोऽयं ग्रन्थ इति; यतो विकार-विरहिते जगत्कारणभूते अलौकिकाद्वैत-तत्त्वविषये वेदान्ता एव प्रमाणम्—"औपनिषदं पुरुषं पृच्छामि," "तद् ब्रह्म उपनिषत्परम्" इत्यादिश्रुतिभ्यः, "शास्त्रयोनित्वात्" इति न्यायाच्च। एतेन जगत्कारणविषये मतभेद-निराकरणमपि सम्भावितं भवति। यतः तर्कयुक्त्यादिभिः वेदान्तातिरिक्त-प्रमाणान्तरैर्वा अलौकिकविषये मतभेद-निराकरणं न सम्भवति कथञ्चन, "अचिन्त्यम् अव्यपदेश्यम्" इत्यादिश्रुतिभ्यः, "तर्काप्रतिष्ठानात्" इत्यादि-न्यायाच्च। एतदेव ग्रन्थस्यास्य रचनोद्देश्यम्; एतदेव अस्य रचनाकौशलं च। एतत् कौशलम् अवमत्य यः कोऽपि ब्रह्मसूत्रार्थ-निर्णयाय यतिष्यते, तेनैव भ्रमितव्यं, तेनैव प्रमदितव्यं, तेनैव व्यासाभिप्रेतार्थाद् दूरम् अवस्थातव्यम्।

## उत्तरमीमांसेति ग्रन्थनाम्नैव अस्य रचनाकौशलनिरूपणफलम्

एवं च एतावद् यद् एतद्ग्रन्थरचना-कौशल-निरूपणम् तद्, एतद्ग्रन्थनाम "ब्रह्म-मीमांसा," "उत्तर-मीमांसा" इत्यादौ मीमांसा-शब्देनैव आविष्कृतम्। कौशलं चैतद् अस्मिन् शास्त्रे श्रुतिसङ्गतिरिति नाम्ना अभिधीयते। अध्याय-पादाधिकरण-सूत्रार्थेषु सर्वत्र अस्या गतिः अव्याहता, सर्वत्रैषा पालनीया। अतो वक्ष्यमाण-दश-भाष्यकारादिषु मध्ये यः कोऽपि एतां श्रुति-संगतिं लङ्घयेत्, स एव व्यास-सम्मत-सूत्रार्थाद् हीयेत, तेनैव असङ्गतम् आचरणं कृतं स्यादिति मन्तव्यम्। आस्तां तावत्, अतःपरं द्रष्टव्यं किम् अपरं कौशलम् अत्र अवलम्बितम् एतद्-ब्रह्मसूत्ररचनायां सूत्रकृता।

## युक्त्यनुसरणमत्र द्वितीयं कौशलम्

ब्रह्मसूत्र-रचनायां यदपरं कौशलमेकं सूत्रकारेण भगवता अवलम्बितं, तत् सम्पूर्णं युक्त्यनुसारेण अध्याय-पाद-विभागादिरूपं, तथा अधिकरण-रचनं सूत्र-सन्निवेशादिकं च। यतो यत्किञ्चिद् दार्शनिक-मतवाद-वर्णने यदि कोऽपि प्रवृत्तो भवेत्, तदा तद्दार्शनिकमतानुसारेण आदौ तत्त्वनिर्णयः, ततः तदनुगुण-साधननिर्देशः, ततश्च तत्साधन-फलमपि यथा तस्य वर्णनीयं भवेत्, तथैव अत्र सूत्रकृतापि अस्यां ब्रह्मसूत्र-रचनायां कृतम्। तेन सूत्रकृता आदौ अध्याय-द्वयेन तत्त्ववर्णनं कृतम्। तत्रापि प्रथमाध्याये ग्रन्थप्रतिपाद्य-मतवादाश्रयभूतश्रुतीनां समन्वयं प्रद-र्शयता तत्त्ववर्णनं कृतम्, द्वितीयाध्याये तादृश-समन्वयार्थं यद्यद्-मतवादैः सह विरोधः सम्भाव्यते, तैः सह स्मृतियुक्तिभ्यां विरोध-परिहारपूर्वकं स्वाभिमत-तत्त्ववर्णनं कृतम्। एवं च अध्यायद्वयेन श्रुतिस्मृतियुक्तिभिः स्वपक्ष-स्थापन-परपक्ष-खण्डनद्वारा तत्त्ववर्णनमेव पूर्णतां गतम्।

एवं च किञ्चिच्छास्त्रावलम्बनेन मतवाद-वर्णनं यदा कर्त्तव्यं भवति, तदा इयमेव गतिः स्वाभाविकी। तदा समन्वयः अविरोधः उभय एव वक्तव्यो भवति। एवं तत्त्ववर्णने कृते तस्य ज्ञानफल-लाभाय किञ्चित् साधनमेव अपेक्ष्यते। एतादृशी साधनफल-विषयिणी जिज्ञासापि तदा स्वाभाविकी। अत एव साधनं फलं च यथाक्रमम् अस्य तृतीय-चतुर्थाध्यायद्वये वर्णितम्। एतेन एतद्-ग्रन्थस्य अध्यायचतुष्टयं समन्वयाविरोध-साधन-फलात्मकं भवितुम् उचितं भवति। तदेव अत्र वर्त्तते च। यत्र तु किञ्चिच्छास्त्रावलम्बनेन मतवाद-स्थापनं न क्रियते, तत्र समन्वयाध्यायस्य प्रयोजनं नास्ति। तत्र स्वपक्षस्थापन-परपक्षखण्डनरूपः अविरोधरूपो वा एक एव अध्याय आवश्यकः; अथवा खण्डनमण्डनाभ्यामेव अध्यायद्वय-रचनं सप्रयोजनं भवति। अतो युक्त्यनु-सरणमपि सूत्रकृताम् एतद्ग्रन्थ-रचनाया अपरं कौशलमेकं दृश्यते। तत्रापि कथम् अध्याय-चतुष्टयस्य समन्वयाविरोधादिनाम्ना अभिधानं, सूत्रेषु तस्मिन् अनुक्तेऽपि, तद् अग्रे वक्ष्यते।

### पादविभागे युक्त्यनुसरणानुसन्धानम्

ननु अध्याय-चतुष्टयस्य विभागाय युक्त्यनुसरणे कृतेऽपि तत्र प्रत्येकम् अध्यायः कथं पादचतुष्टयेन विभक्तः कृतः? तत्र कीदृशी युक्त्यनुसारिता? कथं द्वित्र्यादि-संख्यान्तरेण न विभागः कृतः; कथम् अध्याय-विभागार्थं परिच्छेदाद्यभिधानं नावलम्बितम्। पाद-नाम-ग्रहणेऽपि द्वित्र्यादिसंख्या न असम्भाविता असङ्गता वा अभविष्यत्? द्विपदा मनुष्याः, ब्रह्मणः पादत्रयम् अमृतम्, षट्पदा भ्रमराः—इत्यत्र पाद-संख्याया अनिर्द्धारितत्वात्। अतस्तत्र चतुर्धा पादविभागे का युक्तिः?

### चतुःसंख्यावलम्बनहेतुः

अत्रेयं युक्तिः खलु सम्भाव्यते, यतः चतुःसंख्यया धर्म-ब्रह्मतत्त्व-व्याख्यानं शास्त्रेषु कृतं दृश्यते। यथा—"वृषश्चतुष्पाद् भगवान् धर्मः सत्ये प्रतिष्ठितः" इत्यत्र वृषरूपधर्मः पादचतुष्टयेन कल्पितः, स्थूल-सूक्ष्म-कारण-तुरीय-भेदेन आत्मा वा ब्रह्म चतुर्धा—इति माण्डूक्योपनिषदि वर्णितं दृश्यते। वेदाश्चत्वारः, वर्णाश्चत्वारः, आश्रमाश्चत्वारः, तथा विष्णोश्चत्वारो व्यूहाः। एवं च चतुःसंख्याया धर्म-ब्रह्मविषयत्वाद्, ग्रन्थस्यास्य ब्रह्मविषयत्वाच्च चतुरध्यायात्मकस्य अस्य ग्रन्थस्य प्रत्येकम् अध्यायः चतुर्भिः पादैः विभक्तः स्याद्—एवमेव ग्रन्थकृताम् अभिप्रायो भवितुम् उचितः—इत्येव अनुमीयते। तेन अत्रापि युक्त्यनुसारिता दृश्यते एव सूत्रकृताम्। अतो युक्त्यनुसरणम् एतद्ग्रन्थ-रचनाया अपरमेकं कौशलमिति कल्पयितुं शक्यते।

### षडङ्गाधिकरणावलम्बनहेतुः

ततः षडङ्गाधिकरणद्वारा-विविध-प्रतिपाद्य-कथनमपि एतद्ग्रन्थस्य युक्त्यनुसरणमेव वक्तुं शक्यते। नैयायिकानां पञ्चावयव-न्यायेन मध्यस्थादि-व्यवस्थापूर्वक-वाद-जल्प-वितण्डारूप-कथाद्वारेण वा वक्तव्य-वर्णनं, तथा च युक्त्यनुसरणे सत्यपि षडङ्गात्मकाधिकरणद्वारा तत्त्व वर्णनं

ततोऽधिकतया युक्त्यनुसरणमूलं मन्यते। अवयव-त्रयात्मक-न्यायस्य त्र्यवयवाद् अधिकरणान्तर्गत-पूर्वोत्तरपक्षद्वये तादृशन्यायस्य अन्तर्भावात्, कथायां च तर्कं विना विचार-बाहुल्य-सत्त्वात्। तेन अत्रापि अधिकरणरचनायां युक्त्यनुसरणं मुख्यतया प्रतिभाति। एवं च सूत्र-रचनायामपि युक्त्यनुसारिता दृश्यते एव। एतत् तु नात्र विचार्यते, बाहुल्यभयात् स्पष्टत्वाच्च। तथा च एतद्ग्रन्थ-रचनायां युक्त्यनुसरणम् अपरमेकं कौशलमिति सिद्धम्। तथापि एतत् कौशलं न मुख्यम्। मुख्यं तु श्रुति-शाखाध्याय-पादाधिकरण-सङ्गत्यधीनत्वम्,—एतन्न विस्मर्त्तव्यम्। एतत् सर्वं तु क्रमेण वक्ष्यते। न विस्मर्त्तव्यम्—एतत् ग्रन्थरचनाकौशलज्ञानं ग्रन्थतात्पर्य्यनिर्णायकमिति च।

### ग्रन्थनामनिर्णयः

एवं च यदि युक्त्यनुसरणम् एतद्-ग्रन्थरचनाया एकं कौशलम्, तदा आदौ अस्माकं निरूपणीयं—किं नाम एतद्ग्रन्थस्य भवितुम् उचितमिति; यतः सूत्रकृता एतद्-ग्रन्थनाम-निर्देशकं सूत्रादिकम् एतद्ग्रन्थमध्ये कुत्रापि न कृतम्। वस्तुतस्तु बहुभिः नामभिः ग्रन्थोऽयं लोके प्रथितः; एतच्च उक्तमेव। तेन अस्माभिः युक्तिसहायैः सद्भिः एतद्ग्रन्थनाम आदौ निर्णेयम्। यतः एतेनापि एतद्ब्रह्मसूत्रग्रन्थस्य तात्पर्य्यनिर्णये सहायो भविष्यति।

दृश्यते च—अस्य सूत्रात्मकग्रन्थस्य प्रथमं सूत्रम् "अथातो ब्रह्मजिज्ञासा"। एवं चेद् एतत्सूत्रात्मको ग्रन्थो ब्रह्मज्ञानाय रचितः—इत्यत्र न कोऽपि सन्देहावसरः। तेन एतस्य "ब्रह्मसूत्रम्" इति नाम सङ्गतमेव प्रतिभाति। तथैव ग्रन्थोऽयं ब्रह्म-प्रतिपादनपरोपनिषदपरनाम-वेदान्तानां मीमांसारूपः—इति एतस्य अपरसूत्राणाम् आलोचनेन परिज्ञायते। ततो ब्रह्मण्येव वेदान्तानां तात्पर्यं; वेदान्तश्च वेदस्य उत्तरभागरूपः, तेन "उत्तरमीमांसा" नामापि अस्य सङ्गतमेव। ततश्च वेदान्तसिद्धान्तः एवास्य अवलम्बनम्, उपजीव्यश्च; तद्वेदान्तावलम्बनेन अत्र दार्शनिक-रीत्या तत्त्वनिर्णयादिकं कृतम्, अतोऽस्य "वेदान्तदर्शनम्" इति नामापि युज्यते। अथवा वेदान्तसिद्धान्तः एवात्र दृश्यते, तेनापि "वेदान्तदर्शनम्" इति नामापि अस्य सङ्गतमेव। एवं च अस्य यानि नामानि प्रसिद्धानि लोके, तानि सर्वाणि प्रायेण प्रथमसूत्रार्थालोचनेन ज्ञायन्ते। दृश्यते च एवं, यत् सूत्रकृता व्यासेन एतस्य ग्रन्थस्य केनापि नाम्ना न निर्देशः कृतः, अतो बहुभिः नामभिः अयं लोके प्रसिद्धिं गतः। एवं च एतद्ग्रन्थस्य नामनिर्द्धारणं व्यासस्य युक्तिप्रियत्वस्य निदर्शनम् एकम्। यतो ग्रन्थस्य विषयानुसारेण तस्य यथायोग्यनामनिर्देशो भवतु, तदेव नाम व्यासस्य अभिमतं भविष्यति—इत्येव तस्य अत्र आशयः आसीत्—इति सम्भाव्यते। अन्यथा ग्रन्थादौ ग्रन्थान्ते वा, एकेन सूत्रेण ग्रन्थनामनिर्देशे कृते का वा महती क्षतिः अभविष्यत्। तथापि एतस्य "भिक्षुसूत्र"-नामकत्वे यो हेतुः, तत्र किञ्चिज् ज्ञातव्यम् अस्ति। 'पाराशरिः' इति व्यासस्य एकं नाम, तस्य 'पराशरपुत्रत्वात्'। भिक्षुशब्दश्च पाराशरि-शब्दस्य पर्यायः—इति अमरकोषग्रन्थे दृश्यते। "भिक्षुः पाराशरि

कर्मन्दी पाराशर्यपि मस्करी" इति। तेन ब्रह्मसूत्रस्य व्यास-रचितत्व-ज्ञापनाय एतस्य "भिक्षु-सूत्रम्" इति नाम उचितम्—इति कल्पयितुं शक्यते। एवं च ब्रह्मसूत्रस्य "व्याससूत्रम्" इति नामापि प्रसिद्धं लोके, व्यासेन रचितत्वात्। अथ चेद् व्यासेन यदि एतस्य ग्रन्थस्य एकमेव नाम सूत्रितं स्यात्, तदा एतद्ग्रन्थस्य नामनिर्द्धारण-फलम् एतादृशं बहुभाव-व्यञ्जकं न अभविष्यत्। एतदर्थं युक्तिप्रियो भगवान् व्यासदेवः, शिष्यवर्गान् युक्तिप्रियत्वम् उपदेष्टुं तस्य स्वल्पाक्षरात्मक-सूत्रग्रन्थस्य स्वयं नामनिर्देशं न कृतवान्—इत्येव मन्यामहे वयम्। तथा च—

'मौनेन यद्यभीष्टं स्याद् भाषणे किं प्रयोजनम्। स्वल्पेन यदि सिद्धिः स्याद् बाहुल्यं तत्र मोहनम्॥'

इत्येव वक्तुं शक्यते। अतो निगूढाशयस्य व्यासस्य नैतद् दोषाय न्यूनत्वाय वा भवति।

## ग्रन्थस्य असम्पूर्णताशङ्कानिरासः

ततश्च इदम् आशङ्क्यते—किम् उपलभ्यमानो ग्रन्थोऽयं सम्पूर्णो न वा? किं कालेन अयं खण्डितो जातो न वा? यथा वेद-पुराण-महाभारतादि-शास्त्राणि इदानीं खण्डितानि एव उपलभ्यन्ते, तथैव किं ब्रह्मसूत्रमिदं खण्डितम् अखण्डितं वा उपलभ्यते?

नेयम् आशङ्का समुचिता। अस्य आद्यन्त-सूत्रद्वय-दर्शनेन इयम् आशङ्का न लब्धावसरा भवेत्। तत्र "अथातो ब्रह्मजिज्ञासा" इत्येतद्ग्रन्थस्य आद्यं सूत्रम्। तत्रापि "अथ" पदेन ग्रन्थारम्भः सूच्यते। तथा "अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" इति एतद्ग्रन्थस्य अन्तिमं सूत्रम्। अत्र सूत्रस्य द्विरुक्तिरेव ग्रन्थ-समाप्तिसूचिका, यतः अन्यत्र सूत्रपदमात्रस्य द्विर्वचनम् अध्यायसमाप्तिज्ञापकं सर्वभाष्यकार-सम्मतम्— इति दृश्यते। तेन साकल्येन सूत्रस्य द्विरुक्तिः ग्रन्थसमाप्तिज्ञापिकेति कल्पयितुं शक्यते। अस्मिन् विषये नैकस्यापि भाष्यकारस्य मतभेदोऽपि दृश्यते, श्रूयते वा। अत आद्यन्त-सूत्र-सद्भावाद् ग्रन्थोऽयं न खण्डितः—इति सम्भाव्यते। ग्रन्थमध्येऽपि सर्वत्र सूत्राधिकरणानां मिथः आकांक्षानुरूपसंगतिदर्शनात् नास्य खण्डितत्वशंकापि। अतो ग्रन्थोऽयं सम्पूर्णः एव उपलभ्यते।

## ग्रन्थकारनिरूपणम्

अथ इदानीं जिज्ञास्यं भवति—कोऽस्य ग्रन्थकर्त्ता इति? सूत्रकृता एतदर्थं सूत्रादिकं न एकमपि विरचितम्। एतदर्थं का युक्तिरत्र अनुसरणीया? केषाञ्चित् मते अस्य ग्रन्थकर्त्ता—"कृष्णद्वैपायनो व्यासः", अन्येषां मते तु "बादरायणः" इति। केचिद् आहुः—तौ अभिन्नौ। मतान्तरे तु तौ विभिन्नौ पुरुषौ। दृश्यते च "बादरायणः" इति नामोल्लेखेन एकाधिकं सिद्धान्तसूत्रं रचितम्। "कृष्णद्वैपायनः" इति नाम न कुत्रापि सूत्रमध्ये दृश्यते। अतो बहुभिः मन्यते—"बादरायणः" एव अस्य ग्रन्थकर्त्ता, न तु "कृष्णद्वैपायनः" इति। केषाञ्चित् मतम्—नायं बादरायणोऽपि सूत्रकारः। यतो ग्रन्थमध्ये स्वनामोल्लेखः दृश्यते, स तु, आत्मम्भरितां सूचयति। अतो बादरायणो न सूत्रकारः इति। कृष्णद्वैपायनस्य ग्रन्थकर्तृत्वेऽपि प्रमाणं नास्ति। पुराण-

वचसामपि नात्र प्रामाण्यम्, आधुनिकत्वात् तेषाम्। अतोऽस्य कर्त्ता कश्चित् अज्ञातनामा पुरुष एव भवेत्, बौद्धमत-प्राबल्य-प्रमाणाय तस्य पाणिन्यादीनां समये आविर्भावः अभवत्, अथवा दिङ्नाग-वसुबन्धु-प्रभृतीनां पश्चात् तस्य आविर्भावः सञ्जातः, सूत्रमध्ये तेषां मतखण्डन-दर्शनात् इति। एवं च एतस्य ग्रन्थकर्तृत्वे विविधा विप्रतिपत्तयो वर्त्तन्ते। अतो जिज्ञास्यं—कोऽसौ सूत्रकारः इति ?

### कृष्णद्वैपायन एव बादरायणः

एतस्य उत्तरम्—कृष्णद्वैपायनापरनामा बादरायणो व्यासदेव एव अस्य कर्त्ता। ग्रन्थकर्तुः स्वनामोल्लेखस्तु ग्रन्थमध्ये नात्मम्भरितायाः सूचकः। कौटिल्य-वात्स्यायनसूत्रादिषु स्वनामोल्लेखेन विधिनिषेधादिकं व्यवस्थापितं दृश्यते। मनु-याज्ञवल्क्यादि-कृत-संहिता-ग्रन्थेषु विषयविशेष-वर्णने स्वनाम-ग्रहणं दृश्यते। "आचार्याणाम् इयं शैली,—यत् स्वाभिहितमपि पराभिहिततया प्रकाशयति।" अतो बादरायणस्य सूत्रकारत्वेन, न कापि बाधा दृश्यते। बादरायणस्य ब्रह्मसूत्र-प्रणेतृत्वं शाङ्करभाष्यतोऽपि अवगम्यते, यथा—"ननु एवं सति सातिशयत्वाद् अन्तवत्त्वम् ऐश्वर्यस्य स्यात्, ततश्च एषाम् आवृत्तिः प्रसज्येत, इत्यत उत्तरं भगवान् बादरायण आचार्यः पठति—"अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" (४।४।२२) इति। अन्येषु दार्शनिकग्रन्थेष्वपि बादरायणस्य ब्रह्मसूत्रकारत्वम् अवगम्यते।

### पुराण-कोषादितः कृष्णद्वैपायनस्य बादरायणत्वम्

ततः कृष्णद्वैपायन एव बादरायणः—इत्यत्र बहूनि प्रमाणानि सन्ति। तत्रादौ कोषप्रमाणम् प्रदर्श्यते—

"बदरे बदरिकाश्रमे अयनं वासो यस्य स बादरायणः। बादरायणिः सत्यवतीसुतः सत्यरतः पाराशरिः" इति शब्दरत्नावली। "माठरो द्वैपायनः पाराशर्यः कानीनो बादरायणो व्यासः"—इति हेमचन्द्रः। "कृष्णद्वैपायनः सत्यभारतः पाराशरः सत्यरतः"—इति त्रिकाण्डशेषः। "माठरो व्यासः"—इति मेदिनी।

अत्रायं निष्कर्षः—कृष्ण इति तस्य नाम, द्वीपे जन्महेतोः 'द्वैपायनः' इति नाम्नापि सोऽभिधीयते। तेन कृष्णद्वैपायन इति नाम तस्य अभूत्। स एव पराशरतनयः। सत्यवत्यां जातत्वात् सत्यवतीसुतः सात्यवत इत्यादिनापि नाम्ना स प्रकीर्त्यते। बदरिकाक्षेत्रे आश्रमं कृत्वा स तपश्चचार, अतः स बादरायणः। यथा महाभारते आदिपर्वणि—

"कृष्णद्वैपायनप्रोक्ताः सुपुण्या विविधाः कथाः। १।१।१०

एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्। न्यस्तो द्वीपे स यद् बालस्तस्माद् द्वैपायनः स्मृतः॥ १।६३।८६

विव्यास वेदान् यस्मात् स तस्माद् व्यास इति स्मृतः" ॥ १।६३।८८

एतेन कृष्णद्वैपायन एव वेदव्यासः, स एव पाराशर्यः, स एव सत्यवतीसुतः—इति

अवगम्यते। ततः स एव बादरायणो, यथा महाभारते आदिपर्वणि प्रथमे अध्याये—

"क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा। ९४ त्रीनग्नीनिव कौरव्यान् जनयामास वीर्यवान्"॥ ९५

पुनः श्रीमद्भागवते नवम-स्कन्धे द्वाविंशे अध्याये—

"क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः। धृतराष्ट्रं च पाण्डुं च विदुरञ्चाप्यजीजनत्॥ २५

यस्यां पराशरात् साक्षादवतीर्णो हरेः कला ॥२१॥ वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम्।

हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः ॥२२॥ मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ॥" इति।

एतेन पाराशर्य एव कृष्णद्वैपायनः, स एव बादरायणो व्यासः –इति च विज्ञापितः।

ततश्च कृष्णद्वैपायन एव ब्रह्मसूत्रकारो व्यासः—इति स्कन्दपुराणाद् अवगम्यते। तद् यथा—

"तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः। अवतीर्णो महायोगी सत्यवत्यां पराशरात्॥

उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम्। चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा॥

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥"

(माध्वभाष्यधृत-स्कन्दपुराणवचनम्।)

कृष्णद्वैपायनस्य ब्रह्मसूत्रकर्तृत्वे—वायुपुराणवचनमपि (१०४।१०८) प्रमाणं, यथा—

"अस्मत्सम्मत एवार्थो भवता सम्प्रदर्शितः।

पुराणेष्वितिहासेषु सूत्रेष्वपि च नैकधा। अक्षरं ब्रह्म परमं सर्वकारण-कारणम्॥" इति।

मत्स्यपुराणेऽपि—(५३ अः)

"अङ्गानि चतुरो वेदान् पुराणं न्यायविस्तरम्। मीमांसा धर्मशास्त्रं च परिगृह्य मया कृतम्॥" इति।

एतेन कृष्णद्वैपायनो व्यास एव ब्रह्मसूत्रकारः—इत्येव प्रमाणितं भवति। ब्रह्मसूत्रे बादरायण-नाम्ना सिद्धान्त-निर्देशात् तस्यैव ग्रन्थकर्तृत्वं प्रतीयते। तेन बादरायण एव कृष्ण-द्वैपायनो व्यासः—इत्येव सिध्यति। "बादरायण"–शब्दो ब्रह्मसूत्रमध्ये १।३।२६, १।३।३३, ३।२।४१, ३।४।१, ३।४।८, ३।४।१९, ४।३।१५, ४।४।७, ४।४।१२, संख्यकेषु सूत्रेषु सिद्धान्तज्ञापनाय प्रयुक्तो दृश्यते। एवं बहूनि प्रमाणानि सन्ति, यतः कृष्णद्वैपायन एव बाद-रायणः, स एव ब्रह्मसूत्रकारः—इत्येव सिध्यति। शङ्केयं पाश्चात्यपण्डितवर्गैः उद्भाविताः, तदनु-वर्तिभिः अस्मद्देशीयैः बहुभिश्च परिगृहीता, एतेन तु सा निरस्ता।

### पुराणानाम् अर्वाचीनत्वशङ्कानिरासः

अथ चेत् पुराणादिषु आधुनिकैतिहासिक-कथादि-दर्शनात्, तेषाम् अर्वाचीनत्वं कल्प्येत, तथापि तेषां प्राचीन-कथा-संग्राहक-रूपत्वं न बाधितं भवति। बहुषु पुराणादिषु यत्र ऐकमत्यं, तत्र न अप्रामाणिकत्व-शङ्का समुचिता। केषाञ्चित् पुराणादीनाम् अंशेन आधुनिकत्वेऽपि तत्रस्था प्राचीनकथा प्रमाणत्वेन ग्रहीतुं शक्यते। अंशतः आधुनिकत्वमात्रं न समग्रस्य अप्रामाण्यप्रयोजकम्। कथायाः अविच्छिन्नमूलत्वमेव तस्याः प्रमाणार्हत्वम्। कतिपयपुराणादीनाम् आधुनिकत्वाभ्युपगमेऽपि

तद्वर्णितविषयाणां न आधुनिकत्वं, न वा अप्रामाणिकत्वम्। ततश्च कलेरादौ रचित-ब्रह्मसूत्र-मध्ये "स्मरन्ति च" २।३।४७, ३।१।१४ इति सूत्रयोर्मध्ये, तथा "स्मर्यते च" ४।२।१४ इति सूत्रे, तथा "स्मर्य्यतेऽपि लोके" ३।१।१९ सूत्रे, तथा "स्मर्यमाणमनुमानं स्यादिति" १।२।२५ सूत्रे, तथा "स्मृतेश्च" ४।३।११ सूत्रे सूत्रकृता महाभारत-पुराणादि-वचनमेव लक्ष्यीकृतं, [illegible] अतः पुराणादीनाम् अर्वाचीनत्वकल्पनं न समीचीनम्। एतेन च अस्य [illegible] मपि सिध्यति। तेन द्वापरान्ते कलेरादौ वा अस्य रचितत्वमपि सिध्यति, तदैव कृष्णद्वैपायनस्य प्रसिद्धिः। ब्रह्मसूत्रस्य प्राचीनत्वम् अग्रे प्रमाणान्तरेण वक्ष्यते। अतः कृष्णद्वैपायनो बादरायणश्च अभिन्नः एव। तयोः भेदकल्पनं न संगतम्।

### पाणिनिसूत्रेणापि तस्य प्राचीनत्वसिद्धिः

ब्रह्मसूत्रस्य प्राचीनत्वं पुनः पाणिनीयव्याकरणसूत्रेणापि समर्थ्यते। तत्र "पाराशर्य-शिलालिभ्यां भिक्षुनटसूत्रयोः" ४।३।११० इति सूत्रात् "भिक्षुसूत्र"-नाम्नः पाराशरि-रचितस्य एकस्य सूत्रग्रन्थस्य सत्त्वम् उपलभ्यते। "भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी"—इति अमर-कोष-वचनाद् भिक्षु-शब्दस्य पर्यायः "पाराशरी" इति च लभ्यते। "पाराशर्येण उक्तं भिक्षुसूत्रम् अधीयते" इत्यर्थे णिनिप्रत्यय-विधानात्, पराशरतनय-कृष्णद्वैपायन-व्यास-विरचितं तद् भिक्षुसूत्र-मित्यपि अवगम्यते। महाभाष्येऽपि "पाराशरिणो भिक्षवः" इति पाणिनीय-४।२।६९-सूत्र-व्याख्यानावसरे वर्णितम्। तेन पाराशरीयं यत् भिक्षुसूत्रं तदेव ब्रह्मसूत्रम्, ब्रह्मसूत्राद् अन्यस्य भिक्षुसूत्रस्य अनुपलम्भात्। एतेन पाणिनेः पूर्वं द्वापरान्ते कलेरादौ वा रचितमिदं ब्रह्मसूत्रम् इत्येव अवगम्यते।

### पाणिनेः कालेन तस्य प्राचीनत्वम्

अत्र अपरमेकमपि प्रमाणं वर्त्तते, येन पाणिनेः पूर्वं ब्रह्मसूत्रमिति गम्यते। यतो वर्ष-पण्डित-भ्राता उपवर्षः आसीदिति कथासरित्सागराद् अन्यतश्च उपलभ्यते, उपवर्षकृत-ब्रह्मसूत्र-वृत्तिः एका शाङ्करभाष्यात् शावरभाष्यादपि अवगम्यते। कथासरित्सागरमते च उपवर्षस्य आवि-र्भावो नन्दराजस्य राजत्वकाले अभूदिति। तथा सति पाणिनेः कालो गौतम-बुद्धस्य किञ्चित् पश्चादेव भवति। तेन तत्पूर्वमेव ब्रह्मसूत्रस्य कालः—इति वक्तुं शक्यते। मतान्तरे तु पाणिनेः कालो जनमेजयस्य किञ्चित् पूर्वमेव, यतः पाणिनीयसूत्रे जनमेजय-पूर्ववर्त्तिनां नामादिकं दृश्यते, न तु तत्परवर्त्तिनाम्। तथा सति ब्रह्मसूत्रस्य कालः कलेरादौ एवेति अवगम्यते। वस्तुतस्तु पाणिनेः कालो न अविसंवादितया निर्णीतः एतावत्-कालपर्यन्तम्। तेन पाणिनेः कालम् अव-लम्ब्य, अथवा उपवर्षस्य कालम् अवलम्ब्य ब्रह्मसूत्र-कालो यथा उपलभ्यते, तेन गौतम-बुद्धात् पूर्वम् अयं ग्रन्थः आसीत्—इति कल्पयितुं शक्यते। तेनायं ग्रन्थो बुद्धात् [illegible] केनचन [illegible] बौद्धनागार्जुनादीनां परवर्त्तिना केनचित् [illegible]

रचितः—इति यद् उक्तं कैश्चित् पाश्चात्त्यैः तदनुवर्त्तिभिश्च, तन्न सम्यग् इति सिध्यति।

भवतु पाणिनीय-कालम् अवलम्ब्य एतादृशं फलम्, किन्तु यदि तदुक्तिम् आश्रित्य विचार्यते, तदा "पाराशरीयं भिक्षुसूत्रम्" इति निर्देशाद् द्वापरान्ते कलेरादौ वा ब्रह्मसूत्रस्य रचना अभूत् इत्यत्र न कापि बाधा वर्त्तते। परन्तु तत्रापि बहुभिः पाश्चात्त्यैः विद्वद्भिः जनमेजयस्य महाभारतस्य च कालोऽपि न तादृशः प्राचीनः इति मन्यते। किन्तु तथापि गौतम-बुद्धात् पूर्वमेव ब्रह्मसूत्रं रचितम् इत्यत्र न विरोधः कल्पनीयः। जनमेजयमहाभारतादीनां कालनिर्णयस्तु प्रसङ्गान्तरीयः, अतोऽत्र ततो विरम्यते। अस्मन्मते तयोः कालः कलेरादौ एव।

### श्रीमद्भगवद्गीताप्रमाणेन प्राचीनत्वम्

ततश्च अत्र अपरमेकं प्रमाणमस्ति, येन ब्रह्मसूत्रस्य महाभारत-समकालीनत्वं सिध्यति। यतो भीष्मपर्वान्तर्गत-भगवद्गीतामध्ये ब्रह्मसूत्रस्य नाम दृश्यते, यथा—

"ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः।" (१३।४)

तथैव ब्रह्मसूत्रमध्ये "स्मृतेश्च" १।२।६ इति सूत्रे, तथा "स्मरन्ति च" ४।१।१० इति सूत्रे, गीतावाक्यमेव सूत्रकृता लक्षितम्—इत्यपि सूत्रभाष्यादिभ्यः उपलभ्यते। अतो ब्रह्मसूत्रं महाभारत-समकालीनम् इति अनुमातुं शक्यते अस्मन्मते। महाभारत-रचनाकालः कलेरादौ एव आसीत्। तेन ब्रह्मसूत्रम् अद्य प्रभृति प्रायेण पञ्चसहस्रवर्षेभ्यः प्राग् रचितम् इत्यस्माकं निर्णयः। परन्तु अत्रापि पाश्चात्त्यानां विप्रतिपत्तिः दृश्यते। तत्र अत्र वयं विचारयामः तस्य प्रसङ्गान्तरीयत्वात्। एतदर्थं महाभारतस्य महामहोपाध्याय-श्रीहरिदाससिद्धान्तवागीशकृत-टीकादिकं द्रष्टव्यम्। एवं च अस्मन्मते महाभारत-ब्रह्मसूत्रादीनाम् अर्वाचीनत्वं प्रतिपिपादयिषतां प्रयत्नः सर्वथा व्यर्थः इति प्रतिभाति। येषां मते अद्य प्रभृति १९४१-वर्षेभ्यः प्राक् पृथिव्यां ज्ञानालोकपातः सञ्जातः, तेभ्यः इतोऽधिकं किम् आशास्महे। तेन अत्र बौद्धजैनादीनां मतखण्डनं दृष्ट्वा नास्य श्रुतिमीमांसारूपत्वं व्याहतं, न वा तस्य अर्वाचीनत्वं कल्पनीयम्। तथा च अस्य ग्रन्थकर्त्ता पाराशर्यः कृष्णद्वैपायनापरनाम-बादरायणो, ग्रन्थश्च कलेरादौ रचितः इति।

### सूत्ररचनायाः तृतीयं कौशलम्

इदानीं द्रष्टव्यं किमपरं कौशलं सूत्ररचनायाम् अवलम्बितं सूत्रकृता भगवता व्यासेन? एतच्च ग्रन्थ-प्रतिपाद्यानुसारेण अध्याय-पादाधिकरण-सूत्राणाम् अर्थनियन्त्रणम्। एतदेव अत्र तृतीयं कौशलम्। यथा श्रुत्यर्थमीमांसारूप-श्रुतिसङ्गतिसंरक्षणं सर्वेषाम् अध्याय-पादाधिकरण-सूत्राणाम् एतद्ग्रन्थ-रचनायाः आद्यं मुख्यं कौशलं, यच्च प्रागेव उक्तम्, तथैव अध्याय-चतुष्टयात्मकस्य एतद्ग्रन्थस्य समष्टिरूपेण यत्किञ्चित् प्रतिपाद्यमेकं भवति, यतो व्यष्टिभूतस्य समष्टिरूपत्वमपि स्वाभाविकम्, येन तादृश-प्रतिपाद्य-विषयानुसारेण अध्याय-पादाधिकरण-सूत्राणाम् अर्थनियमनमपि समुचितम्। समष्टिभूतस्य यो धर्मः तस्य व्यष्टिभूतधर्म-नियामकत्वं नैसर्गिकम्।

एतदेव तत्र तृतीयं कौशलम् अनुसृतं सूत्रकृता भगवता। एतदेव तत्र शास्त्र-सङ्गति-नाम्ना परिचितं सर्वेषां सूत्रार्थानुशीलिनाम्। तेन प्रागुक्त-श्रुतिसङ्गति-व्याख्या इयं शास्त्रसङ्गतिः भवति, यया पुनः अध्यायपादाधिकरणसूत्राणाम् अर्थनियमनं कर्त्तव्यम्।

### शास्त्रसङ्गतिनिरूपणम्

तथा सति इदानीम् अस्माकं शास्त्रसङ्गति-रूपम् एतद्ग्रन्थप्रतिपाद्यं निर्णेयम्। यत्र तु ग्रन्थः सूत्रात्मकः, पुनः यत्र ग्रन्थरचना-शैलीप्रभृतीनां कृते सूत्रकृता न किमपि इङ्गितं कृतं तत्र कथं तद्ग्रन्थ-प्रतिपाद्यं निर्णेयम्—इति अस्माकम् अतीव दुरुद्धर-कार्यमेव प्रतिभाति। तथापि नात्र नैराश्यं भजनीयम्। यतः पूर्वाचार्यैः षड्विध-तात्पर्यनिर्णायकं लिङ्गं यन्निरूपितं, तेनैतद्ग्रन्थप्रतिपाद्यं ज्ञातुं शक्यते; तद् यथा—

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये"॥ इति। एतद्धि सर्व-लोक-वेदसाधारणं, सर्वत्र ग्रन्थादीनां तात्पर्य-निर्णये प्रयोजकम्। एतच्च प्रायेण सर्व-वादि-सम्मतम्। कियत्कालावधि एतत् कौशलं सुधीगणमध्ये प्रवर्त्तितम् सर्वैः अवलम्बितं च, तन्न इदानीं निर्णेतुं शक्यते। कपिल-कणाद-गौतम-जैमिनि-व्यासादिभिः सर्वैः एतत् तेषां ग्रन्थ-मध्ये न सूत्रितं दृश्यते, तथापि तैरेव एतस्य अनुसरणं कृतम्—एतदपि तेषां सूत्रार्थ-पर्यालोचने कृते परिज्ञायते। तेन तेभ्योऽपि एतस्य प्रवर्त्तनं प्राचीनतरम्—इत्येव अनुमीयते। पुराणवचनत्वेन एतस्य समुल्लेखो दृश्यते।

तदेतत् तात्पर्य-निर्णायकं लिङ्गं षड्विधम्। यथा (१) उपक्रमोपसंहारः, (२) अभ्यासः, (३) अपूर्वता, (४) अर्थवादः, (५) फलम्, (६) उपपत्तिश्च। एतत्साहाय्येन समग्रब्रह्मसूत्र-ग्रन्थस्य यदेकं सर्वसूत्रानुगतं तात्पर्यं भवेत्, तन्निर्णेतुं शक्यते सर्वैः प्रेक्षावद्भिः। परन्तु एतेषां षण्णां प्रयोगोऽत्र सर्वसूत्रालोचनाधीनः। तन्नात्र कर्त्तुं सम्भाव्यते, अतस्तेषां षण्णां मध्ये यद् आदिमं प्रधानतया परिगृह्यते, तदेव शरणं विधेयम्। तेन च उपक्रमोपसंहारानुरोधेन किमस्य तात्पर्यं तदेव इदानीं विचार्यते। एतेन अस्माकम् उद्देश्यसिद्धिः कथञ्चिद् भविष्यतीति च आशास्महे।

एतदर्थम् एतद्-ग्रन्थस्य आद्यन्तसूत्रद्वयम् एव अवलम्बनीयम्। तयोरेव उपक्रमत्वोपसंहारत्वयोः सम्भावितत्वाद् युक्तत्वाच्च। तत्र आद्यं सूत्रम् "अथातो ब्रह्मजिज्ञासा" इति। अन्तिमं तु "अनावृत्तिः शब्दाद् अनावृत्तिः शब्दात्" इति। एतत्सूत्रद्वयस्य मिलितोऽर्थः—"अथ"—अधिकारिगुणसम्पादनानन्तरम् "अतः"—कर्मफलानित्यत्वज्ञानहेतोः, "ब्रह्मजिज्ञासा"—ब्रह्म ज्ञातुं या इच्छा भवति, तज्जन्यो यो वेदान्तविचारः स कर्त्तव्यः। तस्य फलं संसारे अस्मिन् "अनावृत्तिः"—पुनरागमनराहित्यं; कुतः एतद् अवगम्यते? तदुत्तरम् आह—"शब्दात्", तत्र प्रमाणं वेदा एव इत्यर्थः। अयं तु अक्षरार्थः एतत्-सूत्रद्वयस्य; परन्तु एतस्मादेकवाक्यविरोधाद्

एतच्छास्त्रप्रतिपाद्या यावन्तो विषया अधिगन्तुं शक्यन्ते। एतदेव इदानीं संक्षेपतः प्रदर्श्यते।

### ब्रह्मसूत्रस्य प्रथमप्रतिपाद्यनिरूपणम्

तत्र प्रथमं तावत्—ब्रह्मणो ज्ञानादेव अनावृत्तिरूपा मुक्तिर्भवति। यतः प्रथमसूत्रे इष्यमाण-ब्रह्मज्ञानस्य प्रतिज्ञा कृता। तस्यैव फलम् "अनावृतिः" इति अन्तिमसूत्राद् अवगम्यते। जिज्ञासापदेन यदर्थम् इच्छा तद् अत्र ज्ञानमेव। "ब्रह्मजिज्ञासा"-पदेन तज्ज्ञानं च ब्रह्मविषयकं, न तु तदन्यविषयकम्। तेन ब्रह्मभिन्न-वस्तुज्ञानेन मुक्तिर्न जायते। तथा च तत्र ज्ञानातिरिक्तं किमपि साधनम् अनावृत्त्यर्थं न उपदिष्टं भवति—इति सूत्राक्षरतः एव लब्धम्। अतो मुक्तिहेतुः ज्ञानमेव, न तु उपासनं कर्म वा, किं वा तयोः उभयोः अन्यतरस्य वा ज्ञानेन सह मिश्रणं, द्वारत्वेन स्वरूपेण वा, मुक्तिकारणम्। ब्रह्मज्ञानफलमेव अनावृत्तिरूपो मोक्षः। तेन उपासनादीनाम् उपयोगिता न सूत्रार्थः। एवं च ब्रह्मज्ञानाय या इच्छा, तदिच्छाजन्यो यो विचारः अपेक्षितः, सोऽपि कर्त्तव्यः—इति अवगम्यते, विचारस्य ज्ञानाङ्गत्वाज् ज्ञानसाधनत्वाद् वा। तथापि तादृशेच्छाविचारयोर्मध्ये विचारं प्रति चित्तचाञ्चल्यादिरूप-प्रतिबन्धके सति तन्नाशाय तथा इच्छाया अपि दार्ढ्याय कर्म्मोपासना-प्रायश्चित्तादीनाम् उपयोगो वर्त्तते एव। तेन ब्रह्मज्ञानं प्रति कर्मोपासनादीनां परम्परया साधनत्वं वर्त्तते, न तु साक्षात् तदस्ति। अतो ज्ञानकर्मोपासनानां न स्वरूपसमुच्चयः, किन्तु क्रमसमुच्चय एवेति मतमिति लभ्यते। एतत् सर्वमेव आद्यन्तसूत्राक्षरतो लब्धम्। तेन एतच्छास्त्रस्य एतत् प्रथमं प्रतिपाद्यं भवति।

### द्वितीयप्रतिपाद्यनिरूपणम्

द्वितीयञ्च—अतः ज्ञानस्य यत् साक्षात् फलं, तदज्ञाननिवृत्ति-रूपम्। यद्विषयकं ज्ञानं भवति, तद्विषयकाज्ञाननिवृत्तिं विना तज्ज्ञानं न सम्भवति। अज्ञाननिवृत्ति-ज्ञानोत्पादयोः मध्ये व्यवधानाभावेऽपि आदौ अज्ञाननिवृत्तिः ततो ज्ञानं समुदेति—अज्ञाननिवृत्त्यर्थम् अनुष्ठानस्य पूर्वभावित्वात्। यथा दर्पणस्य मलापनोदने कृते सति प्रतिबिम्बदर्शनरूपं ज्ञानं जायते, तद्वद् अत्रापि बोद्धव्यम्। वस्तुतस्तु ज्ञानस्य साक्षात् फलमपि—अज्ञान-निवृत्तिरेव। एवं च यद्विषयकं ज्ञानं भवति, तद्विषयकाज्ञाननिवृत्तिरेव ज्ञानस्य साक्षात् फलम्। तथा च ज्ञानस्य फलं यदि अनावृत्तिरूपो मोक्षः, तदा अज्ञाननिवृत्तिरेव मोक्षः—इति पर्यवस्यति; ब्रह्मणः स्व-प्रकाशत्वात्; तेन ब्रह्मज्ञानानन्तरं न किमपि कर्त्तव्यं दृश्यते। यथा घटपटादीनां ज्ञानानन्तरं तद्विषयकं कर्त्तव्याकर्त्तव्यादिकं चिन्तनीयं, यथा कर्मोपासना-काण्डे देवतर्षिप्रभृतीनां ज्ञानानन्तरं तद्विषयकम् अनुष्ठानम् उपासनं च विधेयम्, न तथा ब्रह्मज्ञानानन्तरं किमपि सम्पादनीयं स्यात्। ब्रह्मज्ञानानन्तरम् अज्ञान-निवृत्ति-रूपमोक्षस्य साक्षात्-फलत्वात्। मोक्षार्थमेव कर्मो-पासने च, तस्मिन्नेव मोक्षे लब्धे तयोः किं प्रयोजनम्? अतो ब्रह्मजिज्ञासाविषयीभूते ज्ञाने सति न किमपि कर्त्तव्यं सम्भवेत्। तथा च उपक्रमोपसंहाररूपसूत्रद्वयेन अयमेव अर्थः स्पष्टे

भवति यत्—ब्रह्मज्ञानानन्तरं यद् उपासनादीनां विधानं मतान्तरेण स्वीक्रियते, तत्र सूत्राक्षरतो लभ्यते। अतो ज्ञानादेव मुक्तिः एतद्ग्रन्थस्य आद्यन्त-सूत्राक्षरलब्धं द्वितीयं प्रतिपाद्यम्।

### तृतीयप्रतिपाद्यनिरूपणम्

तृतीयं प्रतिपाद्यं—प्रागुक्तसूत्रद्वयेन ब्रह्मज्ञानादेव जीवस्य एव अनावृत्तिरिति उक्तं भवति, नान्यस्य। तथा सति जीवब्रह्मणोः स्वरूपतः अभेद एव उक्तः स्यात्। जीवाद् ब्रह्म भिन्नम्—एतादृश-ब्रह्मणो ज्ञानान्न जीवस्य अनावृत्तिरूपो मोक्षः सम्भवति, ब्रह्मणः संसारित्वा-भावात्, तस्य स्वरूपतः अनावृत्तिरूपत्वाच्च। जीवब्रह्मणोः अभेदज्ञानं विना ब्रह्मज्ञानेन जीवस्य अनावृत्तिः असम्भाविनी। यदि "अहं मुक्तः" इति ज्ञानादेव मम मुक्तिः सिध्यति, नान्यथा, तदा "ब्रह्म मुक्तम्' इति ज्ञानात् मम मुक्तिः कथं भवेत्—यदि उभयोः अभेदज्ञानं न स्यात्? अतो ब्रह्मज्ञानात् जीवस्य मुक्तिः भवति इत्येव चेत् सूत्रार्थः, तदा जीवब्रह्मणोः अभेदः एव अत्र उक्तः स्यात् अयमेव अर्थः उपक्रमोपसंहारसूत्रद्वयात् प्रतिपादितः। एतदेव प्रागुक्ताद्यन्तसूत्राक्षरलब्धम् एतच्छास्त्रस्य तृतीयं प्रतिपाद्यम्।

### चतुर्थप्रतिपाद्यनिरूपणम्

चतुर्थं प्रतिपाद्यं—ततः अनावृत्तिशब्दार्थः पुनरागमन-राहित्यम्। तच्च संसारे अस्मिन् इत्येव अवगम्यते। तत्र ब्रह्मज्ञानफलं चेत् संसारे पुनरागमन-राहित्यं, तदा तज्ज्ञानफलस्य साक्षाद् अज्ञान-निवृत्ति-रूपत्वात् संसाराभाव-रूपाज्ञाननिवृत्तिरपि अत्र पुनरागमन-राहित्यम्। ततः अज्ञानमेव अयं संसारः इति च सिध्यति। संसारश्च संसारज्ञानाधीनः एव, ज्ञातत्वेन अज्ञातत्वेन वा। ज्ञात-सत्ताकस्य यथा ज्ञानाधीनत्वं, तथा अज्ञातसत्ताकस्यापि ज्ञानाधीनत्वम्। "पातालं वर्त्तते न वा—इत्यहं न जानामि" इत्याकारकम् अज्ञानं तद्विषयश्च इति उभयं ज्ञानाधीनम्। यतो ज्ञानम् ऋते न किमपि कथमपि स्वीकर्त्तुं शक्यते। अतः संसारः तज्ज्ञानं तदज्ञानं च सर्वे विषया ज्ञानसत्ताधीना एव। ततश्च अधीनसत्ताकस्यैव निवृत्तिः सम्भवति, न तु स्वाधीन-सत्ताकस्य क्वचित्। यदेव यदधीनसत्ताकं तदेव तदाश्रितम्। अज्ञानमेव ज्ञानाश्रितम्, न तु अन्यत्। अतः अज्ञानमेव संसारः। तस्य निवृत्तिरेव अनावृत्तिः। सैव संसारस्य अभावरूपा। तेन ब्रह्मज्ञान-फलं संसार-तद्दर्शनयोः अभाव-रूपम्। ब्रह्मज्ञाने जाते नायं संसारः स्थास्यति, न वा तस्य ज्ञानमपि वर्त्तिष्यते। केवलं ब्रह्ममात्रमेव अवशिष्येत। एतेन ब्रह्मभिन्नत्वेन ब्रह्मभिन्नाभिन्नत्वेन वा प्रकृति-परमाणुकारण-वादिनां मतं, तथा ब्रह्मपरिणाम-वादिनामपि मतं निराकृतम्, तेषाम् अज्ञानमूलकत्वाभावात्। एतदेव प्रागुक्ताद्यन्त-सूत्राक्षरलब्धम् एतद्ग्रन्थस्य चतुर्थं प्रतिपाद्यम्।

### पञ्चमप्रतिपाद्यनिरूपणम्

पञ्चमं प्रतिपाद्यं—संसारो यदि सन् भवेत्, स यदि सत्यः स्यात्, तदा तस्य बाध-नाभावात् तस्य विलोपो न सम्भवति। दर्शनाभावेऽपि द्रव्य-सद्भावात्; यथा [illegible]-

घटस्य दर्शनाभावे घटस्य सद्भावः तद्वत्। दृश्यसद्भावे सति तस्य पुनर्दर्शनापत्तिः दुर्वारा। तथा सति पुनरागमन-राहित्यं सम्पूर्णतया न सम्भवेत्। वासना-समुच्छेदे जाते संसार-सत्त्वेऽपि पुनरागमन-राहित्यमिति कल्पनायां पुनः संसार-सुखवासना कथं न भवेत्? भोगातिशयाद् रोगिणः रोगमुक्तौ अपि किं तद्भोगाय पुनर्वासना तस्य न जायते? संसारस्य सत्यत्वे सुखभोग-वासना पुनरागमन-राहित्यञ्च असम्भवमेव। तेन पुनरागमन-राहित्यानुरोधेन दर्शनाभावे यदि दृश्याभावः प्रसज्येत, दृश्याभावो यदि दर्शनाभावस्य सहभावी भवेत्, तदा दृश्यमिथ्यात्वमेव स्वीकार्यं भवति। दृश्यमिथ्यात्वं विना दर्शनाभावाद् दृश्यविलोपो न सम्भवति, न वा वासना-समुच्छेदो संघटते। शुक्तौ रजतभ्रमे शुक्तिज्ञानेन रजत-दर्शनाभावे जाते शुक्तौ रजत-सद्भावोऽपि विलुप्यते। एतदेव रजत-मिथ्यात्वम्। तेन मिथ्यात्वं च कल्पितत्वमेव। असतः सत्यत्वेन दर्शन-विषयत्वं, मिथ्यात्वं, कल्पनं वापि। यत्र यन्नास्ति तत्र तत्सत्ताकल्पनं विषयता सम्बन्धेन मिथ्यात्वम्। एवं च ब्रह्मज्ञानाद् अनावृत्तिः इत्युक्ते दृश्यमिथ्यात्वं प्रतिपादितम्—उपक्रमोपसंहारसूत्राभ्याम्। एतेन च जगत्-सत्यतावादिनां मतं निरस्तम्। एतदेव ब्रह्मज्ञानात् मुक्तिरिति आद्यन्तसूत्राक्षर-लब्धम्। एतदेव एतद्ग्रन्थस्य पञ्चमं प्रतिपाद्यं भवति।

### षष्ठप्रतिपाद्यनिरूपणम्

षष्ठं प्रतिपाद्यं—ततो यदेतद् अज्ञानं, तद् ब्रह्मात्मैक्यविषयकम्। न तु केवलं ब्रह्मविषयकम्, न वा आत्मविषयकम्, परन्तु तयोः ऐक्यविषयकम्, ब्रह्मात्मनोः अभिन्नत्वे सति संसार-तद्दर्शनयोः विलोपासम्भवात्। द्रष्टृ-दर्शन-दृश्यानां मध्ये एकस्यापि सद्भावे त्रयाणामेव सद्भावः अवश्यम्भावी। द्रष्टृरूप-जीव-भावाभावे द्रष्टुः ज्ञान-स्वरूप-ब्रह्मत्वावगमे च द्रष्ट्रधीन-दृश्य-दर्शनयोः अभावः अवश्यम्भावी। तेन ब्रह्मज्ञानाद् अनावृत्तिलक्षण-दृश्याभाव इत्युक्तेः ब्रह्मात्मैक्य-विषयकम् अज्ञानमेव संसारः, तन्नाशश्च अनावृत्तिलक्षणो मोक्षः—इत्युक्तं भवति। एतेन मोक्षे अधिष्ठान-ब्रह्मज्ञानाद् अन्यत् न प्रयोजनम् इत्यपि सिद्धं भवति। तथा च एतज्-ज्ञान-धारा-संरक्षणार्थम् एतज्ज्ञानस्यैव आवृत्तिः प्रयोजनम्। प्रतिबन्धके प्रबले सति उपासनादीनां च अनुष्ठेयत्वम्, अन्यथा तेषामपि अनावश्यकत्वम्। एतदेव एतच्छास्त्रस्य आद्यन्त-सूत्राक्षर-लब्धं षष्ठं प्रतिपाद्यं भवति।

### सप्तमप्रतिपाद्यनिरूपणम्

सप्तमं प्रतिपाद्यं—संसारस्य अज्ञानमूलकत्वे सिद्धे अज्ञानं यथा अनादि सान्तं, संसारोऽपि तथा—इति सिध्यति, अज्ञानस्य ज्ञाननाश्यत्वं च यथा, तथैव संसारस्यापि, संसारस्य सत्यत्वे तस्य ज्ञाननाश्यत्वम् असम्भवमेव। तेषां मते संसारः अनादिः अनन्त एव च भविष्यति, न तु अनादिः सान्तः। तेन द्वैताद्यपर-मतवादिनां सिद्धान्तो न एतदुपक्रमोपसंहार-रूप-सूत्रद्वयस्य अक्षरतः लभ्यते इति। एतदेव एतच्छास्त्रस्य सप्तमं प्रतिपाद्यं भवति।

### अष्टमप्रतिपाद्यनिरूपणम्

अष्टमं प्रतिपाद्यम्—एतद् अज्ञानं न ज्ञानाभाव-रूपम्, तथा हि यदि एतद् अज्ञानम् अभावरूपं स्यात्, तदा ब्रह्मात्मनोः अभेदज्ञानेन तादृशस्य अभावस्य नाशापत्तिः भवेत्। न तु, तदस्ति। न केनचित् ज्ञानेनापि अभावस्य नाशः सम्भवति; अत्यन्ताभावस्य नित्यत्वात्, प्रागभावरूपत्वेऽपि तत्सिद्धेः धर्मिप्रतियोगिज्ञानाज्ञानाभ्यां व्याहतत्वात्, प्रागभावस्य नव्य-नैयायिकैरपि प्रमाणनिरूपणेन निरस्तत्वाच्च। एतच्च एतच्छास्त्रस्य अष्टमं प्रतिपाद्यं भवति।

### नवमप्रतिपाद्यनिरूपणम्

नवमं प्रतिपाद्यम्—अज्ञानस्य भावरूपत्वात् तत् स्वाश्रयमेव आवृणोति। तथा च अज्ञानं ज्ञानाश्रितमेव, न तु जडाश्रितम्। तेन शुद्धब्रह्मणो न अज्ञानाश्रयत्वम्, किन्तु अज्ञानावृत-जीवरूप-ब्रह्मणः एव अस्य आश्रयत्वम्। तेन अज्ञानम् आत्माश्रयम् आत्मविषयकं च। यावज् जीवभावकः तावद् अस्य सत्त्वादिकं; ततश्च तत् सत्त्वमपि प्रातिभासिकमेव। एतेन दृष्टिरूपा सृष्टिरिति मतं सिध्यति। एतदेव एतच्छास्त्रस्य नवमं प्रतिपाद्यं भवति।

### दशमप्रतिपाद्यनिरूपणम्

दशमं प्रतिपाद्यं—तदेतद् अज्ञानम्, अज्ञान-जन्या या बुद्धिः, तस्याः च या ब्रह्मा-कारा वृत्तिः तया एव अज्ञानं नश्यति। शुद्धब्रह्मणा सह अस्य विरोधिता नास्ति, तस्य तत्र अभवात्। तेन तदज्ञानं ज्ञानवृत्ति-नाश्यं, न ज्ञान स्वरूप-नाश्यं भवति। ब्रह्म च तेन वृत्ति-व्याप्यं, न तु फलव्याप्यम्—इत्यपि एतस्मादेव सिध्यति। एतदेव एतच्छास्त्रस्य दशमं प्रति-पाद्यं भवति। तथा च अयं निष्कर्षः—

"ब्रह्मज्ञानाद्भवेन्मुक्तिर्न कर्मोपासनादितः। तच्चित्त-मल-नाशाय क्रम-समुच्चयस्ततः॥
अज्ञानोत्पन्न-संसारो ब्रह्मात्मैक्याद् विनश्यति। अतोऽज्ञानं भवेन्मिथ्या, दृश्यते न तु विद्यते॥
भावरूपं तदज्ञानं स्वाश्रयावरकं पुनः। सदसद्भ्यामनिर्वाच्यमेतच्छास्त्र-विनिर्णयः॥
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः। अयमर्थश्च सूत्राणां सर्वत्र पर्यवस्यति॥

एवं च यावन्तः सिद्धान्ता अद्वैतमतानुकूलाः ते सर्वे एव एतदुपक्रमोपसंहारात्मक-सूत्र-द्वयादेव लभ्यन्ते। नूनम् एतदेव भगवद्-व्यासस्य अपूर्वम् अनन्यसाधारणं कौशलमेकं, यद् आद्यन्त-सूत्राक्षरतः एव वेदान्त-प्रतिपाद्यरूपाः सर्वे एव विषयाः ज्ञातुं शक्यन्ते प्रेक्षावद्भिरिति। एतदेव शास्त्रसङ्गतिनाम्ना अत्र अभिधीयते। विस्तारभयात् सूत्राक्षरतः एव अन्यद् वेदान्त-प्रतिपाद्य-वैशिष्ट्यम् न अत्र प्रदर्शितम्।

### षड्विध-तात्पर्यनिर्णायक-लिङ्गप्रदर्शनम्

ननु षड्विध-तात्पर्य-निर्णायक-लिङ्गानां मध्ये केवलम् एकेनैव उपक्रमोप-संहारात्मकेन लिङ्गेन यन्निरूपितं, तत्र तात्पर्यं भवितुं युक्तम्, अभ्यासाद्यवशिष्टलिङ्ग-पञ्चकानां तत्र अनवस्-सम्भवात्। यदेव एतल्लिङ्गषट्कसाधारणं तदेव तात्पर्यम्। तेन उपक्रमोपसंहार-

सूत्रद्वय-साहाय्येन यत् तात्पर्यत्वेन वर्णितं, तत्र तावद् आदरणीयं, यावन्न अवशिष्ट-लिङ्गपञ्चकैः परीक्षितं स्यात्। सत्यम्, तथा कर्त्तव्ये सति अत्रैव सर्वे ग्रन्था आलोचनीयाः स्युः, तन्न अत्र सम्भाव्यते सङ्गच्छते च। ततश्च सर्वेषां सूत्राणाम् अर्थज्ञानाद् ऋते अभ्यासादिद्वारा समग्र-सूत्रार्थालोचनं न सम्भवति। सर्वसूत्रार्थश्च शास्त्र-प्रतिपाद्य-ज्ञानाधीनः, शास्त्रप्रतिपाद्यज्ञानं च अभ्यासादि-शास्त्रप्रतिपाद्यलिङ्गनिर्णयतन्त्रं, तच्च पुनः सूत्रार्थज्ञान-सापेक्षम्। तेन सर्वलिङ्गानां प्रयोगो नात्र सङ्गच्छते, चक्रकादिदोषापत्तेश्च। परन्तु तथापि सर्वाणि लिङ्गान्यत्र प्रयोक्तव्यानि, तदृते एकेन लिङ्गेन निर्णीतः अर्थो न संशय-बीज-वर्ज्जितः स्यात्। तदा काऽत्र गतिः?

### चतुःसूत्रीभागेन तेषां प्रदर्शनम्

एतदर्थं कौशलम् एकम् उद्भावयितुं शक्यते। दृश्यते च ग्रन्थेऽस्मिन् चतुःसंख्याव-लम्बनेन प्रतिपाद्य-विषय-वर्णनरूपा एका रीतिः अवलम्बिता व्यासेन भगवता; यथा ग्रन्थ-स्यास्य चत्वारः अध्यायाः, सर्वेषु अध्यायेषु चत्वारः पादाः इति। एतस्य कोऽभिसन्धिः इति प्रागेव उक्तम्, अतो नात्र पुनः प्रपञ्च्यते। तेन, अथवा व्याससम्प्रदाय-शिक्षानुरोधेन, प्रायेण सर्वैः भाष्यकारैः एतद्-ग्रन्थस्य सर्वे प्रतिपाद्य-विषयाः चतुःसूत्री-भागेनैव वर्णिताः। चतुःसूत्री-भागश्च तेन एतद्ग्रन्थस्य सारभूतः, बीजभूतो वा वक्तुं शक्यते। तेन यदि प्रथमादिषु चतुर्षु सूत्रेषु अभ्यासादिभिः अवशिष्टलिङ्गपञ्चकैः तात्पर्यनिर्णयः कृतः स्यात्, तदेव तात्पर्यं च यदि उपक्रमोप-संहार-सिद्ध-तात्पर्यस्यापि अनुगुणं स्यात्, तदा तादृशे तात्पर्ये न कापि विप्रति-पत्तिः सम्भाव्यते, तथा च अस्माकम् उद्देश्यसिद्धिश्च कथञ्चित् सम्पूर्णतां यास्यतीति वयम् आशास्महे। एवं चेत् तदा इदानीं जन्मादि-सूत्रत्रयम् आलोचनीयम्।

### द्वितीयसूत्रमध्ये तेषां निरूपणम्

तत्र "जन्माद्यस्य यतः" इति द्वितीयं सूत्रम्। अस्य अर्थः, यतः—यद्वस्तुनः, अस्य—जगतः, जन्मादि—जन्मस्थितिलयं भवति तद् ब्रह्म। तेन यतो यस्मात् कारणात् जगतो जन्म, तद् ब्रह्म; यतो यस्मिन् कारणे जगतः स्थितिः, तद् ब्रह्म; यतो यस्मिन् च कारणे जगतः लयः तद् ब्रह्म—इति त्रिविधं ब्रह्मलक्षणं सूत्राक्षरतः एव प्राप्तम्। तथा च एत-ल्लक्षण-त्रयेण यद् ब्रह्म अवगम्यते, तद् ब्रह्म जगतः उपादान-निमित्त-रूपम् उभयं कारणं भवति। यतः एतत्सूत्र-लक्षितश्रुतौ "सत्यं ज्ञानमनन्तं ब्रह्म....तस्माद् वा एतस्माद् आत्मन आकाशः सम्भूतः, आकाशाद् वायुः, वायोरग्निः, अग्नेरापः अद्भ्यः पृथिवी" (तैः १।१) इत्यत्र, तथा "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभि-संविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म" (तै० उ० ३।१) इत्यत्र अभिन्न-निमित्तोपादान-कारणत्वमेव ब्रह्मणः परिव्यक्तं भवति। उपादाननिमित्तकारणयोः भिन्नत्वे ब्रह्मणः सर्वोत्पत्तिप्रतिज्ञा भज्येत। एवं च तत् जिज्ञास्यं ब्रह्म, यत् प्रथमसूत्रेण प्रकृतं, तत् किं रूपम्? इत्येवम्

आकांक्षायाः उत्तरमिदं भवति "जन्माद्यस्य यतः" इति। अनेन ब्रह्मणः लक्षणम् उक्तं भवति।

तत्र प्रथमं तावद् "यतो जन्म" इति ब्रह्मणः प्रथम-लक्षणे "जनिकर्तुः प्रकृतिः" इति अनुशासनात् अभ्यर्हिततया उपादानत्वमेव निमित्तत्वापेक्षया स्वीकार्यमिति। तेन मृत्पिण्डस्य घटं प्रति इव, तन्तोः पटं प्रति इव, जगत् प्रति ब्रह्मणः उपादानत्वम् उक्तं स्यात्। तेन ब्रह्मणः एव अंशविशेषः समुदायो वा जगदाकारेण परिणमते प्रतीयते वा—इति परिणामवादेन विवर्त्त-वादेन वा व्याख्येयम्। तत्र समग्रब्रह्मणः परिणतिवशाज् जगदुत्पत्तौ, तथा ब्रह्मणोऽंश-विशेषस्य परिणति-वशाद् वा तदुत्पत्तौ ब्रह्मणो विकारित्वम् अनिवार्यमेव भवेत्। विकारित्वे च ब्रह्मणः अनित्यत्वं प्रसज्येत। तथा सति उत्पत्तेः प्राग् यद् ब्रह्म आसीत्, इदानीं तत्र वर्त्तते, प्रलयेऽपि तद् ब्रह्म न वर्त्तिष्यते, यतो विकृतेः सम्पूर्णतया प्रकृतितापत्तिः न दृश्यते इति। यत्र तथा दृश्यते तत्र सा विकृतिः प्रातीतिकी एव। ब्रह्मणः विकृतिवशाज् जगद् उत्पद्यते इति यत् मतं तत् श्रुतिस्मृति-विरुद्धमपि। ब्रह्मणः अविकारित्वम् अखण्डत्वम् अजत्वं नित्यत्वादिकं च श्रुतौ स्मृतौ च बहुशः उद्घोषितम्। अंशविशेषस्य विकारित्वं तथा अंशिनश्च अविकारित्वं स्वीकृतं चेत्, तदा स अंशांशिसम्बन्धः सत्यतया न ग्रहणीयः। यतो यदंशस्य विकारः स्यात्, सः अंशः न अविकारिणः अंशत्वम् अश्नुते। तत्र अंशांशिसम्बन्धकल्पनं भ्रमः एव। तत्र विकारस्य असत्यत्वमेव कल्पनीयम्। तेन प्रतीति-वशाज् जगदुत्पत्तिरेव स्वीकार्या भवति। एवं च प्रतीतिवशाद् ब्रह्मणः अंशेन समग्रेण वा जगदुत्पत्तिस्वीकारे शुक्तौ रजतोत्पत्तिवज् जगद् ब्रह्मणः विवर्त्त एवेति सिध्यति। अतः द्वितीयसूत्रेण विवर्त्तवादः एव उपदिष्टः भवति।

**परिणामारम्भवादिनोर्विचारे आरम्भवादः**

अत्र तु परिणामारम्भवादिनौ परस्परं महोत्साहेन प्रत्यवतिष्ठेते। परं तु मतं तयोः न विचारसहम्, प्रत्युत तयोः विवादफलम् अनिर्वचनीय-वादानुकूलम्।

तथा हि आरम्भवादिनां मते—जगद् यदि ब्रह्मणः एव जातं स्यात्, तदा तस्य जन्मनः प्राक् तत् जगत् तस्य कारणे ब्रह्मणि आसीत् न वा? यदि तत्र जगद् आसीत् व्यक्तरूपेण, तदा जन्मार्थस्य व्यर्थतापत्तिः दुर्वारा। अथ चेत् सूक्ष्मरूपेण अव्यक्तरूपेण वा जगत् तत्र आसीत्, तदा "तस्य जन्म"—इत्युक्ते जन्मपदस्य अर्थसंकोचः एव कृतः स्यात्। जगज्जन्मनः प्राग् यदि जगद् ब्रह्मणि वर्त्तेत, तदा तस्य जन्म इति संगच्छते कथम्? ब्रह्मणः वा कारणत्वं कथम्? अव्यक्तजगदेव व्यक्तजगतः कारणं भवति, न तु ब्रह्म। अतः सूक्ष्मरूपेण जगत्सत्तायाः स्वीकारे ब्रह्मणः जगत्कारणत्वं व्याहतं स्यात्। यत् न वर्त्तते तस्यैव जन्म—इत्येव साम्प्रतम्। यत् तु विद्यते, तस्य जन्म-कल्पनं सिद्धसाधन-दोषदुष्टम्। यथा पुत्रजन्मनः प्राक् पुत्रः पितृमातृ-शरीरे देशान्तरे वा कुत्रापि न वर्त्तते इत्येव सर्वैः दृश्यते। अतः असतः अविद्यमानस्यैव जन्म भवति, न तु सतः विद्यमानस्य; यथा घटोत्पत्तिः घटप्रागभावात् भवति—इत्येव सर्वैः स्वीक्रियते।

अतः अत्र जगज्जन्मनः प्राक्, जगत् न ब्रह्मणि कथमपि आसीत्—इत्येव स्वीकार्यम्। तेन आरम्भवादः असत्कार्य्यवादो वा सङ्गच्छते न तु परिणामवादः।

### तत्र परिणामवादिनां मतम्

अत्र परिणाम-वादिनः प्रतिवदन्ति—यदि कार्यं कारणे न वर्त्तेत, तदा वालुकातः तैलं कथं न उत्पद्यते ? घटार्थी न मृत्पिण्डम् आहरिष्यत्। सफलप्रवृत्ति-जनकत्व-दर्शनात्, कार्यं कारणे रूपान्तरेणैव वर्त्तते—इत्येव स्वीकार्यम्। इयं रूपान्तरता कार्यस्य कारणे अव्यक्तावस्था इत्युच्यते। सतः अवस्थान्तरता-सम्पादनमेव तस्य जन्म उत्पत्तिर्वा—इत्येव समीचीनं मतम्। एवं च जगदपि ब्रह्मणि अव्यक्तावस्थया वर्त्तते, ततः एव आविर्भवति। अतः सत्कार्यवादापरनाम परिणामवादः एव युक्तः, आरम्भवादे अभावाद् भावोत्पत्ति-प्रसङ्गाद् आरम्भवादापरनाम असत्कार्य्यवादो न युक्तः इति।

### परिणामवादभेदः

अत्र केचिद्—एतदव्यक्तावस्थापन्नजगतः ब्रह्मभिन्नत्वेन अवस्थानं मन्यन्ते, केचिद् भिन्नाभिन्नत्वेनेति। आद्यास्तु प्रकृतिपुरुषवादिनः सांख्याः, यतः तन्मते प्रकृतेरेव परिणामः जगत्; अथवा ते परमाणुप्रभृतिवादिनो नैयायिक-वैशेषिकविशेषाश्च। तथापि व्यवहारतः नैयायिका वैशेषिकाश्च असत्कार्य्यवादिनः इत्येव मन्यते, न तु परिणामवादिनः इति। यतः तेषां मते परमाणुप्रभृतीनां संस्थानविशेषः एव जगत्। अन्त्याश्च ब्रह्मकारणता-वादिनः, अथवा ब्रह्मशक्तिकारणतावादिनः शैव-शाक्त-वैष्णवादयः। एते खलु प्रायेण विशिष्टाद्वैतवादिनो द्वैताद्वैतवादिनः इत्यादिनाम्ना समाख्यायन्ते। ब्रह्मणि जगतः अव्यक्त-रूपेण अभिन्नरूपेण वा अथवा शक्तिरूपेण अवस्थानस्वीकारात्, ततः एव च पुनस्तस्य पूर्ववद् आविर्भावात्। एतेषां मते जीवजगतोः ब्रह्मणा सह सुवर्ण-कुण्डलयोरिव भिन्नाभिन्न-सम्बन्धः स्वीक्रियते। सत्कारणतावादिमते कारणस्वरूपब्रह्मशक्तिपरिणामः एव जगद्रूपकार्यं भवति। तन्मते कार्यकारणयोः सम्पूर्णतया अभेदे स्वीकृते कार्यस्य तथा तत्कारणशक्तेरपि मिथ्यात्वमेव सिध्यति। शक्त्याश्रयं ब्रह्ममात्रं सद्वस्तु। कार्यस्य उत्पादविलयादिकं सर्वं तन्मते मिथ्यैव भवेत्। सत्कार्यवादाख्य-परिणामवादे कार्यस्य कारणे सत्त्वं कारणात्मना शक्त्यात्मना वा यतः स्वीकृतं स्यात्, ततः कार्य्यकारणयोः भेदाभेद-सम्बन्ध-घटित-परिणामवादः एव सिध्यति, कार्य्यस्य जगतादेः सत्यत्वं च स्वीकर्त्तव्यं स्यात्। तत्र स्वातन्त्र्यवादे तु शक्तिशक्तिमतोः अभेदेऽपि शक्तिपरिणामः एव जगत्, तच्च सत्यमिति मन्यते। अतः अत्र सत्यत्वं मिथ्यात्वस्य नामान्तरमेव भवति। यतः द्वयोः न अभिन्नता सम्भवति, एकस्यैव द्विरूपत्वे अभिन्नता उपदिश्यते। अतः शक्तिमतोः अभेदे एकतरस्य परिणामे उच्यमाने वस्तुतोऽन्यतरस्य लोपः एव उपजायते। तेन स्वातन्त्र्यवादे जगत्सत्यत्वं न वास्तवं भवति। एवं च परिणामवादे एतानि एव मतान्तराणि दृश्यन्ते।

### आरम्भवादिनां परिणामवादखण्डनम्

*अत्र तु आरम्भवादिनां मत्यवसानं दृश्यते । ते तावत् मन्यन्ते—यदि कार्यं कारणे* वर्त्तते, तदा कथं न तत् कार्यं तत्र दृश्यं भवेत् ? अणुवीक्षण-यन्त्र-साहाय्येन वटबीजेषु पूर्णावयव-वटवृक्षोऽपि द्रष्टुं शक्यते, तस्य तत्र अव्यक्तावस्था-सत्त्वेऽपि । तन्तुषु तु पटो न अव्यक्तावस्थापन्नः सन् वर्त्तते, अतस्तत्र पटो न दृश्यते कथञ्चन । अतः कार्यं कारणे न वर्त्तते । विद्यमाने सति तद् अवश्यमेव दृश्यं भवेत् । ततश्च यस्य कार्यस्य कारणे अव्यक्तभावेनापि वर्त्तनं, यथा वटबीजे वटवृक्ष-वर्त्तनं, तस्य ततो जन्म—इति वक्तुं न शक्यते । वर्त्तमानस्य जन्म न सम्भवति । अवर्त्तमानस्यैव जन्म । अव्यक्तस्य व्यक्ततापत्तिः नापि सम्भवति । अवस्थान्तरप्राप्तस्य व्यक्तस्यैव हि सा । अव्यक्तस्य व्यक्तत्वे स्वरूप-हानिदोषः एव भवेत् । अतो यस्य यतो जन्म, तत् तत्र न विद्यते । अभावाद् भावोत्पत्तिरिति यद् बाधककल्पनं, तन्न सम्यक् । अभाव-मात्राद् भावोत्पत्तौ तादृशबाधकत्व-प्रसङ्गः । अतः आरम्भवादः एव समीचीनः । तेन तन्तुभ्यः पटोत्पत्तिस्थले यथा कारणभूत-तन्तुषु कार्यम् असत्, कारणाद् असतः एव कार्यं सद्रूपेण उत्पद्यते—तथा सद्ब्रह्मणि तज् जगत् न कथमपि विद्यते, सद्ब्रह्मणि तज् जगत् असदेव भवति । तस्मात् सतः न जगतः जन्म, किन्तु असतः एव जगतो जन्मादिकम्—इत्येव वक्तुम् उचितम् । सतः अवस्थान्तरता-सम्पादनमपि न जन्म-पदस्य अर्थो भवितुम् अर्हति । न कोऽपि कस्यचिद् वस्तुनः अवस्थाविशेषस्य एव जन्मत्वं स्वीकरोति, अवस्थावतः सतः एव जन्म—इत्येव सर्वैः स्वीक्रियते । तेन असतः एव जन्म, न तु सतः । अतः आरम्भवादः असत्कार्य्यवादः एव वा समीचीनः, न तु परिणामवादः सत्कार्य्यवादो वा इति ।

### उभयोर्विवादे विवर्त्तवादः

एवं च पक्षद्वय-समालोचने कृते उभयमेव अंशतः सत्यम् असत्यं च इति प्रतिभाति । तथैव उभयोरपि ऐक्यम् अनैक्यं च दृश्यते । कारणे कार्यस्य सत्त्वम् असत्त्वम् इति उभयमेव प्रतिभाति । तेन विरुद्धयोः सत्यत्वे तृतीय-पक्षरूपम् अनिर्वचनीयत्वमेव कार्य्यस्य सिध्यति । तदेव सदसद्भिन्नत्वम् । न वा कार्य्यस्य उभयात्मकरूपत्वं, सदसत्त्वम् ? सदसतोः परस्पर-विरोधात् न सामानाधिकरण्यम् । परस्पर-विरुद्धयोः सामानाधिकरण्यस्य निर्वचनासम्भवाद् अनिर्वचनीयत्वम् एव युक्तम् । यत् च सदसदुभयात्मकमिति कल्प्यते, तन्न वस्तुतः सत् न वा असत् भवितुम् अर्हति । अवयविवत् तस्य अतिरिक्तत्वात् । एवं सदसद्वादोऽपि निरस्तः । अतः सदसद्भिन्नवादः एव प्रतिष्ठितः । अयमेव विवर्त्तवादः अनिर्वचनीयवादः सत्कार्य्यवादो वा । एतदेव आरम्भ-परिणाम-वादयोः विवाद-फलम् । ततश्च [illegible] समन्वयोऽपि अनिर्वचनीयः, समान-धर्म-सम्बन्धावच्छेदेन भेदाभेदयोः विरुद्धत्वाभावात् । [illegible] धर्मावच्छेदेन [illegible] [illegible] सिध्यति । [illegible]

वादिनोऽपि भेदवादिन एव। वेदान्तिनां मते भिन्नाभिन्नत्व-सम्बन्ध-मध्ये भेदः एव मिथ्या, अतः स दृश्यते न तु विद्यते। अभेदस्तु पारमार्थिकः। अतो भेदवादरूपः भेदाभेदवादोऽपि मिथ्या। अभेदवादश्च अजातिवाद एव, स एव यथार्थः युक्तिसहश्च। तेन ते विवर्त्तवादिनः इत्यादिनाम्ना आख्यायन्ते। यथा शुक्तौ रजतोत्पत्तिः प्रातीतिकी, न तु पारमार्थिकी, एवमेव कार्य्य-जातं प्रातीतिकं न तु पारमार्थिकम्। अत्र शुक्ति-स्थानीयाधिष्ठानं सत्यं, रजत-स्थानीयारोप्यम् असत्यम् अनृतं वा। एतदेव विवर्त्तवादिनां मतम्। आरम्भ-परिणाम-वादिनोः विरोधफलमेव अयं विवर्त्तवादः इति मन्यते। एतेन विवर्त्तवादानुसारेण ब्रह्मणः जगतः जन्म, न तु अन्यतः कुतश्चित्—इति मतमेव पर्यवस्यति। तथा च 'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः'—इत्येव अर्थः 'यतोऽस्य जन्म' इति "जन्माद्यस्य यतः" इति सूत्रोक्तब्रह्मलक्षणतः अवगम्यते।

### ब्रह्मणः द्वितीयलक्षणफलम्

एवं च द्वितीयं यद् ब्रह्मलक्षणं "यतोऽस्य स्थितिः" इति, यत्र "येन च जातानि जीवन्ति" इति श्रुतिभागो लक्ष्यते इति, ततोऽपि ब्रह्मणः सत्यत्वं, जगतो मिथ्यात्वं, जीवस्य ब्रह्माभिन्नत्वं च सिध्यति। यतो "यतोऽस्य स्थितिः" इत्यत्र घटादीनां मृत्तिकायां स्थितिवत्, कङ्कणादीनां सुवर्णे स्थितिवत्, पटस्य तन्तुषु स्थितिवत्, तरङ्गाणां तारङ्गे समुद्रे स्थितिवत्, शुक्तिरजतादीनां शुक्तौ स्थितिवत्,—ब्रह्मणि एव जगतः इयं स्थितिः इति अवगम्यते, जगतः अन्यत्र स्थितिश्च निषिध्यते। भूतलादिषु घटस्थितिवत्-स्थितिकल्पने "जगद् ब्रह्मणि स्थितम्"—इत्युक्तेः न किमपि सार्थक्यम्, अन्यत्र स्थितेः अनिवारणात्। ब्रह्मण्येव जगतः स्थितिः इत्युक्ते, जगतः अन्यत्र स्थितिः निषिध्यते। अतः जगतः न स्वाधीन-सत्ताकत्वम्। स्वाधीन-सत्ताकस्य यत्किञ्चिदाधार-निर्देशे, न कोऽपि लाभः। एतेन न किमपि अधिकम् उपदिष्टं भगवत्या श्रुत्या। अतोऽस्य पराधीन-सत्ताकत्वम् अत्र श्रुतेः उपदेशः। तत्रैव उपदेशस्य अपूर्वत्वं सार्थक्यं च। यतो जगतः स्वाधीनसत्ताकत्वमेव अस्माकं यः निश्चयः, स एव भ्रमः। तन्नाशः एव अत्र सार्थक्यम्। न वा घटादीनां मृत्तिकायां स्थितिः, शुक्तिरजतादीनां शुक्तौ स्थितितः स्वरूपतः भिद्यते। उभयत्र पराधीनसत्ताकत्वं विद्यते। व्यवहारार्हत्वं च उभयोरेव वर्तते। प्रभेदस्तु स्थिति-कालगताल्पाधिक्यम् एव। रज्जुसर्प-जन्य-भीतिवशात् मृत्युरपि संघटते। शुक्तौ रजतभ्रम-वशात् मिथः विरोधोऽपि जायते। एतेषु सर्वेषु स्थलेषु कार्यस्य कारणे एव विलयः, तत्रैव स्थितिः उत्पत्तिश्च। अतो जगत् ब्रह्मणि कल्पितमेव। जगतो ब्रह्मणि स्थितिः इति उक्त्या जगद्ब्रह्मणोः अतिरिक्तं किमपि नास्ति, यत्र जगतः स्थितिः कल्पयितुं शक्यते। ब्रह्मैव केवलं वर्तते। तत्रैव जगतः स्थितिः इत्येव अत्र उक्तं भवति। अधीन-सत्ताकत्वस्य कल्पितत्वं मिथ्यात्वं वा सर्वैः मन्तुम्

उचितम्। एतेन जगतो मिथ्यात्वमेव उपदिष्टं भवति, तथा च विवर्त्तवादोऽपि अत्र चोदितः अस्ति। इत्यत्र नास्ति कोऽपि सन्देहः।

### ब्रह्मणः तृतीयं लक्षणम्

तथा च तृतीयं यद् ब्रह्मलक्षणं "यस्मिन् जगतो लयः तद् ब्रह्म" इति, तत्रापि पूर्वोक्तमेव दृढीकृतम्। यतो यस्मिन् जगतो लयो जायते, तस्मिन् तज्जगद् व्यक्तरूपेण अव्यक्तरूपेण वा वर्त्तते न वा? यदि केनचिद् रूपेणापि वर्त्तते, तदा लयः तत्र न आत्यन्तिको निरवशेषो वा। सावशेषे लये च न लयशब्दस्य सम्पूर्णोऽर्थः परिगृहीतः स्यात्। तथा सति लयशब्दस्य अर्थसंकोचः एव कृतः स्यात्। अलौकिकविषये एतत् तु नैव सङ्गतम्। एवं चेद्, ब्रह्मणि जगतः सम्यक् लये सति जगतः आत्यन्तिकः अभाव एव तत्र भविष्यति। एतादृशो लयः, तेन, जागरे स्वाप्नविलयसदृशः, शुक्तौ शुक्तिरजत-लयवद् एव भवितुम् उचितः। तथा सति जगद् ब्रह्मणि कल्पितमेव इत्येव सिध्यति। अतः एतेन प्रागुक्तः सिद्धान्तः एव दृढीकृतः; "ब्रह्म सत्यं, जगन्मिथ्या, जीवो ब्रह्मैव नापरः" इत्येव प्रमाणितम्।

एवं च प्रथमसूत्रेण यद् ब्रह्मसत्यत्वं जगन्मिथ्यात्वादिकं च प्रतिपादितं, तदेव एतत्-सूत्रेणापि ब्रह्मणो लक्षणत्रयेण समर्थितम्। इयं पुनरुक्तिः तेन प्रागुक्त-षड्विध-तात्पर्यनिर्णायक-लिङ्गानां मध्ये "अभ्यास"-नामकम् एकं लिङ्गमिति वक्तुं शक्यते। अतः प्रागुक्तोपक्रमोप-संहाराख्य-लिङ्गेन सह अस्य अभ्यासस्य एक-वाक्यता जाता—इति दृश्यते। तेन अद्वैतमतानु-सारेण ब्रह्मप्रतिपादनमेव एतच्छास्त्र-प्रतिपाद्यं भवति।

ततश्च एतत्सूत्रेण "उपपत्ति"-नाम अपरं लिङ्गमपि उपलभ्यते। यतः एतेन वेदान्त-वाक्यम् अवलम्ब्य ब्रह्मणः लक्षणम् उक्तम्। लक्षणमेव अनुमितौ हेतुर्भवति। यथा कम्बुग्रीवा-दिमत्त्वं घटस्य लक्षणं, गल-कम्बलवत्त्वं च गोर्लक्षणम्। घटस्य गोश्च अनुमाने कर्त्तव्ये, ते द्वे हेतू भवतः। तेन एतच्चतुःसूत्रीमध्ये यद् ब्रह्मलक्षणम् उक्तं तत्रैव "उपपत्ति"-नाम तात्पर्य-निर्णायक-लिङ्गम् उपलभ्यते। एतेनापि उपक्रमोपसंहाराख्यलिङ्गप्रतिपाद्यं यद् ब्रह्मसत्यत्व-जगन्मिथ्यात्वादिकं, तदेव एतज्जन्मादिसूत्रेण विज्ञापितम्—इति प्रदर्शयितुं शक्यम्। एवं च सूत्रद्वयेन षड्विध-तात्पर्य-निर्णायक-लिङ्गानां मध्ये त्रीणि लिङ्गानि उपलब्धव्यानि। तैः त्रिभिरेव एतच्छास्त्रस्य प्रतिपाद्यं यद् अद्वैतब्रह्मसत्यत्व-जगन्मिथ्यात्वादिकं तत् सर्वं सम्यक् लभ्यते एव।

### तृतीयसूत्रमध्ये तेषां प्रदर्शनम्

ततश्च तृतीयं सूत्रं "शास्त्रयोनित्वात्" इति। एतस्य सर्वसम्मतः अर्थः—"शास्त्र-मेव योनिः प्रमाणं यस्य तद् ब्रह्म।" तेन तदेव ब्रह्म अनेन शास्त्रेण प्रतिपादितं, शास्त्रैक-गम्यम्—अतः प्रत्यक्षानुमानाद्यपर-प्रमाण-गोचरम्। "औपनिषदं पुरुषं पृच्छामि", "तद् ब्रह्म उपनिषत्परम्" इत्यादिश्रुतिभ्यः एतदेव ज्ञायते। तदेतद् ब्रह्म निर्विशेषमेव,

ब्रह्मत्वम्, अज्ञेयं चेति । यतो निर्विशेषाद्वैते प्रत्यक्षादि-प्रमाणानां नोपयोगः, प्रमाणानां सम्बन्धाधीनत्वात् । निर्विशेषाद्वैतम् असङ्गमेव, असङ्गेनात्मना सह सम्बन्धस्य अयोगात् । यद्यपि एवं शास्त्रस्यापि न तत्र प्रामाण्यं स्यात्, तथापि निषेधमुखेन कथञ्चित् तत् सम्भवत्येव इति प्राग् उपवर्णितम् । एवं च ब्रह्मणः असङ्गत्वविवक्षयापि तदन्यत् सर्वं मिथ्येति प्रतिपादितम् । मिथ्या सह सत्यस्य यः सम्बन्धः सोऽपि मिथ्यैव । तेन ब्रह्मान्यस्य सर्वस्य निषेधः । निषेधप्रतियोगिना सह सद्ब्रह्मणः सम्बन्धोऽपि मिथ्यैव भवति । असद् यद् दृश्यं भवति, तदेव मिथ्या । अदृश्यम् यद् असत् वन्ध्यापुत्रादिकं, तन्न मिथ्या । यच्च सत् तदपि न दृश्यम् । यद् दृश्यं तदेव मिथ्या । एतेन ब्रह्मणः शास्त्रमात्र-गम्यत्वात्, तस्य निर्विशेषाद्वैतत्वं, तद्भिन्नस्य मिथ्यात्वं च सिध्यतः । एतदेव च पूर्वसूत्रद्वयेनापि उपपादितम् । अतः अत्रापि "अभ्यास"-लक्षण-तात्पर्यनिर्णायकं लिङ्गं सुलभम् ।

ततश्च अत्रैव "अपूर्वता"-नामकं लिङ्गं प्रदर्शयितुं शक्यते, यतो यन्न पूर्वं जातं, यन्न पूर्वं केनापि उपायेन ज्ञातं, तदेव "अपूर्वम्"—इत्यत्र न कापि विप्रतिपत्तिः । एवं यज् जिज्ञास्यं ब्रह्म, यतो दृश्यजातस्य जन्मादयः, यच्च पुनः निर्विशेषम् अद्वैतम् अचिन्त्यम् अज्ञेयं, तस्य शास्त्रमात्रैकगम्यत्व-कथनम् अपूर्वमेव । एतदेव शास्त्र-मात्रैकगम्यत्वम् एतत्सूत्रेण विज्ञापितम् । तेन यद् ब्रह्म उपक्रमोपसंहारादिना प्रतिपादितं, तदेव अत्र अपूर्व-विषयत्वेन प्रतिपादितं सत् प्रदर्शितलिङ्गत्रयेण यद् एतच्छास्त्रतात्पर्यत्वेन उक्तम्, तेन सह अस्य ऐक्यमेव प्राप्तम् । निर्विशेषाद्वैत-ब्रह्मणि सिद्धे ब्रह्मसत्यत्व-जगन्मिथ्यात्व-जीवब्रह्माभिन्नत्वादिकं सर्वं पूर्ववत् सिद्धमेव । एवं च एतत्सूत्रेण "अपूर्वता"-नामकलिङ्गमपि लभ्यते ।

अर्थवादश्चापि एतत्सूत्रेणैव उपलभ्यते, यतोऽर्थवादः स्तुतिनिन्दा-स्वरूपः । अत्र शास्त्रमात्रगम्यत्वं ब्रह्मणः प्रतिपाद्यं, शास्त्रं च नित्यम् अपौरुषेयम् इति मत्वा ब्रह्मविद्यायाः स्तुतिरेव कृता स्यात् । तेन ब्रह्मणः शास्त्रभिन्न-गम्यत्वमपि निन्दितं भवति । एवं च अर्थवादोऽपि अत्र लभ्यते एव । तथा सति एतेनापि अद्वैतब्रह्मणः एव सत्यत्वम्, अन्यस्य सर्वस्य मिथ्यात्वम्—इत्येव सुदृढीकृतम् । अत एव पूर्वोक्तसूत्रद्वयेन सह एकतात्पर्यकत्वं च लभ्यते । तेन ब्रह्मसत्यत्व-जगन्मिथ्यात्व-जीवब्रह्माभिन्नत्वादिकं सर्वम् एतदर्थवादरूप-तात्पर्यनिर्णायक-लिङ्गेनापि लब्धम् । एवं च एतत्सूत्रत्रयेण पञ्च-तात्पर्य-निर्णायक-लिङ्गानि समधिगतानि ।

### चतुर्थसूत्रेण तेषां प्रदर्शनम्

तथैव चतुर्थेन सूत्रेण फल-नामकं लिङ्गमपि सुलभमेव । तत्र सूत्रम्—"तत् तु समन्वयात्" इति । अत्र पूर्वोक्तसूत्राद् यदि शङ्कयं जायते, कर्मोपासने चापि [illegible] भवतः, यतस्ते द्वे अपि [illegible] नान्य-प्रमाण-गम्ये; [illegible]; तेन उच्यते, "तु" तत्र, "तत्" ब्रह्म एव शास्त्रप्रतिपाद्यं, तस्मिन्नेव शास्त्राणां "समन्वय"-तात्पर्यत्वात् । एतेन अत्रैव

एतच्छास्त्र-प्रतिपाद्यम्—इत्येव उपदिश्यते। तथा च एतच्छास्त्रावगतेः फलं ब्रह्मज्ञानम्। तदर्थं च नान्य-साधनापेक्षा। आत्मनः सन्निहितत्वाद् ब्रह्मणः आत्मत्वाच्च। अथ चेत् तद् ब्रह्म सगुणं सविशेषं वा स्यात्? तदा न तत् केवलं शास्त्रमात्र-गम्यं भवेद्, यतः सगुणस्य सविशेषस्य च अनुमानादि-प्रमाणगम्यत्वमपि सम्भाव्यते। निर्गुण-निर्विशेष-ब्रह्मणः एव शास्त्र-मात्र-गम्यत्वं, तन्न अन्यप्रमाणगम्यं कथमपि भवति। ततश्च निर्गुणब्रह्मणः एतच्छास्त्र-ज्ञान-फलकत्वे, एतच्छास्त्र-प्रतिपाद्यत्वे च जगन्मिथ्यात्वादिकमपि प्रसज्यते। यतो जगदादीनां मिथ्यात्वम् ऋते ब्रह्मणः निर्गुणत्वं न सम्भाव्यते। अत एतत्-फल-नामक-लिङ्गेनापि ब्रह्मसत्यत्व-जगन्मिथ्यात्व-जीवब्रह्माभिन्नत्वादिकं सर्वं पूर्वोक्तमेव लभ्यते। तस्यैव अन्यलिङ्ग-प्रति-पादितत्वात्, तदेव षड्विध-तात्पर्य-निर्णायक-लिङ्गसिद्धं भवति। एवं च अभ्यासोऽपि अत्र प्रदर्शयितुं शक्यते। तथा सति "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति यद् आदौ उपक्रमोपसंहार-प्रदर्शनावसरे उक्तम्—तस्यैव अत्र प्रतिपादितत्वात् एतदेव एतद्ब्रह्मसूत्राख्य-ग्रन्थस्य प्रतिपाद्यं भवति इति दिक्।

### शास्त्रसङ्गतिनिरूपणोपसंहारः

एवं च एतदेव चेद् एतच्छास्त्रप्रतिपाद्यं भवेत्, तदा ग्रन्थस्यास्य चतुर्षु अध्यायेषु, तत्रापि प्रत्येकं पादे, एवं च अस्य षोडशसु पादेषु, तथैव तदन्तर्गतेषु सर्वेषु अधिकरणेषु, पुनः तदधिकरणान्तर्गतेषु सर्वेषु सूत्रेषु एतच्छास्त्र-प्रतिपाद्य-विषयाणाम् अविरुद्धो योऽर्थः स एव करणीयः नान्यः। इयमेव शास्त्रसङ्गति-नाम्ना अभिधीयते अस्मिन् शास्त्रे। सूत्रादि-व्याख्याने यदि केनापि एतस्य लंघनं कृतं स्यात्, तदा तेन व्यासानुमतं व्याख्यानं न कृतम् इत्येव अवगन्तव्यम्। यथा श्रुतिमीमांसारूपां श्रुतिसङ्गतिं विहाय सूत्रार्थे कृते सोऽर्थो व्याससम्मतो न भवति, तथा इमां शास्त्रसङ्गतिं विहाय सूत्रार्थे कृते सः अर्थः न व्याससम्मतो भवेत्। तत्र इयं शास्त्रसङ्गतिः अद्वैतसिद्धान्तानुकूला इति दृष्टम्। अतः अद्वैतमतानुकूलम् अत्र सर्वसूत्राणां व्याख्यानं कर्त्तव्यमिति।

### [illegible]

परन्तु बहुषु अद्वैतमत-विरुद्ध-व्याख्यानेषु सत्सु एतन्मतं कथं समीचीनम् इति आशंक्यते। भास्कर-रामानुज-मध्व-निम्बार्क-श्रीकण्ठ-श्रीपति-वल्लभ-विज्ञानभिक्षु-बलदेवकृत-भाष्येषु अद्वैतसिद्धान्तो महोत्साहेन श्रुतियुक्तिभिरेव खण्डितो दृश्यते। ते सर्वे परस्परविरुद्ध-मतवादिनः सन्तोऽपि अद्वैतमतखण्डन-विषये अभिन्न-मतावलम्बिनः, अद्वैतमतस्य खण्डनार्हत्वे न तेषां [illegible] दृश्यते। सर्वे हि ते आचार्यपदवीं समारूढाः सम्प्रदाय-प्रवर्तकाश्च, [illegible] [illegible]। सर्वे हि ते [illegible] [illegible]-मूलकत्वं प्रदर्शयन्ति च। तेषां मतेऽपि [illegible] तात्पर्य-निर्णायकं लिङ्गं [illegible] अतिनिपुणतया [illegible] [illegible]। तेन [illegible]

द्वैत-द्वैताद्वैत-विशिष्टाद्वैत-मतान्यतम-मतेनैव कर्त्तव्यः इत्येव पर्यवस्यति, यतः अद्वैतवाद-विरोधिनः सर्वे प्रायेण एतत्त्रिविध-मतान्यतमं मुख्यतया समाश्रयन्ति। एवं च एतच्छास्त्र-प्रतिपाद्यं न निर्णीतं भवति, तेन शास्त्रसङ्गतिरपि न निर्णीता भवति, सर्वेषां मतवादिनां मतानैक्यात्। तथा च व्यास-सम्मत-सूत्रार्थ-निर्णयः पुनः अव्यवस्थितः एव स्यात्?

## अद्वैतिनां श्रुतिमात्रोपजीवित्वम्

तथापि श्रुतिसङ्गति-निर्णयावसरे अस्माभिः दृष्टम्—अद्वैतमत-विरोधिनः सर्वे न श्रुति-मात्रोपजीविनः इति, यतः तेषां मते स्मृतिरूप-पुराणादि-शास्त्राणां तथा योगि-प्रत्यक्षादीनां लौकिक-प्रमाणानामपि अलौकिक-विषयेऽपि श्रुतिवत् प्रामाण्यं मन्यते। केषाञ्चित् मतेन शैव-वैष्णवानां तामिलभाषया रचिता द्राविडवेदाः अपि वेदवत् प्रमाणं भवन्ति। तथैव गुरुमुखी-वङ्गाद्यपर-भाषारचित-पौरुषेय-ग्रन्थादयोऽपि बहूनां मतेन वेदवत् प्रामाण्यं लभन्ते। अद्वैतिनस्तु अलौकिकविषये श्रुतिप्रमाणमेव समाश्रयन्ति। सूत्रकृद्-भगवद्-व्यासोऽपि अत्र श्रुति-मीमांसा-मुखेनैव तत्त्वोपदेशाय प्रवृत्तः, तेन सोऽपि श्रुति-प्रामाण्य-प्राधान्यवादी। "श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी" इति वचनात् स्मृतीहासपुराणादीनां न श्रुतिवत् प्रामाण्यं भवति। अतः अद्वैतमतमेव श्रुतिसम्मतं भवितुम् उचितम्। तथा सति श्रुतिमात्रोपजीवि-शंकराचार्यस्य भगवतः मतमेव यथा व्याससम्मतं, न तथा अन्येषामिति कल्पयितुं शक्यते। परवर्त्तिकाले तु निम्बार्क-श्रीपत्यादयो बहवः आचार्याः अद्वैतमतवादिनः अनुसृत्य स्वस्वमतानां श्रुतिमात्रोपजीवित्वं प्रदर्शयितुं सन्नद्धा दृश्यन्ते। तेषां याथात्म्यं सुधीभिर्विभाव्यम्।

## सूत्राक्षरतः अद्वैतमतस्य व्याससम्मतत्वम्

अत्रापि पुनः अद्वैतमतस्यैव व्याससम्मतत्वे सम्भावनाधिक्यं दृश्यते, यतः उपक्रमोप-संहारादि-लिङ्गानुसरणम् अद्वैतवादे एतद्ग्रन्थस्य आद्यन्त-सूत्राक्षरार्थतो यथा यथा सुष्ठु भवेत्, तथा च चतुःसूत्री-भागेनापि तत्तत्सूत्राणां स्पष्टार्थो यथा समर्थितो भवेत्, न तथा द्वैतादि-मतवादे सम्भवति—इत्येव अस्माभिः अवकल्प्यते।

तत्रायं हेतुः—तेषां मते ईश्वरोपासनस्य फलं तदनुग्रहरूपं तस्य कृपारूपं वा। तादृशानुग्रहस्यैव तेषां मतेन अनावृत्ति-कारणत्वं मन्यते। तेन सूत्राक्षर-लब्धं यद् ब्रह्मज्ञान-फलं, तन्न साक्षाद् अनावृत्ति-रूपम्, ईश्वरकृपोपासनयोश्च अवान्तरकारणत्वात्, ताभ्यामेव तयोः व्यवहितत्वाच्च। सूत्राक्षरतो ब्रह्मज्ञान-फलं साक्षाद् अनावृत्तिरित्येव लभ्यते। अतः सूत्राक्षरतो यः स्पष्टः अर्थः उपलभ्यते, तेन द्वैतादि-मत-वादिनां मतं न समर्थितं स्यात्—इत्येव प्रतिभाति। आद्यं सूत्रं यद् "अथातो ब्रह्मजिज्ञासा", अन्त्यं सूत्रं यद् "अनावृत्तिः शब्दात्", द्वितीयं सूत्रं यज् "जन्माद्यस्य यतः", तृतीयं सूत्रं यत् "तत् तु समन्वयात्" इति, तेषाम् अक्षरतः एव ब्रह्मज्ञानात् मुक्तिः इत्येव अवगम्यते, नान्य-ज्ञानात्, न वा अन्यसाधनात्।

तत्र यदि ईश्वरकृपोपासनादीनां च द्वारत्वम् अवान्तर-साधकत्वं वा भगवद्-व्यासाभिप्रेतम् आसीत्, तदा तत्रैव किं न तेन सूचितम् ? तथैव शिव-विष्णु-शक्ति-प्रभृतीनां ज्ञानादिना उपासनादिना वा मुक्तिः भवेद्—इत्येव यदि भगवद्-व्यासस्य वक्तव्यम् आसीत्, तदा तत्रैव कथं न सूचितं तेन ? कथं "ब्रह्मजिज्ञासा" इत्येवं पदं गृहीतम् ? विष्णूपासनं, विष्णुजिज्ञासा, शिवोपासनं, शिवजिज्ञासा—इत्यादिपदं कथं न गृहीतम् ? इत्यतः एतेषां मतवादिनां मतं न व्यासानुमोदितम्—इत्येव अनुमीयते। ततश्च ईश्वरकृपा-जन्या मुक्तिरिति स्वीकारे मुक्तेः जन्यत्वं सिध्यति। जन्य-भाववस्तुनो नाश्यत्वम् अनित्यत्वं च प्रसिद्धमेव। तेन च एतच्छास्त्र-प्रतिपाद्य-विषयः अद्वैतवादानुकूलः, न तु द्वैताद्यपर-मत-वादानुगुणः—इत्येव पर्यवस्यति।

## व्यासमतस्य अद्वैतपरत्वम्

प्रकारान्तरेणापि एतज् ज्ञातुं शक्यते। तथा हि—प्रायेण वेदान्तमत-विरोधिनः सर्वे सूत्रकाराः प्राचीन-भाष्यकाराश्च वेदान्त-मत-खण्डनाय अद्वैतमतमेव खण्डितवन्तः—इत्येव व्यास-तात्पर्य-निर्णय-ग्रन्थे प्रदर्शितं श्रीमता आयन्नदीक्षितेन। एतेनापि एतद् ज्ञातुं शक्यते—यत् प्राचीनैः ऋषिभिश्च वेदान्तमत-शब्देन अद्वैतमतमेव बुबुधिरे।

## शाण्डिल्यसूत्रेण व्यासस्य अद्वैतपरत्वम्

अन्यच्च, ब्रह्मसूत्र-प्रणेता बादरायणो व्यासो हि अद्वैतवादी आसीत्—इत्यत्र शाण्डिल्य-कृत-भक्तिसूत्रमपि प्रमाणम्। तत्र "आत्मैकपरां बादरायणः" ( ३० श सूत्रम् )—इति सूत्रेण बादरायण-मतस्य अद्वैतत्वेन उक्तत्वात्। अतो वैयासिको ब्रह्मसूत्रग्रन्थः अद्वैतवादपरः—इत्येव निश्चीयते। एवं च बौद्ध-जैनादीनां ग्रन्थतोऽपि "वेदान्तमत"मित्यनेन अद्वैतमतमेव उक्तं भवति—इत्यपि प्रदर्शयितुं शक्यते। तथा सति अध्याय-पादाधिकरण-सूत्रादीनां व्याख्याने अद्वैतमतमेव समाश्रयणीयं, नान्यत् किमपि। एतदेव अगत्या कल्पनीयम्।

## द्वैतादिव्याख्यानस्य उपयोगित्वम्

यत् तु मतान्तरेण व्याख्यानं कृतं भास्कराद्याचार्यवर्यवृन्दैः, तत् तु तन्मतानु-सारिणाम् उपासकानां कृते उपयोगि। तन्मतं श्रुति-तात्पर्य-विरुद्धमपि न दोषाय भवति, यतो भक्तानां भ्रम-प्रमादादिकं स्वयं भगवानेव नाशयति, "अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः" इति भगवद्-वचनात्। चित्तशुद्ध्यर्थम् उपासनायाः प्रयोजनम्, तदन्ते ज्ञानं च अपरोक्षतया प्रकाशते। "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः", एतद्-भगवद्-वचनमपि तत्र प्रमाणम्। अतो मतान्तरेण सूत्रव्याख्यानम् अद्वैतिना दृष्टौ न दोषाय, प्रत्युत सम्यगुपकारायैव, यदि भगवच्छरणं तत्र समापन्नं स्यात्। निर्णयोऽयम् अस्माकं यदि केनचित् आलोचकः स्यात्, तदा तेषां कृते एतन्निवेदनम् अस्माकं यद्—व्यासमत-निर्णयाय पक्षपात-रहितेन यदि केनापि अपर-सम्प्रदायेन कृता स्यात्, तदा सा सत्य-निर्णायक-अनुकूला भविष्यतीति,

कल्पयामहे । ... यथा अस्माभिरत्र समर्थितः संस्कारवशेन चित्, स यदि ग्रन्थेषु व्यासमत-[illegible] अनुसृतो भवेत्, तदा सत्यानुसन्धित्सूनाम् अनेन महान् उपकारो भविष्यति; अस्माकमपि श्रमः सफलः भविष्यति ।

### अध्यायपादसङ्गतिविषयकमपि कौशलान्तरम्

एवं च ग्रन्थोद्देश्य-निर्णयद्वारा या श्रुतिसङ्गतिः समुपलब्धा, तथैव ग्रन्थप्रतिपाद्य-पर्यालोचनेन या च शास्त्रसङ्गतिः समासादिता, ताभ्यामेव सूत्रादि-व्याख्याने नियन्त्रिते सति व्यास-मतानुसारि-सूत्रार्थ-निर्णय-सम्भावनायाम् एतत् सङ्गति-द्वयम्, एतद्ग्रन्थ-रचना-कौशल-मेकं सूत्रकृद्-भगवद्-बादरायणस्य इति ज्ञायते ।

परन्तु एतत-कौशल-द्वयेनापि एतद्-ग्रन्थान्तर्गतसूत्र-व्याख्यानं न सम्पूर्णतया नियन्त्रयितुं शक्यते, अध्याय-पादानां प्रतिपाद्य-भेदात् । श्रुति-शास्त्र-सङ्गतिद्वयम् अनुसृत्यापि अध्याय-पाद-प्रतिपाद्य-विषय-भेदेन तत्तत्-सङ्गति-बलात् सूत्रार्थः खलु अन्यथा नेतुं शक्यते । यथा साधना-ध्याये फलाध्याये वा यदुक्तं, तेन यत्र जीव-जगद्-ब्रह्म-विषयक-तत्त्वनिर्णयः कथञ्चिदपि सम्भाव्यते, तत्र स निर्णयो न मुख्यः, स तु तत्त्व-निर्णायक-प्रथम-द्वितीयाध्यायाधीनः एव भवितुं युक्तः, अतो गौणः एव स निर्णयः, तेन न प्रथम-द्वितीयाध्याययोः सिद्धान्तौ न अन्यथा करणीयौ । तथैव प्रथम-द्वितीयाध्याययोः साधन-फलविषयकं न किमपि अनुसन्धेयम् । अतः सूत्रार्थानां सम्यक् अवधारणार्थम् अध्याय-प्रतिपाद्य-रूपा अध्याय-सङ्गतिः, तथा पाद-प्रतिपाद्यरूपा पादसङ्गतिः निर्णेया ।

### सूत्रप्रकृतिप्रभृतिद्वारा तन्निरूपणप्रस्तावः

परन्तु एतदर्थं न किमपि इङ्गितं कृतं सूत्रकारेण । अध्याय-पादादयः कुत्र आरब्धाः, कुत्र वा समाप्ताः—इति गुरूपदेशं प्रवादं वा विना न ज्ञातुं शक्यते; अध्याय-पादादीनां नाम-निर्देशादिकं प्रतिपाद्य-वर्णनं वा दूरे आस्ताम् । अत एव एतदर्थं सूत्राणां प्रकृत्यनुशीलनं, तथा पूर्वोक्त-तात्पर्य-निर्णायक-लिङ्ग-साहाय्यमपि आश्रयणीयम् । किन्तु तदपि न स्वल्प-श्रमसाध्यम्, अतस्तेषां षण्णां लिङ्गानां मध्ये प्रथमं यद् उपक्रमोपसंहाराख्यं मुख्यं लिङ्गं, तथा सूत्राणां यत् पदविन्यासादिकं तदेवात्र आलोचनीयम् । एतेन एव अत्र अध्यायारम्भः तथा अध्याय-समाप्तिश्च निर्णेतुं शक्यते—इति वयम् आशास्महे ।

### अध्यायारम्भनिर्णयः

अनेन पथा अनुसन्धित्सुभिः अस्माभिः प्रथमं दृश्यते—अत्र ग्रन्थमध्ये चत्वारि सूत्राणि विलक्षणान्येवेति, यथा—

> "[illegible] व्याख्याता व्याख्याताः
> "[illegible] ॥"

"एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ।" ३।४।५२

"अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥" ४।४।२२

अत्र प्रथमे सूत्रे सूत्रान्तर्गतस्य "व्याख्याताः" इति पदस्य पुनरुक्तिः दृश्यते। द्वितीयसूत्रे "तद्वादः" इति सूत्रान्तर्गत-पदस्य द्विरुक्तिः कृता। तृतीयसूत्रे "तदवस्थावधृतेः" इति सूत्रान्तर्गत-पदस्य द्विरुक्तिः साधिता, चतुर्थसूत्रे तु "अनावृत्तिः शब्दात्" इति समग्र-सूत्रस्य पुनर्वचनं दृश्यते। एतादृशं द्विर्वचनं ५५५-सूत्रमध्येषु एतदन्यत्-स्थलेषु कुत्रापि न दृश्यते। प्राचीनतमत्वेन उपलभ्यमानं शाङ्करभाष्यम् आरभ्य सर्वेषु भाष्येषु एतत्-सूत्रचतुष्टयेनैव चतुर्णाम् अध्यायानां समाप्तिः दृश्यते। तेन सूत्रपद-द्विरुक्ति-करणम् अध्याय-समाप्तिसूचकं सर्वेषां भाष्यकाराणां मतेन, तथा च सूत्रकृन्मतेऽपि—इति कल्पयितुं शक्यते। एवं च समग्रसूत्रस्य द्विर्वचनं ग्रन्थ-समाप्ति-सूचकम्, सर्वेषां मतेन। यतः अतःपरं न सूत्रमेकं केनापि [illegible] गृहीतं दृश्यते। अतो ग्रन्थ-कृन्मतेऽपि अत्रैव ग्रन्थसमाप्तिः कल्पनीया। तेन "एतेन सर्वे व्याख्याता व्याख्याताः" इति सूत्रेण प्रथमाध्यायस्य समाप्तिः। अतः तत्परवर्तिसूत्रेण, यथा—"स्मृत्यनवकाश-"इत्यादिसूत्रेण द्वितीयाध्यायारम्भः, तथैव "वैशेष्यात्तु तद्वादस्तद्वादः", अत्र "तद्वादः" इतिपदस्य द्विरुक्तत्वाद् एतेन द्वितीयाध्यायस्य समाप्तिः; तत्परवर्तिना "तदन्तर-प्रतिपत्तौ"-इत्यादिसूत्रेण तृतीयाध्यायारम्भः, ततश्च "एवं मुक्तिफलानियमस्तदवस्थावधृतेः" इति सूत्रेण तृतीयाध्याय-समाप्तिः; अत्र "तदवस्थावधृतेः" इति पदस्य द्विरुक्तत्वात्, तत्परवर्तिना "आवृत्तिरसकृत्" इत्यादिसूत्रेण चतुर्थाध्यायारम्भः, ततश्च "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" इति सूत्रेण ग्रन्थसमाप्तिः; अत्र समग्रसूत्रस्य द्विरुक्तत्वात्। एतत् तु ग्रन्थरचनाशैलीसमालोचन-फलम्। तेन एतद्-ग्रन्थः चतुरध्यायात्मकः—इति ग्रन्थप्रकृतितः अवगम्यते।

## प्रथमाध्यायप्रतिपाद्यनिर्णयः

इदानीं द्रष्टव्यं—प्रत्यध्यायं के वै प्रतिपाद्य-विषयाः? प्रागेव उक्तं—युक्त्यनुसरणे इति एतेषाम् अध्यायानां नाम "समन्वयाविरोध-साधन-फलानि" इति भवितुं युक्तम् इति। अधुना द्रष्टव्यम्, एतद्-ग्रन्थावलम्बनेन कथम् एतद् अवगम्यते? सूत्राक्षरतः एतद् अवगम्यते न वा?

तत्रादौ सूत्रसाहाय्येन प्रथमाध्यायस्य प्रतिपाद्यं निरूपणीयम्। एतदर्थं [illegible] कोऽपि उपायो वर्त्तते अस्माकं, प्रागुक्त-तात्पर्य-निर्णायकं लिङ्गं विना। तथा सति तेषां षण्णां मध्ये मुख्यं यद् उपक्रमोपसंहाराख्यं लिङ्गं तदेवात्र समाश्रयणीयम्। यतः [illegible] ग्रन्थ-गौरवम् अनिवार्यं भवेत्, ततश्च तानि लिङ्गानि समग्र-सूत्रा[illegible]। [illegible] तु नात्र सम्भाव्यते, प्रबन्धस्यास्य उपोद्घात-रूपत्वात्। [illegible] प्रथमाध्यायस्य प्रतिपाद्य-निर्णयः क्रियते।

[illegible] एतद् [illegible] अथवा [illegible]

उपक्रमः। ततः प्रथमाध्यायस्य अन्तिमं सूत्रं तु "एतेन सर्वे व्याख्याता व्याख्याताः" इति। अन्तिमत्वाद् अयमेव उपसंहारः। एवञ्च प्रथमाध्यायस्य अवशिष्टसूत्राणाम् एतत्-सूत्रद्वयान्तः-पतितत्वात् तेषाम् अर्था एतत्-सूत्र-द्वयानुकूला भवन्त्येव। तत्र "अथातो ब्रह्मजिज्ञासा" इति सूत्रेण अधीतजाधिकारिणां वेदान्त-वाक्यावलम्बनेन ब्रह्मविचारः कर्तव्यः—इति उक्त्वा परवर्ति-सूत्रसमूहैः तमेव विचारं समाप्य उपसंहार-रूपेण उच्यते—"एतेन सर्वे व्याख्याता व्याख्याताः" इति। व्याख्यानञ्च संशयादि-निरसन-रूपमिति प्रसिद्धम्। तेन अधिकारिणां ब्रह्मविषयक-वेदान्तवाक्येषु वाक्यार्थ-गोचरा ये ब्रह्मविषयकाः संशयादयः सम्भवन्ति, तेषां निरसनमेव प्रथमा-ध्यायस्य सर्वैः सूत्रैः कृतमिति सिध्यति। अर्थाद् येषां वाक्यानां ब्रह्मपरत्वं सन्दिह्यते, तेषां ब्रह्मपरत्व-स्थापनमेव तन्निरसनं भवति। तेन एतादृश-संशय-निरसनं ब्रह्मविषयक-वेदान्त-वाक्यानां किञ्चिदनुगतार्थ-प्रदर्शनपरम्। एतदेव अनुगतार्थ-प्रदर्शनं समन्वयापरनामकम्। सम्यक् तात्पर्य-रूपेण वेदान्तानां ब्रह्मण्यन्वयात् सम्बन्धाद् अस्य अध्यायस्य समन्वय-नाम सर्वथा सङ्गच्छते एव। अयमेव अर्थः प्रथमाध्यायस्य तदाद्यन्त-सूत्रद्वयेन लभ्यते। तेन आद्यन्त-सूत्ररूपोपक्रमोपसंहाराख्य-लिङ्गेन एतत्प्रथमाध्यायस्य "समन्वयाध्यायः" इति नाम प्रदत्तं स्यात्।

### समन्वयनामग्रहणे हेतुः

ननु कथं "समन्वयः" इति नाम सर्वैः भाष्यकारैः गृहीतम्? किम् एतदर्थकः अन्यः शब्दो नासीत्? अतः सर्व-साधारण्येन एतन्नाम-ग्रहणं प्रति किञ्चित् कारणमेव विद्यते खलु। तदेतद्—यस्मिन् कस्मिन् शब्दे अपि गृहीते कथम् एतच्छब्दो गृहीतः स्याद् इति प्रत्यवस्थातुं शक्यते, अतः समानार्थक-शब्दान्तर-ग्रहण-प्रसङ्गः अत्र निरर्थकः। अन्यत् कारणं यद् अस्ति तत् तु समन्वयसूत्रे समन्वय-पद-ग्रहणम्। ग्रन्थस्यास्य प्रयोजनं श्रुति-मीमांसारूपम्, एतत्तु प्रागेव उक्तम्। समन्वय-कार्यञ्च तादृश-श्रुति-मीमांसान्तर्गतमेव। तेन ग्रन्थ-रचनोद्देश्य-मध्ये यदेव मुख्यतया प्रयोजनम्, आदावेव तस्य आलोचनं सङ्गतमेव। ग्रन्थमध्ये ग्रन्थान्ते वा ग्रन्थस्य मुख्य-प्रयोजन-वर्णनं न स्वाभाविकं सङ्गतञ्च। अत आदावेव समन्वयाध्यायस्य आरम्भो युक्तः एवेति प्रतिभाति। तदेवात्र अनुष्ठितम्। ततश्च अत्र अपरमेकं कारणं वर्त्तते; प्रथमसूत्रेण ब्रह्मजिज्ञासायाः कर्त्तव्यत्वं प्रतिज्ञाय, द्वितीयसूत्रेण तद्ब्रह्मलक्षणं विज्ञाप्य, तृतीयेण सूत्रेण तस्य शास्त्र-प्रमाणकत्वम् उपदिश्य कथं ब्रह्मणः शास्त्र-मात्र-गम्यत्वं, कर्मोपासनादीनां तथात्वेऽपि कथं न तत्र शास्त्रस्य तात्पर्यम् इत्येवं प्रश्ने समुदिते चतुर्थेन सूत्रेण तस्य समाधानं कृतं—ब्रह्मण्येव समन्वय-दर्शनाद्—इत्यनेन। कर्मोपासनादिषु तादृश-समन्वयो न दृश्यते। अतो ग्रन्थस्य अस्य तादृश-श्रुति-मीमांसारूप-समन्वयः एव मुख्यं प्रयोजनं भवति। तस्य अतीव प्रदर्शनं ग्रन्थस्य आरम्भे एव करणीयम्। अयमेव अतीव स्वाभाविकः पन्थाः। [illegible] [illegible] आनुपूर्वी-क्रमेण एतादृश-समन्वयस्य उपक्रमः, [illegible] आनुपूर्वी-क्रमानुसरणेन

ग्रन्थस्य प्रथमाध्यायः एव "समन्वयाध्याय" इति [illegible] । [illegible] कृतम् । एतदेव एतद्-ग्रन्थान्तर्गत-प्रथमाध्याय [illegible] समन्वयाध्यायोऽपि [illegible] प्रतीयते । एवञ्च अस्मिन् प्रथमाध्याये यावन्ति सूत्राणि तैः [illegible] समन्वय [illegible] अन्यथा सूत्राणाम् अतिप्रसङ्ग-दोषापत्तिः स्यात् । तेन [illegible] एतदध्यायान्तर्गतस्य एकस्यापि सूत्रस्य अपरार्थ [illegible] व्याख्यानं कृतं स्यात्, तदा तद्व्याख्यानं न एतदध्यायार्थानुगतं भवेत् । [illegible] सम्मतमपि । यथा द्वितीयसूत्रेण ब्रह्मलक्षणे [illegible] सति, यदि तदर्थः [illegible] कृतः स्यात्, तदा सोऽर्थो न साक्षात् सूत्राक्षरार्थो भवेत्, सगुणत्व-विशेषणस्य [illegible] तथैव यदि तदर्थतो जगतः सत्यत्वं केनापि इष्येत, सत्कर्तृ सत्कार्य-[illegible], [illegible] सोऽपि अर्थः सूत्राक्षरार्थाद् हीयेत । सोऽर्थो न समन्वयाध्यायानुगतो [illegible] । एतदेव कौशलम् अत्र अध्याय-सङ्गतिनाम्ना अभिधीयते । तथा च [illegible] अध्यायेषु चतुर्धा भवति यथा द्वितीयाध्याये अविरोधसङ्गतिः, तृतीयाध्याये साधनसङ्गतिः, चतुर्थाध्याये फलसङ्गतिरिति ।

### [illegible] निर्गुणत्वे [illegible]

अत्रेदं प्रष्टव्यं—प्राक् चतुःसूत्रीव्याख्यान-काले द्वितीय-सूत्रेण [illegible] सूत्रार्थस्तु निर्गुण-ब्रह्मपरत्वेन जगन्मिथ्यात्व-बोधकत्वेनापि कृतः । [illegible] [illegible]-ब्रह्मणः सगुणत्वादि-विशेषणं निषिध्यते, तत् कथं तथैव निर्गुणत्वादि-[illegible] प्रतिषिद्धं भवेत् ? किमेतत् स्वपक्षपातित्वम् ?

एतस्य एतदेव उत्तरं—तत्र निर्गुणत्वादि-विशेषणमपि न [illegible] [illegible], किन्तु [illegible] आर्थिकं [illegible] । [illegible] सगुणत्वादिकं [illegible] । [illegible] विशेषोऽस्ति । ब्रह्मणो निर्गुणत्वादिकं तात्पर्यार्थानुकूलं, तेन [illegible] तु न तथा, [illegible]-द्वयमध्ये युक्ति-[illegible] प्राबल्यात्, [illegible] । [illegible] बलेन ब्रह्मणो निर्गुणत्वं सिद्धमेव ।

### [illegible]

[illegible] । [illegible] एतदध्यायान्तर्गतानि यानि अधिकरणानि सूत्राणि च, तानि सर्वाणि, [illegible] इति [illegible] व्याख्येयानि । [illegible] [illegible] । [illegible] [illegible] भवन्ति । [illegible] [illegible]

द्वितीयाध्यायप्रतिपाद्यविषयनिर्णयः

[illegible] सूत्रेण [illegible] द्वितीयाध्याय-प्रतिपाद्य-विषयो निर्णेयः, स एव [illegible] [illegible] भविष्यति । [illegible] च—अध्यायोऽयं सर्वैः भाष्यकारैः अविरोधाध्याय- [illegible] । [illegible] एतदर्थं [illegible] सूत्रं रचितं सूत्रकृद्भगवता । तत् कथं [illegible] अविरोधाध्याय-नामकत्वम् । [illegible] यथा एतत् सिध्यति, तत् तु [illegible] । [illegible] सूत्रकारानुसरणेन [illegible] । एतदर्थम् अत्रापि अस्माकं तात्पर्य-निर्णायक- [illegible] । तत्र आद्यं यद् उपक्रमोपसंहारात्मकं लिङ्गं, तदेव अवलम्बनीयं, नान्यत्, [illegible] । [illegible] इति [illegible]-द्वितीयाध्यायस्य उपक्रम-स्थानीयं यत् प्रथमं सूत्रं तत्—

"स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्" २।१।१ ;

[illegible] अन्तिमं सूत्रं तत्—

"वैशेष्यात् तु तद्वादस्तद्वादः" २।४।२२ इति ।

तत्र प्रथमसूत्रेण पूर्वाध्यायार्थ-विषये श्रुतिस्मृत्योः विरोधे सम्भाविते स्मृतेः निरवकाशत्व-वारणाय श्रुत्यर्थस्यैव अन्यथात्वं करणीयम्, स्मृतेः श्रुतिमूलकत्वात् स्मृतिकर्तुश्च [illegible] सर्वज्ञत्वाद् इति । एवं पूर्वपक्षे [illegible] सति [illegible] सूत्रकारः—तत्र कर्त्तव्यम्, "अन्यस्मृतिरपि अनवकाशत्व-प्रसङ्गाद्" इति ; श्रुत्यर्थः एव तत्रापि भजनीयः । इत्युक्त्वा तत्र श्रुतिस्मृत्योः विरोध-परिहारः कृतः । तथा च अनेन अविरोधोऽपि प्रदर्शितः । [illegible] विरोध-प्रदर्शनेन श्रुत्यर्थ-विषयकाविरोधे प्रदर्शिते स्मृत्या [illegible] च अविरोधः प्रदर्शितः स्यात् । तेन अविरोध-प्रदर्शनमेव अत्र प्रथमसूत्रेण [illegible] भवति । तथैव [illegible] अन्तिमसूत्रेण स एव अविरोधः पुनरुपदिष्टः स्यात् । "एतेन सर्वे व्याख्याता व्याख्याताः"—इत्यनेन प्रथमाध्याय-सिद्धान्ते स्मृति-तर्कमूलकाः [illegible] पूर्वप्रदर्शिताः [illegible] सम्भवन्ते, तेषां सर्वेषां निरसन-रूपं व्याख्यानं [illegible] स्यात् । [illegible] अविरोध एव प्रदर्शितः इत्येव [illegible] । यथा प्रथमाध्याये तृतीयसूत्रस्य "शास्त्र"-पदात् पञ्चमसूत्रस्य "अशब्दं"-पदात् समन्वय-प्रदर्शनार्थं श्रुतिप्रमाणः [illegible] एव अवलम्बितः, तथा अत्रापि द्वितीयाध्याये प्रथमसूत्रस्य "स्मृति"-पदस्य पुनः "दोषप्रसङ्गाद्" इति [illegible], तथा अन्तिमसूत्रस्य "व्याख्याताः"-पदात् स्मृति-पौरुष-तर्क-[illegible] अवलम्बितम्— [illegible] । स्मृतेः [illegible] श्रुत्यर्थानुभव-जन्य-[illegible]त्वेन, [illegible] [illegible]त्वेन, व्याख्यानस्य दोष[illegible]त्वेन च तर्कस्यैव [illegible] [illegible] एव-[illegible]-सामान्य तर्केण पूर्व[illegible] [illegible] [illegible] । [illegible] । तत्र द्वितीयाध्याये पूर्व[illegible]-

[illegible] परिहाराय तर्केण श्रुतिनिन्दा-समाधानं दोषनिर्मोचनं कौशलम् [illegible] पौरुषेयत्वात्, पौरुषेयविषये तर्कस्य प्राधान्याच्च । तेन अत्र श्रुतिसमन्विते अर्थे विरोधाभाव-रूपाविरोध-प्रदर्शनमेव यन्मुख्यं कार्यं, तत् तर्केणैव सिद्धं भवति । अतः अयम् अविरोधः, तर्क-प्राधान्यात् श्रुतिसिद्ध-विषये परकृत-खण्डनस्य प्रधानत्वात्, परमत-खण्डनत्वाच्च । एतत् सर्वं सूत्रीय-"स्मृति"-"दोषप्रसङ्ग"-"आरम्भण"-इत्यादिशब्देभ्यो लभ्यते, [illegible] प्राधान्यस्मरणात् । अतः द्वितीयाध्यायस्य अविरोधनाम सुसङ्गतमेव ।

## द्वितीयाध्यायस्य अविरोधत्वे आशङ्कानिरासः

ननु प्रथमाध्याये श्रुति-समन्वय-द्वारा स्वपक्ष-साधने कृते द्वितीयाध्याये परकृत-क्षेप-परिहारार्थं परपक्ष-खण्डने च साधिते कथं द्वितीयाध्याये अविरोधः प्रदर्शितः ? अविरोध-शब्देन उभय-पक्षयोः मूलतः ऐकमत्यं बुध्यते, अनभिमतस्य आपाततः [illegible] अर्थस्य वर्जनीयत्व-प्रदर्शनमेव अविरोध-कार्यम् उच्यते । तत् किं तर्कसहायेन परमत-खण्डनमपि अविरोध-शब्देन अभिधीयते ? परपक्षखण्डनं नाम किम् एतदध्यायस्य न मुख्यं कार्यम् ?

अत्र अयम् अभिसन्धिः—येषु मतेषु किञ्चिदपि श्रुति-मूलकत्वं नास्ति, तेषां खण्डने परमत-खण्डनाख्या सङ्गता, किन्तु येषु मतेषु अंशतः श्रुतिमूलकत्वं दृश्यते, स्मर्यते वापि, तेषाम् अश्रौतांश-खण्डनं तर्केणापि, न सम्पूर्णं परमत-खण्डनरूपं भवति, श्रुति-मूलकत्वाद् अंशतः ऐकमत्यस्य सत्त्वाच्च । स्वकपोल-कल्पितत्वात् स्वानुभवमूलकत्वाद् वा अंशतः अश्रौतत्वेन अनैकमत्यस्य सत्त्वादपि तन्मत-खण्डनेन तत्र अविरोध-प्रदर्शनमेव कृतं स्यात् । वस्तुतस्तु एतदध्यायान्तर्गत-सांख्य-तर्क-योग-वैशेषिक-बौद्ध-जैन-शैव-पाञ्चरात्र-भागवत-मत-खण्डनम् अंशतो मूलतो वा श्रौतमत-खण्डनमेव । बौद्ध-जैन-भिन्न-सांख्यादि-मतानां श्रुति-मूलकत्वं प्रसिद्धमेव । बौद्ध-जैनानां श्रुतिमूलकत्वं प्रागेव प्रदर्शितम् । यदि श्रुति-निन्दा-पराणां नवीनबौद्ध-जैनानां सम्पूर्णतया श्रुतिबाह्यानां मतं खण्डितं स्यात्, तदा एतस्य परमतखण्डन-नामविधानं समुचितम् अभविष्यत् । अतः अस्य द्वितीयाध्यायस्य अविरोधः इति नाम सङ्गतमेव प्रतिभाति ।

## अविरोधनामकरणे हेतुः

[illegible] यदि आशङ्क्येत—अयम् अविरोध-शब्दः एतदर्थे सूत्रकारेण [illegible] -स्वयम् [illegible] किम् [illegible] अतः [illegible] न आसीत् ? [illegible] अध्याये अविरोध-शब्दः एव सूत्रकारेण दृश्यते, यथा—[illegible]

"न वा [illegible] अविरोधो [illegible]" [illegible]

[illegible]

[illegible] अविरोध [illegible]

[illegible]। एवं च सूत्रसंदर्भानुसारेण अविरोध-नाम एतदध्यायस्य प्रयुक्तं स्यात् इत्येतद् [illegible]।

### प्रथमाध्यायस्य अविरोधनामत्वानुपपत्तिः

[illegible] । ननु यदि उच्येत—प्रथमाध्यायेऽपि अविरोध-शब्दः चतुर्षु सूत्रेषु दृश्यते, तद् [illegible] तदन्या नाभिधीयते । तानि च सूत्राणि यथा—

"उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्" १।१।२७

"साक्षादप्यविरोधं जैमिनिः" १।२।२८

"समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च" १।३।३०

"कल्पनोपदेशाच्च मध्वादिवदविरोधः" १।४।१०

एतेषु सर्वेषु सूत्रेषु अविरोधशब्दो दृश्यते, अतः प्रथमाध्यायोऽपि अविरोधाध्याय-नाम [illegible] युज्यते एव ।

[illegible], तथापि कश्चिद् विशेषः तत्र दृश्यते—द्वितीयाध्याये कुत्रापि समन्वय-शब्दो [illegible]। एवं च प्रथमाध्याये समन्वयः अविरोधश्चेति द्वौ शब्दौ विद्येते, किन्तु [illegible] अविरोधशब्द एव उपलभ्यते । संख्याधिक्येन आत्याधिक्यं न वार्यते । [illegible] अविरोधनाम सङ्गतमेव, न तु तत् प्रथमाध्यायस्य ।

### समन्वयाविरोधशब्दार्थयोः विशेषः

[illegible] समन्वयाविरोध-शब्दद्वय-मध्ये प्रभेदः स्वल्पः एव । कियदंशेन एतच्छब्द-द्वयं [illegible]। तथापि समन्वयमध्ये विरोधः केवलं व्यज्यते, तत्र विरोध-विषये [illegible] यथार्थतस्तु संशयस्तत्र न विद्यते अविरोधमध्ये तु विरोधः सत्यवत् प्रतो-[illegible] । ततश्च समन्वयः तावद् वाक्यार्थ-सापेक्षः, अविरोधस्तु [illegible] । तेन तत्र स्वपक्ष-स्थापनं परपक्ष-खण्डनञ्चेति उभयमेव वर्त्तते । [illegible] युक्तिरेव प्रधानतया समाश्रीयते, न तु युक्तिः । अतः प्रथमाध्यायस्य [illegible], द्वितीयाध्यायस्य अविरोधनाम—चेति एतदुभयं सङ्गतमेव प्रतिभाति । [illegible] [illegible] —यत्र किञ्चित् शास्त्रम् अवलम्ब्य [illegible] तत्त्वनिर्णयः कर्त्तव्यः स्यात्, तत्र प्रथमं तावत् तच्छास्त्र-[illegible] ; [illegible] अविरोधप्रदर्शनं [illegible] । [illegible] । [illegible] प्रथमाध्यायस्य [illegible] द्वितीयाध्यायस्य अविरोधनाम [illegible] । [illegible] इति [illegible] ।

[illegible] अविरोध-[illegible] द्वितीय-

[illegible]स्य एकमपि सूत्रम् एताम् अध्याय-सङ्गतिं लङ्घयित्वा न व्याख्येयम्। सर्वेषां सूत्राणां व्याख्याने सर्वत्र अविरोध-प्रदर्शनमेव कर्त्तव्यं भवेत्। तथैव एतदध्यायस्य न एकमपि सूत्रं समन्वय-साधन-फल-परत्वेन व्याख्येयम्, तेषाम् अपराध्याय-विषयत्वात्।

एवं च यदि "स्मृत्यनवकाश"-इत्यादिसूत्रेण, "एतेन योगः प्रत्युक्तः" इति सूत्रेण वा, कोऽपि सांख्य-योगयोः अविरुद्धांशं लक्ष्यीकृत्य तयोः श्रौतत्वं प्रतिपादयेत्, तदपि न सङ्गतं भवेत्, तेषां पौरुषेयत्वात्। यथा अनृत-वादिनां सर्ववाक्येषु मिथ्यात्वे असत्यपि तेषां न एकमपि वाक्यं सद्भिः सत्यत्वेन गृह्यते, यथा वा व्यभिचारासक्त-नरनारीणां सौन्दर्य-विद्या-बुद्धि-बलप्रकर्षादिकं च न बहुमन्यते साधुभिः, यथा वा सोपकरणस्य भोज्यस्य सर्वत्र विष-सम्बन्धाभावेऽपि—एकस्मिन्नेव उपकरणे विषशङ्कया सर्वमेव भोज्यं त्याज्यं भवेत्, तद्वत् श्रुत्युक्त-योगविद्याम् उपेक्ष्य सांख्य-योगादीनां विरुद्धांशखण्डने कृतेऽपि तयोः अविरुद्धांशस्य न ग्रहणीयत्वं भवेद्, वेदान्तिनां श्रुत्यननुसारित्वशङ्कया। यथा वा "उत्पत्त्यसम्भवात्" (२।२।४२) इति सूत्रे पाञ्चरात्र-सिद्धान्त-खण्डनम् अकृत्वा स्वपक्ष-स्थापन-प्रयासः रामानुजाचार्य-भगवतः असङ्गतः स्यात्, तेन च सः अग्रहणीयः एव, अविरोध-नाम अध्याय-सङ्गतिम् अनुसृत्यापि परपक्ष-खण्डनरूप-पादसङ्गति-लङ्घनात्, तथा एतद्-द्वितीयाध्यायस्य सर्वाणि सूत्राणि अविरोध-परत्वेन व्याख्येयानि। पाद-सङ्गति-भेदात् तत्र यो विशेषः, स तु अग्रे वक्ष्यते।

## तृतीयाध्याय-प्रतिपाद्यनिरूपणम्

अतःपरं सूत्रावलम्बनेन तृतीयाध्याय-प्रतिपाद्य-निर्णयद्वारा तदीयाध्याय-सङ्गतिः आविष्करणीया। युक्ति-साहाय्येन तथा एतस्य प्रतिपाद्यं 'साधनम्' एव भवितुम् उचितम्, तत्त्व-निर्देशानन्तरं तदनुकूल-साधनस्य वक्तव्यत्वात्, तत् तु प्रागेव प्रदर्शितम्। इदानीं द्रष्टव्यम्, एतदध्यायस्य साधनाख्यानम् एतदन्तर्गत-सूत्रावलम्बनेन कथं लभ्यते इति। एतदर्थम् अस्माकं पूर्ववदुपक्रमोपसंहाराख्यं लिङ्गमेव शरणम्। तद् यथा अस्य प्रथमं सूत्रम्—

"तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" ३।१।१ ;

अन्तिमं सूत्रञ्च—

"एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः" ३।४।५२

तत्र प्रथमसूत्रेण उच्यते—देहान्तर-प्राप्ति-समये जीवः सूक्ष्मदेहेन सह गच्छति, एतत् श्रुत्यन्तर्गत-प्रश्नोत्तर-दर्शनेन अवगम्यते। उत्तरेण सूत्रेण उच्यते—मुक्ति-[illegible] न कोऽपि नियमो वर्त्तते। मुक्तावस्थायाः सर्वश्रुतिषु [illegible]। [illegible] एतत् सूत्रद्वयेन [illegible] [illegible] आलोच्यते—एतत्र [illegible] [illegible] [illegible]। [illegible] परलोकगमन-[illegible] [illegible], तथैव अन्तिमसूत्रेण मुक्तिफल-विषयक-[illegible] च [illegible] [illegible] [illegible], [illegible] "[illegible]" [illegible]। [illegible] [illegible]

साधनाध्यायाभिधानत्वं युक्तमेव—इति प्रतिपादयितुं शक्यते। तत्र प्रथमं तावद् आरम्भसूत्रेण परलोक-गमन-कथावतरणेन भोग्य-भोग-साधनयोः जगज्जीवनयोः अनित्यत्वम् उक्तं भवति। जगज्जीवनयोः अनित्यत्व-चिन्तनेन मनसि वैराग्यमेव उपजायते। एतद्द्वयमेव एतद्-ग्रन्थ-प्रतिपाद्य-ब्रह्म-ज्ञानस्य साधनाय मुख्यत्वेन परिगृह्यते। नित्यानित्य-वस्तु-विवेक-वैराग्याभ्यां विना ब्रह्म-ज्ञानाधिकारो न कस्यापि सम्भवति। चित्त-मलापनोदनाय एतयोः यादृशी उपयोगिता तादृशी नापरस्य कस्यापि। चित्राङ्कनार्थं पटस्य मलापनोदनानन्तरं गुणाधानं मण्डादि-लेपन-रूपं यथैव विहितं, तथैवात्र शम-दमादिकं मुमुक्षुत्वं च ब्रह्म-ज्ञानाय कर्त्तव्यम्—इति साधकैः स्वयमेव कल्पयितुं शक्यते। तेन एतत्सूत्रेण ब्रह्म-ज्ञान-साधनमेव उपदिष्टम्—इत्येव अवधार्यते। तथैव अन्तिमसूत्रेणापि एषः एवार्थः समर्थितो भवतीति दृश्यते। तत्र "अनियमे"ति शब्देन मुक्तिफलस्य साधन-निरपेक्षत्वम् उक्तम्। अभावबुद्धिं प्रति प्रतियोगि-ज्ञानं सप्रयोजनम्—इति नियमात्, नियम-शब्द-वाच्य-साधनमेव तत्र लक्षितम्। तेन उपक्रमोपसंहार-स्थानीय-प्रागुक्त-सूत्रद्वयस्य आर्थिकार्थावलम्बनेन एतदध्यायस्य "साधनं" नाम उपस्थाप्यते। एतदपि एतदध्यायान्तर्गत-सूत्र-निवहैरपि अनुगृह्यते। तथा हि—

"अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः" ३।१।६

इति सूत्रे "इष्टादिकारिणाम्" इति पदात्, तथैव—

"कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" ३।१।८

इति सूत्रे "कृतात्यये" इति पदात्, तथैव—

"चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" ३।१।९

इति सूत्रात् "चरणात्" इति पदात्, तथैव—

"सुकृत-दुष्कृते एवेति तु बादरिः" ३।१।११

इति सूत्रे "सुकृत-दुष्कृते" इति पदात्, तथैव—

"विद्याकर्मणोरिति तु प्रकृतत्वात्" ३।१।१७

इति सूत्रे "विद्याकर्मणोः" इति पदात्, तथैव—

"शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्" ३।४।२७

इति सूत्रे "शमदमादि"-शब्दात्, तथा "अनुष्ठेय"-शब्दाद्, एवं च अपरापर-सूत्राणां बहुभ्यः शब्देभ्यः एतदध्यायस्य साधन-नामकत्वम् अतीव समीचीनमेवेति प्रतिभाति। अस्मिन् विषये सर्वेषां भाष्यकाराणाम् ऐकमत्यमपि वर्त्तते। एवं च एतदेव व्यास-सम्मतम् इत्यपि सिध्यति। तथा सति एतदध्यायस्य सर्वाणि सूत्राणि साधनपरत्वेन व्याख्येयानि। अन्यथा-व्याख्याने इयम् अध्यायसङ्गतिः व्याहन्येत। यथा यदि केनापि एतदध्यायान्तर्गतस्य एकस्यापि सूत्रस्य तत्त्वनिर्देशपरत्वेन साधनफलपरत्वेन वा व्याख्या क्रियेत, तदा तेन अध्याय-सङ्गतिः

कल्पिता एव स्यात्। यथा "एक आत्मनः शरीरे भावात्" ३।३।५३ इति सूत्राद् यदि कोऽपि आत्मनः एकत्वं प्रतिपादयेत्, तदा तद् व्याख्यानम् असङ्गतमेव भविष्यति, अध्याय-सङ्गति-विरोधात्। तथा च इयं साधन-सङ्गतिः समन्वयाविरोध-सङ्गतिवत् श्रुतिसङ्गति-व्याप्य-शास्त्रसङ्गति-व्याप्या। अत्र सर्वे भाष्यकाराः एकमतावलम्बिनो भवन्ति। एवं च एतदध्यायस्य साधन-परत्वं सूत्रार्थावलम्बनेन ज्ञायते इति वक्तुं शक्यते।

### चतुर्थाध्याय-प्रतिपाद्य निरूपणम्

इदानीं चतुर्थाध्याय-प्रतिपाद्य-निर्णयमुखेन तस्य सङ्गतिरपि निरूप्यते। एतद्-ग्रन्थरचना-कौशल-निर्णयावसरे युक्त्यनुसरणेन एतस्य फल-नामकत्वं सङ्गतम्—इति उक्तम्। अधुना एतदध्यायान्तर्गत-सूत्रावलम्बनेन एतस्य तादृशाभिधानं कथं समुचितम्—एतदेवात्र आलोचनीयम्। एतदर्थं पूर्वपूर्वाध्यायेषु यथा कृतम्, तथैव उपक्रमोप-संहाराख्य-लिङ्गमेवात्र आश्रयणीयम्। एतदनुसारेण द्रष्टव्यं प्रथमं सूत्रम्—

"आवृत्तिरसकृदुपदेशात्" ४।१।१

प्राथम्याद् अस्यैव उपक्रमत्वम्। तथा च अन्तिमसूत्रम्—

"अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" ४।४।२२

अन्तिमत्वाद् अस्यैव उपसंहारत्वं स्वीकार्यम्। तत्र प्रथमसूत्रेण उच्यते—ब्रह्मज्ञान-फल-लाभाय श्रवणादीनाम् असकृद् आवृत्तिः करणीया। तथा अन्तिमसूत्रेण उच्यते—ब्रह्मविदां संसारे पुनरावृत्तिः न भवति। एतदेव श्रुत्या उद्घोषितम्। इदानीम् एतत्सूत्रद्वयस्य अर्थो यदि समाह्रियते, तदा अस्मिन् अध्याये साधनस्य फल-वर्णनमेव कृतम्—इति अवगम्यते। एतच्च एतद्ग्रन्थस्य आद्यन्तसूत्रद्वयेनैव ज्ञातम्। तथा च एतस्य फलपरत्वं सर्वभाष्यकार-सम्मतम्। तेन च सूत्रकृद्-भगवद्व्यास-सम्मतमपि। एवं च अयं फलाध्यायः इति प्रसिद्धम्। ततश्च एतदध्यायस्य फल-सङ्गतिरिति नाम अभिधातुं शक्यते। एवं च सर्वासाम् अध्यायसङ्गतीनां शास्त्रसङ्गति-व्याप्यत्वेन तस्याः अपि श्रुतिसङ्गतिव्याप्यत्वेन, श्रुतिवाक्यानां मीमांसा-मुखेन श्रौतब्रह्म-ज्ञान-फल-वर्णनाय अयम् अध्यायो रचितः—इति अनुमीयते। तेन एतदध्यायस्य चतुर्षु पादेषु यानि अधिकरणानि तदन्तर्गतसूत्राणि च, सर्वाणि फलपरत्वेन व्याख्येयानि। यदि केनापि एतदन्यथा कृतं स्यात्, तेन भ्रान्तेनैव भवितव्यम्। तत्कृतः अर्थश्च कदापि न व्यास-सम्मतो भवितुम् अर्हति। तथापि प्रथम-द्वितीयाध्याय-द्वयेन सूत्रान्तर्गत-पदसाहाय्येन यथा तयोः अध्यायसङ्गतिरपि निर्णीता, तथा नैव एतत्तृतीय-चतुर्थाध्यायद्वये निर्णीयते इत्येव विशेषः अत्र मन्तव्यः।

एतेन एतदपि अनुमीयते, यद्, ग्रन्थस्य अस्य अध्याय-पादादि-नामकरण-रचनं सम्यक्ताविरोधोपदेश-सापेक्षम्। तद् एतदपि पुनः सूत्रकृताम् अपि अभिप्रेतम् प्रतीयेत।

कल्पनया पूर्वोक्तैव सूत्रविरचनेन एतत् सर्वं तेन विज्ञापयितुं शक्यम्। यतः तत् न कृतं, ततः सूत्रकृतामपि अयमेव अभिप्राय आसीत्, यद्—ब्रह्मजिज्ञासवः सर्वे शिष्यवर्गाश्च सम्प्रदाय-क्रमेण एतद्‌ब्रह्मसूत्रतात्पर्यं शिक्षेरन् इति। सर्वज्ञक्रमेण वेदार्थस्य प्राप्तौ निष्फलत्वापत्तिः सम्भाव्यते इति एवम्प्रकारं सूत्रकृताम् अभिप्रायं विदित्वैव सर्वे भाष्यकाराः स्वकृत-व्याख्यान-प्रामाण्य-दार्ढ्याय स्वस्वसम्प्रदायस्य व्यासमूलकतां सर्वज्ञर्षिमूलकतां वा प्रदर्शयितुं सचेष्टा आसन्। अध्याय-तात्पर्य-निरूपण-द्वारा अध्याय-सङ्गति-निरूपणाय एतद् अस्माकं चेष्टामात्रम्, न तु सिद्धान्ततया वक्तुम् उत्सहामहे। निर्णयस्तु सुधीभिः करणीयः। अत्र यद् अस्माभिः निरूपितं तत् तु एतदेव, यत्—समन्वय-सङ्गतिः प्रथमाध्यायस्य, अविरोधसङ्गतिः द्वितीयाध्यायस्य, साधनसङ्गतिः तृतीयाध्यायस्य, फलसङ्गतिश्च चतुर्थाध्यायस्येति युक्तिसिद्धं तथा सूत्राक्षरलब्धमिति। एवं च एतदेव सूत्रकृताम् एतद्‌ग्रन्थरचनायां चतुर्थं कौशलमिति।

### पादसङ्गतिरूप पञ्चमकौशलम्

इदानीमस्य पाद-प्रतिपाद्य निर्णयद्वारा पाद-सङ्गतिः निर्णेया। एतदेव सूत्रकृताम् एतद्-ग्रन्थ-रचनायां पञ्चमं कौशलम्। तथा हि—चतुरध्यायात्मक-ग्रन्थोऽयं षोडशपादात्मक इति प्रागेव उक्तम्। यतः प्रत्यध्यायं चत्वारः पादा वर्त्तन्ते। अथेयं पाद-सङ्गतिर्निरूपिता चेत्, तदा तदन्तर्गताधिकरणानां विचाराणां वा, ततश्च सूत्रार्थावधारणे च व्याख्यातॄणां मतभेदावसरः स्वल्पः एव अवशिष्येत। यथा एतस्य फलमेकं द्वितीयाध्याये परमत-खण्डनाभिधे द्वितीयपादे अन्तिमेन उत्पत्त्यधिकरणेन पाञ्चरात्रमतं खण्डितमेव, न तु स्थापितम्, यथा शाङ्कर-भास्करादि-प्राचीन-भाष्यादिषु दृश्यते। परन्तु रामानुजाचार्येण एतस्य अन्यथात्वं कृतं दृश्यते। तेन अस्मिन् अधिकरणे पाञ्चरात्रमतं स्थापितं, न तु खण्डितम् इति एतत् तु पादसङ्गतिलङ्घनमेव। तथैव शाङ्करभास्करादिभाष्येऽपि "महद्दीर्घाधिकरणे" परमतखण्डनं न कृतम्, परन्तु स्वपक्ष-दोषनिरसनं कृतम्। अत्रापि अंशतः पादसङ्गतिलङ्घनमेव वक्तव्यम्, अतः पाद-सङ्गति-ज्ञाने वर्तमाने सति अधिकरणार्थे न स्वातन्त्र्यं सम्भविष्यति। अधिकरणार्थ-नियामिका साक्षाद् इयं पादसङ्गतिः। तेन चेयं सङ्गतिः परम्परया सूत्रार्थनियामिका अपि भवति।

परन्तु एतत्-पादसङ्गति-निरूपणे महान् अन्तरायो दृश्यते, यतो यथा अध्यायारम्भ-शेषौ सूत्रकारेण सूत्रपद-द्विरुक्तिद्वारा विज्ञापितौ, तथा पादारम्भ-शेषौ न तेन उपदिष्टौ। सूत्राणाम् आकारमात्र-दर्शनेन न केनापि पादारम्भशेषौ ज्ञातुं शक्येते, यथा एतस्मात् सूत्रात् पादारम्भः, एतस्मिंश्च पादशेषः सञ्जातः इत्यादि। [illegible]-सूत्र-ज्ञानाभावे उपक्रमोपसंहारादि-लिङ्गादिभिः अधिकरणादीनां तात्पर्यनिर्णयो न सम्भवति। तेन पादतात्पर्यमपि न ज्ञातुं शक्यते, यतः सूत्रार्थावलम्बनेनैव पादार्थोऽपि निर्णीतो भवेत्। अतो दुरतिक्रमोऽयम् अन्तरायः सञ्जातः। अत एव मन्यामहे यद्—नूनं पादारम्भ-शेष-निर्देशार्थं [illegible]

स्वरित-स्वरादि-योगः सूत्रे कृतः आसीद् व्यासेन भगवतेति । बौद्धादि-वेद-बाह्यसम्प्रदाय-प्राबल्य-वशात् प्रायेण उच्छिन्न-सम्प्रदायोऽयं जातः ; तेन स्वरयोगेन पाठादिकमपि सर्वैः विस्मृतम् । व्यास-शुक-गौडपाद-गोविन्दपादादि-चिरजीविनां योगिनां प्रसादात् शङ्करभगवता पुनः प्रचारितोऽयं ब्रह्मसूत्रार्थः सप्तम्यां शक-शताब्द्याम् ; अतोऽयम् उपलभ्यते अस्माभिरिति । यदि तेन आचार्येण एतत् सूत्रादिरचना-कौशलम् उपदिष्टं स्यात्, तदा परवर्तिकाले नैतादृशः मतभेदः अभविष्यत् । न ज्ञायते कथं तेन एतत् कौशलं न प्रचारितम् ।

### प्राचीनभाष्यकाराः

शाङ्करभाष्यात् प्राचीनभाष्यादिकं किल बौद्धप्रभावादेव विनष्टम् अथवा शांकर-भाष्येण तेषां सम्पूर्णतया गतार्थत्वात् तेषां संरक्षणे औदासीन्यवशाद् विनष्टं जातं, तेन तद् भाष्यादिकम् इदानीं नोपलभ्यते । वेदान्तादि-प्राचीनदर्शनशास्त्रग्रन्थालोचने कृते शङ्करभगवतः प्राग् बोधायनोपवर्षभर्तृप्रपञ्च-ब्रह्मनन्दि-टङ्क—गुहदेव-भारुचि—कपर्दि-भर्तृहरि—सुन्दरपाण्ड्य—द्रमिडाचार्य-ब्रह्मदत्त-नामधेय-वेदान्ताचार्याणां बहूनां ब्रह्मसूत्रादिग्रन्थेषु भाष्यवृत्ति-प्रभृतय आसन् इति अव-गम्यते । एतेषां भाष्यादीनां नैव इदानीम् उपलम्भः । एतेषां मतवादादिकं काशीस्थाच्युत-ग्रन्थ-मालान्तर्गत-वेदान्तदर्शन-भूमिकायां काशीराजकीय-संस्कृत-विद्यालयाध्यक्ष म०म०-श्रीगोपीनाथ-कविराज एम्, ए, महोदयेन कथञ्चित् प्रपञ्चितम् । शङ्करमतविरोधिनो भाष्यकाराः, येषां भाष्यादिकम् उपलभ्यते, ते सर्वे एव शङ्कराचार्यात् अर्वाचीनाः । तेषामपि स्वमत-स्थापनार्थं क्वचिद् अनुकूलतया क्वचित् प्रतिकूलतया शाङ्कर-सूत्र-व्याख्यानमेव प्रायेण अवलम्बनम् अभवत्, अनन्यगतिकत्वात्, अतः अविरोधस्थले शाङ्करव्याख्यानमेव प्रायेण तैः अनुसृतं दृश्यते ।

### पादारम्भविषये भाष्यकाराणामैकमत्यम्

परन्तु तैरपि पादारम्भ-शेष-निर्णय-कौशलविषये किमपि नोक्तम् । तथापि तत्र तेषां मतभेदो न दृश्यते । अतः उपलभ्यमान-भाष्य-कर्तॄणां सर्वेषां पादारम्भ-शेष-विषये ऐकमत्यात् नात्र अस्माकं तन्निर्णायक-प्रयत्नः करणीयः । तेन उपक्रमोपसंहारादि-तात्पर्य-निर्णायक-लिङ्गैः पादप्रतिपाद्य-विषय-निर्णयद्वारा अस्माभिः इदानीं पादसङ्गतिरेव आविष्करणीया इत्येव युक्तम् ।

### पादप्रतिपाद्यविषये मतभेदाः

परन्तु तत्रापि पुनर्महान् एकः अन्तरायो वर्तते एव । यतः पादप्रतिपाद्यविषयेषु सर्वे भाष्यकारा नैकमत्यं भजन्ते । अध्यायप्रतिपाद्यविषयेषु यथा सर्वे भाष्यकारा अविसंवादिनः [illegible] प्रायेण अभवन्, तत्र न तथा इति उपलभ्यते । अत्र आलोच्यमानेषु [illegible] मध्ये पादप्रतिपाद्यविषयनिर्देशे सर्वे भिन्नमार्गानुसारिणो दृश्यन्ते । यथा प्रथमपादे [illegible] "[illegible] समन्वयः" इति उच्यते, परन्तु रामानुजभाष्ये "[illegible]" इति उच्यते । [illegible]

## दशभाष्यकाराणामाविर्भावकालः

तेषां दशानां भाष्याणाम् आविर्भावक्रमः अभ्युदयकालश्च, यथा—

| | | | | | | |
|---|---|---|---|---|---|---|
| १ । | शाङ्करभाष्यम्— | ६२४ | शकाब्दे | रचितमिति | | सम्भाव्यते । |
| २ । | भास्करभाष्यम्— | ६३० | " | " | प्रायेण | " |
| ३ । | रामानुजभाष्यम्— | ९९० | " | " | " | " |
| ४ । | निम्बार्कभाष्यम्— | १०५० | " | " | " | " |
| ५ । | माध्वभाष्यम्— | ११७० | " | " | " | " |
| ६ । | श्रीकण्ठभाष्यम्* | ११९२ | " | " | " | " |
| ७ । | श्रीकरभाष्यम्* | १३२२ | " | " | " | " |
| ८ । | वल्लभभाष्यम्* | १४२२ | " | " | " | " |
| ९ । | विज्ञानभिक्षुभाष्यम्* | १५२२ | " | " | " | " |
| १० । | बलदेवभाष्यम्* | १६३७ | " | " | " | " |

### भास्करनिम्बार्कश्रीकण्ठाविर्भावकालः

एतेषां मध्ये शाङ्करभाष्यस्य रचना-कालो यथा निश्चितप्रायो न तथा अपरेषाम् । अतो भास्करादीनां कृते "प्रायेण सम्भाव्यते" इत्येवं मन्तव्यम् अत्र कृतम् । आविर्भावक्रमविषये विप्रतिपत्तिः प्रायेण नास्त्येव । भास्कराचार्यः प्रायेण सर्वैः शकीयदशमशतके आसीदिति मन्यते । परन्तु भास्करेण शङ्करमतं खण्डितं, तथा शङ्करशिष्यपद्मपादेनापि भास्करमतं खण्डितम्, तेन शङ्करभास्करौ समकालिकौ इति कल्प्यते । तथा हि भास्करभाष्यारम्भे दृश्यते—

"सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशनात् । व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये ॥" इति ।

ततः शङ्करशिष्य-पद्मपादेनापि भास्करमतं खण्डितं, यतः पञ्चपादिकायां दृश्यते—"सदैवाहंकर्त्तुः सदैकरूपावगमात् स्थायित्वेऽपि अर्थक्रियासम्भवात् न नीलस्य स्वगतापरोक्षत्व-भावेन माहायानिकः पक्षः समर्थ्यते, किन्तु ग्राहकस्य अहंकर्त्तुरात्मनः स्थायिनोऽभावे । स च एकरूपः अनुभवाद् युक्तितश्च प्रसाधितः । ननु नानुमेयादिषु अपरोक्षता दृश्यते" इति ।

अत्र विवरणे—"यस्तु कश्चित्क्षपणक-पादावनत-शिरोबिम्बः, तत्त्वदर्शन-तन्निष्ठ-परमहंस-प्रद्वेष-तीव्र-वायु-विक्षिप्त-विवेक-विज्ञानलवः स्वपरपक्षगुणदोष-विभाग-दूरीकृत-विज्ञानो भेदाभेदाभ्यां बन्धमोक्षादि-सङ्करमिव कुर्वन् दुर्जनरमणीयां वाचं जल्पति—सुगत-विज्ञानवाद-समानोऽयं वेदान्तवाद इति, सम्प्रदाय-श्रवण-परिचय-शून्यतया दर्शन-विवेकम् [illegible] [illegible], किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भिरिति ।"

[illegible] तत्त्वदीपने—"विषय-चैतन्ययोरभेद-मात्रेण [illegible] स्यात् [illegible]

---

* [illegible] श्रीकरभाष्यभूमिकातो गृहीतः । [illegible] ।

"सर्वसिद्धान्तसंकरः स्यात्" इत्युक्तं विवृणोति—"यत् किञ्चित्" इति। किमेतद् गुरोर्मतम्? उत वार्तिककारस्य? अथवैकदेशिनः? * * * तृतीयमुत्थापयति—"अस्तु" इति। क्षपणकस्य पादौ क्षपणकपादौ, तयोः अवनतं शिरोबिम्बं यस्य तथोक्तः, अनेन च विरोधेन भेदाभेदवादित्वेन क्षपणकविनेयत्वम्। ततस्तत् समयस्य उपेक्ष्यत्वम् उक्तम्" इति। (पृष्ठ ४००, १९३३ सं, ब्रह्मसूत्र-शाङ्करभाष्यम्, कलिकाता-संस्कृतग्रन्थमालायां (नं० १) मः मः श्रीअनन्तकृष्ण-शास्त्रि-सम्पादितम्)।

अत्र केनचिद् भेदाभेदवादिना शाङ्करमतस्य "माहायानिकत्वं" समाख्यातम्। तन्मतमेव पद्मपादेन प्रत्युक्तम् इति स्पष्टम्। वस्तुतस्तु भास्करभाष्ये १।४।२५-सूत्रे शाङ्करमतं लक्ष्यीकृत्य उक्तम्—

"तथा च वाक्यं—परिणामस्तु स्याद् दध्यादिवदिति विगीतं विच्छिन्नमूलं माहायानिकबौद्धगाथितं मायावादं व्यावर्णयन्तो लोकान् व्यामोहयन्ति" इति।

एतेन अनुमीयते—पद्मपादेन स्वमते यन्माहायानिकत्वापवादः खण्डितः तदपवादस्य जनको भास्कर एव आसीत्। गुरुपरम्परागतः प्रवादोऽपि अयमेव।

ततश्च माधवीयशङ्करविजये १५श-सर्गे ८०-श्लोकादौ शङ्करभास्करयोः विचारकथा वर्णितेति दृश्यते। तेन भास्करः शङ्करसमसामयिकः इति कल्पयितुं शक्यते। तथा च शङ्करस्य जीवितं यदि ६०८-शकाब्दतः ६४०-शकाब्दपर्य्यन्तकालान्तरे स्यात्, एवं च शङ्करेण यदि (२०) विंशतिवर्ष-वयसि त्रिंशद्वर्षवयस्क-भास्करेण सह विचारः कृतः स्यात्, तदा भास्करस्य जन्मकालः प्रायेण ५९८-शकाब्दतः ६७८-शकाब्दपर्य्यन्तकालान्तरे आसीद् इत्येव युक्तम्, यदि अशीतिवर्षाणि तस्य जीवितकालः कल्प्यते। ये खलु भास्करस्य जीवितं शकीयदशमशतके स्थापयितुम् इच्छन्ति, तेषामिदं चिन्तनीयं—यद् वाचस्पतिमिश्रेण भास्करमतमपि खण्डितम्। यथा—आनन्दमयाधिकरणे तेन उक्तम्—

"न च प्राणमयादिषु विकारार्थत्वायोगात् स्वार्थिको मयड् इति युक्तम्।"

अत्र कल्पतरौ उक्तम्—"भास्करोक्तम् आशङ्क्य आह—"न च" इति। एतेन भास्करो वाचस्पतिमिश्रादपि प्राचीनः इति प्रतीयते।

**वाचस्पतिमिश्रस्य आविर्भावकालः**

वाचस्पतिमिश्रस्य आविर्भावकालः ८००-शकाब्दतः ८८०-शकाब्दपर्य्यन्तो भवितुम् अर्हति, यतः तेन तदीयन्यायसूचीनिबन्धे "वस्वङ्कवसुवत्सरे" (८९८-विक्रमाब्दे) तद्ग्रन्थरचनाकालः इति उक्तम्। तेन ८९८-५७=८४१-शकाब्दः एव तद्ग्रन्थरचनाकालः इति प्रतीयते। एवं यदि ४१-वत्सर-वयसि वाचस्पतिना तेन रचितः स्यात्, तदा तस्य जीवितकालः ८०० शकाब्दतः ८८०-शकाब्दपर्य्यन्तः इति वक्तुं शक्यते। तेन [illegible]

पूर्वोक्त [illegible] इति पर्य्यवस्यति, न तु [illegible]शकीयशतके इति । वाचस्पतेः ८९८-[illegible] न [illegible], किन्तु विक्रमसंवदेव, यतः उदयनेन वाचस्पतेः न्यायवार्त्तिक-[illegible] तात्पर्य्य-परिशुद्धिग्रन्थो रचितः, एतेन वाचस्पतेः उदयनात् प्राचीनत्वमपि [illegible], यतः तस्य लक्षणावलीरचनाकालः ९०६-शकाब्दो भवति, यतस्तेन उक्तम्—

"तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः । वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥"

तेन भास्करस्य कालः न शकीयदशमशतकम् इति निश्चितम् । एवं च भास्करस्य शङ्करसमसामयिकत्वे न कापि प्रबला बाधा दृश्यते । मतान्तरे तु कल्पनाबाहुल्यमेव दृश्यते । तन्नात्र वयं विचारयामः ।

तथापि निम्बार्काचार्याविर्भावविषये तत्सम्प्रदायानुवर्त्तिनां मतं भिन्नमेव । तन्न अस्माभिः बोद्धुं शक्यते । तैर्मन्यते कलेरादौ व्यासाविर्भावसमये निम्बादित्यभगवतः अभ्युदयोऽभवत् । (काशीसंस्कृत-ग्रन्थमाला-संस्करण-ब्रह्मसूत्रग्रन्थस्य भूमिका द्रष्टव्या।) किन्तु तथा सति निम्बार्क-भाष्यं शङ्करभगवतोऽपि प्राचीनैर्विद्वद्भिः यथा उल्लेखनीयम् आसीत्, तथा शङ्कर-तत्पर-वर्त्ति-भास्कर-रामानुजादिभिरपि अपरैश्च उल्लेख्यतां धत्ते । परन्तु तथा नैव दृश्यते । प्राचीनानां मध्ये निम्बार्कस्वामिनः साक्षाच्छिष्य-श्रीनिवासाचार्यात् ("श्रीमन्निम्बार्कपादपद्मान्तेवासिना श्रीश्रीनिवासाचार्य्येण" इति उक्तत्वात्) पूर्वं न केनापि तस्य सत्ता प्रज्ञापिता । तस्यापि आविर्भावकालसम्बन्धे न किमपि विशिष्टं प्रमाणं विद्यते । श्रीनिवासेन बौद्ध-धर्मकीर्त्तिवाक्यं विप्रभिक्षु-वचनत्वेन "नाभाव उपलब्धेः" इति २।२।२८-सूत्रभाष्ये उद्धृतं दृश्यते । तच्च वचनम्—

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति" इत्यादि ।

अयं विप्रभिक्षुः धर्मकीर्त्तिरेवेति खण्डनटीकायां शङ्करमिश्रेण उक्तमिति । (१म परिच्छेदे स्वप्रकाशवादखण्डनं द्रष्टव्यम् ।) तद् यथा—"इति धर्मकीर्त्तिनापि उक्तम् इत्यर्थः" इत्यादिना । एवं च प्रायेण विंशतिवर्षैः ज्यायानपि धर्मकीर्त्तिः शङ्करसमसामयिकः एव, यतः ६०८-शकाब्दतः ६४०-शकाब्दपर्यन्ते काले शङ्करस्य जीवितमासीद् इत्येव अनुमीयते । तस्य धर्मकीर्त्तेः गुरुः पितृव्यश्च कुमारिलभट्टः आसीत्; तेन सह शङ्करस्य साक्षात्कारकथा माधवीयशङ्करविजये दृश्यते । शङ्करेण च धर्मकीर्त्तेर्वाक्यं २।२।२८-सूत्रभाष्ये उद्धृतम् । तेन कुमारिलस्य मतमपि अध्यासभाष्यमध्ये उद्धृतम् । अतो धर्मकीर्त्ति-शङ्करयोः समसामयिकत्वे न कापि बाधा भवेत् । तथा सति शङ्करात् पूर्वम्, एवं च शकीयसप्तमशताब्दतः पूर्वं निम्बार्काचार्यस्य आविर्भावो न कथमपि सम्भवति । अतः कलेरादौ तस्य आविर्भावः इति [illegible] भवति ।

[illegible] भाष्यन्तु [illegible] आलोच्यते । [illegible]

उत्पत्त्यधिकरणे शङ्कर-भास्करादिभिः पाञ्चरात्रमतखण्डनं कृतमिति दृश्यते। रामानुजाचार्येण पाञ्चरात्रवैष्णव-मतावलम्बिना पाञ्चरात्रमत-स्थापनं कृतम्। एतेन तु द्वितीयाध्याय-द्वितीयपादस्थ परपक्ष-खण्डनरूप-पादसङ्गति-लङ्घनजन्य-दोषः तस्य अभवत्। तद्दोषवारणाय निम्बार्काचार्येण तथा मध्वाचार्येण च तत्र शाक्तमत-खण्डनं कृतम्। तेन रामानुजाभीष्टं वैष्णवमतमूलं पाञ्चरात्रमतमपि रक्षितं, पादसङ्गतिरपि न लङ्घिता। निम्बार्काचार्यो यदि भास्कर-रामानुजयोः पूर्वभावी स्यात्, तदा शाङ्करभाष्य-खण्डनोद्यतो भास्कराचार्यः स्वानभीष्ट-शाङ्करभाष्यम् अनुसृत्य स्वाभिमतानुकूल-पाञ्चरात्रमतं न खण्डयेत्, किन्तु निम्बार्कभाष्यम् अनुसृत्य शाक्तमतखण्डनं कृत्वा शाङ्करमत-विरोधितां साधयेत्। तथैव रामानुजाचार्यो निम्बार्कभाष्यम् अनुसृत्य पादसङ्गतिलङ्घनजन्यदोषं न वृणुयात्, किन्तु शाक्तमतखण्डनं कृत्वा पाञ्चरात्रमतस्य निर्दोषतां प्रतिपादयेत्। एतेन रामानुजाचार्य-परभविकत्वमेव निम्बार्कमध्वाचार्ययोः सिध्यति। कौशलमिदं यदि रामानुजाचार्यस्य मनसि उदियात् तदा तेन एतस्यैव अनुसरणं कृतं स्यादेव। अतो रामानुजाचार्यस्य परवर्तिनौ एव निम्बार्क-मध्वाचार्यौ—इत्येव अनुमीयते।

ततश्च मध्वविजयग्रन्थे दृश्यते मध्वाचार्येण एकविंशतिसंख्यकानि ब्रह्मसूत्रभाष्याणि दृष्टानि, तन्मध्ये निम्बार्कभाष्यस्य न उल्लेखो वर्त्तते। तौ च आचार्य्यौ अन्यतरं परस्परं वा कुत्रचित् न प्रमाणत्वेन स्वीकृतवन्तौ। एतदेव हि मध्वचरितकारस्य निम्बार्काचार्य-नामानुल्लेख-कारणम्—इत्येव कल्प्यते, अतः निम्बार्काचार्य्यस्य मध्वाचार्य्यात् परभविकत्वं सम्भाव्यते। तथापि निम्बार्कशिष्यसम्प्रदायान्तर्गत-देवाचार्यस्य आविर्भावकालः, तत्कृत-वेदान्तजाह्नवीग्रन्थस्य किशोरदासकृतभूमिकायां "युगरुद्रेन्दुः"-शब्देन यथा उक्तः, स च १११२ विक्रमाब्दो भवति। तेन देवाचार्यस्य जीवितकालः ९७७ शकाब्दतः १०५७ शकाब्दपर्यन्तम् आसीदित्येव सम्भाव्यते—यदि ८० वर्षाणि तस्य जीवितं भवेत्। परन्तु मध्वाचार्यस्य कालः ११२१-शकाब्दतः १२०१-शकाब्द-पर्यन्तम्—इत्येव तस्य चरित-ग्रन्थादितः अवगम्यते। तथा सति देवाचार्यः मध्वाचार्यात् प्राचीनो भवति। निम्बार्काचार्यस्तु ततोऽपि प्राचीनो रामानुजाचार्याच्च अर्वाचीनो भवति, इत्येव सिध्यति, यतः रामानुजाचार्य्यस्य कालः ९४१-शकाब्दतः १०६१-शकाब्दपर्य्यन्तो ज्ञायते।

परन्तु निम्बार्कशिष्य-परम्परागत-देवाचार्यस्य कालः ९७७-१०५७ शकाब्द-पर्यन्तः इति प्रतिपादितम्। तेन देवाचार्यः रामानुजात् ३६ वर्षैः कनीयान् भवति। परन्तु देवा-चार्य-श्रीनिवासादीनां ग्रन्थतः अवगम्यते—ते सर्वे निम्बार्काचार्यस्य समकालिका आसन् एवेति। ततो निम्बार्केण रामानुजकृत-पादसङ्गति-लङ्घनजन्य-दोषस्य परिहारात् निम्बार्क-श्रीनिवासाचार्ययोः कालः रामानुज-देवाचार्ययोः मध्ये एव पतति। तथा च ९५०-शकाब्दतः १०५७-शकाब्द-मध्ये निम्बार्कदेवाचार्ययोः कालः इति सम्भाव्यते।

भास्कर-श्रीकण्ठयोश्च समयविषये अपि बहवो मतभेदा वर्तन्ते। बहवो विद्वांसो भास्करस्य शकीयनवमशतके आविर्भावः इति मन्यन्ते। किन्तु पद्मपादाचार्येण पञ्च-पादिकायां च तन्मतखण्डनं कृतम् अतः शङ्कर-समसामयिक एव स—इत्यपि कल्पयितुं शक्यते। एतत् तु प्रागेव सूचितम्। श्रीकण्ठस्य शङ्करादपि प्राचीनत्वमिति बहूनाम् अभिमतम्। किन्तु तस्य रामानुज-परवर्त्तित्वमेव सङ्गच्छते। एतदर्थं श्रीकरभाष्य-भूमिका द्रष्टव्या। अत्र आचार्याणाम् आनुमानिकः कालः—

| | | | | | |
|---|---|---|---|---|---|
| कुमारिलभट्टः | ५४४-६२४ | शकाब्दाः, | उदयनाचार्यः | ८६६-९४६ | शकाब्दाः |
| धर्म्मकीर्त्तिः | ५७०-६३० | ,, | रामानुजाचार्यः | ९४१-१०६१ | ,, |
| शङ्कराचार्यः | ६०८-६४० | ,, | निम्बार्काचार्यः | ९५०-१०३० | ,, |
| पद्मपादाचार्यः | ६१०-६९० | ,, | श्रीनिवासाचार्यः | ९६०-१०४० | ,, |
| भास्कराचार्यः | ६००-६५० | ,, | देवाचार्यः | ९७७-१०५७ | ,, |
| वाचस्पतिमिश्रः | ८००-८८० | ,, | मध्वाचार्यः | ११२१-१२०१ | ,, |

### शाङ्करमतेन पादप्रतिपाद्यम्

इदानीं प्रकृतम् अनुसरामः। पादप्रतिपाद्यविषये इदानीं भाष्यकाराणां मतभेदाः दर्शनीयाः। तथा हि शाङ्करभाष्यानुसारेण एतद्ब्रह्मसूत्रग्रन्थस्य पादप्रतिपाद्यं, यथा—ब्रह्मामृतवर्षिण्यां दृश्यते—

१।१ पादे सुस्पष्टब्रह्मबोधक-श्रुतिवाक्यानां समन्वयः।
१।२ ,, उपास्यब्रह्मवाचकास्पष्टश्रुतिवाक्यानां समन्वयः।
१।३ ,, ज्ञेयब्रह्मप्रतिपादकास्पष्ट-श्रुतिवाक्यानां समन्वयः।
१।४ ,, अव्यक्तादि-सन्दिग्धपदमात्राणामेव समन्वयः।
२।१ ,, सांख्य-योग-काणादादिस्मृतिभिः सांख्यादि-प्रयुक्ततर्कैश्च वेदान्त-समन्वयस्य विरोधपरिहारः।
२।२ ,, सांख्यादिमतानां दुष्टत्वप्रदर्शनेन वेदान्तसमन्वयस्य विरोधपरिहारः।
२।३ ,, पूर्वभागेन पञ्चमहाभूतश्रुतीनाम्, उत्तरभागेन च जीवश्रुतीनां परस्पर-विरोधपरिहारः।
२।४ ,, लिङ्गशरीरश्रुतीनां विरोधपरिहारः।
३।१ ,, जीवस्य परलोकगमनागमन-विचारपूर्वक-वैराग्यादिनिरूपणरूपसाधननिर्देशः।
३।२ ,, पूर्वभागेन त्वंपदार्थस्य, उत्तरभागेन च तत्पदार्थस्य शोधनरूपसाधननिर्देशः।
३।३ ,, सगुणविद्यासु गुणोपसंहारस्य निर्गुणे ब्रह्मणि अपुनरुक्तपदोपसंहारस्य च निरूपणद्वारा साधनवर्णनम्।

३।४ पादे निर्गुणज्ञानस्य बहिरङ्ग-साधनभूतानाम् आश्रमयज्ञादीनाम् अन्तरङ्गसाधन-
भूतानाञ्च शमदमश्रवणमननादीनां निरूपणद्वारा साधनत्व-निरूपणम् ।

४।१ „ श्रवणाद्यावृत्त्या निर्गुणम्, उपासनया सगुणं वा ब्रह्म साक्षात्कृतवतो जीवतः पुण्यपापलेषविनाशलक्षणायाः मुक्तेः अभिधानम् ।

४।२ „ म्रियमाणस्य उत्क्रान्तिप्रकारदर्शनम् ।

४।३ „ सगुणब्रह्मविदो मृतस्य उत्तरमार्गाभिगमनम् ।

४।४ „ पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तेः, उत्तरभागेन च, सगुण-ब्रह्मविदो ब्रह्मलोकस्थितेः निरूपणम् ।

इत्येव शाङ्करमतानुसारेण पादार्थनिर्णयः । तेन इयमेव पादसंगतिः ।

### भास्करमतेन पादप्रतिपाद्यम्

भास्करभाष्यस्य पादार्थप्रदर्शनपर-टीकादिकं न दृश्यते, न वा मुद्रितसंस्करणे तथा कृत्वा पुस्तकमेतत् मुद्रितमास्ते, तथापि एतद्विषये प्रायेण शाङ्करभाष्यानुरूपं भास्करभाष्यम् इति सूत्रार्थतः अवगम्यते । भास्करस्तु ज्ञानकर्म-स्वरूपसमुच्चयवादी, शङ्करस्तु तद्विरोधी ज्ञानकर्म-क्रमसमुच्चयवादो, भास्करः द्वैताद्वैतवादी, शङ्करस्तु अद्वैतवादी, तन्मते व्यवहारदशायां द्वैतं स्वीकृतमपि मिथ्या, अद्वैतमेव पारमार्थिकम् इत्यादिरूपं पार्थक्यं तयोः प्रसिद्धमेव । तेन शङ्कर-कृतपादार्थे यत्र निर्गुणब्रह्मविषयवर्णनं, तत्र भास्करस्य सगुणब्रह्मविषय-वर्णनमेव ज्ञातव्यम् । अतः तन्मतेन पादार्थनिर्णयादिकं प्रायेण शाङ्करमतानुरूपमेव भवति । एतेन ब्रह्मणो निर्गुण-त्वानुरोधेन यत्र यत्र शङ्कराभिमत-पादार्थमध्ये पूर्वोत्तरभाग-कल्पनादिकं दृश्यते, तत्र तत्र भास्करमते तथा न—इत्येव पार्थक्यं ज्ञेयं, न तु अन्यत् ।

### रामानुजमतेन पादप्रतिपाद्यम्

इदानीं रामानुजमतेन पादार्थो वक्तव्यः । रामानुजमतेन पादार्थस्तु—

१।१ पादे अस्पष्टतरजीवादिलिङ्गकानि वाक्यानि विचारितानि ।

१।२ „ पुनरस्पष्टजीवादिलिङ्गकानि „

१।३ „ स्पष्टलिङ्गकानि „

१।४ „ स्पष्टतरजीवादिलिङ्गकानि „

२।१ „ सांख्यादिस्मृतिभिः बाधस्य परिहारः ।

२।२ „ प्रतिपक्षतर्काणां वेदान्तवाक्यानुसारिभिः सत्तर्कैः निराकरणम् ।

२।३ „ आकाशादेः कार्यत्वनिरूपणम् ।

२।४ „ इन्द्रियादेः कार्यत्वनिरूपणम् ।

३।१ „ [illegible] जीवस्य लोकादि[illegible] ।

३।२ पादे पुरुषोत्तमस्य सर्वदा हेयप्रत्यनीकत्वकल्याणगुणाकरत्वरूपोभयलिङ्गत्व प्रतिपादनम्।

३।३ „ साधनभेदनिरूपणम्।

३।४ „ अङ्गनिरूपणम्।

४।१ „ उपासनारोहमाहात्म्यम्, उत्तरपूर्वाघाश्लेषविनाशरूपम्।

४।२ „ उत्क्रान्तिप्रकारः।

४।३ „ अर्चिरादिगतिः।

४।४ „ ब्रह्मप्राप्तिरूपम् अपुनरावृत्तिलक्षणम्।

ततश्च एतन्मते अध्यायप्रतिपाद्यमपि द्रष्टव्यं, तत्रापि कश्चिद् भेदो दृश्यते, यथा—

प्रथमाध्याये—ब्रह्मणि जगत्कारणत्वान्वयं प्रतिपादयति।

द्वितीयाध्याये—ब्रह्मणो निखिलजगदेककारणत्वे वेदान्तवाक्यविरोधशङ्कया यौक्तिक-विरोधशङ्कायाः केषाञ्चिन्नित्यत्वश्रुतिविरोधशङ्कायाश्च निवर्तकत्वम्।

तृतीयाध्याये—साधनप्रतिपादकत्वम्।

चतुर्थाध्याये—प्राप्तिचिन्तापरत्वम्।

एवञ्च शाङ्करमतेन सह अध्याय-पाद-प्रतिपाद्य-विषयेषु यः प्रभेदो प्रदृश्यते, स तु न अकिञ्चित्करः इति प्रतिभाति। शङ्कराद् अर्वाचीनेन रामानुजाचार्येण भगवता यदि शङ्करभगवता सह स्वस्य एतत्प्रभेदं समर्थयितुं शङ्करादपि प्राचीनभाष्यवृत्त्यादिकं किञ्चित् प्रमाणत्वेन प्रदर्शितं स्यात्, तदा अतीव शोभनम् अभविष्यत्। तदभावात् युक्तिशरणमेव यथा तेन गृहीतं, तथा अत्र अस्माकमपि कर्त्तव्यम्।

तथा सति शाङ्करमतेन अध्यायप्रतिपाद्यादिविषये यादृशं स्वाभाविकत्वं युक्त्यनुकूलत्वं च दृश्यते, तादृशं नात्र उपलभ्यते। यतः उपनिषदः अवलम्ब्य तद्वाक्यार्थमीमांसाच्छलेन दर्शनशास्त्ररचनायां कर्त्तव्यायां समन्वयाविरोधसाधनफलानि यथाक्रमम् अध्यायार्थरूपेण वक्तव्यानि भवन्ति। न तु "ब्रह्मणि जगत्कारणत्वान्वयप्रतिपादनादिकं", यथोक्तं वेदान्तदीपे श्रीभाष्यभूमिकायां च, अध्यायार्थरूपेण सन्निवेशनीयम्। जगत्कारणत्वेन ब्रह्मपरिचय-प्रदानं तस्य ब्रह्मणः श्रुतितात्पर्यविरुद्धकथनम् एव। जगत्कारणत्वेन ब्रह्मपरिचये दीयमाने ब्रह्मणः सच्चिदानन्दरूपत्वस्य हानिरेव आपद्येत। अतः एतत् न समीचीनं प्रतिभाति। ब्रह्मणो जगत्कारणत्वं यदि पारमार्थिकं स्यात्, तदा जगतः सत्यतापत्तिः दुर्वारा, तथा सति विशिष्टाद्वैतहानिः, द्वैतापत्तिश्च भवत्येव। जगतो ब्रह्मकार्यत्वेऽपि ब्रह्मणोऽशुद्धत्वं विकारित्वं च प्रसज्येत। अतो ब्रह्मणो जगत्कारणत्व-वर्णनं न श्रुतितात्पर्यम्।

अथ श्रीमद्रामानुजमते ब्रह्मसूत्रस्य पादप्रतिपाद्यविषयाः तावत्—

१।१ पादे नामात्मकानाम् अन्यत्र प्रसिद्धानां शब्दानां विष्णौ समन्वयः।

१।२ „ लिङ्गात्मकानाम् अन्यत्र प्रसिद्धानां शब्दानां विष्णौ समन्वयः।

१।३ „ उभयत्रप्रसिद्धानां शब्दानां विष्णौ समन्वयः।

१।४ „ अन्यत्रैव प्रसिद्धानां शब्दानां विष्णौ समन्वयः।

२।१ „ युक्त्यविरोधः।

२।२ „ समयाविरोधः।

२।३ „ केवलश्रुत्यविरोधः।

२।४ „ सयुक्तिकश्रुत्यविरोधः।

३।१ „ वैराग्यार्थं गत्यादिनिरूपणम्।

३।२ „ भक्तिनिरूपणम्।

३।३ „ उपासनानिरूपणम् ( सर्वपरिज्ञानं प्रथमतः उच्यते अन्ते निर्णयः )।

३।४ „ ज्ञानसामर्थ्यनिरूपणम्।

४।१ „ कर्मनाशाख्यं फलम्।

४।२ „ देवानां मोक्षः तथा उत्क्रान्तिनिरूपणम्।

४।३ „ सर्गगम्ययोर्निरूपणम्।

४।४ „ परब्रह्मप्राप्तानां भोगनिरूपणम्।

अत्र विष्णुपरत्वेन पाद-प्रतिपाद्यादिनिर्णय एव वैशिष्ट्यम्। एतत् तु उपासनानुकूलम् इति स्पष्टम्। तथा च नैतद् ब्रह्मजिज्ञासा-पदसूचित-ब्रह्मज्ञानानुकूलम्। अत एतादृश-पादार्थ-निरूपणं सूत्राणां स्पष्टार्थ-विरुद्धम्। तथापि अत्र शाङ्करमतेन सह यः प्रभेदो दृश्यते, स तु महानैपुण्येन शङ्करपादभूषणाख्य-ग्रन्थ-मध्ये रघुनाथसूरिणा विचारितः। स तु विचारः एतदर्थं द्रष्टव्यः। माध्वभाष्ये तट्टीकातत्त्वप्रकाशिकायां माध्वचन्द्रिकायां च पादार्थ-विषये विस्तृतालोचनं दृश्यते। परन्तु तत् सर्वं स्वतन्त्रविचारमूलकं, न तु किमपि प्राचीन-भाष्यादिमूलकम्। किमधिकं रामानुजभाष्यस्य यादृशबोधायनवृत्तिमूलकत्वम् उद्घोष्यते तादृशं किञ्चिद्भाष्यमूलकत्वम् अस्य नास्ति।

इदानीं द्रष्टव्यं निम्बार्कमते कीदृशोऽस्य पादप्रतिपाद्यविषयः इति। तत्र श्रीनिवास-भाष्ये दृश्यते—

१।१ पादे जिज्ञास्ये श्रीवासुदेवे श्रुतीनां समन्वयः।

१।२ „ अस्पष्टस्पष्टजीवादिलिङ्गकवाक्यानां तत्र समन्वयः।

१।३ „ „ „ „ „ „ „

१।४ „ कापिलतन्त्रसिद्धाव्यक्तक-प्रधानादिप्रतिपादकवाक्यानां तत्रापि समन्वयः।

२।१ पादे परैः स्वसिद्धान्ते उद्भाविता दोषाः निराक्रियन्ते ।
२।२ „ परोक्तयुक्तीनामाभासत्व-प्रदर्शनपूर्वकपरपक्षखण्डनम् ।
२।३ „ ब्रह्मकार्यवियदाद्युत्पत्तौ जीवविषये च श्रुतीनामविरोधप्रदर्शनम् ।
२।४ „ जीवकरणश्रुतीनामविरोधप्रदर्शनम् ।
३।१ „ संसारस्य दोषनिरूपणेन ततो विरक्तिप्रदर्शनम् ।
३।२ „ विवेकवैराग्यदार्ढ्याय स्वप्नावस्थाविचारः ।
३।३ „ ब्रह्मोपासनासु गुणोपसंहारविकल्पनिर्णयाय विद्याभेदाभेदविचारः ।
३।४ „ विद्यातः तदङ्गात् कर्मणो वा पुरुषार्थविचारः ।
४।१ „ साधनावृत्तिः आप्रयाणात् कर्त्तव्या इति निरूपणम् ।
४।२ „ विद्वदविद्वत्साधारणोत्क्रान्तिनिरूपणम् ।
४।३ „ विदुषो ब्रह्मप्राप्तये गतिनिरूपणम् ।
४।४ „ अर्चिरादिमार्गेण परब्रह्मप्राप्तानामाविर्भाववर्णनम् ।

अत्र सगुणब्रह्मवासुदेवपरत्वेन पादप्रतिपाद्यनिर्णयः एव वैशिष्ट्यम् । अन्यथा शाङ्कर-पादप्रतिपाद्यविषयैः सह प्रायेण ऐकमत्यं दृश्यते । अध्याय-प्रतिपाद्यविषयेषु तथैव ऐकमत्यं वर्त्तते एव ।

**श्रीकण्ठमतेन** पादप्रतिपाद्यविषयाः तावत्—

१।१ पादे स्पष्टब्रह्मलिङ्गवाक्यविचारः ।
१।२ „ अनतिस्पष्टलिङ्गवाक्यविचारः ।
१।३ „ स्पष्टास्पष्टलिङ्गवाक्यविचारः ।
१।४ „ अस्पष्टलिङ्गवाक्यविचारः ।
२।१ „ सांख्यादितर्कविरोधशङ्कापूर्वकस्वपक्षस्थापनम् ।
२।२ „ सांख्यादिमतानां दुष्टत्वप्रदर्शनम् ।
२।३ „ श्रुतिवाक्यानां परस्परविरोधपरिहारः ।
२।४ „ भौतिकोत्पत्तिश्रुतिविरोधपरिहारः ।
३।१ „ उपासकस्य नित्यत्वादियुक्तस्य जीवस्य गत्यागतिनिरूपणम् ।
३।२ „ जीवावस्थानिरूपणपूर्वकेश्वरस्वरूपलक्षणोक्तिः ।
३।३ „ उपासनाविशेषाणां गुणोपसंहारः ।
३।४ „ विद्यासहकार्याश्रमधर्मादिनिरूपणम् ।
४।१ „ उपासनाप्रकारनिरूपणम् ।
४।२ „ उपासकस्य विदुषः शरीराद् उत्क्रान्तिनिरूपणम् ।

४।३ पादे अर्चिरादिगतिनिरूपणम् ।

४।४ „ मुक्तिस्वरूपनिरूपणम् ।

अत्रापि अध्यायचतुष्टयं समन्वयाविरोधसाधनफलपरम् इति अवगम्यते । परन्तु तृतीयाध्यायस्य द्वितीयपादे ईश्वरस्वरूपलक्षणवर्णनं न साधनपरम्, तथा चतुर्थाध्यायस्य प्रथमपादेऽपि उपासनाप्रकारनिरूपणस्य न फलपरत्वमिति प्रतिभाति, अतो व्यभिचारः, [illegible] विषये शाङ्करमतानुसरणमेव दृश्यते ।

**श्रीकरमतेन** पादप्रतिपाद्यविषयास्तु—

१।१ पादे परमशिवब्रह्मलिङ्गवाक्यसमन्वयाभिधानम् ।

१।२ „ केषाञ्चिद् अस्पष्टलिङ्गानां पदानां ब्रह्मप्रतिपादकत्वम् अर्थान्तरबोधकत्वं वेति सन्देहे परब्रह्मशिवरूपमुख्यार्थबोधकत्वम् ।

१।३ „ स्पष्टास्पष्टश्रुतिवाक्य-सन्देहशूकनिर्मूलकतया स्पष्टार्थकथनम् ।

१।४ „ क्वचित् शाखासु प्रधानजगत्कारणत्वप्रतिपादकशब्दानां स्पष्टार्थकथनम् ।

२।१ „ वेदान्तविरुद्ध-स्मृतितर्कादि-निराकरणपूर्वकं जगज्जन्मादि-कारणत्वं परब्रह्मशिवस्यैव इति प्रतिपादनम् ।

२।२ „ सांख्यादिदुर्वादनिरसनेन मुमुक्षूणां शुद्धवैदिकमार्गनिष्ठत्वस्यैव दृढीकरणम् ।

२।३ „ श्रुतीनाम् अन्योन्यविरुद्धत्वद्योतनात् जगतो ब्रह्मकारणत्वशङ्कानिरसनम् ।

२।४ „ जीवस्य ब्रह्मकार्यत्वेऽपि चेतनत्वाद् अजन्यत्व-स्वाभाविक-भिन्नत्व-तत्स्वरूपत्वानां प्रदर्शनेन तस्य तल्लिङ्गशरीरत्वप्रतिपादनम् ।

३।१ „ जीवस्य लोकान्तर-गमनागमनविचारः ।

३।२ „ परमशिवब्रह्मस्वरूपलक्षणादीनि प्रपञ्चितानि ।

३।३ „ तदुपासनविशेषगुणोपलक्षणम् ।

३।४ „ ब्रह्मचर्याद्याश्रमचतुष्टयनिरूपणम् ।

४।१ „ सर्वासां विद्यानां फलम् ।

४।२ „ त्वं-पदार्थभूत-जीवोत्क्रान्त्यादिदशाविशेषफलम् ।

४।३ „ अर्चिरादिना मार्गेण गत्यागतिफलम् ।

४।४ „ मुमुक्षूणां मुक्तिस्वरूपप्रकारं विचिन्त्य स्वाभाविक-[illegible]-पूर्वक-शिवभावरूपपरमपुरुषार्थ-फलनिरूपणम् ।

अयं पादार्थः प्रायेण श्रीकण्ठमतानुरूपः, विशेषस्तु [illegible] ब्रह्मशिवत्वप्रतिपादनम्, [illegible] माध्वमते [illegible] विष्णुत्वप्रतिपादनम् । शाङ्कर-भास्कराद्य-भाष्यद्वयं [illegible], [illegible], एवं रामानुज-[illegible]-भाष्यद्वयं [illegible]

भाष्यम्, तथा श्रीकण्ठ-श्रीकराख्यभाष्यद्वयं च शिवपरं परशिवपरं वा, तेन शैवभाष्यम् इत्याख्यातुं शक्यते। प्रभेदोऽयं सम्प्रदायानुसारेण उपास्यानुरागजन्यः इत्येव प्रतीयते। वल्लभ-विज्ञानभिक्षु-बलदेव-भाष्याणां पादार्थनिर्णये सम्यक् प्रयत्नो न दृश्यते। मुद्रितग्रन्थेषु एतदर्थं सम्पादककर्तृभिरपि न कोऽपि समुल्लेखः कृतो दृश्यते। ततश्च एतानि त्रीणि भाष्याणि अतीव-आधुनिकानि, न वा तानि प्राचीनभाष्यमूलकानि। अतः तेषां पादार्थं निरूप्य स नात्र प्रदर्शितः अस्माभिरपि। प्राचीनविषये प्राचीना एव प्रायेण प्रमाणं भवन्ति। प्राचीनविषयावगमे प्राचीनानां यथा सम्भावनाधिक्यं, न तथा अर्वाचीनानाम्। तेन उपलभ्यमानभाष्याणां मध्ये प्राचीनतमत्वात् शाङ्कर-भाष्यं यादृशं प्रमाणं भवति, तथा न परवर्त्तिनां भास्कर-रामानुजादीनां भाष्यमिति कल्पयितुं शक्यते।

शाङ्करभाष्यमपि कथञ्चित् प्राचीनभाष्यमूलकम् उत प्राचीनमतमूलकं, भास्कर-रामानुजभाष्यादीनामिव, तदपि न सम्यग् ज्ञातुं शक्यते। वाराणसीय-संस्कृतविद्यालयस्थपुस्तकालयाध्यक्ष-स्वर्गीय—श्रीविन्ध्येश्वरीप्रसादद्विवेदी-महोदयाच्छ्रुतं—शुकशिष्य-गौडपादप्रणीत-ब्रह्मसूत्र-व्याख्यानरूपः सहस्रकारिकात्मकः एको ग्रन्थः तेन दृष्टः। परन्तु स ग्रन्थः इदानीं नोपलभ्यते, न वा कुत्रचित् तस्य वाक्यादिकम् उद्धृतमपि। तथा सति शाङ्करभाष्यस्य प्राचीनभाष्यमूलत्वं प्रतिपद्येत। तथापि प्राचीनत्वात् तस्यैव प्रामाण्याधिक्यं सम्भाव्यते। एतेनैव सर्वैः बोद्धुं शक्यते,—पादप्रतिपाद्यविषये कीदृशो मतभेदो भाष्यकाराणामिति, न कोऽपि अन्यैः सह सर्वथा ऐकमत्यं भजते इति च।

## मतभेदकारणं सम्प्रदायरक्षणम्

एतस्य प्रथमं कारणम्—अधिकरणरचनायां मतभेदः। सोऽपि सूत्रार्थमतभेदजन्यः। तस्य अपरं कारणं सम्प्रदायानुरोधः। सम्प्रदाय-रक्षणाय युक्त्याश्रयत्वं हातुं प्रायेण सर्वेषां कुण्ठा न भवति। अतः एतदेव अत्र मुख्यं कारणं मन्यते। "युक्तियुक्तमुपादेयं वचनं बालकादपि" इति मतम् अनुसृत्य सूत्राक्षरतः एव सूत्रार्थे विचारिते सति नैतादृशी मतभेदसम्भावना स्यात्। अथवा सर्वसम्मत-साक्षाद्व्याससम्प्रदायतः सूत्रार्थे लब्धे सति नैवं मतानैक्यम् अभविष्यत्। एवञ्च मतभेदस्य मुख्यं कारणं सम्प्रदायरक्षानुरोधरूप-दुराग्रहविशेष एव इत्यनुमीयते।

## पादार्थनिरूपणोपायः

स्यात् एतत्, परन्तु पादप्रतिपाद्यरूप-पादसङ्गतिनिरूपणं विना अधिकरणार्थनिर्णयः असम्भवः, ततः तदर्थनिरूपणाद् ऋते सूत्रार्थनिरूपणमपि सुदुष्करम्। तेन ब्रह्मसूत्र-तात्पर्यम् अनिरूपितं स्यात्, तत्र व्याससम्मत-सूत्रभाष्यनिर्णयश्च ततोऽपि असम्भवः एव प्रतिभाति। परन्तु तथापि अस्माकं नैराश्यं न भजनीयम्। एतदर्थं तत्र उपायद्वयं वर्तते। तत्र प्रथमं तावद् व्यास-सम्प्रदायानुसारिणाविष्करणं, द्वितीयन्तु सूत्राधिकरणयोः यथासम्भाविताधीनिरूपणम्।

द्वितीयोपायार्थं यत् कर्तव्यं तद् एकस्मिन् पक्षे उत्तरोत्तरभाष्य-श्रुति-शाखाध्याय-सङ्गति-सङ्गत्यालोकेन यथासम्भवं पादार्थनिरूपणं, पक्षान्तरे च सूत्रपद-पर्यालोचनेन, ततः अधिकरण-रचना-नियमाविष्करणेन अधिकरण-तदर्थनिर्णयानन्तरम् अधिकरण-समष्टिरूप-पादार्थनिरूपणम्। अधिकरण-रचना-नियमाविष्करणमपि अष्टानां भाष्याणां मध्ये अधिकतमसंख्यकानां सम्मति-ग्रहणेन कर्तव्यम्। एतदेव द्वितीयोपायार्थम् अस्माकं कर्तव्यम्। एवं च उभयपक्षतो निरूपितः अर्थः पादार्थो भवितुम् अर्हति। यथा कस्यचित् कार्ये च कारणे च विज्ञाते सति तस्य स्वरूपम् आविष्कर्तुं शक्यते, कार्यकारणयोः अन्तःपातित्वात् तस्य, तद्वद् अत्रापि श्रुतिशाखाध्यायार्थेषु विज्ञातेषु सत्सु, तथा अधिकरणार्थे सूत्रार्थे च अवगते सति पादार्थनिर्णयः सम्भवत्येव, अध्यायाधिकरणयोः अन्तःपातित्वात् पादार्थस्य। अयमेव अत्र द्वितीयः उपायः।

### पादार्थनिरूपणे प्रथमोपायः

तत्र प्रागुक्तः प्रथमोपायस्तु एतस्मात् द्वितीयोपायादपि दुर्बलः; यतः सर्वे भाष्यकाराः स्वस्वसम्प्रदायस्य व्यासमूलकत्वम् ऋषिमूलकत्वं वा प्रतिपादयितुम् उत्सहन्ते। यथा शाङ्कर-सम्प्रदायस्य व्यास-शुक-गौडपादादिक्रमेण, तथा शङ्करेण सह उत्तरकाशी व्यासस्य साक्षात्-कारानन्तरं शाङ्करभाष्यस्य व्यासानुमोदितत्वेन च व्यास-सम्प्रदायत्वं, भास्करसम्प्रदायस्य पाणिनि-गुरुपरम्परासम्प्रदायत्वं, रामानुजसम्प्रदायस्य व्यास-तत्प्रशिष्य-बोध-तदन्वयोत्पन्न-बोधायनादिक्रमेण व्याससम्प्रदायत्वं, माध्वसम्प्रदायस्य मध्वाचार्येण बदरिकाश्रमस्थ-व्यासाश्रमे व्याससाक्षात्कार-पूर्वकोपदेशलाभात् व्याससम्प्रदायत्वं, निम्बार्कसम्प्रदायस्य सनत्कुमार-नारदादिक्रमेण ऋषिसम्प्रदायत्वं तेन व्याससम्प्रदायत्वम्, श्रीकण्ठ-श्रीकरयोः सर्वज्ञभगवच्छिव-सम्प्रदायत्वाद् व्याससम्प्रदायत्वम्, वल्लभस्य विष्णुस्वामिसम्प्रदायत्वात् तथा, विज्ञानभिक्षोः कपिलसम्प्रदायत्वात् तथा, स्वप्ने गोविन्द-भगवतः लब्धसूत्रार्थविवेकविज्ञानस्य बलदेवस्य माध्वसम्प्रदायत्वाद् व्याससम्प्रदायत्वम्। वस्तुतस्तु सर्वत्र अविसंवादि सर्वमान्यं सम्यक् प्रमाणं किञ्चिदपि न विद्यते। ऋषीणां मतभेदेन, आचार्याणां मध्ये परस्परविरोधेन च सर्वत्र संशयास्कन्दितत्वात्। अतः व्याससम्प्रदायानुगत्याविष्करणरूपः प्रथमोपायो द्वितीयोपायाद् दुर्बलः एव।

### पादार्थनिरूपणे द्वितीयोपायः

एवं च द्वितीयेन उपायेन पादार्थनिरूपणे सति यदि कस्मिंश्चित् पादे इयं पाद-सङ्गतिः केनचिद् भाष्यकारेण लक्षिता स्यात्, तदा तद्भाष्यं तदंशेन च व्याससम्मतं भवेत्, यथा रामानुजभाष्यम्। तत्र द्वितीयाध्यायस्य अविरोधलक्षणाख्ये द्वितीयपादे अन्तिमोत्पत्त्यधि-करणे इयं सङ्गतिः लक्षिता दृश्यते, तत्पक्षस्य-पाञ्चरात्रमतस्य स्थापनात्। तथैव सङ्कर्षण-उत्तराध्यायस्य तृतीयपादे "पादनिर्णय"विवरणे शाङ्करमतेऽपि इयं सङ्गतिः अस्तीति दृश्यते, तत्पाद-तात्पर्यानुसारेण स्वमतस्थापनात्। वस्तुतस्तु अनुमानादिभिः शाङ्करभाष्यस्य सङ्गतिः अपि वर्तते

शाङ्कर-भाष्यानामस्य प्रतिपक्ष-खण्डनपरतया एव व्याख्यातम् इति दृश्यते। एतदपि न असङ्गतकल्पनम्, यतः शाङ्करभाष्ये एतत्प्रसङ्गस्य उपक्रमे खण्डनपरत्ववचनमेव उपन्यस्तं दृश्यते। अतो "महर्षिर्वेद"विकल्पे शङ्करस्य एवं पादसङ्गतिलङ्घनं न निश्चितम्—इति कल्पयितुं शक्यते। अस्तु तावत्, अत्र एतदेव कल्पनीयं, यद्—यस्मिन् भाष्ये एतादृश-दोषाधिक्यं भवेत्, तत् व्याससम्मतं भाष्यम्—इति, तथा यत्र एतादृशदोषाभावः, तदेव व्याससम्मतं भाष्यम् इति च। दोषाल्पत्वे सन्निकृष्टत्वं दोषाधिक्ये विप्रकृष्टत्वम् इति विवेकः।

परन्तु एतादृशीं बाधाम् अतिक्रमितुं प्रायेण सर्वैः आचार्यैः स्वस्वमतेन पादार्थोऽपि अन्यथाकृतः—एतत् तु प्रागेव दृष्टम्। तेन निःसंशयं यथा स्यात् तथा व्याससम्मतभाष्य-निरूपणं न सुकरं भवति—न कोऽपि केनापि उपायेन निःसंशयम् एतत् सम्पादयितुं समर्थो भवेत्। तथापि एतत् पादसङ्गतिनिरूपणार्थं यथासम्भवम् अत्र प्रयत्नः कर्त्तव्यः।

### अधिकरणनिरूपणद्वारा पादार्थनिर्णयः

एतदर्थम् अस्माभिः आदौ अधिकरण-निरूपणं कर्त्तव्यम्, पादार्थानाम् अधिकरणार्थाधीनत्वात् मुख्यतः। अत्र यद्यपि अधिकरण-रचनायामपि पादार्थतोऽपि महान् मतभेदो दृश्यते, तथापि तद्रचना-नियमाविष्करणाय वयम् अत्र प्रयतामहे। यतः समान-लक्षणाक्रान्तानि बहूनि अधिकरणानि सन्ति, तानि दृष्ट्वा अधिकसम्मतनियमाविष्करणं न असम्भवं भवति। पादप्रतिपाद्य-निर्णये तु एतादृशी सम्भावना न विद्यते, तन्निर्णायकसमानाकार-पदादीनाम् असत्त्वात्। अतः केनचित् प्रकारेण अधिकानुमतः अधिकरण-रचन-नियमो यदि आविष्कृतः स्यात्, तदा स एव नियमो व्यासानुमतः इति मत्वा तन्नियमानुगताधिकरण-समूहार्थः एव पादार्थो भवितुम् अर्हति। तथा सति पादार्थनिर्णयो न असम्भवः, न वा सुदूरपराहतः इति मन्तव्यम्। अतः अधुना पादार्थनिर्णयार्थम् अधिकरणरचनानियमाविष्करणप्रयासः क्रियते।

### अधिकरणरचनायां सामान्यनियमाः

तत्र अधिकरणं नाम मीमांसाद्वय-प्रदर्शित-विचार-विशेषः—इति प्रागेव उक्तम्। एतदधिकरणरचनायां द्विविधो नियमो दृश्यते, यथा, सामान्यनियमो विशेषनियमश्च। तत्रादौ सामान्यनियमो निरूप्यते। यद् यथा—

१। एकेन वा एकाधिकसूत्रेण वा यथाप्रयोजनम् अधिकरणानि रचयितव्यानि। तेन कियन्ति सूत्राणि प्रत्यधिकरणं वर्त्तिष्यन्ते तत्र न कोऽपि नियमः।

२। यत्र एकेन सूत्रेण अधिकरणं रचितं स्यात्, तत्र तदेव सिद्धान्तसूत्रं भवेत्। न तु पूर्वपक्षसूत्रं क्वचिदपि। तत्र पूर्वाधिकरणस्य सिद्धान्तं दृष्ट्वा पूर्वपक्षः ऊहनीयः।

३। अधिकरणद्वयमध्ये यः सम्बन्धः सोऽत्र सङ्गतिशब्देन अभिधीयते। स तु विविधप्रकारो भवति, यथा—आक्षेपसङ्गतिः, दृष्टान्तसङ्गतिः, [illegible], [illegible],

उपोद्घातसङ्गतिः, हेतुहेतुमद्भावसङ्गतिः, उपजीव्योपजीवकभाव-सङ्गतिरित्यादिः। यत्र "कथमेतत्" इत्याद्याकारस्य आक्षेपस्य उत्तररूपेण अधिकरणम् अवतार्यते, तत्र आक्षेपसङ्गतिः बोद्धव्या, तथा यत्र दृष्टान्तरूपेण अधिकरणम् आरभ्यते, तत्र दृष्टान्तसङ्गतिः ज्ञेया। "यथा तत्र तथा अत्र" एवम्प्रकारेण अधिकरणं यत्र प्रस्तूयते, तत्र प्रत्युदाहरणसङ्गतिः प्रतिदृष्टान्तसङ्गतिर्वा उच्यते। प्रासङ्गिकविषयस्य देशविशेषम् अवलम्ब्य यदि तत्संश्लिष्टः कोऽपि प्रसङ्गः अवतारितः स्यात्, तदा प्रसङ्ग-सङ्गतिः उच्यते। एतत् सर्वं वैयासिक-न्यायमालायां, "भाष्यरत्नप्रभा"-नामिकायां टीकायां, [illegible]-वर्षिण्याख्यटीकायां, ब्रह्मतत्त्वप्रकाशिकाख्यायां वृत्तौ च प्रपञ्चितम्। माध्वमिश्र-मतान्तरीय-भाष्यटीकादिषु प्रायेण एतज्जातीयालोचनं न दृश्यते। अधिकरण-मालजातीय-ग्रन्थाश्च केवलं शङ्कर-रामानुज-श्रीकण्ठसम्प्रदायेष्वेव दृश्यन्ते। तथापि शङ्कर-सम्प्रदायस्यैव प्राधान्यं ग्रन्थबाहुल्यं च। रामानुजीयवेदान्तदीपः ग्रन्थः यदि रामानुजाचार्यविरचितः स्यात्, तदा स एव ग्रन्थः अत्र प्रथमत्वेन ग्रहणीयः, यतः बहूनां तस्य रामानुजाचार्यप्रणीतत्वे सन्देहः वर्तते। अन्यथा भारतीतीर्थ-विरचितवैयासिक-न्यायमाला-ग्रन्थस्यैव प्राचीनतमत्वं सम्भाव्यते।

४। ततश्च यत्र अधिकरणम् आरभ्यते, तत्र सूत्रमध्ये प्रथमान्त-पदमेव प्रायेण विधेयतया व्यवहृतम्—इत्येव सर्वेषु भाष्येषु सर्वेषाम् अधिकरणारम्भकसूत्राणाम् आलोचनेन अवगम्यते, प्रथमान्तपदस्यैव वस्तुस्वरूप-वर्णन-योग्यत्वात्। यथा घटं दृष्ट्वा तम् अजानन् यदि कोऽपि पृच्छेत् "कोऽयं पदार्थः?" तदा तस्य इदम् उत्तरम् "अयं घटः"; न तु "इमं घटम्", "अनेन घटेन", "अस्मै घटाय", "अस्मात् घटात्", "अस्य घटस्य", "अस्मिन् घटे" वेति। द्वितीयादि-विभक्त्यन्तेन पदेन वस्तुनिर्देशः न केनापि क्रियते, तेन वस्तुनिर्देशाय प्रथमान्तपदमेव सर्वैः व्यवह्रियते; अतः सूत्रमध्ये प्रथमान्तपदसत्त्वम् अधिकरणारम्भसूचकम्। यथा "आनन्दमयः अभ्यासात्" इत्यत्र प्रथमान्तानन्दमयपदस्य विधेयत्वात् अस्य अधिकरणारम्भकत्वम्।

५। यत्र एतादृशप्रथमान्तपदं न दृश्यते, तत्र तत्पूर्वसूत्रात् पूर्वाधिकरणाद् वा तादृशप्रथमान्तपदम् अध्याहर्त्तव्यम्। सूत्रमध्ये प्रथमान्तपदं विना सूत्राणाम् अधिकरणारम्भकत्वं न मन्यते। अतः प्रथमान्तपदम् अधिकरणारम्भलक्षणम्। तथा "जन्माद्यस्य यतः" इति सूत्रे जन्मादि इति प्रथमान्तपदम्। "ईक्षतेर्नाशब्दम्" इति सूत्रे "अशब्दम्" इति प्रथमान्तपदं वेति।

६। यत्र एकाधिकेन सूत्रेण अधिकरणं रचितं स्यात्, तत्र सर्वाणि सूत्राणि क्वचित् सिद्धान्तबोधकानि, क्वचित् कतिपयानि सिद्धान्तबोधकानि अवशिष्टानि अन्यानि पूर्वपक्ष-सूचकानि। यथा "विलक्षणत्वाधिकरणम्"।

७। पूर्वपक्षसूत्रम् अधिकरणारम्भे अधिकरणमध्ये वा [illegible] [illegible] [illegible] न [illegible] [illegible]।

८। क्वचित् सूत्र[illegible]मध्ये आक्षेप-समाधानक्रमेण एकाधिकवारं पूर्वपक्षसूत्राणि सिद्धान्तसूत्राणि च लभ्यन्ते।

९। कुत्रचिद् एकस्मिन्नेव सूत्रमध्ये पक्षद्वयं सन्निवेशितम्, यथा "गौणश्चेन्नात्म-शब्दात्" इति।

१०। एकेन एकाधिकसूत्रेण वा यत्र अधिकरणं भवति, तत्र अधिकरणस्य पञ्चाङ्गानि तत्र अन्तर्निहितानि भवन्ति। टीकाविद्भिः तानि अङ्गानि पृथक् कृत्वा प्रदर्शितानि। सूत्रद्वारा सूत्रकृता अधिकरणाङ्गानि न प्रदर्शितानि। न वा सूत्ररचनायां सूत्रक्रमे वा अधिकरणाङ्ग-क्रमोऽपि अनुसृतः।

११। अधिकरणाङ्गानि षट्, यथा—सङ्गतिः, विषयः, संशयः, पूर्वपक्षः, सिद्धान्त-पक्षः, फलभेदश्च। एतदपि प्रागेव उक्तम्। सूत्रकृता एतत्क्रमानुसारेण नैकमपि अधिकरणं रचितम्। तत्र सङ्गतयः सदैव उहनीयाः। विषयश्च श्रुतिवाक्यं, तच्च सूत्रपदात् विज्ञेयम्, यथा—"जन्माद्यस्य यतः" इति एकेन सूत्रेण एकम् अधिकरणं रचितम्, तत्र "यतः"-पदात् "यतो वा इमानि भूतानि" इत्यादि-श्रुतिवाक्यं विषयत्वेन गृह्यते। क्वचित् सूत्रार्थादपि विषयरूपं श्रुति-वाक्यं संगृह्यते। यथा—"शास्त्रयोनित्वात्" इति एकेन सूत्रेण एकम् अधिकरणं रचितम्, तत्र "अस्य महतो भूतस्य निःश्वसितम्" इति श्रुतिवाक्यम् अथवा "तं तु औपनिषदं पुरुषं पृच्छामि" इति श्रुति-वाक्यं विषयत्वेन अर्थात् गृह्यते। संशयश्च विषयवाक्यम् अवलम्ब्य कल्पनीयः। पूर्वोत्तरपक्षद्वयं संशयस्य कोटिद्वयात् निरूपणीयम्। फलभेदश्च पूर्वोत्तरपक्षात्मकः समग्राधि-करणार्थ-निरूपणाधीनः। एवं च यथासम्भवं सूत्रपदम् अनुसृत्य सूत्रार्थं च पर्यालोच्य अधिकरणाङ्गानि रचयितव्यानि। अधिकरणाङ्गक्रमेण सूत्रकृता सूत्राणि न रचितानि। एतावन्तः एव अधिकरणरचनायां सामान्यनियमा इति वक्तुं शक्यते।

### अधिकरणरचनायां विशेषनियमाः

विशेषनियमास्तु बहवः। ते सर्वे अधिकरणविचारप्रसङ्गेन संकलनीयाः। सर्वेषां सूत्राणाम् आलोचनं परीक्षणं विना तेषां संकलनं नास्ति सम्भवति। शङ्करादिवल्लभान्तानाम् अष्टानाम् आचार्य्याणां मध्ये केन आचार्य्येण, केन वा सूत्रेण अधिकरणारम्भः कृतः, कतिभिः सूत्रैश्च तदधिकरणं सङ्कलितं, कस्मिन् अधिकरणे कति मतभेदाः, तत्रापि के च अधिकैः सह अधिकमतावलम्बिनः, के पुनः अल्पसंख्यकगणान्तर्गताः—इत्यादिकं सर्वं यावन्न निर्णीयते, तावद् विशेषनियमसङ्कलनं न सम्भवति, तदनन्तरं तैश्च नियमैः अधिकरणरचनायाम् आचार्य्याणां नियम-पालनापालन-जन्यदोषगुण-निर्णयाय अधिकरण-परीक्षणमपि न सम्भवति। अतः सर्वादौ [illegible] सर्वाणि सूत्राणि यथाक्रमम् एकीकृत्य सरण्याकारेण च [illegible] एका सरणिः विरचनीया। ततश्च अधिकरण-परीक्षासुखेन विभिन्नानाम् आचार्य्याणां [illegible]

पाठभेद-पाठजन्य-दोषगुणविचारः करणीयः। तेषु च केषाञ्चिद् दोषबाहुल्यात् व्यासमतविप्रकृष्टत्वं, लाघवाच्च केषाञ्चित् सन्निकृष्टत्वम् अवधार्यम्।

### व्याससम्मतिनिर्णयोपायः

एवं च सन्निकृष्टविप्रकृष्टत्वनिर्णयेन व्याससम्मताधिकरणं निरूप्य अधिकरणान्तर्गत-विषय-तदनुकूल-श्रुतिवाक्यादिकम् अवलम्ब्य अधिकरण-समष्टिरूप-पादानामपि प्रतिपाद्यं निरूपयितुं शक्यते। तदेव पादसङ्गतिः भविष्यति। तया च पादसङ्गत्या स एव अधिकरणार्थः पुनः निर्णेयः। नात्र अन्योन्याश्रयदोषशङ्का, व्यक्तेः भेदात्। यदधिकरणनिरूपिता या पादसंगतिः, तदधिकरणस्य न तत्संगतिनिरूपितत्वात्। परन्तु एतदधिकरणरचनादिकं विशेषनियमाधीनम्। विशेषनियम-निर्णयश्च समग्र-(५५५)-सूत्रालोचन-सापेक्षः। एतदर्थं ग्रन्थबाहुल्यम् अवश्यम्भावि। अतः तत्पूर्वम् उल्लिखित-सरणितः अपरे ये बहवो विषयाः ज्ञायन्ते, तैरपि आलोच्यमानानां दशानां भाष्याणां मध्ये कतमस्य व्यासमत-सन्निकृष्टत्वम्, अन्येषां वा तत् कीदृशं तद् विज्ञातुं प्रयतामहे। ते च विषयाः (१) मतान्तरेण सूत्राणां पाठभेदाः, (२) एकस्य सूत्रस्य द्विधाकरणं, (३) सूत्रद्वयस्य एकीकरणम्, (४) अतिरिक्तसूत्रग्रहणम्, (५) गृहीत-सूत्रवर्जनम्, (६) सूत्रक्रमस्य विपर्ययः—इत्यादयः। अत्र सूत्रकृतां निर्देशाभावेन प्राचीनप्रमाणाभावेन च अधिकानां पक्षभुक्तिरेव व्यासमतसन्निकृष्टत्वस्य लक्षणं, तथा अल्पानां पक्षभुक्तिश्च व्यासमतविप्रकृष्टत्वस्य निदर्शनं भवति। एवं च व्यासमतविप्रकृष्टत्वमेव दोषः, सन्निकृष्टत्वमेव गुणो भविष्यति। तथा सति एतादृशदोषगुणनिर्णयः अष्टप्रकारैः सम्पादनीयः, यथा अल्पसंख्यकपक्षान्तर्गतत्वात्—

१। अधिकरणस्य रचनायां दोषाः, २। अधिकरणस्य अरचनायां दोषाः, ३। पाठभेदे दोषाः, ४। एकसूत्रस्य द्विधाकरणाद् दोषाः, ५। सूत्रद्वयस्य एकीकरणाद् दोषाः, ६। अति-रिक्तसूत्रग्रहणाद् दोषाः, ७। गृहीतसूत्रवर्जनाद् दोषाः, ८। सूत्रक्रमविपर्ययाद् दोषाः इति।

एवं च एतेषाम् अष्टानां समाहारे कृते अल्पसंख्यकानां पक्षान्तर्गतत्वात् यस्य दोषसंख्याः अपरेभ्यः स्वल्पाः भविष्यन्ति, स एव व्यासमतसन्निकृष्टत्वात् व्यासमतानुसारीति आख्यातुम् उचितम्। तथापि एतन्न विस्मर्तव्यं यद् अयं निर्णयः पक्षगतव्यक्तिसंख्याबलसिद्धः, सूत्राक्षरमात्रदर्शनेन। अत्र प्राचीनत्वार्वाचीनत्वजन्य-बलाबलविचारो न कृतः। कालगतपरत्वापरत्वजन्यं यद् व्यास-मतस्य अनुसारित्वम् अनुसारित्वं वा तदत्र न परिगणितम्। तस्य परिगणने कृते शाङ्कर-भाष्यस्य यादृशं प्रामाण्यं, न तथा अपरेषाम्—इति अवधेयम्। यतः सर्वे शङ्करपरभाविकाः आचार्याः शङ्करात् प्राचीन-प्रमाण-प्रदर्शन-पराङ्मुखाः।

स्यादेतत्, सूत्राक्षरमात्रम् अनुसृत्य इतः अधिकं न निर्णेतुं शक्यते। सूत्राणां केवलम् अर्थविचारेण यो निर्णयः, तत्र विप्रतिपत्तिः न सम्यक् निवारयितुं केनापि शक्यते, तर्काप्रतिष्ठानात्। अतोऽत्र सूत्राक्षरमात्रतो व्यासमतानुसारित्वं निर्णीतम्। एतन्निर्णयम् अवलम्ब्य यदि सूत्रार्थ-

विचारः कृतः स्यात्, तदैव काचित् मीमांसा सम्भावनीया। अन्यथा असम्भावनीया एव इयं मीमांसा, इत्यत्र न कोऽपि सन्देहः। एतदर्थम् अत्र अस्माभिः सूत्राक्षरमात्रतः दोषगुणनिर्णयः कृतः। एतेन सह सूत्रार्थ-विचारः सुधीभिः करणीयः। एतदर्थं सूत्रपाठ-सूत्रसंख्याधिकरणसंख्या-तदन्तर्गत-सूत्र-संख्यादिकं प्रदर्श्य कतिपयाः सरणयोऽत्र विरच्यन्ते अस्माभिः। अधस्तात्—एतत्सरणीनां फल-मात्रम् अत्र पाठकानां कौतूहलनिवृत्तये प्रदीयते, विशेषेण तेषाम् आलोचनं फलं च द्वितीयपादे करिष्यते। तच्च फलं यथा—

### अधिकरणरचननियमनिरपेक्षं संख्यामूलकं विचारफलम्

| भाष्य-नाम | अधिकरणस्य रचनायाम् | अधिकरणस्य अरचनायाम् | १ अधिकरणदोषसमष्टिः | २ सूत्रपाठे | ३ सूत्रयोगे | ४ सूत्रविभागे | ५ सूत्रग्रहणे | ६ सूत्रवर्जने | ७ सूत्रक्रमविपर्यये | दोषसमष्टिः |
|---|---|---|---|---|---|---|---|---|---|---|
| शाङ्करः | १ | १२ | १३ | १० | १ | ० | ० | ० | ० | २४ |
| भास्करः | १ | १० | ११ | ४६ | ४ | ० | ० | ४ | ० | ६५ |
| रामानुजः | १९ | ४ | २३ | ३६ | १४ | ६ | ३ | २ | २ | ८६ |
| निम्बार्कः | ४० | ३ | ४३ | ३३ | ८ | २ | ३ | २ | ० | ९१ |
| मध्वः | ३२ | ७४ | १०६ | ४७ | १ | ६ | ६ | ३ | १ | १७० |
| श्रीकण्ठः | १२ | १६ | २८ | २६ | १४ | ६ | ३ | २ | २ | ८१ |
| श्रीकरः | १० | ९ | १९ | ६३ | ११ | ० | २ | ० | ४ | ९९ |
| वल्लभः | ४६ | ३० | ७६ | २४ | २ | ० | १ | १ | ० | १०४ |
| विज्ञानभिक्षुः | ? | ? | ? | २९ | १ | ० | १ | ० | ० | ३१ |
| बलदेवः | ? | ? | ? | ४१ | २ | ० | १ | ० | ० | ४४ |
| समष्टिः | १६१ | १५८ | ३१९ | ३५५ | ५८ | २० | २० | १४ | ९ | ७९५ |

अत्र अल्पसंख्यक-पक्षान्तर्गतत्वाद् अष्टसु विषयेषु समाहृतेषु प्रत्येकं दोषसंख्याः—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १ । | शङ्करे | २४ | दोषाः | ६ । | श्रीकण्ठे | ८१ | दोषाः |
| २ । | भास्करे | ६५ | ,, | ७ । | श्रीकरे | ९९ | ,, |
| ३ । | रामानुजे | ८६ | ,, | ८ । | वल्लभे | १०४ | ,, |
| ४ । | निम्बार्के | ९१ | ,, | ९ । | विज्ञानभिक्षौ | ३१ | ,, |
| ५ । | मध्वे | १७० | ,, | १० । | बलदेवे | ४४ | ,, |

भवन्ति । विज्ञानभिक्षु-बलदेवयोः अधिकरण-निर्णयाभावात् दोषाल्पता अत्र दृश्यते । अधिकरण-रचनाजन्यदोषाणां परिगणने प्रदर्शितदोषसंख्यातः आधिक्यमेव तयोः भविष्यति । ततश्च प्राचीनत्वार्वाचीनत्वादिकं नात्र विवेचितम् । न वा अधिकरण-रचनानियमाविष्करणेन एतद् विचारितम् । अत्र केवलं दोषाणां संख्यामात्रेण निर्णयोऽयं कृतः । विशेषस्तु द्वितीयपादे प्रदर्शयिष्यते । अधिकरणरचनायाः नियमाविष्करणपूर्वकं विवेचनम् एतद्ग्रन्थस्य तृतीये पादे करिष्यते । तथापि तस्यापि अन्तिमफलम् अत्र प्रदर्श्यते—

**नियमसापेक्षम् अधिकरणविचारफलम्**

| भाष्य-नाम | अधिकरणस्य रचनायाम् | अधिकरणस्य अरचनायाम् | अधिकरणदोष-समष्टिः |
|---|---|---|---|
| शांकर-भाष्ये | ० | ० | ० |
| भास्कर ,, | १ | २ | ३ |
| रामानुज ,, | १८ | ३१ | ४९ |
| निम्बार्क ,, | १६ | ५३ | ६९ |
| माध्व ,, | ७३ | ४८ | १२१ |
| श्रीकण्ठ ,, | २३ | २१ | ४४ |
| श्रीपति ,, | १५ | २७ | ४२ |
| वल्लभ ,, | ३० | ५८ | ८८ |
| समष्टिः | १७६ | २४० | ४१६ |

एतेन नियमसापेक्षाधिकरणरचनाविचारफले शांकरभाष्यस्य दोषाभावः, भास्करभाष्यस्य दोषत्रयम् इत्यादि दृश्यते । एवं च प्राचीनविषये प्राचीनानामेव प्रामाण्याधिक्यम् इत्येव, सिध्यति । सूत्रपाठादिषु षट्सु विषयेषु तुलनाफलं तु उक्तमेव ।

(५४) २५, १०६, ११५, १३९, १९१, १७६, १७७, १८०, २०१, २४२, २४४, २४६, २४७, २६७, २७२, २७३, २८१, २९३, २९४, २९५, २९६, २९७, २९८, ३००, ३०६, ३०७, ३०९, ३१८, ३२३, ३२४, ३३६, ३३८, ३५२, ३५५, ३७२, ३७६, ३८०, ३८७, ४०६, ४०८, ४०९, ४१०, ४११, ४३५, ४३८, ४३९, ४५९, ५०२, ५१७, ५२३, ५२५, ५३६, ५४२, ५५३=५४ सूत्रेषु—

श०भा०रा०नि०श्री०श्रीप०व० भाष्याणामैक्यं म० भाष्यस्य विरोधः

( ७ ) १६, ३४, ४८, १४२, २८५, ३८१, ४०० सूत्रेषु—

श०भा०रा०नि०म०श्रीप०व० भाष्याणामैक्यं श्री० भाष्यस्य विरोधः

(१०) ३६,१३६,१५१,२७५,२८४,३१२,३४३,३४६,३८९,४१३ सूत्रेषु—

श०भा०रा०नि०म०श्री०श्रीप० भाष्याणामैक्यं व० भाष्यस्य विरोधः

७४ समष्टिः ।

तेन ७४ सूत्रेषु अल्पसंख्यकगणान्तर्गतत्वात्—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| श्रीपतिभाष्यस्य | १ | दोषः | भवति | माध्वभाष्यस्य | ५४ | दोषाः | भवन्ति |
| रामानुजभाष्यस्य | १ | „ | „ | श्रीकण्ठभाष्यस्य | ७ | „ | „ |
| निम्बार्कभाष्यस्य | १ | „ | „ | वल्लभभाष्यस्य | १० | „ | „ |

समष्टिः=७४

तथा च अधिकरणस्य अरचनायां शङ्कर-भास्करभाष्ययोर्दोषाभावः अवगम्यते ।

## षण्णां भाष्याणाम् अधिकरणरचनायां दोषाः ।

तथा च षण्णां भाष्याणाम् अधिकरणरचनायाम्—

( ३ ) १०३,२२४,२३० सूत्रेषु श०भा०म०श्री०श्रीप०व०

भाष्याणामैक्यं रा०नि० भाष्ययोर्विरोधः

( १ ) २३५ सूत्रे श०भा०नि०श्री०श्रीप०व० „ रा०म० भाष्ययोर्विरोधः

( २ ) २७७,२९७ सूत्रयोः श०भा०नि०म०श्री०व० „ रा०श्रीप० „ „

( ५ ) १२५,१९७,२८६,४५१,५१४ सूत्रेषु—

श०भा०रा०श्री०श्रीप०व० „ नि०म० भाष्ययोर्विरोधः

( ३ ) १२०,४७७,५१२ सूत्रेषु श०भा०रा०म०

श्रीप०व० भाष्याणामैक्यं नि०श्री० भाष्ययोः विरोधः

( २ ) ३९०,४८९ सूत्रयोः श०भा०रा०म०श्री०व० " नि०श्रीप० " "

( ६ ) १३४,३१४,३२७,४९९,५००,५४१ सूत्रेषु

श०भा०रा०म०श्री०श्रीप० " नि०व० " "

(१०) १६०,३६५,३७९,४४६,४४८,४५०,४५३,४६१,४९३,४९६ सूत्रेषु

श०भा०रा०नि०श्री०श्रीप० भाष्याणामैक्यं म०व० भाष्ययोः विरोधः

( १ ) ४७५ सूत्रे श०भा०रा०नि०म०श्रीप० " श्री०व० " "

( २ ) १६६,५४३ सूत्रयोः श०भा०रा०नि०म०श्री० " श्रीप०व० " "

३५ समष्टिः ।

एवं च ३५ सूत्रेषु अल्पसंख्यकगणान्तर्गतत्वात्—

| | | | | | |
|---|---|---|---|---|---|
| रा० नि० | भाष्ययोः | ३ दोषाः | नि० व० | भाष्ययोः | ६ दोषाः |
| रा० म० | " | १ दोषः | म० व० | " | १० " |
| रा०श्रीप० | " | २ दोषौ | श्री० व० | " | १ दोषः |
| नि०म० | " | ५ दोषाः | श्रीप०व० | " | २ दोषौ । |
| नि०श्री० | " | ३ " | | समष्टिः | ३५ |
| नि०श्रीप० | " | २ दोषौ | | | |

एवं च एकैकस्य दोषसंख्या इत्थम्—

| | | |
|---|---|---|
| रा०—६ | म०—१६ | श्री०—४ |
| नि०—१९ | श्रीप०—६ | व०—१९ |

समष्टिः ७० ÷ २=३५

### षण्णां भाष्याणाम् अधिकरणस्य अरचनायां दोषाः ।

तथैव षण्णां भाष्याणाम् अधिकरणस्य अरचनायाम्—

( २ ) २५६,५०८ सूत्रयोः रा०नि०म०श्री०

श्रीप०व० भाष्याणामैक्यं श०भा० भाष्ययोः विरोधः

( १ ) ४९५ सूत्रे भा०रा०म०श्री०श्रीप०व० " श०नि० " "

( १ ) ५३२ " भा०रा० नि०म०श्री०श्रीप० " श०व० " "

( २ ) १९७,३७१ सूत्रयोः श०भा०रा०नि०श्रीप०व० " म०श्री० " "

(१२) १४१,१७८,२७९,२९०,३०८,३१७,३२६,३३२,३३७,३४१,

४२४,[illegible], सूत्रेषु श०भा०रा०नि०श्री०श्रीप० भाष्याणामैक्यं म०व० " "

( १ ) ४७४ सूत्रे श०भा०रा०नि०म०व० भाष्याणामैक्यं श्री०श्रीप० भाष्ययोर्विरोधः
( २ ) ५२२,५४६ सूत्रयोः श०भा०रा०नि०म०श्री० „ श्रीप०व० „ „
२१ समष्टिः ।

एवं च २१ सूत्रेषु अल्पसंख्यकगणान्तर्गतत्वात्—

| | | | | | |
|---|---|---|---|---|---|
| श०भा० भाष्ययोः | २ | दोषौ | म०व० भाष्ययोः | १२ | दोषाः |
| श०नि० „ | १ | दोषः | श्री०श्रीप० „ | १ | दोषः |
| श०व० „ | १ | „ | श्रीप०व० „ | २ | दोषौ |
| म०श्री० „ | २ | दोषौ | | समष्टिः २१ | |

एवं च एकैकस्य दोषसंख्या इत्थम्—

| | | | |
|---|---|---|---|
| श०—४ | नि०—१ | श्री०—३ | व०—१५ |
| भा०—२ | म०—१४ | श्रीप०—३ | समष्टिः=४२÷२=२१ |

अत्र रामानुजभाष्यस्य दोषाभावः अवगम्यते ।

## पंचानां भाष्याणाम् अधिकरणरचनायां दोषाः ।

तथा च पंचानां भाष्याणाम् अधिकरणरचनायाम्—

(१) ४०४ सूत्रे रा०नि०श्री०श्रीप०व० भाष्याणामैक्यं श०भा०म० भाष्याणां विरोधः
(६) ८५, १०५, २२७, २२८, २२९, २३१ सूत्रेषु—
श०भा०म०श्रीप०व० भाष्याणामैक्यं रा०नि०श्री० „ „
(२) २२५, ४१९ सूत्रयोः श०भा०म०श्री०व० „ „ रा०नि०श्रीप० „ „
( २ ) १६८,३४० „ श०भा०म०श्री०श्रीप० „ „ रा०नि०व० „ „
( १ ) २३२ सूत्रे श०भा०नि०श्री०श्रीप० „ „ रा०म०व० „ „
( ३ ) ४९१,४९२,५१६ सूत्रेषु श०भा०रा०
श्री०श्रीप० „ „ नि०म०व० „ „
( १ ) २८२ सूत्रे श०भा०रा०म०श्री० „ „ नि०श्रीप०व० „ „
१६ समष्टिः ।

एवं च १६ सूत्रेषु अल्पसंख्यकगणान्तर्गतत्वात्—

| | | | | | |
|---|---|---|---|---|---|
| श०भा०म० भाष्याणाम् | १ | दोषः | रा०म०व० भाष्याणाम् | १ | दोषः |
| रा०नि०श्री० „ | ६ | दोषाः | नि०म०व० „ | ३ | दोषाः |
| रा०नि०श्रीप० „ | २ | दोषौ | नि०श्रीप०व० „ | १ | दोषः |
| रा०नि०व० „ | २ | दोषौ | | समष्टिः=१६ | |

एवं च एकैकस्य दोषसंख्या इत्थम्—

| | | |
|---|---|---|
| श०—१ | रा०—११ | श्रीप०—३ |
| भा०—१ | नि०—१४ | व०—७ |
| म०—५ | श्री०—६ | समष्टिः=४८÷३=१६ |

## पंचानां भाष्याणाम् अधिकरणस्य अरचनायां दोषाः।

तथैव पंचानां भाष्याणाम् अधिकरणस्य अरचनायाम्—

| | | | | | | |
|---|---|---|---|---|---|---|
| (२) ३९३,३९६ | सूत्रयोः | रा०नि०श्री० श्रीप०व० | भाष्याणामैक्यं | श०भा०म० | भाष्याणां | विरोधः |
| (२) ४४३,५०४ | ” | रा०नि०म०श्रीप०व० | ” | श०भा०श्री० | ” | ” |
| (१) १८३ | सूत्रे | रा०नि०म०श्री०व० | ” | श०भा०श्रीप० | ” | ” |
| (३) १६४,२८८,४६८ | सूत्रेषु | रा०नि०म०श्री० श्रीप० | ” | श०भा०व० | ” | ” |
| (१) १२१ | सूत्रे | श०भा०रा०श्री०श्रीप० | ” | म०नि०व० | ” | ” |
| (१) ३४५ | ” | श०भा०नि०श्री०व० | ” | रा०म०श्रीव० | ” | ” |
| (२) २०३,४५२ | सूत्रयोः | श०भा०मि०म०व० | ” | रा०श्री०श्रीप० | ” | ” |
| (१) ३५४ | सूत्रे | श०भा०रा०नि०व० | ” | म०श्री०श्रीप० | ” | ” |
| (१) ४८३ | ” | श०भा०रा०नि०श्रीप० | ” | म०श्री०व० | ” | ” |

१४ समष्टिः।

एवं च १४ सूत्रेषु अल्पसंख्यकगणान्तर्गतत्वात्—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| श०भा०म० | भाष्याणाम् | २ | दोषौ | रा०म०श्रीप० | भाष्याणाम् | १ | दोषः |
| श०भा०श्री० | ” | २ | दोषौ | रा०श्री०श्रीप० | ” | २ | दोषौ |
| श०भा०श्रीप० | ” | १ | दोषः | म०श्री०श्रीप० | ” | १ | दोषः |
| श०भा०व० | ” | ३ | दोषाः | म०श्री०व० | ” | १ | ” |
| म०नि०व० | ” | १ | दोषः | | | समष्टिः=१४ | |

एवं च एकैकस्य दोषसंख्या इत्थम्—

| | | |
|---|---|---|
| श०—८ | नि०—१ | श्रीप०—५ |
| भा०—८ | म०—६ | व०—५ |
| रा०—३ | श्री०—६ | समष्टिः ४२÷३=१४ |

एवं च सप्तानां षण्णां पंचानां च भाष्याणाम् अधिकरणस्य रचनायाम् अरचनायां च ऐक्यानैक्यपर्यालोचनेन ये दोषाः प्रतीयन्ते तेषां समष्टिः [illegible] भवति तदित्थम्—

## एकैकस्य भाष्यस्य दोषसमष्टिः ।

| | अधिकरणस्य अरचनायां दोषाः | अधिकरणस्य रचनायां दोषाः | दोष-समष्टिः |
|---|---|---|---|
| शंकरभाष्ये | १ | १२ ( ४+८ ) | १३ |
| भास्करभाष्ये | १ | १० ( २+८ ) | ११ |
| रामानुजभाष्ये | १९ ( २+६+११ ) | ४ ( १+३ ) | २३ |
| निम्बार्कभाष्ये | ४० ( ७+१९+१४ ) | ३ ( १+१+१) | ४३ |
| माध्वभाष्ये | ३२ ( ११+१६+५ ) | ७४ ( ५४+१४+६ ) | १०६ |
| श्रीकण्ठभाष्ये | १२ ( २+४+६ ) | १६ ( ७+३+६ ) | २८ |
| श्रीपतिभाष्ये | १० ( १+६+३ ) | ९ ( १+३+५ ) | १९ |
| वल्लभभाष्ये | ४६ ( २०+१९+७ ) | ३० ( १०+१५+५ ) | ७६ |
| | १६१ | १५८ | ३१९ |

एवं चतुर्षु भाष्येषु दोषगुणानां समत्वात् तेषां ग्रहणं न विशेषफलप्रदम् । तेन त्रिद्व्येकसंख्यकभाष्येषु दोषगुणानां ग्रहणमत्र फलोपधायकमेव । तत्र तु दोषगुणानां फलं प्रदर्शित-सप्त-षट्-पंच-भाष्यानुरूपं, विशेषस्तु अधिकरणरचनाऽरचनयोः दोषगुणसंख्यायाः विपर्ययमात्रम् । तेन यत्र अधिकरणरचनायां शांकरभाष्यस्य एकः एव दोषः, अधिकरणस्य अरचनायां च १२ दोषाः, तत्र अधिकरणरचनायां १२ दोषाः, तथैव अधिकरणस्य अरचनायां एको दोषः परिगणनीयः इति ।

## सूत्रानुसारेण एकैकस्य भाष्यस्य दोषनिर्णयः ।

अधुना द्रष्टव्यं केषु सूत्रेषु कस्य भाष्यस्य ते दोषाः संजाताः इति ।

शंकरभाष्ये अधिकरणस्य अरचनायां—१ दोषः यथा—

(१) ४०४ पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ३।३।४५

शंकरभाष्ये अधिकरणस्य रचनायां—१२ दोषाः यथा—

(१२) १६४ सर्वोपेता च तद्दर्शनात् २।१।३०

१८३ उभयथापि न कर्मातस्तदभावः ।२।२।१२

२५६ यथा च तक्षोभयथा २।३।४०

३८८ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ३।३।२९

३९३ इयदामननात् ३।३।३४

३९६ व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७

[illegible] परामर्शं जैमिनिरचोदना चापवदति हि ३।४।१८

४६८ बहिस्तूभयथापि स्मृतेराचाराच्च ३।४।४३

४९५ यदेव विद्ययेति हि ४।१।१८

५०४ तदापीतेः संसारव्यपदेशात् ४।२।८

५०८ प्रतिषेधादिति चेन्न शारीरात् ४।२।१२

५३२ अप्रतीकालम्बनान्नयति बादरायण उभयथाऽदोषात् तत्क्रतुश्च ४।३।१५

१२ समष्टिः।

भास्करभाष्ये अधिकरणस्य अरचनायाम् १ दोषः यथा—

(१) ४०४ पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ३।३।४५

भास्करभाष्ये अधिकरणस्य रचनायाम्—१० दोषाः यथा—

(१०) १६४ सर्वोपेता च तद्दर्शनात् २।१।३०

१८३ उभयथापि न कर्मातस्तदभावः २।२।१२

२५६ यथा च तक्षोभयथा २।३।४०

३८८ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ३।३।२९

३९३ इयदामननात् ३।३।३४

३९६ व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७

४४३ परामर्शं जैमिनिरचोदना चापवदति हि ३।४।१८

४६८ बहिस्तूभयथापि स्मृतेराचाराच्च ३।४।४३

५०४ तदापीतेः संसारव्यपदेशात् ४।२।८

५०८ प्रतिषेधादिति चेन्न शारीरात् ४।२।१२

११ समष्टिः।

रामानुजभाष्ये अधिकरणस्य अरचनायाम्—१९ दोषाः यथा—

(१९) ४२ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् १।२।११

८५ अनुकृतेस्तस्य च १।३।२२

१०३ ज्योतिर्दर्शनात् १।३।४०

१०५ सुषुप्त्युत्क्रान्त्योर्भेदेन १।३।४२

१६८ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति २।१।३४

२२४ एतेन मातरिश्वा व्याख्यातः २।३।८

२२५ असम्भवस्तु सतोऽनुपपत्तेः २।३।९

२२७ आपः २।२।११

२२८ पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२

२२९ तदभिध्यानादेव तु तल्लिङ्गात् सः २।३।१३

२३० विपर्ययेण तु क्रमोऽत उपपद्यते च २।३।१४

२३१ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् २।३।१५

२३२ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २।३।१६

२३५ उत्क्रान्तिगत्यागतीनाम् २।३।१९

२७७ श्रेष्ठश्च २।४।८

३४० प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३।२।२२

३९१ यावदधिकारमवस्थितिराधिकारिकाणाम् ३।३।३२

३९७ सैव हि सत्यादयः ३।३।३८

४१९ काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् ३।३।६०

रामानुजभाष्ये अधिकरणस्य रचनायाम्—४ दोषाः यथा—

(४) ९४ मध्वादिष्वसम्भवादनधिकारं जैमिनिः १।३।३१

२०३ सर्वथानुपपत्तेश्च २।२।३२

३४५ उभयव्यपदेशात्त्वहिकुण्डलवत् ३।२।२७

४५२ शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ३।४।२७

२३ समष्टिः ।

निम्बार्कभाष्ये अधिकरणस्य अरचनायाम्—४० दोषाः यथा—

(४०) ४ तत्तु समन्वयात् १।१।४

८५ अनुकृतेस्तस्य च १।३।२२

१०३ ज्योतिर्दर्शनात् १।३।४०

१०५ सुषुप्त्युत्क्रान्त्योर्भेदेन १।३।४२

१२० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः १।४।१४

१२५ वाक्यान्वयात् १।४।१९

१२९ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् १।३ ४।२

१३४ एतेन सर्वे व्याख्याता व्याख्याताः १।४।२८

१६८ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति २।१।३४

१९७ नासतोऽदृष्टत्वात् २।२।२६

२२४ एतेन मातरिश्वा व्याख्यातः २।३।८

२२५ असम्भवस्तु सतोऽनुपपत्तेः २।३।९

२२६ तेजोऽतस्तथाह्याह २।३।१०

२२७ आपः २।३।११

२२८ पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२

२२९ तदभिध्यानादेव तु तल्लिंगात् सः २।३।१३

२३० विपर्ययेण तु क्रमोऽत उपपद्यते च २।३।१४

२३१ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् २।३।१५

२३३ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः २।३।१७

२८२ अणुश्च २।४।१३

२८६ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् २।४।१७

३१४ नातिचिरेण विशेषात् ३।१।२३

३१५ अन्याधिष्ठितेषु पूर्ववदभिलापात् ३।१।२४

३२७ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ३।२।९

३४० प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३।२।२२

३५६ फलमत उपपत्तेः ३।२।३८

३८६ साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये ३।३।२७

३९० अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ३।३।३१

४१९ काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् ३।३।६०

४५१ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ३।४।२६

४७७ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ३।४।५२

४८९ आप्रायणात् तत्रापि हि दृष्टम् ४।१।१२

४९१ इतरस्याप्येवमसंश्लेषः पाते तु ४।१।१४

४९२ अनारब्धकार्ये एव तु पूर्वे तदवधेः ४।१।१५

४९९ तन्मनः प्राण उत्तरात् ४।२।३

५०० सोऽध्यक्षे तदुपगमादिभ्यः ४।२।४

५१२ अविभागो वचनात् ४।२।१६

५१४ रश्म्यनुसारी ४।२।१८

५१६ अतश्चायनेऽपि हि दक्षिणे ४।२।२०

५४१ संकल्पादेव तु तच्छ्रुतेः ४।४।८

निम्बार्कभाष्ये अधिकरणस्य रचनायाम्—२ दोषाः यथा—

(३) १२१ समाकर्षात् १।४।१५

२५९ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके २।३।४३

४९५ यदेव विद्ययेति हि ४।१।१८

४१ समष्टिः।

मध्वभाष्ये अधिकरणस्य अरचनायाम्—३२ दोषाः यथा—

(३२) ११४ चमसादिवदविशेषात् १।४।८

१२२ जगद्वाचित्वात् १।४।१६

१२५ वाक्यान्वयात् १।४।१९

१३७ एतेन योगः प्रत्युक्तः २।१।३

१४६ एतेन शिष्टापरिग्रहा अपि व्याख्याताः २।१।१२

१५८ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि २।१।२४

१६० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २।१।२६

१९७ नासतोऽदृष्टत्वात् २।२।२६

२३२ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २।३।१६

२३५ उत्क्रान्तिगत्यागतीनाम् २।३।१९

२५७ परात्तु तच्छ्रुतेः २।३।४१

३६५ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ३।३।६

३७९ सम्बन्धादेवमन्यत्रापि ३।३।२०

३८६ साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये ३।३।२७

३९२ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ३।३।३३

३९४ अन्तरा भूतग्रामवत् स्वात्मनः ३।३।३५

४०४ पूर्वविकल्पः प्रकरणात्स्यात् क्रिया मानसवत् ३।३।४५

४४६ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ३।४।२१

४४८ पारिप्लवार्था इति चेन्न विशेषितत्वात् ३।४।२३

४५० अतएव चाग्नीन्धनाद्यनपेक्षा ३।४।२५

४५१ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ३।४।२६

४५३ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ३।४।२८

४५४ अबाधाच्च ३।४।२९

४६१ अन्तरा चापि तु तद्दृष्टेः ३।४।३६

४६५ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ३।४।४०

४७२ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ३।४।४७

४९१ इतरस्याप्येवमसंश्लेषः पाते तु ४।१।१४

४९२ अनारब्धकार्ये एव तु पूर्वे तदवधेः ४।१।१५

४९३ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ४।१।१६

४९६ भोगेन त्वितरे क्षपयित्वा सम्पद्यते ४।१।१९

५१४ रश्म्यनुसारी ४।२।१८

५१६ अतश्चायनेऽपि हि दक्षिणे ४।२।२०

माध्वभाष्ये अधिकरणस्य रचनायाम्—७५ दोषाः यथा—

(७४) २५ छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् १।१।२५

१०६ पत्यादिशब्देभ्यः १।३।४३

११५ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके १।४।९

१२१ समाकर्षात् १।४।१५

१३९ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् २।१।५

१४१ असदिति चेन्न प्रतिषेधमात्रत्वात् २।१।७

१६१ श्रुतेस्तु शब्दमूलत्वात् २।१।२७

१७६ अन्यत्राभावाच्च न तृणादिवत् २।२।५

१७७ अभ्युपगमेऽप्यर्थाभावात् २।२।६

१७८ पुरुषाश्मवदिति चेत्तथापि २।२।७

१८० अन्यथानुमितौ च ज्ञशक्तिवियोगात् २।२।९

१९७ नासतोऽदृष्टत्वात् २।२।२६

२०१ न भावोऽनुपलब्धेः २।२।३०

२४२ व्यतिरेको गन्धवत् २।३।२६

२४४ पृथगुपदेशात् २।३।२८

२४६ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् २।३।३०

२४७ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् २।३।३१

२६७ अदृष्टानियमात् २।३।५१

२७२ तत्प्राक्श्रुतेश्च २।४।३

२७३ तत्पूर्वकत्वाद् वाचः २।४।४

२७९ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः २।४।१०

२८१ पञ्चवृत्तिर्मनोवद् व्यपदिश्यते २।४।१२

२९० मांसादिभौमं यथाशब्दमितरयोश्च २।४।२१

२९३ त्र्यात्मकत्वात्तु भूयस्त्वात् ३।१।२

३९६ व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७
४०६ विद्यैव तु निर्धारणात् ३।३।४७
४०८ मुख्यादिकलोपत्वाच्च न बाधः ३।३।३९
४०९ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ३।३।५०
४१० न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ३।३।५१
४११ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ३।३।५२
४२४ न वा तत्सहभावाश्रुतेः ३।३।६५
४३५ असार्वत्रिकी ३।४।१०
४३८ नाविशेषात् ३।४।१३
४३९ स्तुतयेऽनुमतिर्वा ३।४।१४
४५९ सर्वथापि त एवोभयलिंगात् ३।४।३४
४८३ आदित्यादिमतयश्चांग उपपत्तेः ४।१।६
४९४ अतोऽन्यापि ह्येकेषामुभयोः ४।१।१७
५०२ नैकस्मिन् दर्शयतो हि ४।२।६
५१७ योगिनः प्रति च स्मर्यते स्मार्ते चैते ४।२।२१
५२३ वैद्युतेनैव ततस्तच्छ्रुतेः ४।३।६
५३५ मुक्तः प्रतिज्ञानात् ४।४।२
५३६ आत्मा प्रकरणात् ४।४।३
५४२ अतएव चानन्याधिपतिः ४।४।९
५५३ दर्शयतश्चैवं प्रत्यक्षानुमाने ४।४।२०

१०६ समष्टिः।

श्रीकण्ठभाष्ये अधिकरणस्य अरचनायाम्—१२ दोषाः यथा—

(१२) ८५ अनुकृतेस्तस्य च १।३।२२
१०५ सुषुप्त्युत्क्रान्त्योर्भेदेन १।३।४२
१२० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः १।४।१४
१५५ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २।१।२१
२२७ आपः २।३।११
२२८ पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२
२२९ अभिध्यानादेव तु तल्लिंगात् सः २।३।१३
२३१ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् २।३।१५

२८३ ज्योतिराद्यधिष्ठानं तु तदामननात् २।४।१४
४७५ अनाविष्कुर्वन्नन्वयात् ३।४।५०
४७७ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ३।४।५२
५१२ अविभागो वचनात् ४।२।१६

श्रीकण्ठभाष्ये अधिकरणस्य रचनायाम्—१६ दोषाः यथा—

(१६) १६ नेतरोऽनुपपत्तेः १।१।१६
३४ अनुपपत्तेस्तु न शारीरः १।२।३
४८ अनवस्थितेरसम्भवाच्च नेतरः १।२।१७
१४२ अपीतौ तद्वत्प्रसंगादसमञ्जसम् २।१।८
१९७ नासतोऽदृष्टत्वात् २।२।२६
२०३ सर्वथानुपपत्तेश्च २।२।३२
२८५ तस्य च नित्यत्वात् २।४।१६
३५४ तथान्यप्रतिषेधात् ३।२।३६
३७१ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ३।३।१२
३८१ दर्शयति च ३।३।२२
४०० उपस्थितेऽतस्तद्वचनात् ३।३।४१
४४३ परामर्शं जैमिनिरचोदना चापवदति हि ३।४।१८
४५२ शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ३।४।२७
४७४ मौनवदितरेषामप्युपदेशात् ३।४।४९
४८३ आदित्यादिमतयश्चांग उपपत्तेः ४।१।६
५०४ तदापीतेः संसारव्यपदेशात् ४।२।८

२८ समष्टिः ।

श्रीपतिभाष्ये अधिकरणस्य अरचनायाम्—१० दोषाः यथा—

(१०) १६६ न प्रयोजनवत्त्वात् २।१।३२
२२५ असम्भवस्तु सतोऽनुपपत्तेः २।३।९
२७७ श्रेष्ठश्च २।४।८
२८२ अणुश्च २।४।१३
३९० अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ३।३।३१
३९७ सैव हि सत्यादयः ३।३।३८
४१९ [illegible] न वा [illegible] ३।३।६०

४८९ आम्नायणात् तत्रापि हि दृष्टम् ४।१।१२

५३८ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ४।४।५

५४३ अभावं बादरिराह ह्येवम् ४।४।१०

श्रीपतिभाष्ये अधिकरणस्य रचनायाम्—९ दोषाः, यथा—

(९) १८३ उभयथापि न कर्मातस्तदभावः २।२।१२

२०३ सर्वथानुपपत्तेश्च २।२।३२

३४५ उभयव्यपदेशात् त्वहिकुण्डलवत् ३।२।२७

३५४ तथान्यप्रतिषेधात् ३।२।३६

४२२ समाहारात् ३।३।६३

४४२ ऊर्द्ध्वरेतःसु च शब्दे हि ३।४।१७

४५२ शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ३।४।२७

४७४ मौनवदितरेषामप्युपदेशात् ३।४।४९

५४६ तन्वभावे सन्ध्यवदुपपत्तेः ४।४।१३

१९ समष्टिः ।

वल्लभभाष्ये अधिकरणस्य अरचनायाम्—४६ दोषाः, यथा—

(४६) ३ शास्त्रयोनित्वात् १।१।३

१३४ एतेन सर्वे व्याख्याता व्याख्याताः १।४।२८

१६० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २।१।२६

१६६ न प्रयोजनवत्त्वात् २।१।३२

१६८ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति २।१।३४

२३२ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २।३।१६

२७४ सप्तगतेर्विशेषितत्वाच्च २।४।५

२८२ अणुश्च २।४।१३

३१३ तत्साभाव्यापत्तिरुपपत्तेः ३।१।२

३१४ नातिचिरेण विशेषात् ३।१।२३

३२७ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ३।२।९

३२८ मुग्धेऽर्द्धसम्पत्तिः परिशेषात् ३।२।१०

३४० प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३।२।२२

३६५ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ३।३।६

३६९ सर्वाभेदादन्यत्रेमे ३।३।१०

३७० आनन्दादयः प्रधानस्य ३।३।११
३७८ समान एवं चाभेदात् ३।३।१९
३७९ सम्बन्धादेवमन्यत्रापि ३।३।२०
३८२ सम्भृतिद्युव्याप्त्यपि चातः ३।३।२३
३८५ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ३।३।२६
३९८ कामादीतरत्र तत्र चायतनादिभ्यः ३।३।३९.
४१२ एक आत्मनः शरीरे भावात् ३।३।५३
४१४ अंगावबद्धास्तु न शाखासु हि प्रतिवेदम् ३।३।५५
४४६ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ३।४।२१
४४८ पारिप्लवार्था इति चेन्न विशेषितत्वात् ३।४।२३
४५० अतएव चाग्नीन्धनाद्यनपेक्षा ३।४ २५
४५३ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ३।४।२८
४६१ अन्तरा चापि तु तद्दृष्टेः ३।४।३६
४६९ स्वामिनः फलश्रुतेरित्यात्रेयः ३।४।४४
४७५ अनाविष्कुर्वन्नन्वयात् ३।४।५२
४७६ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ३।४।५१
४८१ न प्रतीके न हि सः ४।१।४
४८४ आसीनः सम्भवात् ४।१।७
४९१ इतरस्याप्येवमसंश्लेषः पाते तु ४।१।१४
४९२ अनारब्धकार्ये एव तु पूर्वे तदवधेः ४।१।१५
४९३ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ४।१।१६
४९६ भोगेन त्वितरे क्षपयित्वा सम्पद्यते ४।१।१९
४९९ तन्मनः प्राण उत्तरात् ४।२।३
५०० सोऽध्यक्षे तदुपगमादिभ्यः ४।२।४
५११ तानि परे तथा ह्याह ४।२।१५
५१६ अतश्चायनेऽपि हि दक्षिणे ४।२।२०
५१९ वायुमब्दादविशेषविशेषाभ्याम् ४।३।२
५२० तडितोऽधिवरुणः सम्बन्धात् ४।३।३
५३७ अविभागेन दृष्टत्वात् ४।४।४
५४१ संकल्पादेव तु तच्छ्रुतेः ४।४।८

५४२ अभावं बादरिराह ह्येवम् ४।४।१०

वल्लभभाष्ये अधिकरणस्य रचनायाम्—२० दोषाः, यथा—

(२०) २६ शब्दविशेषात् १।२।५

१२१ समाकर्षात् १।४।१५

१३६ इतरेषां चानुपलब्धेः २।१।२

१४१ असदिति चेन्न प्रतिषेधमात्रत्वात् २।१।७

१५१ असद्व्यपदेशादिति चेन्न धर्मान्तरेण वाक्यशेषात् २।१।१७

१६४ सर्वोपेता च तद्दर्शनात् २।१।३०

१७८ पुरुषाश्मवदिति चेत्तथापि २।२।७

२७५ हस्तादयस्तु स्थितेऽतो नैवम् २।४।६

२७९ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः २।४।१०

२८४ प्राणवता शब्दात् २।४।१५

२९० मांसादि भौमं यथाशब्दमितरयोश्च २।४।२१

३०८ विद्याकर्मणोरिति तु प्रकृतत्वात् ३।१।१७

३१२ तृतीयशब्दावरोधः संशोकजस्य ३।१।२१

३१७ रेतःसिग्योगोऽथ ३।१।२६

३२६ अतः प्रबोधोऽस्मात् ३।२।८

३३२ अरूपवदेव हि तत्प्रधानत्वात् ३।२।१४

३३७ अम्बुवदग्रहणात्तु न तथात्वम् ३।२।१९

३४१ तदव्यक्तमाह हि ३।२।२३

३४३ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ३।२।२५

३४६ प्रकाशाश्रयवद्वा तेजस्त्वात् ३।२।२८

३८८ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ३।३।२९

३८९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३।३।३०

४१३ व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ३।३।५४

४२२ समाहारात् ३।३।६३

४२४ न वा सत्सहभावाश्रुतेः ३।३।६५

४६८ बहिस्तूभयथापि स्मृतेराचाराच्च ३।४।४३

४८३ आदित्यादिमतयश्चाङ्ग उपपत्तेः ४।१।६

४९४ अतोऽन्यापि ह्येकेषामुभयोः ४।१।१७

५२२ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ४।३।१५

५४६ तन्वभावे सन्ध्यवदुपपत्तेः ४।४।१३

७६ समष्टिः ।

एवं च शं० १३, भा० ११, रा० २३, नि० ४३, म० १०६, श्री० २८, श्रीप० १९, व० ७६ दोषाणां समष्टि :—३१९ संख्याः भवन्ति, अधिकरणरचनाऽरचनाविषये । तेन यदि दोषपक्षे अल्पसंख्यकगणान्तर्गतत्वं, तथैव गुणपक्षे अधिकसंख्यकगणान्तर्गतत्वं व्यास-सम्मतेः सन्निकृष्टत्वसूचकं भवेत् तदा—

| | | | | | |
|---|---|---|---|---|---|
| ११ | दोषत्वात | भास्करभाष्यस्य | व्यासमतसन्निकृष्टत्वेन | | प्रथमं स्थानम् |
| १३ | „ | शंकरभाष्यस्य | „ | „ | द्वितीयं स्थानम् |
| १९ | „ | श्रीपतिभाष्यस्य | „ | „ | तृतीयं स्थानम् |
| २३ | „ | रामानुजभाष्यस्य | „ | „ | चतुर्थं स्थानम् |
| २८ | „ | श्रीकण्ठभाष्यस्य | „ | „ | पंचमं स्थानम् |
| ४३ | „ | निम्बार्कभाष्यस्य | „ | „ | षष्ठं स्थानम् |
| ७६ | „ | वल्लभभाष्यस्य | „ | „ | सप्तमं स्थानम् |
| १०६ | „ | माध्वभाष्यस्य | „ | „ | अष्टमं स्थानं भवति । |

एतत्तु अधिकरण-रचना-नियम-निरपेक्ष-निर्णय-फलम् । तादृश-नियम-सापेक्ष-निर्णय-फलम् अग्रे प्रदर्शयिष्यते ।

## शंकर-भास्करयोर्दोषवैलक्षण्यहेतुः ।

अत्र शंकर-भास्करभाष्ययोर्मध्ये यः प्रभेदः, स तु "यदेव विद्ययेति हि" ४।१।१८ इति सूत्रस्य भास्कराचार्येण वर्जनात्, तथा च "अप्रतीकालम्बनान्नयति" ४।३।१५ इति सूत्रेण शंकरमतेन अधिकरणरचनात् भास्करमतेन तु अरचनात् इति बोद्धव्यम् । परन्तु "यदेव विद्ययेति हि" ४।१।१८ इति सूत्रस्य वर्जने भास्कराचार्येण न किमपि प्राचीनं प्रमाणं प्रदर्शितम्, न वा उपवर्षाचार्यस्य मतमिति उक्तमपि । अत्र तेनोक्तं "यदेव विद्ययेति हि" इति सूत्रं केचित् अधीयते, तत अनर्थकमिति उपेक्षणीयम् इति । एतेन प्रमीयते भास्कराचार्यस्तु युक्तिबले-नैव भाष्यं विरचयामास, न तु उपवर्षाचार्य-भाष्यादिकं दृष्ट्वा इति, अतस्तद्वाक्यमप्रमाणम् । तथैव, "अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" इति सूत्रे अधिकरणरचना समुचितैव प्रतिभाति, यतः 'बादरायण' इति प्रथमान्तपदेन, तथा विधेयभेदेन च बादरायण-मतस्य उक्तत्वात् । नियमोऽयं विशेषनियमसंकलनप्रस्तावे प्रदर्शयिष्यते । अतः शंकर-भास्कर-भाष्ययोः अत्र मतभेदः शंकरमतमेव अनुकूलयति । एवं च अधिकरणरचनाऽरचनाविषयकैः रामा-नुजाद्यन्येभ्यः सर्वेभ्यो भाष्येभ्यः शंकर-भास्कर-भाष्यद्वयमेव व्याससम्मतभाष्यमिति सिध्यति ।

अधिकरणरचनानुगुण-सूत्ररचना-कौशलाविष्करणपूर्वकं भाष्याणां गुणागुण-विवेचनं ग्रन्थस्यास्य तृतीयपादे करिष्यते।

## अधिकरणरचनायां प्रकारान्तरेण दोषगुणनिर्णयः।

अथ चेत् प्रकारान्तरेण दोषगुणविचारः क्रियते, तदा तदित्थम्—

यः खलु एकाकी षण्णां विरोधी तस्य दोषाधिक्यम्।

" " अन्येन सह पंचानां विरोधी तस्य ततो दोषाल्पता।

" " अन्यद्वाभ्यां सह चतुर्णां विरोधी, तस्य ततोऽपि दोषाल्पता।

अथ एतदर्थमेका प्रदर्शनी विरच्यते, सा इत्थम्—

| | एकाकी अधिकरणस्य रचनायाम् | एकाकी अधिकरणस्य अरचनायाम् | अन्यैक्येन सह अधिकरणस्य रचनायाम् | अन्यैक्येन सह अधिकरणस्य अरचनायाम् | अन्यद्वाभ्यां सह अधिकरणस्य रचनायाम् | अन्यद्वाभ्यां सह अधिकरणस्य अरचनायाम् | समष्टिः |
|---|---|---|---|---|---|---|---|
| शां० | ० | ० | ० | ४ | १ | ८ | १३ |
| भा० | ० | ० | ० | २ | १ | ८ | ११ |
| रा० | २ | १ | ६ | ० | ११ | ३ | २३ |
| नि० | ७ | १ | १९ | १ | १४ | १ | ४३ |
| म० | ११ | ५४ | १६ | १४ | ५ | ६ | १०६ |
| श्री० | २ | ७ | ४ | ३ | ७ | ६ | २९ |
| श्रीप० | १ | १ | ६ | ३ | २ | ५ | १८ |
| व० | २० | १० | १९ | १५ | ७ | ५ | ७६ |
| | ४३ | ७४ | ७० | ४२ | ४८ | ४२ | ३१९ |

एतेन शंकरभास्करभाष्ययोः एकाक्यधिकरणरचनाऽरचनाजन्यदोषो नास्ति। अन्यैक्येन सह अधिकरणरचनायां तथैव दोषो नास्ति। परन्तु अधिकरणारचनायां शंकरे चत्वारो दोषाः, भास्करे द्वौ दोषौ। तथैव अन्यद्वाभ्यां सह अधिकरणरचनायां शंकरे एको दोषः, भास्करेऽपि एको दोषो दृश्यते। तथैव अन्यद्वाभ्यां सह अधिकरणारचनायां शंकरे अष्ट दोषाः, भास्करेऽपि तथा।

रामानुजादीनां सर्वेषां एकाक्यधिकरणरचनाऽरचनाजन्यदोषो भवत्येव। तेषां [illegible]

दीनां तुलनायां कृतायां श्रीपतिभाष्यस्य श्रेष्ठत्वं सिध्यति, ततो रामानुजभाष्यस्य, ततो निम्बार्क-भाष्यस्य, ततः श्रीकण्ठभाष्यस्य, ततो वल्लभभाष्यस्य, ततो मध्वभाष्यस्य स्थानम्।

तेन शंकर-भास्कर-भाष्ययोर्यथा व्यासमतसन्निकृष्टत्वं न तथा अन्येषाम् इति सिद्धम्। तत्रापि पुनः शंकरभाष्यस्यैव श्रेष्ठत्वम्। यतो भास्करेण शंकरगृहीत-सूत्रपाठखण्डनार्थं न किमपि प्राचीनं प्रमाणं प्रदर्शितम्, परन्तु स्वोद्भावितयुक्तिरेव तत्र तस्य शरणमासीत्। शंकरपठित-सूत्राण्येव तस्यावलम्बनमभवत् इत्येव प्रतिभाति। अन्यथा स्वसम्प्रदायप्रवर्तकोपवर्षाचार्यप्रवर्तित-पाठस्य प्रमाणत्वेन प्रदर्शनं कृतमासीत् भास्कराचार्य्येण। एवं च अधिकरणरचनाजन्यविचारे शंकरभाष्यस्य यथा व्याससम्मतत्वं सिध्यति न तथा अन्येषामिति स्थितम्।

## भाष्याणां परस्परसम्बन्ध-निर्णयः।

इदानीं भाष्याणां परस्परसम्बन्धः निरूपणीयः। तत्र द्वितीयायां सरण्याम् अस्माभिः दृष्टं—यत्र षट् भाष्यकारा अधिकरणरचनापक्षपातिनः, तथा च अधिकरणरचना-विरोधिनः, तत्र रचनाऽरचनाविरोधिनौ द्वौ द्वौ भाष्यकारौ अभवताम् इति, यथा—अधिकरणारचनाविरोधे—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| रा० नि० भाष्ययोः | ३ सूत्रेषु | विरोधो दृश्यते। | | नि० श्रीप० भाष्ययोः | २ सूत्रयोः | विरोधो दृश्यते |
| रा० म० | „ | १ सूत्रे | „ | नि० व० | „ | ६ सूत्रेषु | „ |
| रा० श्रीप० | „ | २ सूत्रयोः | „ | म० व० | „ | १० | „ |
| नि० म० | „ | ५ सूत्रेषु | „ | श्री० व० | „ | १ सूत्रे | „ |
| नि० श्री० | „ | ३ „ | „ | श्रीप० व० | „ | २ सूत्रयोः | „ |

तथा रचनापक्षपातिभाष्यद्वयस्य विभागः इत्थम्—

| | | | | | |
|---|---|---|---|---|---|
| श० भा० भाष्ययोः | २ सूत्रयोः, | म० श्री० भाष्ययोः | | २ सूत्रयोः, |
| श० नि० | „ | १ सूत्रे, | म० व० | „ | १२ सूत्रेषु, |
| श० व० | „ | १ „ | श्री० श्रीप० | „ | १ सूत्रे, |
| श्रीप० व० | „ | २ सूत्रयोः ऐकमत्यं दृश्यते। | | | |

तथैव यत्र पञ्च भाष्यकारा अधिकरणरचनाविरोधिनः, तत्र—

| | | | | | |
|---|---|---|---|---|---|
| श०भा०म० भाष्येषु | १ सूत्रे, | रा०नि०व० भाष्येषु | | २ सूत्रयोः, |
| रा०नि०श्री० | „ | ६ सूत्रेषु, | रा०म०व० | „ | १ सूत्रे, |
| रा०नि०श्रीप० | „ | २ सूत्रयोः, | नि०म०व० | „ | ३ सूत्रेषु, |
| नि०श्रीप०व० | „ | १ सूत्रे, विरोधो दृश्यते। | | | |

तथैव यत्र पञ्च भाष्यकारा अधिकरणरचनापक्षपातिनः, तत्र—

| | | | |
|---|---|---|---|
| श०भा०म० भाष्येषु | २ सूत्रयोः, | श०भा०व० भाष्येषु | ३ सूत्रेषु, |
| श०भा०श्री० „ | २ „ | श०भा०श्रीप० भाष्येषु | १ |

रा० श्री० श्रीप० भाष्येषु २ सूत्रयोः, म० श्री० श्रीप० भाष्येषु १ सूत्रे,
रा० म० श्रीप० „ १ सूत्रे म० श्री० व० „ १ „
म० नि० व० „ १ सूत्रे, ऐकमत्यं दृश्यते।

एवं च यत्र चत्वारो भाष्यकारा अधिकरण-रचना-विरोधिनः आसन्, तत्र—

श० भा० म० श्रीप० भाष्येषु १ सूत्रे, श० भा० श्री० व० भाष्येषु ३ सूत्रेषु,
श० भा० रा० श्रीप० „ १ „ रा० म० श्रीप० व० „ १ सूत्रे,
श० भा० म० श्री० „ ४ सूत्रेषु, रा० नि० श्रीप० व० „ १ „
श० भा० म० व० „ २ सूत्रयोः म० नि० श्री० श्रीप० „ १ „

विरोधो दृश्यते। तथैव तत्र—

रा० नि० श्री० व० भाष्येषु १ सूत्रे, रा० नि० म० श्रीप० भाष्येषु ३ सूत्रेषु,
नि० म० श्री० व० „ १ „ श० भा० नि० श्री० „ १ सूत्रे,
रा० नि० श्रीप० व० „ ४ सूत्रेषु, श० भा० म० श्री० „ १ „
रा० नि० श्री० श्रीप० „ २ सूत्रयोः, श० भा० रा० व० „ १ „

ऐकमत्यं दृश्यते।

एवं च एतेषां भाष्याणां यदि द्वे द्वे कृत्वा विभागः कृतः स्यात्, तदा २८ संख्यक-भाष्ययुगलैः ३१४ सूत्राणि भवन्ति, यथा—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १। | म० व० | ३२ | सूत्राणि | १५। | श० श्री० | ११ | सूत्राणि |
| २। | श० भा० | २५ | „ | १६। | श० व० | १० | „ |
| ३। | रा० नि० | २४ | „ | १७। | म० श्री० | ११ | „ |
| ४। | नि० व० | २० | „ | १८। | भा० व० | ९ | „ |
| ५। | रा० श्रीप० | १९ | „ | १९। | म० श्रीप० | ८ | „ |
| ६। | नि० श्रीप० | १६ | „ | २०। | रा० म० | ७ | „ |
| ७। | नि० श्री० | १५ | „ | २१। | श्री० व० | ७ | „ |
| ८। | नि० म० | १४ | „ | २२। | श्री० श्रीप० | ७ | „ |
| ९। | भा० श्री० | ११ | „ | २३। | श० श्रीप० | ३ | „ |
| १०। | श० म० | ११ | „ | २४। | भा० श्रीप० | ३ | „ |
| ११। | भा० म० | ११ | „ | २५। | श० रा० | २ | सूत्रे |
| १२। | रा० श्री० | ११ | „ | २६। | भा० रा० | २ | „ |
| १३। | रा० व० | ११ | „ | २७। | श० नि० | २ | „ |
| १४। | श्रीप० व० | ११ | „ | २८। | भा० नि० | १ | सूत्रम् |

समष्टिः = ३१४

एतेन प्रतीयते मध्ववल्लभभाष्ययोः ३१ संख्यकेषु सूत्रेषु साम्यम्, तथा शंकर-भास्करभाष्यद्वयम् २५ संख्यकेषु सूत्रेषु सम्मतम्, तथा रामानुज-निम्बार्कभाष्यद्वयं २४ संख्यकेषु स्थलेषु अभिन्नम् इत्यादि। तेन मध्ववल्लभयोः यथा घनिष्ठः सम्बन्धः, तथा नान्येषाम्, तथा शंकर-भास्करयोः यथा सम्बन्धैकट्यं न तथा अन्येषाम् इति। शिष्टस्थलेषु एवं रीत्या बोद्धव्यम्।

तथा च परवर्त्तिनः प्रायेण पूर्ववर्त्तिनाम् अनुकारिणो भवन्ति इति न्यायेन वल्लभ-भाष्यं यथा मध्वभाष्यस्य अनुगामि न तथा अन्यस्य, मध्वस्य वल्लभात् प्राचीनत्वात्, तथा भास्करभाष्यं यथा शंकरभाष्यस्य अनुसारि न तथा अन्यस्य, शंकरस्य भास्करात् प्राचीनत्वात्, तथा निम्बार्कभाष्यं यथा रामानुजभाष्यानुकारि न तथा अन्यस्य, रामानुजभाष्यस्य निम्बार्क-भाष्यात् प्राचीनत्वात् इत्यादिकमवगम्यते।

एवं च यदि एकैकस्य सम्बन्धः यथाक्रमं विन्यस्यते तदा इत्थं भाति—

| | | | | | |
|---|---|---|---|---|---|
| (शं०) | शं० भा० २५ | | रा० व० ११ | | म० श्रीप० ८ |
| | शं० म० ११ | | रा० म० ७ | (श्री०) | श्री० व० ७ |
| | शं० श्री० ११ | (भा०) | भा० श्री० ११ | | श्री० श्रीप० ७ |
| | शं० व० १० | | भा० म० ११ | (नि०) | नि० व० २० |
| | शं० श्रीप० ३ | | भा० व० ९ | | नि०श्रीप० १९ |
| | शं० रा० २ | | भा० श्रीप० ३ | | नि० श्री० १५ |
| | शं० नि० २ | | भा० रा० २ | | नि० म० १४ |
| (रा०) | रा० नि० २४ | | भा० नि० १ | (श्रीप०) | श्रीप० व० ११ |
| | रा० श्रीप० १९ | (म०) | म० व० ३२ | | समष्टिः = ३१४ |
| | रा० श्री० ११ | | म० श्री० ११ | | |

एतेन कः कस्य कियत् अनुकरोति, तत् अतिस्पष्टतया प्रतिभाति। तथा च भास्करः शंकरस्य यथा अनुगामी, निम्बार्कः रामानुजस्य यथा अनुगामी, वल्लभः यथा हि मध्वस्य अनुगामी, न तथा अपरोऽपरस्येति सिध्यति। एतेनापि शंकरभाष्यस्यैव व्याससम्मत्याधिक्यं निश्चीयते।

## सूत्रेषु पाठभेदजन्यगुणदोषविचारः।

इदानीं पाठभेदविचारः करणीयः। अत्रापि अधिकसम्मतः पाठ एव व्याससम्मतः पाठः इति मन्त्रमवलम्ब्य पाठभेदजन्यगुणागुणविचारेण तत्तदनुगुणभाष्याणां व्यासमतसन्निकृष्टत्व-विप्रकृष्टत्वे निरूपणीये। तेन यद् भाष्यम् अन्येभ्यः सर्वेभ्यो भाष्येभ्यो व्यासमतसन्निकृष्टं भविष्यति, तदेव भाष्यं व्याससम्मतमिति ग्रहणीयम्। एतदर्थम् अत्र तृतीया सरणिरेका विरच्यते। एतत् सर्वं प्रथमायां सरण्यां विक्षिप्ताकारेण प्रदर्शितम्, तथापि पुनरत्र संगृह्य प्रदर्श्यते बोधसौकर्यार्थम्।

# तृतीया सरणिः ।

## पाठभेदप्रदर्शनपरा ।

( १ अ० १ पा० )

१। ( १५ ) मान्त्रवर्णिकमेव च गीयते ( शं० )

मान्त्रवर्णिकमेव गीयते ( श्रीप० )

मान्त्रवर्णिकमेव च गम्यते ( व० )

( १ अ० २ पा० )

२। ( ७ ) अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च (शं०)

—तद्व्यपदेशात् नेति चेन्न—( भा० )

३। ( ११ ) गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ( शं० )

गुहाप्रविष्टा—( श्रीप० )

४। ( १६ ) श्रुतोपनिषत्कगत्यभिधानाच्च ( शं० )

—गत्यभिधानात् ( भा० )

५। ( १८ ) अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ( शं० )

—दैवाधिलोकादिषु—( भा०, रा०, नि०, श्री० )

६। ( १९ ) न च स्मार्त्तमतद्धर्माभिलापात् ( शं० )

—लापाच्छारीरश्च ( रा०, श्री० )

७। ( २० ) शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ( शं० )

उभयेऽपि हि भेदेनैनमधीयते ( रा०, श्री० )

न शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ( नि० )

८। ( २४ ) वैश्वानरः साधारणशब्दविशेषात् ( शं० )

वैश्वानरसाधारण—( बल० )

९। ( २६ ) शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ( शं० )

—प्रतिष्ठानान्नेति चेन्न—( भा० )

—प्रतिष्ठानान्नेति चेन्न—पुरुषविधमपि ( म० )

—प्रतिष्ठानान्नेति चेन्न—पुरुषमभिधीयते ( नि० )

—दृष्ट्युपदेशसम्भवात्—पुरुषविधमपि—( बल० )

१०। ( ३१ ) सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ( शं० )

—स्तथा दर्शयति ( श्रीप० )

( १ अ० ३ पा० )

११। ( २ ) मुक्तोपसृप्यव्यपदेशात ( शं० )

—व्यपदेशाच ( रा० )

१२। ( ५ ) भेदव्यपदेशात् ( शं० )

भेदव्यपदेशाच ( रा०, बल० )

१३। ( ६ ) प्रकरणात् ( शं० )

प्रकरणाच ( भा० )

१४। ( १५ ) गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च ( शं० )

—तथा दृष्टं लिंगं च— ( बल० )

१५। ( १८ ) उत्तराच्चेदाविर्भूतस्वरूपस्तु ( शं० )

उत्तरश्चेदा— ( श्रीप० )

१६। ( २१ ) अल्पश्रुतेरिति चेत्तदुक्तम् ( शं० )

अल्पश्रुतिरिति— ( श्रीप० )

१७। ( २३ ) अपि च स्मर्यते ( शं० )

अपि तु स्मर्यते ( नि० )

अपि स्मर्यते ( म०, व०, बल० )

१८। ( २६ ) तदुपर्यपि बादरायणः सम्भवात् ( शं० )

तदुपर्युपरि— ( श्रीप० )

तदुपर्यपि च ( व० )

१९। ( २७ ) विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ( शं० )

—प्रवृत्तेर्दर्शनात् ( श्रीप० )

२०। ( २८ ) शब्द इति चेन्नातः प्रभावात् प्रत्यक्षानुमानाभ्याम् ( शं० )

—चेन्नान्तःप्रभावात्— ( श्रीप० )

२१। ( २९ ) अतएव च नित्यत्वम् ( शं० )

अतएव नित्यत्वम् ( नि० )

२२। ( ३० ) समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ( शं० )

—नामरूपत्वादावृत्ता— ( व० )

—विरोधदर्शनात्— ( वि० )

२३। ( ३२ ) ज्योतिषि भावाच्च ( शं० )

ज्योतिषि भावाच्च ( श्रीप० )

२४। ( ३३ ) भावं तु बादरायणोऽस्ति हि ( शं० )

भावातु—( भा०, पाठान्तरम् )

भावस्तु—( बल० )

२५। ( ३४ ) शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ( शं० )

शुद्रस्य—( भा० पाठान्तरम् )

२६। ( ३५ ) क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ( शं० )

क्षत्रियत्वावगतेश्च—( रा०, नि०, म०, बल० )

२७। ( ३८ ) श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ( शं० )

श्रवणाध्ययनप्रतिषेधात् स्मृतेश्च ( श्रीप० )

—स्मृतिश्च ( बल० )

२८। ( ३९ ) कम्पनात् ( शं० )

प्राणः कम्पनात् ( वि० )

( १ अ० ४ पा० )

२९। ( २ ) सूक्ष्मं तु तदर्हत्वात् ( शं० )

सूक्ष्मं तदर्हत्वात् ( श्रीप० )

३०। ( ३ ) तदधीनत्वादर्थवत् ( शं० )

तदधीनत्वात्तदर्थवत् ( श्रीप० )

३१। ( ६ ) त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ( शं० )

त्रयाणामेवमुपन्यासः प्रश्नश्च ( व० )

३२। ( ७ ) महद्वच्च ( शं० )

महत्त्वाच्च ( भा० पाठान्तरम् )

३३। ( ८ ) चमसवदविशेषात् ( शं० )

चमसवदविशेषाच्च ( भा० पाठान्तरम् )

३४। ( ९ ) ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ( शं० )

ज्योतिरुपक्रमात्तु—( रा०, म०, व०, वि० )

ज्योतिरुपक्रमात्तथा—( श्रीप० )

३५। ( १० ) कल्पनोपदेशाच्च मध्वादिवदविरोधः ( शं० )

कल्पनोपदेशाय मध्वादि—( बल० )

३६। ( ११ ) न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ( शं० )

न सांख्योपसंग्रहादपि—( श्रीप० )

३७। ( १२ ) प्राणादयो वाक्यशेषात् ( शं० )

—वाक्यविशेषात् ( श्रीप० )

३८। ( १३ ) ज्योतिषैकेषामसत्यन्ने ( शं० )

—मसत्यन्ये ( श्रीप० )

३९। ( १४ ) कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ( शं० )

—चाकाशादिषु तथा व्यप—( श्रीप० )

४०। ( १७ ) जीवमुख्यप्राणलिंगान्नेति चेत् तद् व्याख्यातम् ( शं० )

—लिंगादिति चेत्—( म०, व० )

४१। ( १८ ) अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ( शं० )

अन्यार्थस्तु जैमिनिः—( बल० )

४२। ( २० ) प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः ( शं० )

—लिंगमित्याश्मरथ्यः ( वि० )

४३। ( २४ ) अभिध्योपदेशाच्च ( शं० )

अभिद्योपदेशाच्च ( श्रीप० )

( २ अ० १ पा० )

४४। ( ६ ) दृश्यते तु ( शं० )

दृश्यते च ( म० )

४५। ( ९ ) न तु दृष्टान्ताभावात् ( शं० )

न च दृष्टान्ताभावात् ( श्रीप० )

४६। ( १० ) स्वपक्षदोषाच्च ( शं० )

स्वपक्षे दोषाच्च ( नि०, बल० )

४७। ( ११ ) तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसंगः ( शं० )

—चेदेवमप्यविमोक्षप्रसंगः ( शं०, व०, )

४८। ( १२ ) एतेन शिष्टापरिग्रहा अपि व्याख्याताः ( शं० )

एतेन शिष्टा अपरिग्रहा—( म० )

४९। ( १६ ) सत्त्वाच्चावरस्य ( शं० )

सत्त्वाच्चापरस्य ( रा०, श्री०, श्रीप० )

५०। ( २० ) यथा च प्राणादि ( शं० )

यथा च प्राणादिः ( [illegible]० )

५१। ( २४ ) उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ( शं० )
उपसंहारदर्शनान्नेति चेत क्षीरवद्धि ( म० )
५२। ( २६ ) कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ( शं० )
—निरवयवशब्दकोपो वा ( वि० )
निरवयवशब्दव्याकोपो वा ( बल० )
५३। ( २९ ) स्वपक्षदोषाच्च ( शं० )
स्वपक्षे दोषाच्च ( नि०, बल० )
५४। ( ३० ) सर्वोपेता च तद्दर्शनात् ( शं० )
सर्वोपेता च सा तद्दर्शनात् ( नि० )
५५। ( ३५ ) न कर्माविभागादिति चेन्नानादित्वात् ( शं० )
न कर्मविभागादिति—( व० )
अकस्माद् विभागादिति—( भा० )
न कर्मविभागदिति चेन्नानादित्वापि ( श्रीप० )
५६। ( ३६ ) उपपद्यते चाप्युपलभ्यते च ( शं० )
उपपद्यते चानुपलभ्यते च ( श्रीप० )
( २ अ० २ पा० )
५७। ( ७ ) पुरुषाश्मवदिति चेत्तथापि ( शं० )
पुरुषाश्मवच्चेत्तथापि ( वि० )
५८। ( ८ ) अंगित्वानुपपत्तेश्च ( शं० )
अंगित्वानुपपत्तेः ( भा०, म० )
५९। ( ९ ) अन्यथानुमितौ च ज्ञशक्तिवियोगात् ( शं० )
अन्यथानुमितौ शक्तिवियोगात् ( भा० )
अन्यथानुमितौ च ज्ञानशक्तिवियोगात् ( श्री०, श्रीप० )
६०। ( १४ ) नित्यमेव च भावात् ( शं० )
नित्यमेव भावात् ( भा० )
६१। ( १९ ) इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ( शं० )
—प्रत्ययमन्यत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात ( भा० ).
—प्रत्ययत्वादुपपन्नमिति चेन्न संघाताभावानिमित्तत्वात् (रा०, नि० श्री०, श्रीप०)
६२। ( २० ) उत्तरोत्पादे च पूर्वनिरोधात् ( शं० )
—पूर्वनिरोधात् ( शं० ).

६३। ( २१ ) असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ( शं० )
असति प्रतिज्ञोपरोधो—( रा० )
६४। ( २२ ) प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ( शं० )
—प्राप्तिरसम्भवः ( भा० )
६५। ( ३१ ) क्षणिकत्वाच्च ( शं० )
क्षणिकत्वात् ( नि० )
६६। ( ३६ ) अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ( शं० )
—दविशेषात् ( म० )
६७। ( ४२ ) उत्पत्त्यसम्भवात् ( शं० )
उत्पत्तेरसम्भवात् ( श्रीप० )
६८। ( ४३ ) न च कर्त्तुः करणम् ( शं० )
तच्च कर्त्तुः करणम् ( श्रीप० )
( २ अ० ३ पा० )
६९। ( ६ ) प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ( शं० )
प्रतिज्ञाहानिर्व्यतिरेकाच्छब्देभ्यः ( श्रीप० )
७०। ( ७ ) यावद्विकारं तु विभागो लोकवत् ( शं० )
यावद्विकारस्तु विभागो लोकवत् ( बल० )
७१। ( १२ ) पृथिव्यधिकाररूपशब्दान्तरेभ्यः ( शं० )
—शब्दान्तरादिभ्यः ( म० )
७२। ( १४ ) विपर्ययेण तु क्रमोऽत उपपद्यते च ( शं० )
—उपपद्यते ( व० )
पारम्पर्येण क्रमोऽत उपपद्यते ( श्री० )
७३। ( १६ ) चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् (शं०)
—व्यपदेशोऽभाक्तः—( रा०, श्री०, बल० )
७४। ( १७ ) नात्मश्रुतेर्नित्यत्वाच्च ताभ्यः ( शं० )
नात्माऽश्रुते—( नि०, वि० )
७५। ( २५ ) गुणाद् वा लोकवत् ( शं० )
गुणाद् वा आलोकवत् ( भा० रा० श्री० )
७६। ( २७ ) तथाच दर्शयति ( शं० )
तथाहि दर्शयति ( नि०, श्री०, बल० )

७७। ( २९ ) तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ( शं० )
—सारत्वात् तद्व्यपदेशः—( रा० बल० )

७८। ( ३१ ) पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ( शं० )
पुंस्त्वादिवत्त्वस्य ( रा०, वि० )

७९। ( ३२ ) नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ( शं० )
—प्रसंगोऽन्तर—( रा० )

८०। ( ३४ ) विहारोपदेशात् ( शं० )
उपादानाद् विहारोपदेशश्च ( रा०, श्री०, श्रीप० )

८१। ( ४० ) यथा च तक्षोभयथा ( शं० )
यथा च तक्षोभयता ( नि० )

८२। ( ४२ ) कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ( शं० )
—प्रतिषेधावैयर्थ्यादिभ्यः ( म० )

८३। ( ४३ ) अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके (शं०)
—दास—( बल० )

८४। ( ४४ ) मन्त्रवर्णाच्च ( शं० )
मन्त्रवर्णात् ( भा०,रा०,नि०,म०,श्री०,श्रीप०,व०,वि०,बल० )

८५। ( ४५ ) अपि च स्मर्यते ( शं० )
अपि स्मर्यते ( भा०, रा०, म०, व०, बल० )

८६। ( ४६ ) प्रकाशदिवन्नैवं परः ( शं० )
प्रकाशादिवत्तु नैवं परः ( रा० नि० श्री० श्रीप० )

८७। ( ५० ) आभास एव च ( शं० )
आभासा एव वा ( भा० )
आभासा एव च ( रा० नि० श्री० )

८८। ( ५२ ) अभिसन्ध्यादिष्वपि चैवम् ( शं० )
अभिसन्ध्यादिष्वप्येवम् ( वि० )

८९। ( ५३ ) प्रदेशादिति चेन्नान्तर्भावात् ( शं० )
प्रदेशभेदादिति चेन्नान्तर्भावात् ( रा०, श्रीप० )

( २ अ० ४ पा० )

९०। ( १० ) चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ( शं० )
—तत्सहशिष्ट्यादिभ्यः ( म० )

९१। ( १५ ) ज्योतिराद्यधिष्ठानं तु तदामननात् ( शं० )

ज्योतिराद्यधिष्ठानं तद्वा मननात् प्राणवता शब्दात् (रा०श्री०श्रीप०)

९२। ( १६ ) तस्य च नित्यत्वात् ( शं० )

तस्य नित्यत्वात् ( नि० )

९३। ( १७ ) त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ( शं० )

तदिन्द्रियाणि—( श्रीप०, व० )

९४। ( १९ ) वैलक्षण्याच्च ( शं० )

वैलक्षिण्याच्च ( श्रीप० )

९५। ( २२ ) वैशेष्यात्तु तद्वादस्तद्वादः ( शं० )

वैशेष्यात् तद्वादस्तद्वादः ( नि० )

( ३ अ० १ पा० )

९६। ( २ ) त्र्यात्मकत्वात्तु भूयस्त्वात् ( शं० )

आत्मकत्वात्तु भूयस्त्वात् ( भा० )

९७। ( ४ ) अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ( शं० )

अग्न्यादिश्रुतेः—( व० )

९८। ( ५ ) प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ( शं० )

प्रथमे श्रवणादिति—( रा० म०, व० वि० )

९९। ( ७ ) भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ( शं० )

भाक्तं चानात्मवित्त्वात्—( भा० )

—तथा वा दर्शयति ( श्रीप० )

१००। ( ८ ) कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ( शं० )

—यथेतमनेवम् ( भा० )

१०१। ( ९ ) चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ( शं० )

—चेन्न तदुपलक्षणार्थेति—( रा० म० श्री०श्रीप० वल० )

१०२। ( १० ) आनर्थक्यमिति चेन्न तदपेक्षत्वात् ( शं० )

आनर्थिक्यमिति—( श्रीप० )

१०३ ( ११ ) सुकृतदुष्कृते एवेति तु बादरिः ( शं० )

—एव तु बादरिः ( भा० )

—एवेति बादरिः ( श्रीप० )

१०४। ( १३ ) संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ( शं० )

—तद्गतिवर्शनात् ( नि० श्री० वल० )

१०५। ( १५ ) अपि च सप्त ( शं० )

अपि सप्त ( भा० म० नि० श्रीप० व०वल० )

१०६ ( १६ ) तत्रापि च तद्व्यापारादविरोधः ( शं० )

तत्रापि तद्व्या— ( रा० श्रीप० )

१०७। ( १७ ) विद्याकर्मणोरिति तु प्रकृतत्वात् ( शं० )

विद्याकर्मिणो— ( श्रीप० )

१०८। ( २१ ) तृतीयशब्दावरोधः संशोकजस्य ( शं० )

तृतीये शब्दा— ( म० व० )

१०९। ( २२ ) तत्स्वाभाव्यापत्तिरुपपत्तेः ( शं० )

तत्स्वाभाव्या—( रा० म०नि० श्री०श्रीप० वल० )

साम्यापत्ति—( शं० भा० व० वि० )

११०। ( २४ ) अन्याधिष्ठितेषु पूर्ववदभिलापात् ( शं० )

अन्याधिष्ठिते पूर्व—( शं० भा० रा० नि० म०श्री०श्रीप० व०वि०वल० )

१११। ( २६ ) रेतः सिग्योगोऽथ ( शं० )

रेतः सिग्योगाच्च ( भा० )

( ३ अ० २ पा० )

११२। ( ४ ) सूचकस्य हि श्रुतेराचक्षते च तद्विदः ( शं० )

—राचक्षते तद्विदः ( भा० )

११३। ( ५ ) पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ( शं० )

—ध्यानं तु तिरोहितं—( भा० )

—ध्यानाच्चिरोहितं—( श्रीप० )

११४। ( ९ ) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ( शं० )

स एव च कर्मा—( म० वि० )

११५। ( १२ ) न भेदादिति चेन्न प्रत्येकमतद्वचनात् ( शं० )

भेदादिति—( भा० रा० नि० श्री० श्रीप०

११६। ( १४ ) अरूपवदेव हि तत्प्रधानत्वात् ( शं० )

अरूपवदेव तत्प्रधानत्वात् ( भा० )

११७। ( १५ ) प्रकाशवच्चावैयर्थ्यात् ( शं० )
प्रकाशवच्च वैयर्थ्यात् ( भा० )
प्रकाशवच्चावैयर्थ्यात् ( रा० नि०मी० श्रीप० वि० )

११८। ( १७ ) दर्शयति चाथो अपि स्मर्यते ( शं० )
अदर्शयति चा— ( श्रीप० )

११९। ( १९ ) अम्बुवद् ग्रहणात्तु न तथात्वम् ( शं० )
अम्बुवद् ग्रहणान्न तथात्वम् ( भा० )

१२०। ( २० ) वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ( शं० )
—सामञ्जस्यादेव ( भा० )
वृद्धिह्रासभाक्त्वमन्तर्भावाद्— ( रा० श्रीप० )

१२१। ( २४ ) अपि च संराधने प्रत्यक्षानुमानाभ्याम् ( शं० )
अपि संराधने— ( भा० रा०नि०म० श्री० व०वि० बल० )
अपि संराधने प्रत्यक्षानुमानाभावात् ( श्रीप० )

१२२। ( २५ ) प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ( शं० )
प्रकाश्यादिवच्चा— ( नि० )
प्रकाशवच्चावैशेष्यं— ( म० )
प्रकाशवच्चावैशेष्यात् ( बल० )

१२३। ( २७ ) उभयव्यपदेशात्त्वहिकुण्डलवत् ( शं० )
उभयव्यपदेशादहिकुण्डलवत् ( भा० )

१२४। ( ३६ ) तथान्यप्रतिषेधात् ( शं० )
तथान्यप्रतिषेधाच्च ( वि० )

१२५। ( ३७ ) अनेन सर्वगतत्वमायामशब्दादिभ्यः ( शं० )
—मायामयश्च— ( म० )

( ३ अ० ३ पा० )

१२६। ( २ ) भेदान्नेति चेन्नैकस्यामपि ( शं० )
भेदान्नेति चेत् स्यादेकस्यामपि ( भा० )
भेदान्नेति चेदेकस्यामपि ( रा० नि० म० श्रीप० व० )
भेदादिति चेन्नैकस्यामपि ( बल० )

१२७। ( ३ ) स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ( शं० )
—तथात्वे हि समाचारेऽधिकाराच्च सलिलवच्च तन्नियमः (भा०)

—तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः (रा० नि०)

—तथात्वे हि समाचारधिकाराच्च सववच्च—( श्रीप० )

—तथात्वेन समाचारेऽधिकाराच्च—( व० )

१२८। ( ५ ) उपसंहारोऽर्थाभेदाद् विधिशेषवत्समाने च ( शं० )

—विधिशेषवत् समो न च ( श्रीप० )

१२९। ( ६ ) अन्यथात्वं शब्दादिति चेन्नाविशेषात् ( शं० )

अन्यथात्वं च शब्दादिति—( म० )

१३०। ( ९ ) व्याप्तेश्च समञ्जसम् ( शं० )

प्राप्तेश्च समञ्जसम् ( म० )

१३१। ( १६ ) आत्मगृहीतिरितरवदुत्तरात् ( शं० )

आत्मग्रहीतेरितरवदुत्तरात् ( भा० )

१३२। ( २१ ) न वा विशेषात् ( शं० )

न वाऽविशेषात् ( वि० )

१३३। ( २३ ) संभृतिद्युव्याप्त्यपि चातः ( शं० )

संभृतिवद् व्याप्त्यपि चातः ( भा० )

१३४। ( २४ ) पुरुषविद्यायामिव चेतरेषामनाम्नानात् ( शं० )

पुरुषविद्यायामपि—( भा० रा० नि० म० श्री० श्रीप० )

१३५। ( ३१ ) अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् ( शं० )

अनियमः सर्वासाम—( भा० व० वि० )

—मविरोधाच्छब्दानुमानाभ्याम् ( म० बल० )

१३६। ( ३३ ) अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ( शं० )

अक्षरधियां त्वविरोधः—( भा० )

—सामान्यतस्तद्भावाभावाभ्याम्—( व० )

अक्षरधियां त्ववोधः—( वि० बल० )

१३७। ( ३४ ) इयदामननात् ( शं० )

ईषदामननात् ( भा० )

१३८। ( ३५ ) अन्तरा भूतग्रामवत् स्वात्मनः ( शं० )

—वदितिचेत्तदुक्तम् ( म० )

१३९। ( ३६ ) अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ( शं० )

—चेन्नोपदेशवत् ( म० )

—भेदानुपपत्तेरिति—( म० )

—भेदानुपपत्तेरिति चेन्नोपदेशवत् ( रा० श्री० श्रीप० )

१४०। ( ३७ ) व्यतिहारो विशिंषन्ति हीतरवत् ( शं० )

—विशिषन्ति हीतरवत् ( श्रीप० )

१४१। ( ३९ ) कामादीतरत्र तत्र चायतनादिभ्यः ( शं० )

कामावितरत्र चाय—( म० )

कामादयस्तत्र तत्र चा—( श्री० )

१४२। ( ४२ ) तन्निर्द्धारणाऽनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ( शं० )

तन्निर्द्धारणाऽनियमस्तद्दृष्टेः ( रा० पाठान्तरम् )

तन्निर्द्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ( म० )

१४३। ( ४३ ) प्रदानवदेव तदुक्तम् ( शं० )

प्रदानवदेव हि तदुक्तम् ( म० )

१४४। ( ४५ ) पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ( शं० )

पूर्वविकल्पप्रकरणात्—( वि० )

१४५। ( ५२ ) परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ( शं० )

परेण शब्दस्य ता—( श्रीप० )

१४६। ( ५४ ) व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ( शं० )

व्यतिरेकस्तद्भावभावित्वा—( भा० रा० नि० म० श्री० बल० )

१४७। ( ५६ ) मन्त्रादिवद् वाऽविरोधः ( शं० )

मन्त्रादिवद् वा विरोधः ( म० व० बल० )

१४८। ( ५७ ) भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ( शं० )

—तथा च दर्शयति ( म० )

—तदाहि दर्शयति ( श्रीप० )

१४९। ( ५९ ) विकल्पोऽविशिष्टफलत्वात् ( शं० )

विकल्पो विशिष्टफलत्वात् ( म० व० )

१५० ( ६५ ) न वा तत्सहभावाश्रुतेः ( शं० )

न वाऽतत्सहभावश्रुतेः ( म० )

न वा तत्सहभावोऽश्रुतेः ( नि० )

( ३अ० ४ पा० )

१५१। ( ४ ) तच्छ्रुतेः ( शं० )

तच्छ्रुतेश्च ( वि० )

१५२। ( ६ ) तद्भूतो विधानात् ( शं० )

तत्त्वतो विधानात् ( श्रीप० )

१५३। ( ७ ) नियमाच्च ( शं० )

नियमात् ( श्री० श्रीप० )

१५४। ( ८ ) अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ( शं० )

—बादरायणस्यैव तद्दर्शनात् ( म० )

१५५। ( ९ ) तुल्यं तु दर्शनम् ( शं० )

तुल्यं दर्शनम् ( व० )

१५६। ( १० ) असार्वत्रिकी ( शं० )

असार्वत्रिकः ( श्रीप० )

१५७। ( १५ ) कामकारेण चैके ( शं० )

कामचारेण चैके ( श्रीप० )

१५८। ( १८ ) परामर्शं जैमिनिरचोदना चापवदति हि ( शं० )

—रचोदनाच्चापवदति हि ( रा० नि० श्री० श्रीप० )

१५९। ( २१ ) स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ( शं० )

—चेन्न पूर्वत्वात् ( श्रीप० )

१६०। ( २३ ) पारिप्लवार्था इति चेन्न विशेषितत्वात् ( शं० )

पारिप्लवार्थ इति चेन्न विशेषितत्वात्तथा—( भा० )

१६१ ( २४ ) तथा चैकवाक्यतोपबन्धात् ( शं० )

तथा चैकवाक्योपबन्धात् ( भा० म० श्रीप० )

१६२। ( २६ ) सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ( शं० )

—यज्ञादिश्रुतिरश्ववत् ( वल्ल० )

१६३। ( २७ ) शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानु-
ष्ठेयत्वात् ( शं० )

—तथापि तु विधेस्तदंग—( भा० )

—तेषामप्यवश्यानुष्ठेयत्वात् ( रा० श्री० श्रीप० )

—तथापि तद्विधे— ( वि० )

[illegible] ( [illegible] )

१६४ ( २८ ) सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ( शं० )

सर्वान्नानुमतिः प्राणात्यये—( बल० )

१६५। ( ३० ) अपि च स्मर्यते ( शं० )

अपि स्मर्यते ( रा० म० श्रीप० व० बल० )

१६६। ( ३१ ) शब्दश्चातोऽकामकारे ( शं० )

शब्दश्चातोऽकामचारे ( म० बल० )

१६७। ( ३४ ) सर्वथापि त एवोभयलिंगात् ( शं० )

सर्वथापि तु त एवो—( म० )

सर्वथापि तत्र वोभयलिंगात् ( बल० )

१६८। ( ३७ ) अपि च स्मर्यते ( शं० )

अपि स्मर्यते ( भा० रा० म० श्रीप० व० बल० )

१६९। ( ३८ ) विशेषानुग्रहश्च ( शं० )

विशेषा अनुग्रहं च ( म० )

१७०। ( ३९ ) अतस्त्वितरज्ज्यायो लिंगाच्च ( शं० )

—लिंगात् ( नि० )

१७१। ( ४० ) तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ( शं० )

—तु तद्भावो जैमिनेरपि नियमा तद्रूपावभावेभ्यः ( म० )

—जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ( भा०रा०नि०श्री० )

—जैमिनिरपि—( व० )

तद्भुतस्य नातद्भावे जैमिनेरपि नियमात्तद्—( वि० )

१७२। ( ४१ ) न चाधिकारिकमपि पतनानुमानात्तदयोगात् ( शं० )

—पतनानुमानात्तद्योगात् ( बल० )

—मपि यजनानुमानात्तद्योगात् ( वि० )

१७३। ( ४२ ) उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ( शं० )

उपपूर्वमपीत्येके भाव—( रा० म० श्री० श्रीप० )

१७४। ( ४३ ) बहिस्तूभयथापि स्मृतेराचाराच्च ( शं० )

बहिस्तूभयथा स्मृते—( भा० बल० )

१७५। ( ४५ ) आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ( शं० )

—परिक्रीयते ( नि० व० वि० बल० )

१७६। ( ४७ ) सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ( शं० )

—पक्षेण तृतीयं—( श्रीप० )

१७७। ( ५१ ) ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ( शं० )
ऐहिकमप्रस्तुत—( भा० रा० म० श्री० श्रीप० ब० वि० बल०
ऐहिकमप्रस्तुते— नि० )
१७८। ( ५२ ) एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ( शं० )
मुक्तिफला— नि० )
( ४ अ० १ पा० )
१७९। ( ११ ) यत्रैकाग्रता तत्राविशेषात् ( शं० )
—तत्र विरोधात् ( भा० )
१८०। ( १२ ) आप्रायणात्तत्रापि हि दृष्टम् ( शं० )
आप्रयाणात्—( रा० )
१८१। ( १४ ) इतरस्याप्येवमसंश्लेषः पाते तु ( शं० )
इतरस्याप्येवमश्लेषः—( नि० )
१८२। ( १६ ) अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ( शं० )
—तु तत्तत्कार्यायैव—( वि० )
१८३। ( १७ ) अतोऽन्यापि ह्येकेषामुभयोः ( शं० )
अतोऽन्यदपीत्येकेषामुभयोः ( म० )
१८४। ( १९ ) भोगेन त्वितरे क्षपयित्वा सम्पद्यते ( शं० )
—क्षपयित्वाथ सम्पद्यते ( रा० नि० श्री० श्रीप० ब० बल० )
—क्षपयित्वाथ सम्पत्स्यते ( म० )
( ४ अ० २ पा० )
१८५। ( २ ) अतएव च सर्वाण्यनु ( शं० )
अतएव सर्वाण्यनु ( रा० नि० ब० वि० श्रीप० मतान्तरे )
१८६। ( ४ ) सोऽध्यक्षे तदुपगमादिभ्यः ( शं० )
सोऽध्यक्षेण—( श्री० )
१८७। ( ५ ) भूतेषु तच्छ्रुतेः ( शं० )
भूतेष्वतः श्रुतेः ( भा० वि० )
१८८। ( ९ ) सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ( शं० )
सूक्ष्मप्रमाणतश्च—( बल० )
१८९। ( ११ ) अस्यैव चोपपत्तेरेष ऊष्मा ( शं० )
—चोपपत्तेरूष्मा ( श्रीप० )

—चोपपत्तेरूष्मा ( रा० नि० म० )

तस्यैव चोप—( वल० )

१९०। ( १३ ) स्पष्टो ह्येकेषाम् ( शं० )

स्पष्टौ ह्येकेषाम् ( वल० )

१९१। ( १९ ) निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ( शं० )

निशि नेति चेन्न संबन्धात् ( म० )

१९२। ( २१ ) योगिनः प्रति च स्मर्यते स्मार्ते चैते ( शं० )

योगिनः प्रतिस्मर्यते—( रा० नि० म० श्री० श्रीप० )

( ४ अ० ३ पा० )

१९३। ( २ ) वायुमब्दादविशेषविशेषाभ्याम् ( शं० )

वायुशब्दाद—( म० )

१९४। ( ३ ) तडितोऽधिवरुणः संबन्धात् ( शं० )

तटितोऽधिवरुणः— ( म० श्री० श्रीप० )

१९५। ( ४ ) आतिवाहिकास्तल्लिंगात् ( शं० )

आतिवाहिकस्तल्लिंगात् ( म० )

१९६। ( ९ ) सामीप्यात् तु तद्व्यपदेशः ( शं० )

—तु तदुपदेशः ( नि० )

१९७। ( १० ) कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्, (शं०)

—परमविधानात् ( रा० )

१९८। ( १४ ) न च कार्ये प्रतिपत्त्यभिसन्धिः ( शं० )

—प्रत्यभिसन्धिः ( रा० श्री० श्रीप० )

१९९। ( १५ ) अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत् क्रतुश्च (शं०)

—उभयथा च दोषात् तत्क्रतुश्च (रा० म० श्री० श्रीप० वल०)

( ४ अ० ४ पा० )

२००। ( १ ) संपद्याविर्भावः स्वेन शब्दात् ( शं० )

संपद्याविहाय स्वेन शब्दात् ( म० )

२०१। ( ६ ) चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः (शं०)

चितिमात्रेण— ( रा० म० श्री० )

२०२। ( ८ ) संकल्पादेव तु तच्छ्रुतेः ( शं० )

( संकल्पादेव तच्छ्रुतेः ( रा० नि० वल० )

२०३। ( ९ ) अतएव चानन्याधिपतिः ( शं० )

अतएवानन्याधिपतिः ( वि० )

२०४। ( १० ) अभावं बादरिराह ह्येवम् ( शं० )

अभावे बादरि—( बल० )

२०५। ( ११ ) भावं जैमिनिर्विकल्पामननात् ( शं० )

—विकल्पाम्नानात् ( म० )

—जैमिनिनिर्विकल्पामननात् ( वि० )

आह ह्येवं जैमिनिर्विकल्पामननात् ( बल० )

२०६। ( १३ ) तन्वभावे सन्ध्यवदुपपत्तिः ( शं० )

तस्य भावे सन्ध्यवदुपपत्तिः ( श्रीप० )

२०७। ( १६ ) स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ( शं० )

स्वापसम्पत्त्यो—( वि० )

स्वापसम्पत्त्योरन्यतरापेक्ष्यमाविष्कृतं हि ( बल० )

२०८। ( १८ ) प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ( शं० )

प्रत्यक्षोपदेशान्नेति चेन्ना—( भा० नि० श्रीप० बल० )

२०९। ( १९ ) विकारवर्त्ति च तथा हि स्थितिमाह ( शं० )

—तथा हि दर्शयति ( म० )

२१०। ( २० ) दर्शयतश्चैवं प्रत्यक्षानुमाने ( शं० )

स्थितिमाह दर्शयतश्चैवं—( म० )

२११। ( २१ ) भोगमात्रसाम्यलिंगाच्च ( शं० )

भोगमात्रसाम्यं लिंगाच्च ( भा० )

अत्र मुद्रितग्रन्थानां संस्करणभेदेन पाठभेदोऽपि परिलक्ष्यते, तत्र ३।१।१३ सूत्रे यः पाठभदेः प्रदर्शितः, स तु न ग्रहणीयः, तदनुसारेण निर्णयफलं संशोधनीयम् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अत्र शंकरपाठे | ३ | सूत्रेषु | पाठान्तरम् | श्रीकण्ठपाठे | ३९ | सूत्रेषु | पाठान्तरम् |
| भास्कर | ,, ६० | ,, | ,, | श्रीपति | ,, ७९ | ,, | ,, |
| रामानुज | ,, ५४ | ,, | ,, | वल्लभ | ,, ३२ | ,, | ,, |
| निम्बार्क | ,, ४५ | ,, | ,, | विज्ञानभिक्षु | ,, ३६ | ,, | ,, |
| माध्व | ,, ६२ | ,, | ,, | बलदेव | ,, ५४ | ,, | ,, |

एवं च दृश्यते २११ सूत्रेषु पाठभेदः सञ्जातः, शिष्टेषु सूत्रेषु ( ५५५—२११

१४४ सूत्रेषु ) सर्वेषाम् ऐकमत्यमिति। तत्र यदि २११ सूत्रेषु [illegible] विश्लेषणं कृतं स्यात्, तदा बहुषु सूत्रेषु—

१। एकैकः आचार्यः स्वातन्त्र्येण पाठभेदकारी,

२। द्वौ मिलित्वा पाठभेदकारिणौ,

३। त्रयो मिलित्वा पाठभेदकारिणः,

४। चत्वारो " "

५। पञ्च " "

६। षट् " "

७। अष्ट " "

८। नव " " इति दृश्यते। तद् यथा—

( १ ) स्वातन्त्र्येण पाठभेदकारिणः आचार्याः—

केवलं शांकरभाष्ये २६०, ३१५ सूत्रयोः एकाकी पाठभेदकारी।

केवलं भास्करभाष्ये ३५ सूत्रेषु पाठान्तरं वर्त्तते, तानि सूत्राणि, यथा—३८, ४७, ५७, ६६, १६६, १८०, १८५, १९०, १९३, २६६, २७९, २९३, २९८, २९९, ३०२, ३१७, ३२२, ३२३, ३३२, ३३३, ३३७, ३३८, ३४५, ३६१, ३६२, ३७५, ३८२, ३९२, ३९३, ३९५, ४३३, ४४८, ४५२, ४८८, ५५४।

तथा केवलं रामानुजभाष्ये ६ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—६५, १९१, १९२, २४८ ४८६, ५२७।

तथा केवलं निम्बार्कभाष्ये १५ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—५१, ५७, ८६, ९२, १६४, २०२, २५६, २८५, ३४३, ४२४, ४६४, ४७६,४७७, ४९१, ५२६।

तथा केवलं माध्वभाष्ये ३० सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—५७, १४०, १४६, १५८, २०७, २२८, २५८, ३४३, ३५५, ३६५, ३६८, ३९४, ३९५, ३९८, ४०१, ४०२, ४१६, ४२४, ४५९, ४६३, ४६५, ४९४, ४९६, ५१५, ५१९, ५२१, ५३४, ५४५, ५५२, ५५३।

तथा केवलं श्रीकण्ठभाष्ये ३ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—२३०, ३९८, ५००।

यथा केवलं श्रीपतिभाष्ये ४४ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—१५, ४२, ६२, ८२, ८४, ८९, ९०, ९१, ९५, १०१, १०८, १०९, ११५, ११७, ११८, ११९, १२०, १३०, १४३, १६६, १७०, २१३, २१४, २२२, २८८, २९८, ३०१, ३०२, ३०८, ३२३, ३३५, ३४२, ३६२, ३६४, ३९६, ४११, ४१६, ४२१, ४३५, ४४०, ४४६, ४७२, ५०७, ५४६।

तथा केवलं मध्वभाष्ये १२ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—१५, ८१, ६३, ११२, १४५, १६१, २३०, २१५, ३६२, ३१२, ४३४, ४६५।

तथा केवलं विज्ञानभिक्षुभाष्ये १८ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—६३, १०२, १२६, १६०, १७८, २६८, २११, ३५४, ३८०, ४०४, ४२१, ४१२, ४६५, ४६६, ४१३, ५४२, ५४४, ५४१।

तथैव केवलं बलदेवभाष्ये २४ सूत्रेषु पाठान्तरं, तानि च सूत्राणि, यथा—५५, ५७, ७८, ९६, १०१, ११६, १२४, १५४, १६०, २२३, २५१, ३४३, ३६१, ४५१, ४५२, ४५३, ४५१, ४६६, ५०५, ५०७, ५०१, ५४३, ५४४, ५४६।

( २ ) तथा यत्र द्वौ आचार्यौ मिलित्वा पाठभेदकारिणौ, तेषां विवरणम्—

| | | | |
|---|---|---|---|
| भा०, म०=१७९ …. …. | १ | नि० बल०=१४४, १६३ …. …. | २ |
| भा० वि०=५०१ …. …. | १ | नि० वि०=२३३ …. …. …. | १ |
| भा०बल०=४६८ …. …. | १ | म० व०=१२३,३१२,४१८ …. | ३ |
| रा० नि०=३६२ …. …. | १ | म०वि०=३२७ …. …. …. | १ |
| रा० श्री०=५०, ५१ …. | २ | म०बल०=३९०, ४५६ …. …. | २ |
| रा०श्रीप०=२६९,३०७,३३८,…. | ३ | श्री०श्रीप०=१८०, ४३२ …. | २ |
| रा० वि०=२४७ … …. | १ | श्रीप० व०=२८६ … …. | १ |
| रा०बल०=६८, २४५ …. | २ | वि० बल०=३९२ …. | १ |
| | | | २५ |

२५×२=५०

अत्र एकैकस्य भाष्यस्य एवं दोषसंख्या स्यात्—

| | | | | |
|---|---|---|---|---|
| भा०=३ | वि०=५ | रा०=९ | श्री०=४ | व०=४ |
| म०=७ | बल०=८ | नि०=४ | श्रीप०=६ | ५० |

( ३ ) यत्र त्रय आचार्या मिलित्वा पाठभेदकारिणस्तेषां विवरणम्—

| | | | |
|---|---|---|---|
| भा०रा०श्री०=२४१… | १ | रा०श्री०श्रीप०=१५०,२५०, | |
| भा०म०श्री०=५३९…. | १ | २८३,३९५४५२,५३१ | ६ |
| भा०म०श्रीप०=४४९ …. | १ | रा०श्री०बल०=२३२ …. | १ |
| भा०व०वि०=३१३,३९० | २ | नि०श्री०बल०=२४३,३०४…. | २ |
| रा० नि० म०=५०७ …. | १ | म०श्री०श्रीप०=५२० …. | १ |
| रा० नि० श्री०=२६६ …. | १ | म० व० बल०=८६,४१५ …. | २ |
| रा० नि० बल०=५४१…. | १ | | २० |

२०×३=६०

अत्र एकैकस्य भाष्यस्य एवं दोषसंख्या स्यात्—

| | | | |
|---|---|---|---|
| भा०=५ | बल०=६ | श्री०=१३ | व०=४ |
| म०=६ | रा०=११ | श्रीप०=८ | ६० |
| वि०=२ | नि०=५ | | |

(४) यत्र चत्वार आचार्या मिलित्वा पाठभेदकारिणंस्तेषां विवरणम्—

| | | | |
|---|---|---|---|
| भा०रा०नि०श्री०=४९,४६५ | ....२ | रा०नि०व०वि०=४९८ | ....१ |
| भा०नि०श्रीप०बल०=५५१ | ....१ | रा०म०व०वि०=११५,२९६ | ....२ |
| रा० नि० म०बल०=९८ | ...१ | रा०म०श्री०श्रीप०=४६७ | ....१ |
| रा०नि०श्री०श्रीप०=१९०,२६२,४४३ | ....३ | नि०व०वि०बल०=४७० | ....१ |
| | | | १२ |

१२×४=४८

अत्र एकैकस्य भाष्यस्य दोषसंख्या एवं स्यात्—

| | | | |
|---|---|---|---|
| भा०=३ | बल०=३ | श्री०=६ | व०=४ |
| म०=४ | रा०=१० | श्रीप०=५ | ४८ |
| वि०=४ | नि०=९ | | |

(५) तथा यत्र पंच आचार्य्या मिलित्वा पाठभेदकारिणंस्तेषां विवरणम्—

| | | | |
|---|---|---|---|
| भा०रा०नि०श्री०श्रीप०=३३०....१ | रा०नि०श्रीप०वि० | ३३३ | ...१ |
| भा०रा०म०व०बल० =२६१....१ | रा०म०श्री०श्रीप०बल० | ३००,५३२ | २ |
| रा०नि०म०श्री०श्रीप० =५१७....१ | रा०म०श्रीप०व०बल० | ४५५ | ....१ |
| रा०नि०म०श्रीप०व० =३६१....१ | | | ८ |

८×५=४०

अत्र एकैकस्य भाष्यस्य दोषसंख्या एवं भवेत्—

| | | | |
|---|---|---|---|
| भा० २ | श्री० ५ | व० ३ | वि० १ |
| रा० ८ | श्रीप० ७ | बल० ४ | ४० |
| नि० ४ | म० ६ | | |

(६) एवं यत्र षट् आचार्या मिलित्वा पाठभेदकारिणस्तेषां विवरणम्—

| | |
|---|---|
| भा०रा०नि०म०श्री०श्रीप०=३८३...१ | भा०नि०म०श्रीप०व०बल०=३०६ ....१ |
| भा०रा०नि०म०श्री० बल०=४१३....१ | रा०नि०श्री०श्रीप०व०बल०=४९५ ....१ |
| भा०रा०म०श्रीप०व०बल०=४६२....१ | रा०नि०म०श्री०श्रीप०बल०=३१३ ....१ |
| | ६ |

६×६=३६

तेन एकैकस्य भाष्यस्य दोषसंख्या एवं स्यात्—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा० | ४ | श्री० | ४ | व० | ३ | बल० | ५ |
| रा० | ५ | श्रीप० | ५ | वि० | ० | | ३६ |
| नि० | ५ | म० | ५ | | | | |

( ८ ) एवं च यत्र अष्टौ आचार्या मिलित्वा पाठभेदकारिणस्तेषां विवरणम्—

भा० रा० नि० म० श्री० व० वि० बल० ३४२=१

भा० रा० म० श्री० श्रीप० व० वि० बल ४७६=१

२

२×८=१६

अत्र एकैकस्य भाष्यस्य एवं दोषसंख्या स्यात्—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा० | २ | श्री० | २ | व० | २ | वि० | २ |
| रा० | २ | श्रीप० | १ | बल० | २ | | १६ |
| नि० | १ | म० | २ | | | | |

( ९ ) तथा च यत्र नव आचार्या मिलित्वा पाठभेदकारिणस्तेषां विवरणम्—

भा० रा० नि० म० श्री०-श्रीप० व० वि० बल०—२६०, ३१५=२

२×९=१८

तेनात्र एकैकस्य भाष्यस्य दोषसंख्या एवं स्यात्—

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| भा० | २ | नि० | २ | श्री० | २ | व० | २ | बल० | २ |
| रा० | २ | म० | २ | श्रीप० | २ | वि० | २ | | १८ |

अत्र यदि एकैकस्य पाठभेदसंख्या निरूप्यते तदा इत्थमेव फलम्—

| | भा० | रा० | नि० | म० | श्री० | श्रीप० | व० | वि० | बल० |
|---|---|---|---|---|---|---|---|---|---|
| (१) | ३५ | ६ | १५ | ३० | ३ | ४४ | १२ | १८ | २४ |
| (२) | ३ | ६ | ४ | ७ | ४ | ६ | ४ | ५ | ८ |
| (३) | ५ | ११ | ५ | ६ | १३ | ८ | ४ | २ | ६ |
| (४) | ३ | १० | ६ | ४ | ६ | ५ | ४ | ४ | ३ |
| (५) | २ | ८ | ४ | ६ | ५ | ७ | ३ | १ | ४ |
| (६) | ४ | ५ | ५ | ५ | ४ | ५ | ३ | ... | ५ |
| (८) | ३ | ३ | २ | ३ | ३ | २ | ३ | २ | ३ |
| (९) | १ | १ | १ | १ | १ | १ | १ | १ | १ |
| | ५६ | ५३ | ७४ | ६२ | ३९ | ७८ | ३४ | ३३ | ५४ |

तत्र यदि अल्पसंख्यकगणान्तर्गतत्वं दोषाय इति कृत्वा विभिन्नभाष्याणां दोषनिरूपणं कृतं स्यात् तदा इत्थमेव व्यवस्था—

| | | | | | | |
|---|---|---|---|---|---|---|
| तत्र भास्करः | २५ | सूत्रेषु | एकाकी पाठभेदकारी | | | |
| | ३ | ,, | अन्यैकेन सह मिलित्वा पाठभेदकारी | | | |
| | ५ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |
| | ३ | ,, | अन्यत्रिभिः | ,, | ,, | ,, |
| एवं च | ४६ | ,, | अल्पसंख्यकगणान्तर्गतः सन् | | | ,, |
| तथा रामानुजः | ६ | सूत्रेषु | एकाकी पाठभेदकारी | | | |
| | ९ | ,, | अन्यैकेन सह मिलित्वा | | | ,, |
| | ११ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |
| | १० | ,, | अन्यत्रिभिः | ,, | ,, | ,, |
| एवं च | ३६ | ,, | अल्पसंख्यकगणान्तर्गतः सन् | | | ,, |
| तथा निम्बार्कः | १५ | सूत्रेषु | एकाकी पाठभेदकारी | | | |
| | ४ | ,, | अन्यैकेन सह मिलित्वा पाठभेदकारी | | | |
| | ५ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |
| | ९ | ,, | अन्यत्रिभिः | ,, | ,, | ,, |
| एवं च | ३३ | ,, | अल्पसंख्यकगणान्तर्गतः सन् | | | ,, |
| तथा मध्वः | ३० | ,, | एकाकी पाठभेदकारी | | | |
| | ७ | ,, | अन्यैकेन सह मिलित्वा पाठभेदकारी | | | |
| | ६ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |
| | ४ | ,, | अन्यत्रिभिः | ,, | ,, | ,, |
| एवं च | ४७ | ,, | अल्पसंख्यकगणान्तर्गतः सन् | | | ,, |
| तथा श्रीकण्ठः | ३ | ,, | एकाकी पाठभेदकारी | | | |
| | ४ | ,, | अन्यैकन सह मिलित्वा पाठभेदकारी | | | |
| | १३ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |
| | ६ | ,, | अन्यत्रिभिः | ,, | ,, | ,, |
| एवं च | १६ | ,, | अल्पसंख्यकगणान्तर्गतः सन् | | | ,, |
| तथा श्रीपतिः | ४४ | ,, | एकाकी पठभेदकारी | | | |
| | ६ | ,, | अन्यैकेन सह मिलित्वा पाठभेदकारी | | | |
| | ८ | ,, | अन्यद्वाभ्यां | ,, | ,, | ,, |

५ सूत्रेषु अन्यत्रिभिः सह मिलित्वा पाठभेदकारी ।

एवं च ६३ „ अल्पसंख्यकगणान्तर्गतः सन् „

तथा वल्लभः १२ „ एकाकी पाठभेदकारी
४ „ अन्यैकेन सह मिलित्वा पाठभेदकारी
४ „ अन्यद्वाभ्यां „ „ „
४ „ अन्यत्रिभिः „ „ „

एवं च २४ „ अल्पसंख्यकगणान्तर्गतः सन् „

तथा विज्ञानभिक्षुः १८ „ एकाकी पाठभेदकारी
५ „ अन्यैकेन सह मिलित्वा पाठभेदकारी
२ सूत्रयोः अन्यद्वाभ्यां „ „ „
४ सूत्रेषु अन्यत्रिभिः „ „ „

एवं च २९ „ अल्पसंख्यकगणान्तर्गतः सन् „

तथा बलदेवः २४ „ एकाकी पाठभेदकारी
८ „ अन्यैकेन सह मिलित्वा पाठभेदकारी
६ „ अन्यद्वाभ्यां „ „ „
३ „ अन्यत्रिभिः „ „ „

एवं च ४१ „ अल्पसंख्यकगणान्तर्गतः सन् „

शंकरस्तु ६ „ षण्णाम् आचार्याणां विरोधी
३ „ अष्टाणाम् आचार्याणां विरोधी
२ सूत्रयोः नवानाम् आचार्याणां विरोधी

एवं च ११ सूत्रेषु अल्पसंख्यकदलान्तर्गतः सन् पाठभेदकारी ।

अत्र यदि सूत्रपाठभेदे अल्पसंख्यकगणान्तर्गतत्वं दोषाय भवति, तथा च व्यासमतानुसारित्वस्य सूचकं भवति, तदा—

| | | | |
|---|---|---|---|
| शंकरभाष्ये— | ११ दोषाः | श्रीकण्ठभाष्ये— | २६ दोषाः |
| भास्करभाष्ये— | ४६ „ | श्रीपतिभाष्ये— | ६३ „ |
| रामानुजभाष्ये— | ३६ „ | वल्लभभाष्ये— | २४ „ |
| निम्बार्कभाष्ये— | ३२ „ | विज्ञानभिक्षुभाष्ये— | २९ „ |
| माध्वभाष्ये— | ४७ „ | बलदेवभाष्ये— | ४१ „ भवन्ति । |

एतेन शंकरभाष्यस्यैव दोषाल्पत्वं सिध्यति । ततो वल्लभ-श्रीकण्ठ-विज्ञानभिक्षु-

निम्बार्क-रामानुज-[illegible]-भास्कर-मध्व-श्रीकण्ठानिति पूर्वपूर्वक्रमेण बोद्धव्यम् ।

एतदर्थम् आचार्याणां मतानुसारेण सूत्रविभागो यथा—

शङ्करः—२६०, ३०६, ३१३, ३१५, ३४२, ३८३, ४१३, ४६२, ४७६, ४९६=१०
सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

भास्करः—३८, ४७, ४९, ५७, ६९, १६९, १७५, १८०, १८५, १९०, १९३, २४१, २६६, २७६, २९३, २६८, २९९, ३०२, ३१३, ३१७, ३२२, ३२३, ३३२, ३३३, ३३७, ३३८, ३४५, ३६१, ३६२, ३७५, ३८२, ३९०, ३९२, ३९३, ३९५, ४३३, ४३८, ४४६, ४५२, ४६५, ४६८, ४८८, ५०१, ५३६, ५५१, ५५४=४६ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

रामानुजः—४९, ५०, ५१, ६५, ६८, ९८, ११५, १५०, १९०, १९१, १९२, २३२, २४१, २४५, २४७, २४८, २५०, २६२, २६६, २६९, २८३, २९६, ३०७, ३३८, ३६२, ३९५, ४४३, ४५२, ४६५, ४६७, ४८९, ४९८, ५०७, ५२७, ५३१, ५४१=३६ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

मध्वः—५७, ८६, ९८, ११५, १२३, १४०, १४६, १५८, १७९, २०७, २२८, २५८, २६६, ३१२, ३२७, ३४३, ३५५, ३६५, ३६८, ३९०, ३९४, ३९५, ३९८, ४०१, ४०२, ४१५, ४१६, ४१८, ४२४, ४४९, ४५६, ४५९, ४६३, ४६५, ४६७, ४९४, ४९६, ५०७, ५१५, ५१९, ५२०, ५२१, ५३४, ५३६, ५४४, ५५२, ५५३=४७ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

निम्बार्कः—४९, ५१, ५७, ८६, ९२, ९८, १४४, १६३, १६४, १९०, २०२, २३३, २४३, २५६, २६२, २६६, २८५, ३०४, ३४३, ३६२, ४२४, ४४३, ४६४, ४६५, ४७०, ४७६, ४७७, २९१, ४९८, ५०७, ५२६, ५४१, ५५१=३३ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

श्रीकण्ठः—४९, ५०, ५१, १५०, १८०, १९०, २३०, २३२, २४१, २४३, २५०, २६२, २६६, २८३, ३०४, ३९४, ३९८, ४३२, ४४३ ४५२, ४६५, ४६७, ५०० ५२०, ५३१, ५३९=२९ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

श्रीपतिः—१५, ४२, ६२, ८२, ८४, ८९, ९०, ९१, ९५, १०१, १०८, १०९, ११५, ११७, ११८, ११९, १२०, १३०, १४३, १५०, १६९, १७०, १८०, १९०, २१३, २१५, २२२, २५०, २६२, २६६, २८३, २८६, २८८, २९९, ३०१, ३०२, ३०७, ३०८, ३२३, ३३५, ३३८, ३४२, ३६२, ३६४, [illegible], ३९६, [illegible], [illegible], ४३१, ४३२, ४३५, [illegible], [illegible], [illegible], [illegible], [illegible], ४६७,

४७२, ५०७, ५२०, ५३१, ५४६, ५५१=६२ सूत्रेषु अल्पसंख्यक-दलान्तर्गतः ।

वल्लभः—१५, ८६, ८१, ९३, ११२, ११५, १२३, १४५, १६९, २३०, २८६, २९५, २९६, ३१२, ३१३, ३६२, ३९०, ३९२, ४१५, ४१८, ४३४, ४६४, ४७०, ४९८=२४ सूत्रेषु अल्पसंख्यकगणान्तर्गतः ।

विज्ञानभिक्षुः—६३, १०२, ११५, १२६, १६०, १७८, २३३, २४७, २६८, २९१, २९६, ३११, ३२७, ३५४, ३८०, ३९०, ३९२, ४०४, ४२६, ४५२, ४६५, ४६६, ४७०, ४९३, ४९८, ५०१, ५३२, ५४४, ५४९,=२९ सूत्रेषु अल्पसंख्यक-दलान्तर्गतः ।

बलदेवः—५५, ५७, ६८, ७८, ८९, ९९, ९८, १०१, ११६, १२४, १४४, १५४, १६० १६३, २२३, २३२, २४३, २४५, २५९, ३०४, ३४३, ३६१, ३९०, ३९२, ४१५, ४५१, ४५२, ४५३, ४५६, ४५९, ४६६, ४६८, ४७०, ५०५, ५०७ ५०९, ५४१, ५४३, ५४४, ५४९, ५५१,=४१ सूत्रेषु अल्पसंख्येकदलान्तर्गतः।

एवं च शंकरभाष्यस्य सूत्रपाठविषये सर्वेभ्योऽपि अल्पदोषत्वात् व्यासमतानुसारित्वं कल्पयितुं शक्यते । तेन यदि तस्य दोषस्य विश्लेषणं कृतं स्यात्, तदा स एकाकी एकस्मिन्नेव सूत्रे अपरेषां विरोधी भवति । अन्यत्र नवसु स्थलेषु तेन सह एकः द्वौ चत्वारः वा आचार्याः मिलिताः दृश्यन्ते, यथा—

| | | | | |
|---|---|---|---|---|
| ३१५ | सूत्रे | शंकरः | .... .... | एकाकी अपरेषां विरोधी |
| ३४२ | „ | शंकरः | श्रीपतिना | सह मिलित्वा अपरेषां विरोधी |
| ४७६ | „ | „ | निम्बार्केण | „ „ „ „ |
| २६० | „ | „ | विज्ञानभिक्षुणा | „ „ „ „ |
| ३०६ | „ | „ | रा० श्री० वि० | „ „ „ „ |
| ३८३ | „ | „ | ब० वि० वल० | „ „ „ „ |
| ४६२ | „ | „ | नि० श्री० वि० | „ „ „ „ |
| ३१३ | „ | „ | भा० व० वि० | „ „ „ „ |
| ४१३ | „ | „ | श्रीप० व० वि० | „ „ „ „ |
| ४९६ | „ | „ | भा० म० वि० | „ „ „ „ |

अधुना द्रष्टव्यं कीदृशः स पाठभेदः इति—

| | | | | | |
|---|---|---|---|---|---|
| ३०६ | सूत्रे | शांकरपाठः | "अपि च" | अन्येषां पाठः | "अपि" |
| ३१३ | „ | „ | "तत्साभाव्या"— | „ | "तत्स्वाभाव्या:" |

| | | | | | |
|---|---|---|---|---|---|
| ३८२ | सूत्रे | शांकरपाठः | 'विद्यायामिव' | अन्येषां पाठः | "विद्यायामपि" |
| ४१३ | " | " | "तद्भावा"— | " | "तद्भाव"— |
| ४६२ | " | " | "अपि च" | " | "अपि" |
| ४९६ | " | " | "क्षपयित्वा सम्पद्यते" | " | "क्षपयित्वाथ |
| " | " | " | " | " | "क्षपयित्वाथ सम्पत्स्यते" |
| २६० | " | " | "मन्त्रवर्णाच्च" | " | "मन्त्रवर्णात्" |
| ३४२ | " | " | "अपि च" | " | "अपि" |
| " | " | " | "अनुमानाभ्याम्" | " | "अनुमानाभावात्" |
| ४७६ | " | " | "ऐहिकम्" | " | "ऐहिकमपि" |
| " | " | " | "अप्रस्तुत" | " | "अप्रस्तुते" |
| ३१५ | " | " | "अन्याधिष्ठितेषु" | " | "अन्याधिष्ठिते" तथा च— |

"च"-कारवर्जनजन्यः पाठभेदः चतुर्षु सूत्रेषु (२६०, ३०६, ३४२, ४६२)।

"अपि-वर्जनजन्यः पाठभेदः ४७६ सूत्रे।

'इव'-स्थले 'अपि'-ग्रहणे पाठभेदः ३८२ सूत्रे।

'विभक्तिजन्यः पाठभेदः षट्सु सूत्रेषु (३१३, ३१५, ३४२, ४१३, ४९६, ४७६)

शब्दभेदजन्यपाठभेदः ३१३ सूत्रे दृश्यते। अयमेव अधिकरणरचनाऽरचनाजन्य-दोषगुणनिरूपणानन्तरं पाठभेदजन्यदोषगुणनिर्णयः।

तथा च दोषसंख्याल्पताक्रमेण परिचयः—

| | | | | | |
|---|---|---|---|---|---|
| शंकरभाष्ये | १० | दोषाः | रामानुजभाष्ये | ३६ | दोषाः |
| वल्लभभाष्ये | २४ | " | बलदेवभाष्ये | ४१ | " |
| श्रीकण्ठभाष्ये | २६ | " | भास्करभाष्ये | ४६ | " |
| विज्ञानभिक्षुभाष्ये | २९ | " | माध्वभाष्ये | ४७ | " |
| निम्बार्कभाष्ये | ३३ | " | श्रीपतिभाष्ये | ६३ | " भवन्ति। |

इदानीं द्रष्टव्यं कस्य केन सह कीदृशः सम्बन्धः। तद् यथा—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा० रा० | १२ | रा० म० | १९ | नि० व० | १८ | श्री० व० | ५ |
| भा० नि० | १० | रा० श्री० | ३० | नि० वि० | ६ | श्री० व० | ४ |
| भा० म० | १२ | रा० श्रीप० | २७ | नि० बल० | १५ | श्री० बल० | १२ |
| भा० श्री० | ११ | रा० व० | १२ | म० श्री० | १३ | श्रीप० व० | ९ |
| भा० श्रीप० | ९ | रा० वि० | ८ | म० श्रीप० | १५ | श्रीप० वि० | ३ |
| भा० व० | [illegible] | रा० बल० | १७ | म० व० | १६ | श्रीप० बल० | ११ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा० वि० | ६ | नि० म० | ११ | म० वि० | ६ | व० वि० | ८ |
| भा० बल० | १० | नि० श्री० | १८ | म० बल० | १७ | व० बल० | ११ |
| रा० नि० | २२ | नि० श्रीप० | १४ | श्री०श्रीप० | २४ | वि० बल० | ५ |

अथ यदि मतसाम्याधिक्यक्रमेण एतेषां विन्यासः कृतः स्यात् तदा—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| रा० श्री० | ३० | म० व० | १६ | भा० श्री० | ११ | रा० वि० | ८ |
| रा० श्रीप० | २७ | म० श्रीप० | १५ | नि० म० | ११ | व० वि० | ८ |
| श्री० श्रीप० | २४ | नि० बल० | १५ | श्रीप० बल० | ११ | भा० वि० | ६ |
| रा० नि० | २२ | नि० श्रीप० | १४ | व० बल० | ११ | म० वि० | ६ |
| रा० म० | १९ | म० श्री० | १३ | भा० नि० | १० | नि० वि० | ६ |
| नि० श्री० | १८ | भा० रा० | १२ | भा० बल० | १० | श्री० व० | ५ |
| नि० व० | १८ | भा० म० | १२ | भा० श्रीप० | ९ | वि० बल० | ५ |
| रा० बल० | १७ | रा० व० | १२ | भा० व० | ९ | श्री० वि० | ४ |
| म० बल० | १७ | श्री० बल० | १२ | श्रीप० ब० | ९ | श्रीप०वि० | ३ इति। |

एतेन प्रतीयते रामानुज-श्रीकण्ठ-भाष्ययोः ३० संख्यकेषु सूत्रेषु साम्यम्। तथा रामानुज-श्रीपति-भाष्ययोः २७ संख्यकेषु सूत्रेषु साम्यम् इत्यादि। ततश्च श्रीकण्ठः यथा रामानुजस्य अनुगामी, श्रीपतिरपि यथा रामानुजस्य अनुसारी, न तथा अपरः अपरस्य इति प्रतीयते, एवं च मध्वापेक्षया निम्बार्कः रामानुजानुगामीत्यपि बुध्यते। एतेन एतेषां समयोऽपि ज्ञायते।

## सूत्रयोगे दोषगुणनिर्णयः।

इदानीं द्रष्टव्यं सूत्रद्वयैकीकरणफलम्। दृश्यते च शंकरपठितसूत्राणां मध्ये बहुषु स्थलेषु भास्कर-रामानुजादिभिः पृथक् सूत्रद्वयम् एकीकृतम्। अत्रापि न कैरपि आचार्यैः एतदेकीकरणफलं विचारितम्। न वा तदर्थं शंकरात्पूर्वं किमपि प्राचीनप्रमाणं प्रदर्शितम्। अर्वाचीनैः प्राचीनपाठादीनां शोधने परिवर्त्तने वा प्रवृत्ते प्राचीनतरप्रमाणम् अपेक्षणीयम्—इत्येव उचितम्, तत्तु नात्र कृतम्। यत्र कुत्रचित् क्वचिदपि भाष्ये एतद्विषयकं किमपि आलोचनं दृश्यते, तत्तु स्वोत्प्रेक्षित-युक्तिमूलमेव। एतेन अनुमीयते शंकरपरभविकैः भाष्यकृद्वर्गैः शंकर-भाष्यात् प्राचीनतरभाष्यादिकं न दृष्टम्। व्याससम्मतसूत्रपाठादीनां विनिर्णये व्यासानुमोदितपाठस्यैव प्रामाण्यं, न तु भाष्यकृतां स्वोद्भावित-युक्ति-तर्कादीनां, तर्काप्रतिष्ठानात्। अतोऽत्रापि सूत्रद्वयैकी-करणे, अधिकभाष्यकृतां सम्मतिरेव व्यासानुमोदितत्वे प्रमाणत्वेन गृहीतम्। ये खलु अत्र अल्पसंख्यकदलान्तर्गता आचार्याः, तेषां तत्र दोष एव सञ्जातः इत्येव मन्तव्यम्। एतदर्थमेका सरणिः अत्र विरच्यते ततः सर्वं ज्ञातव्यं स्पष्टं भविष्यति।

# चतुर्थी सरणिः

## सूत्रद्वययोगप्रदर्शनपरा ।

(१ अ० १ पा०)

| | | |
|---|---|---|
| २। | जन्माद्यस्य यतः | |
| ३।' | शास्त्रयोनित्वात् | वल्लभः |

(१ अ० ३ पा०)

| | | |
|---|---|---|
| ३।६६ | नानुमानमतच्छब्दात् | |
| ४।६७ | प्राणभृच्च | रा० श्री० |

(२ अ० १ पा०)

| | | |
|---|---|---|
| १७।१५१ | असद्व्यपदेशान्नेति चेन्न धर्मान्तरेणवाक्यशेषात् | |
| १८।१५२ | युक्तेः शब्दान्तराच्च | रा० नि० श्री० |
| ३५।१६९ | न कर्माविभागादिति चेन्नानादित्वात् | |
| ३६।१७० | उपपद्यते चाप्युपलभ्यते च | रा० नि० श्री०+श्रीप० |

(२ अ० २ पा०)

| | | |
|---|---|---|
| १।१७२ | रचनानुपपत्तेश्च नानुमानम् | |
| २।१७३ | प्रवृत्तेश्च | रा० श्री० श्रीप० |

(२ अ० ३ पा०)

| | | |
|---|---|---|
| ३।२१९ | गौण्यसम्भवात् | |
| ४।२२० | शब्दाच्च | रा० नि० श्री० श्रीप० बल० |
| २६।२४२ | व्यतिरेको गन्धवत् | |
| २७।२४३ | तथा च दर्शयति | रा० म० श्रीप०+नि० श्री० बल० |
| ३४।२५१ | विहारोपदेशात् | |
| ३५।२५२ | उपादानात् | रा० श्री० श्रीप० |

(२ अ० ४ पा०)

| | | |
|---|---|---|
| २।२७१ | गौण्यसम्भवात् | |
| ३।२७२ | तत्प्राक्श्रुतेश्च | रा० श्री० श्रीप० |
| ५।२७४ | सप्तगतेर्विशेषितत्वाच्च | |
| ६।२७५ | हस्तादयस्तु स्थितेऽतो नैवम् | श्रीप० |
| १४।२८३ | ज्योतिराद्यधिष्ठानं तु तदामननात् | |
| १५।२८४ | प्राणवता शब्दात् | रा० श्री० श्रीप० |

१८।२८७ भेदश्रुतेः }
१९।२८८ वैलक्षण्याच्च } रा० नि० श्री०+श्रीप०

( १ अ० २ पा० )

२०।३३८ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् }
२१।३३९ दर्शनाच्च } रा०+श्री०

( ३ अ० ३ पा० )

३५।३९४ अन्तरा भूतग्रामवत् स्वात्मनः } भा०+रा० श्री० श्रीप०
३६।३९५ अन्यथा भेदानुपपत्तेरिति चेन्नोपदेशान्तरवत् } +नि०
४७।४०६ विद्यैव तु निर्द्धारणात् }
४८।४०७ दर्शनाच्च } रा० नि० श्री० श्रीप०

( ३ अ० ४ पा० )

२३।४४८ पारिप्लवार्था इति चेन्न विशेषितत्वात् }
२४।४४९ तथा चैकवाक्योपबन्धात् } भा०

( ४ अ० २ पा० )

१२।५०८ प्रतिषेधादिति चेन्न शारीरात् }
१३।५०९ स्पष्टो ह्येकेषाम् } भा० रा० नि० श्री० श्रीप०

एवं च यदि भाष्यसंख्यानुसारेण सूत्राणां विभागः क्रियते तदा—

| | | | | | |
|---|---|---|---|---|---|
| ( १ ) | भा० | ४४८+४४९ | | रा० श्री० श्रीप० | १७२+१७३ |
| | श्रीप० | २७४+२७५ | ( ४ ) | रा० नि० श्री० श्रीप० | १६९+१७० |
| | व० | २+३ | | ,, | २८७+२८८ |
| ( २ ) | रा०श्री० | ६६+६७ | | ,, | ४०६+४०७ |
| | ,, | ३३८+३३९ | ( ५ ) | भा०रा०नि०श्री०श्रीप० | ५०८+५०९ |
| ( ३ ) | रा०नि०श्री० | १५१+१५२ | | ,, | ३९४+३९५ |
| | रा०श्री०श्रीप० | २५१+२५० | | रा०नि०श्री०श्रीप०वल | ११९+१२० |
| | ,, | २७१+२७२ | ( ६ ) | रा०नि०म०श्री०श्रीप० | |
| | ,, | २८३+२८४ | | वल० | २४२+२४३ |

तथापि एकस्मिन् स्थले यत्र षट् आचार्याः सूत्रद्वयैकीकरणे पक्षपातिनः भवन्ति, तत्र सर्वे आचार्याः सूत्रपाठविषये न अभिन्नमतावलम्बिनः । तत्र ते द्विधा विभक्ताः जाताः । एकस्मिन् पक्षे रा० म० श्रीप० इति त्रयः आचार्याः, अन्यस्मिन् पक्षे नि० श्री० वल० इति त्रयः आचार्याः सूत्रपाठविषये विरोधं चक्रुः । एवं च यत्र षट् आचार्याः सूत्रद्वयैकीकरणे अभि-

अपिनः तत्र ते अधिकसंख्यकाः अभवन् । तेन शंकरः, भास्करः, वल्लभः विज्ञानभिक्षुश्च अल्पसंख्यकाः सन्तः सूत्रद्वयैकीकरणे विरोधिनः इत्येव दृश्यते । एतेषां श० भा० व० वि० नाम आचार्याणां मध्ये शंकरः भास्करश्च अन्येभ्यः सर्वेभ्यः प्राचीनौ । सूत्रद्वययोगाभिलाषिणोऽपि अवशिष्टाः आचार्याः न प्राचीनतरं प्रमाणं प्रदर्शयामासुः । अतः एतेन अल्पसंख्यकानाम् आचार्याणां शंकर-भास्कर-वल्लभ-विज्ञानभिक्षूणां दोषः न गुरुत्वाय कल्प्यते । ततश्च —

भास्करः— ३९४, ४४८, ५०८ इति त्रिषु सूत्रेषु सूत्रद्वययोगपक्षपाती, तेन स दोषी भवति, २४२ सूत्रे योगविरोधित्वात् अल्पसंख्यकगणान्तर्गतः सन् पुनरेव दोषी भवति ।

रामानुजश्च—६६, १५१ १६९ १७२ २१९ २४२ २५१ २७१ २८३ २८७ ३३८ ३९४ ४०६ ५०८ इति १४ सूत्रेषु तथा ।

मध्वस्तु— २४२ सूत्रे एव तथा ।

निम्बार्कश्च—१५१ १६९ २१९ २४२ २८७ ३९४ ४०६ ५०८ इति ८ सूत्रेषु तथा ।

श्रीकण्ठस्तु—६६ १५१ १६९ १७२ २१९ २४२ २५१ २७१ २८३ २८७ ३३८ ३९४ ४०६ ५०८ इति १४ सूत्रेषु तथा ।

श्रीपतिश्च—१६९ १७२ २१९ २४२ २५१ २७१ २७४ २८३ २८७ ३९४ ४०६ ५०८ इति १२ सूत्रेषु तथा ।

वल्लभश्च—२ सूत्रे; तेन एकस्मिन् स्थले एव तथा. परन्तु २४२ सूत्रे योगविरोधित्वात् अल्पसंख्यकान्तर्गतः सन् दोषी ।

विज्ञानभिक्षुस्तु—न कुत्रापि सूत्रद्वयमेकीकृतवान् । परन्तु २४२ सूत्रे अल्पसंख्यकान्तर्गतत्वात् सूत्रद्वययोगविरोधी सन् दोषी ।

बलदेवः पुनः—२१९, २४२, सूत्रयोः सूत्रद्वययोगपक्षपाती ।

शंकरस्तु २४२ सूत्रे योगविरोधित्वात् अल्पसंख्यकगणान्तर्गतः सन् दोषी भवति । एवं च—

भास्करः—४ स्थलेषु दोषी, तत्र—
(३ स्थलेषु योगजन्यः,
१ स्थले तद्विरोधजन्यः )
श्रीपतिः १२ स्थले दोषी „
रामानुजः १४ स्थलेषु दोषी
मध्वः १ स्थले „
निम्बार्कः ८ स्थलेषु „

वल्लभः २ स्थलयोः दोषी तत्र—
(१ स्थले योगजन्यः, १ स्थले तद्विरोधजन्यः,)
बलदेवः २ स्थलयोः दोषी ।
विज्ञानभिक्षुः १ स्थले दोषी, योगविरोधजन्यः ।
श्रीकण्ठः १४ स्थलेषु दोषी
शंकरोऽपि १ स्थले दोषी, योगविरोधजन्यः ।

अत्र शंकरः, भास्करः, वल्लभः, विज्ञानभिक्षुश्च एते चत्वारः आचार्याः २४२ सूत्रे अल्पसंख्यकदलान्तर्गतत्वात् सूत्रद्वययोगाविरोधित्वाच्च दोषिणः, अन्ये सर्वे सूत्रद्वययोगजन्यदोषिणः इति विवेकः।

इदानीं द्रष्टव्यं कस्य केन सह कीदृशः सम्बन्धः, तद् यथा—

| | | | | | |
|---|---|---|---|---|---|
| भा० रा० | २ | रा० म० | १ | नि० श्री० | ८ |
| भा० नि० | २ | रा० श्री० | १४ | नि० श्रीप० | ७ |
| भा० श्री० | २ | रा० श्री० | ११ | नि० वल० | २ |
| भा० श्रीप० | २ | रा० वल० | २ | म० श्री० | १ |
| रा० नि० | ८ | नि० म० | १ | म० श्रीप० | १ |
| म० वल० | १ | | | श्री० वल० | २ |
| श्री० श्रीप० | १२ | | | श्रीप० वल० | २ |

अथ यदि संख्याधिक्यक्रमेण विन्यस्यते तदा इत्थम्—

| | | | | | |
|---|---|---|---|---|---|
| रा० श्री० | १४ | भा० नि० | २ | रा० म० | १ |
| श्री० श्रीप० | १२ | भा० श्री० | २ | नि० म० | १ |
| रा० श्रीप० | ११ | भा० श्रीप० | २ | म० श्री० | १ |
| रा० नि० | ८ | रा० वल० | २ | म० श्रीप० | १ |
| नि० श्री० | ८ | नि० वल० | २ | म० वल० | १ |
| नि० श्रीप० | ७ | श्री० वल० | २ | | |
| भा० रा० | २ | श्रीप० वल० | २ | | |

एतेन प्रतीयते श्रीकण्ठः यथा रामानुजानुगामी, श्रीपतिश्च यथा तस्यैवानुसारी, तथा श्रीपतिः यथा श्रीकण्ठस्य अनुगामी न तथा अन्यः अन्येषाम्। एवं निम्बार्क-श्रीकण्ठ-श्रीपतीनां मध्ये निम्बार्कः यथा रामानुजानुगामी, श्रीकण्ठः तथैव निम्बार्कानुगामी इति। एतेन एतेषाम् आविर्भावकालोऽपि निर्णेतुं शक्यते।

---

## सूत्रविभागे दोषगुणनिर्णयः।

इदानीं द्रष्टव्यं सूत्रविभागकरणफलम्। तत्र शंकरपठितानां सूत्राणां बहूनां, बहुभिः भाष्यकारैः द्विधा कृतम्। अत्र यदि अल्पसंख्यकगणान्तर्गतत्वं दोषाय भवेत्, तदा विषयेऽस्मिन् कस्य कति दोषाः निर्णेतुं शक्यन्ते। एतदर्थम् यावो येषां सूत्राणां विभागः, येन भाष्यकारेण कृतः, तत्प्रदर्शनार्थम् एका सरणिः अधस्तात् संकल्प्यते। तद् यथा—

# पञ्चमी सरणिः

## सूत्रविभागप्रदर्शनपरा ।

( १ अ० ३ पा० )

१।३ ३५।९८ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्—
{ क्षत्रियत्वावगतेश्च ( रा० ) क्षत्रियत्वगतेश्च ( श्री० )
{ उत्तरत्र चैत्ररथेन लिंगात् ( रा० श्री० )

„ ३८।१०१ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च—
{ श्रवणाध्ययनार्थप्रतिषेधात् ( रा० नि० श्री० )
{ स्मृतेश्च ( रा० नि० श्री० )

( १ अ० पा० ४ )

१।४ ५।१११ वदतीति चेन्न प्राज्ञो हि प्रकरणात्—
{ वदतीति चेन्न प्राज्ञो हि ( म० )
{ प्रकरणात् ( म० )

„ २६।१३२ आत्मकृतेः परिणामात्—
{ आत्मकृतेः ( रा० श्री० )
{ परिणामात् ( रा० श्री० )

२।१ ११।१४५ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसंगः—
{ तर्काप्रतिष्ठानादिति ( रा० श्री० )
{ अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसंगः ( रा० श्री० )

२।३ ६।२२२ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः—
{ प्रतिज्ञाहानिरव्यतिरेकात् ( रा० श्री० )
{ शब्देभ्यः ( रा० श्री० )

„ १२।२२८ पृथिव्यधिकाररूपशब्दान्तरेभ्यः—
{ पृथिवी ( रा० नि० श्री० )
{ अधिकाररूपशब्दान्तरेभ्यः ( रा० नि० श्री० )

३।१ ८।२९९ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च—
{ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम् ( म० वल० )
{ यथेतमनेवं च ( म० वल० )

३।२ २५।३४३ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्—

{ प्रकाशादिवच्चावैशेष्यम् ( म० बल० )
{ प्रकाशश्च कर्मण्यभ्यासात् ( म० बल० )

३।३ ३।३६२ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः—

{ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ( म० बल० )
{ सववच्च तन्नियमः ( म० बल० )

„ ५०।४०९ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्—

{ अनुबन्धादिभ्यः ( म० बल० )
{ प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ( म० बल० )

४।४ १७।५५० जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च—

{ जगद्व्यापारवर्जम् ( म० )
{ प्रकरणादसन्निहितत्वाच्च ( म० )

अत्र म० १११, ५५० इति सूत्रद्वये सूत्रविभागपक्षपाती ।

रा० श्री० ९८, १३२, १४५, २२२ सूत्रेषु सूत्रविभागपक्षपातिनौ ।

म० बल० २९९, ३४३, ३६२, ४०९ „ „ „

रा०नि०श्री० १०१, २२८ इति सूत्रद्वये सूत्रविभागपक्षपातिनः ।

तेन सर्वे सूत्रविभागकारिणः आचार्याः अल्पसंख्यकदलान्तर्गतत्वात् दोषिणः भवन्ति । तत्रापि—

रामानुजः—९८, १०१, १३२, १४५, २२२, २२८ इति षट्सु स्थलेषु सूत्रविभागपक्षपाती ।

श्रीकण्ठः—९८, १०१, १३२, १४५, २२२, २२८ इति षट्सु स्थलेषु सूत्रविभागपक्षपाती ।

निम्बार्कः—१०१, २२८ इति द्वयोः स्थलयोः सूत्रविभागपक्षपाती ।

मध्वः—१११, २९९, ३४३, ३६२, ४०९, ५५० इति षट्सु स्थलेषु सूत्रविभागपक्षपाती ।

बलदेवः—२९९, ३४३, ३६२, ४०९ इति चतुर्षु स्थलेषु सूत्रविभागपक्षपाती ।

तेन शंकरः, भास्करः, श्रीपतिः वल्लभः, विज्ञानभिक्षुश्च एते पञ्च अधिकसंख्यकदलान्तर्गतत्वात् दोषवर्जिताः भवन्ति । तेन—

रामानुजः—६ स्थलेषु निम्बार्कः—२ स्थलयोः बलदेवः—४ स्थलेषु दोषी भवति ।
श्रीकण्ठः—६ „ मध्वः—६ स्थलेषु

इदानीं द्रष्टव्यं कस्य केन सह कीदृशः सम्बन्धः इति, तद् यथा—

रा० श्री० ६, म० बल० ४, रा० नि० २, नि० श्री० २ स्थलेषु मिलितौ ।

तेन श्रीकण्ठः यथा रामानुजपक्षपाती बलदेवश्च यथा मध्यस्य न तथा अन्योऽन्येषाम् ।

### अतिरिक्तसूत्रग्रहणे दोषगुणनिर्णयः।

इदानीं द्रष्टव्यम् अतिरिक्तसूत्रग्रहणफलम्। दृश्यते च बहूनि सूत्राणि रामानुजादिभिः अतिरिक्तत्वेन सन्निवेशितानि। तत्रापि तैः न प्रमाणत्वेन प्राचीनतरभाष्यादीनि उद्धृतानि उल्लिखितानि वा। दृश्यते च प्रायेण एतानि अतिरिक्तसूत्राणि शंकरभाष्यान्तर्गत-वाक्यविशेषा एव। वस्तुतस्तु सम्प्रदायोपदेशम् अन्तरेण बुद्धिबलेन सूत्रार्थनिर्णये प्रवृत्ते सति, एकमेव सम्भाव्यते। यतः भाष्यलक्षणमेव—

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" ॥ इति।

तेन सूत्रानुरूपेण वाक्येन यत्र भाष्यं रचितम्, तच्च स्ववाक्यं यत्र व्याख्यातमपि भाष्यकृता, तत्र स्वबुद्धिबलेन अलब्धोपदेशेन सूत्रार्थनिर्णये प्रवृत्ते, भाष्यवाक्यमपि सूत्रत्वेन गृहीतम् इत्येव सम्भवति। एतदेव अतिरिक्तसूत्रत्वं शांकरभाष्यपर्यालोचनेन अवगम्यते। स्यादेतत्, अधुना कानि तानि अतिरिक्तसूत्राणि इत्येव आलोचनीयम्।

# षष्ठी सरणिः

### अतिरिक्तसूत्रप्रदर्शनपरा।

| | | |
|---|---|---|
| १।१ ( ८क, ) | प्रतिज्ञाविरोधात् | रा० नि० श्री० श्रीप० |
| १।२ ( १५क, ४६-४७ ) | अत एव च स ब्रह्म | रा० नि० श्री० |
| | अत एव च तद् ब्रह्म | नि० |
| | अत एव स ब्रह्म | श्री० |
| „ ( २३क, ५४-५५ ) | प्रकरणात् | बल० |
| २।१ ( ४क, १३८-१३९ ) | दृश्यते तु | म० |
| २।२ ( ३४क, २०५-२०६ ) | शरीराणाञ्चानवस्थितपरिमाणत्वात् | श्रीप० |
| २।३ ( १२क, २२८-२२९ ) | पृथिवी | रा० नि० श्री० |
| „ ( १८क, २३४-२३५ ) | युक्तेश्च | म० |
| २।४ ( २क, २७१-२७२ ) | प्रतिज्ञानुरोधाच्च | म० |
| ३।१ ( २१क, ३१२-३१३ ) | स्मरणाच्च | म० |
| ३।२ ( ३१क, ३४९-३५० ) | दर्शनात् | म० |
| ३।४ ( १६क, ४४१-४४२ ) | कामकारेण चैके | वि० |
| ४।२ ( १९क, ५१५-५१६ ) | यावद्देहभावित्वाद्दर्शयति च | म० |
| ४।३ ( ३क, ५२०-५२१ ) | वरुणाच्चाचीन्द्र-प्रजापती | ब० |

एवं च श्रीप० २०५ सूत्रात्परं, बल० ५४ सूत्रात्परं, वि० ४४१ सूत्रात्परं, व० ५२० सूत्रात्परं, म० १३८, २३४, २७१, ३१२, ३४९, ५१५ सूत्रेभ्यः परं, १० स्थलेषु अतिरिक्तसूत्रं पठितवान्।

रा० निं० श्री० ४६, २२८ सूत्राभ्यां परं २ स्थलयोः अतिरिक्तसूत्रं पठितवन्तः

रा० नि० श्री० श्रीप० ८ सूत्रात्परं १ स्थले ,, ,,

| | | | | | |
|---|---|---|---|---|---|
| तेन रामानुजः—८ क, ४६-४७, २२८-२२९ | इति | ३ स्थलेषु | अतिरिक्तसूत्रं | गृहीतवान् |
| निम्बार्कः—८ क, ४६-४७, २२८-२२९ | ,, | ३ स्थलेषु | ,, | ,, |
| श्रीकण्ठः—८ क, ४६-४७, २२८-२२९ | ,, | ३ स्थलेषु | ,, | ,, |
| श्रीपतिः—८ क, २०५-२०६ | ,, | २ स्थलयोः | ,, | ,, |
| मध्वः—१३८-१३९, २३४-२३५, २७१-२७२ ३१२-३१३, ३४९-३५०, ५१५-५१६ | ,, | ६ स्थलेषु | ,, | ,, |
| वल्लभः—५२०-५२१ | ,, | १ स्थले | ,, | ,, |
| विज्ञानभिक्षुः—४४१-४४२ | ,, | १ ,, | ,, | ,, |
| बलदेवः—५४-५५ | ,, | १ ,, | ,, | ,, |

अत्र अष्ट आचार्याः अल्पसंख्यकदलान्तर्गताः सन्तः दोषभागिनः सञ्जाताः, तद् यथा—

| | | | | | |
|---|---|---|---|---|---|
| रामानुजः | ३ स्थलेषु | दोषी | मध्वः | ६ स्थलेषु | दोषी |
| निम्बार्कः | ३ ,, | ,, | वल्लभः | १ स्थले | ,, |
| श्रीकण्ठः | ३ ,, | ,, | विज्ञानभिक्षुः | १ ,, | ,, |
| श्रीपतिः | २ स्थलयोः | ,, | बलदेवः | १ ,, | ,, |

तेन अतिरिक्तसूत्रग्रहणे केवलं शंकर-भास्करौ न दोषभागिनौ दृश्येते। अपरे सर्वे दोषिणः इति प्रतिभाति।

इदानीं द्रष्टव्यं कस्य केन सह कीदृशः सम्बन्धः इति, तद् यथा—

| | | | | | |
|---|---|---|---|---|---|
| रा० नि० | ३ | नि० श्री० | ३ | नि० श्रीप० | १ |
| रा० श्री० | ३ | रा०श्रीप० | १ | श्री० श्रीप० | १ |

एतेन प्रतीयते यथा निम्बार्कः रामानुजानुगामी तथा श्रीकण्ठोऽपि, पुनः तथैव श्रीकण्ठः निम्बार्कानुगामी इति।

---

## सूत्रवर्जने दोषगुणनिर्णयः।

इदानीं द्रष्टव्यं सूत्रवर्जनफलम्। दृश्यते च भास्करादिभिः आचार्यैः शंकरपठित-सूत्राणि वर्जितान्यपि। अत्रापि न प्राचीनतरप्रमाणानि प्रदर्शितानि। वर्जितसूत्राणि, यथा—

# सप्तमी सरणिः

## सूत्रवर्जनप्रदर्शनपरा ।

| | | | | | |
|---|---|---|---|---|---|
| २।१ | ६।१४० | दृश्यते तु | इति सूत्रं | म० भाष्ये वर्जितम् | |
| २।२ | ४५।२१६ | विप्रतिषेधाच्च | ” | भा० ” | ” |
| ३।१ | २७।३१८ | योनेः शरीरम् | ” | भा० ” | ” |
| ३।२ | ३२।३५० | सामान्यात् तु | ” | म० ” | ” |
| ” | ३४।३५२ | स्थानविशेषात् प्रकाशादिवत् | ” | भा० ” | ” |
| ३।४ | २२।४४७ | भावशब्दाच्च | ” | व० ” | ” |
| ” | ४२।४६७ | उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् | ” | भा० ” | ” |
| ” | ४६।४७१ | श्रुतेश्च | ” | भा०रा०म०नि०श्री० ” | ” |
| ४।३ | ५।५२२ | उभयव्यामोहात् तत्सिद्धेः | ” | भा० रा० नि० श्री० ” | ” |

अत्र म० १४०, ३५० इति सूत्रद्वयं, भा० २१६, ३१८, ३५२, ४३७ इति सूत्राणि, व० ४४७ सूत्रम्—एवम् एकैकः आचार्यः ७ स्थलेषु पूर्वगृहीतसूत्रं परित्यक्तवान् ।

भा० रा० नि० श्री० ४ आचार्याः ५२२ सूत्रे, अतः १ स्थले गृहीतसूत्रं परित्यक्तवन्तः ।

भा०रा०म०नि०श्री० ५ ” ४७१ ” ” १ ” ” ” ।

तेन—

भास्करः—२१६, ३१८, ३५२, ४६७, ४७१, ५२२ इति ६ स्थलेषु—

रामानुजः—४७१, ५२२ इति द्वयोः स्थलयोः—

मध्वः—१४०, ३५०, ४७१ इति ३ स्थलेषु—

निम्बार्कः—४७१, ५२२ इति २ स्थलयोः—

श्रीकण्ठः—४७१, ५२२ ” २ ” —

वल्लभः—४४७ ” १ स्थले—

प्राचीनैः गृहीतानां सूत्राणां वर्जनं कृतवान् ।

तेन अल्पसंख्यकगणान्तर्गतत्वात्—

| | | |
|---|---|---|
| रामानुजः—२ स्थलयोः | निम्बार्कः—२ स्थलयोः | वल्लभः—१ स्थले |
| मध्वः—३ स्थलेषु | श्रीकण्ठः—२ स्थलयोः | भास्करः—४ स्थलेषु |

दोषी भवति ।

अत्र भास्करः ४७१ सूत्रे, रा० म० नि० श्री० इति चतुर्भिः आचार्यैः सह मिलितः दृश्यते । तेन अत्र स समसंख्यकगणान्तर्गतः सन् न दोषभाक् भवति । किन्तु अन्येषु स्थलेषु अल्पसंख्यकगणान्तर्गतः सन् स चतुर्षु स्थलेषु दोषभाक् जातः इति विशेषः ।

[illegible] केन सह कीदृशः सम्बन्धः इति, तद् यथा—

| | | | |
|---|---|---|---|
| भा० रा० २ स्थलयोः | रा० नि० २ स्थलयोः | भा० म० १ स्थले | म० श्री० १ स्थले |
| भा० नि० २ ,, | रा० श्री० २ ,, | रा० म० १ ,, | मिलितौ। |
| भा० श्री० २ ,, | नि० श्री० २ ,, | नि० म० १ ,, | |

एतेन रामानुजः, निम्बार्कः, श्रीकण्ठश्च भास्करानुगामिनः, निम्बार्कः श्रीकण्ठश्च रामानुजानुगामीति दृश्यते ।

---

### सूत्रक्रमविपर्यये दोषगुणनिर्णयः ।

अधुना द्रष्टव्यं—सूत्र-क्रम-विपर्ययफलम् । दृश्यते च शंकरपठितसूत्रक्रमस्य चतुर्षु स्थलेषु अपरैः आचार्यैः व्यतिक्रमः कृतः, तत्रापि प्राचीनतरप्रमाणं न प्रदत्तम् । तद् यथा—

# अष्टमी सरणिः

## सूत्रक्रमविपर्ययप्रदर्शनपरा

| शंकरपाठः | २।१ | मध्वपाठः |
|---|---|---|
| ४। न विलक्षणत्वादस्य तथात्वं च शब्दात् | | ४। न विलक्षणत्वादस्य तथात्वं च शब्दात् |
| ५। अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् | | ५। दृश्यते तु |
| ६। दृश्यते तु | | ६। अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् |
| ७। असदिति चेन्न प्रतिषेधमात्रत्वात् | | ७। दृश्यते च |
| | | ८। असदिति चेन्न प्रतिषेधमात्रत्वात् |

| शंकरपाठः | २।१ | रा० श्री० श्रीप०-पाठः |
|---|---|---|
| ५। अन्यत्राभावाच्च न तृणादिवत् | | ४। अन्यत्राभावाच्च न तृणादिवत् |
| ६। अभ्युपगमेऽप्यर्थाभावात् | | ५। पुरुषाश्मवदिति चेत्तथापि |
| ७। पुरुषाश्मवदिति चेत्तथापि | | ६। अंगित्वानुपपत्तेश्च |
| ८। अंगित्वानुपपत्तेश्च | | ७। अन्यथानुमितौ (च) ज्ञशक्तिवियोगात् |
| ९। अन्यथानुमितौ च ज्ञशक्तिवियोगात | | ८। अभ्युपगमेऽप्यर्थाभावात् |
| १०। विप्रतिषेधाच्चासमञ्जसम् | | ९। विप्रतिषेधाच्चासमञ्जसम् |

| शंकरपाठः | २।२ | श्रीपतिपाठः |
|---|---|---|
| ३०। न भावोऽनुपलब्धेः | | २९। न भावोऽनुपलब्धेः |
| ३१। क्षणिकत्वाच्च | | ३०। सर्वथानुपपत्तेश्च |
| ३२। सर्वथानुपपत्तेश्च | | ३१। क्षणिकत्वाच्च |
| ३३। नैकस्मिन्नसम्भवात | | ३२। नैकस्मिन्नसम्भवात् |

| शंकरपाठः | २।३ | रा० श्री० श्रीप०-पाठः |
|---|---|---|
| ३४। विहारोपदेशात् <br> ३५। | | ३४ । रा०श्री० <br> ३२ । श्रीप० } उपादानाद् विहारोपदेशाच्च |
| ३६। व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः | | ३५ । रा०श्री० <br> ३३ । श्रीप० } व्यपदेशाच्च क्रियायां न चेत् निर्देशविपर्ययः । |

| शंकरपाठः | ४।३ | श्रीपतिपाठः |
|---|---|---|
| ५। उभयव्यामोहात्तत्सिद्धेः | | ५। वैद्युतेनैव ततस्तच्छ्रुतेः |
| ६। वैद्युतेनैव ततस्तच्छ्रुतेः | | ६। उभयव्यामोहात्तत्सिद्धेः |

अत्र मध्वः रामानुजः श्रीकण्ठः श्रीपतिश्च सर्वे अल्पसंख्यक-दलान्तर्गतत्वाद् दोषभागिनः भवन्ति । तेन—

२।२।५ <br> २।३।२४ } रामानुजः २ स्थलयोर्दोषी, | २।२।५ <br> २।३।२४ } श्रीकण्ठः २ स्थलयोर्दोषी

२।१।४-७ मध्वः १ स्थले दोषी, | २।२।५ <br> २।२।३० <br> २।३।२४ <br> ४।३।५ } श्रीपतिः ४ स्थलेषु दोषी भवति ।

अपरे षट् आचार्याः शंकरः, भास्करः, निम्बार्कः, श्रीपतिः, विज्ञानभिक्षुः, बलदेवश्च तेन दोषवर्जिताः भवन्ति ।

इदानीं द्रष्टव्यम् अत्र कस्य केन सह कीदृशः सम्बन्धः, इति, तद् यथा—

रा० श्री० २।२।५ सूत्रे, रा०श्रीप० २।२।५ सूत्रे, श्री०श्रीप० २।२।५ सूत्रे,
" २।३।२४ " " २।३।२४ " " २।३।२४ "
अभिन्नमतावलम्बिनौ संजातौ ।

तेन इदं निर्गलितं फलम्—

रा० श्री० २ स्थलयोः मिलितौ
रा० श्रीप० " "
श्री०श्रीप० " "

एवं सूत्रक्रमविपर्यये यदैकमत्यं तत्तु रा०श्री०श्रीप० एतत् त्रिषु आचार्येषु दृश्यते । मध्वाचार्य्येण सह न कस्यापि ऐकमत्यं वर्त्तते । श्रीपतिः आचार्य्यस्तु द्वयोः स्थलयोः एकाकी सूत्रक्रमविपर्ययपक्षपाती ।

## द्वितीयपादसमालोचनम् ।

इदानीं यदि अधिकरणरचनानियमनिरपेक्षाधिकरणरचना-सूत्रपाठ-सूत्रयोग-सूत्रविभाग-सूत्रग्रहण-सूत्रवर्जन-सूत्रक्रमविपर्ययजन्य-दोषगुणानां समाहारः क्रियेत, तदा इत्थमेव फलं दृश्यते—

| | अधिकरणरचनायाम् | अधिकरणारचनायाम् | समष्टिः | सूत्रपाठे | सूत्रयोगे | सूत्रविभागे | सूत्रग्रहणे | सूत्रवर्जने | सूत्रविपर्यये | समष्टिदोषाः |
|---|---|---|---|---|---|---|---|---|---|---|
| शां० | १ | १२ | १३ | १० | १ | ... | ... | ... | ... | २४ |
| भा० | १ | १० | ११ | ४६ | ४ | ... | ... | ४ | ... | ६५ |
| रा० | १९ | ४ | २३ | ३६ | १४ | ६ | ३ | २ | २ | ८६ |
| नि० | ४० | ३ | ४३ | ३३ | ८ | २ | ३ | २ | ... | ९१ |
| म० | ३२ | ७४ | १०६ | ४७ | १ | ६ | ६ | ३ | १ | १७० |
| श्री० | १२ | १६ | २८ | २६ | १४ | ६ | ३ | २ | २ | ८१ |
| श्रीप० | १० | ९ | १९ | ६३ | ११ | ... | २ | ... | ४ | ९८ |
| व० | ४६ | ३० | ७६ | २४ | २ | ... | १ | १ | ... | १०४ |
| वि० | ? | ? | ? | २९ | १ | ... | १ | ... | ... | ३१ |
| बल० | ? | ? | ? | ४१ | २ | ... | १ | ... | ... | ४४ |
| | १६१ | १५७ | ३१९ | ३५५ | ५८ | २० | २० | १४ | ९ | ७९५ |

अत्र विज्ञानभिक्षु-बलदेव-भाष्ययोः अधिकरणरचनाऽरचनाजन्यतुलनाफलं न प्रदर्शितम्। तयोः मुद्रितग्रन्थे अधिकरणनिर्देशस्य असाधितत्वात्, तेन अधिकरणरचनाविषयकविचारः अष्टसु भाष्येषु कृतः, पाठभेदादि-विचारस्तु दशसु भाष्येषु कृतः इति विवेकः । एवं च अष्टानां भाष्याणां मध्ये दोषाणां संख्याधिक्यक्रमः इत्थम्—

शंकरभाष्ये २४ दोषाः; श्रीकण्ठभाष्ये ८१ दोषाः; निम्बार्कभाष्ये ९१ दोषाः; वल्लभभाष्ये १०४ दोषाः;
भास्कर „ ६५ „ ; रामानुज „ ८६ „ ; श्रीपति „ ९८ „ ; मध्व „ १७० „ ।

तेन शंकरभाष्यमेव अत्र दोषाल्पत्वात्, व्यासमतसन्निकृष्टं भवति। ततः भास्करा-

दीनमिति यथायथं बोद्धव्यम् । एवम् एव अधिकरणस्वरूपविचारनिरपेक्षनिर्णयफलम्, नियम-[illegible] तु एतत् अग्रतः तृतीये पादे प्रदर्शनीयम् ।

इदानीं द्रष्टव्यं प्रागुक्तेषु सप्तसु निर्णयेषु कस्य केन सह कतिधा [illegible] वा सम्बन्धः इति ।

| भाष्य-नामानि | अधिकरण-रचनाऽ-रचनायाम् | सूत्र-पाठे | सूत्र-योगे | सूत्र-विभागे | सूत्र-ग्रहणे | सूत्र-वर्जने | सूत्रक्रम-विपर्यये | समष्टिः |
|---|---|---|---|---|---|---|---|---|
| शां० भा० | २५ | — | — | — | — | — | — | २५ |
| शां० रा० | २ | — | — | — | — | — | — | २ |
| शां० नि० | २ | — | — | — | — | — | — | २ |
| शां० म० | ११ | — | — | — | — | — | — | ११ |
| शां० श्री० | ११ | — | — | — | — | — | — | ११ |
| शां० श्रीप | ३ | — | — | — | — | — | — | ३ |
| शां० ब० | १० | — | — | — | — | — | — | १० |
| भा० रा० | २ | १२ | २ | — | — | २ | — | १८ |
| भा० नि० | १ | १० | २ | — | — | २ | — | १५ |
| भा० म० | ११ | १२ | — | — | — | १ | — | २४ |
| भा० श्री० | ११ | ११ | २ | — | — | २ | — | २६ |
| भा० श्रीप | ३ | ९ | २ | — | — | — | — | १४ |
| भा० ब० | ९ | ९ | — | — | — | — | — | १८ |
| भा० वि० | — | ६ | — | — | — | — | — | ६ |
| भा० बल० | — | १० | — | — | — | — | — | १० |
| रा० नि० | २४ | २२ | ८ | २ | ३ | २ | — | ६१ |
| रा० म० | ७ | १९ | १ | — | — | १ | — | २८ |
| रा० श्री० | ११ | ३० | १४ | ६ | ३ | २ | २ | ६८ |
| रा० श्रीप० | १६ | २७ | ११ | — | १ | — | २ | ६० |
| रा० ब० | ११ | १२ | — | — | — | — | — | २३ |

| शाख-नामानि | अधिकरण-रचनाऽरचनाभ्याम् | सूत्र-पाठे | सूत्र-योगे | सूत्र-विभागे | सूत्र-ग्रहणे | सूत्र-वर्जने | सूत्रक्रम-विपर्यये | सर्वाणि |
|---|---|---|---|---|---|---|---|---|
| रा० वि० | — | ८ | — | — | — | — | — | ८ |
| रा०बल० | — | १७ | २ | १ | — | — | — | २० |
| नि० म० | १४ | ११ | १ | — | — | १ | — | २७ |
| नि० औ० | १५ | १८ | ८ | २ | ३ | २ | — | ४८ |
| नि०औप० | १६ | १४ | ७ | — | १ |  | — | ३८ |
| नि० व० | २० | १८ | — | — | — | — | — | ३८ |
| नि० वि० | — | ६ | — | — | — | — | — | ६ |
| नि०बल० | — | १५ | २ | १ | — | — | — | १८ |
| म० औ० | ११ | १३ | १ | — | — | १ | — | २६ |
| म०औप० | ८ | १५ | १ | — | — | — | — | २४ |
| म० व० | ३२ | १६ | — | — | — | — | — | ४८ |
| म० वि० | — | ६ | — | — | — | — | — | ६ |
| म० बल० | — | १७ | १ | ४ | — | — | — | २२ |
| औ०औप० | ७ | २४ | १२ | — | १ | — | २ | ४६ |
| औ० व० | ७ | ५ | — | — | — | — | — | १२ |
| औ० वि० | — | ४ | — | — | — | — | — | ४ |
| औ०बल० | — | १२ | २ | १ | — | — | — | १५ |
| औप०व० | ११ | ६ | — | — | — | — | — | २० |
| औप०वि० | — | ३ | — | — | — | — | — | ३ |
| औप०बल० | — | ११ | २ | — | — | — | — | १३ |
| व० वि० | — | ८ | — | — | — | — | — | [illegible] |
| व० [illegible] | [illegible] | ११ | — | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| वि०बल० | — | ५ | — | — | — | — | — | [illegible] |

अथ यदि एतेषां दोषाणां संख्यानुक्रमेण विन्यासः कृतः स्यात्, तदा—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| रा० श्री० | ६८ | भा० श्री० | २६ | भा० नि० | १५ | व० वि० | ८ |
| रा० नि० | ६१ | शं० भा० | २५ | श्री० बल० | १५ | नि० वि० | ९ |
| रा० श्रीप० | ६० | भा० म० | २४ | भा० श्रीप० | १४ | भा० वि० | ६ |
| नि० श्री० | ४८ | म० श्रीप० | २४ | श्रीप० बल० | १३ | म० वि० | ६ |
| म० व० | ४७ | रा० व० | २३ | श्री० व० | १२ | वि० बल० | ५ |
| श्री० श्रीप० | ४६ | म० बल० | २२ | शं० म० | ११ | श्री० वि० | ४ |
| नि० श्रीप० | ३८ | रा० बल० | २० | शं० श्री० | ११ | श्रीप० वि० | ३ |
| नि० व० | ३८ | श्रीप० व० | २० | व० बल० | ११ | श० श्रीप० | ३ |
| रा० म० | २८ | भा० रा० | १८ | शं० व० | १० | शं० रा० | २ |
| नि० म० | २७ | भा० व० | १८ | भा० बल० | १० | शं० नि० | २ |
| म० श्री० | २६ | नि० बल० | १८ | रा० वि० | ८ | | |

तेन श्रीकण्ठः सर्वेभ्यः रामानुजानुगामी, ततः निम्बार्कः रामानुजानुगामी, ततः श्रीपतिः रामानुजानुगामीति दृश्यते। एवम्—अवशिष्टं बोद्धव्यम् इति। अयमपि आचार्याणां सम्बन्धनिर्णये एकः पन्थाः। एतेन निम्बार्क-श्रीकण्ठ-श्रीपतीनां रामानुजपरभविकत्वमपि अनुमातुं शक्यते।

एवं च दशानाम् आचार्याणाम् एकैकस्य अल्पसंख्यकगणान्तर्गतत्वात्—

१। अधिकरणरचनाऽरचनयोः
२। पाठभेदे
३। सूत्रद्वययोगे
४। सूत्रविभागे
५। अतिरिक्तसूत्रग्रहणे
६। गृहीतसूत्रवर्जने
७। सूत्रक्रमविपर्यये चेति—

एतेषु सप्तसु विषयेषु कति दोषाः भवन्ति, ते च—

| | | | | | |
|---|---|---|---|---|---|
| शंकरे | २४ | दोषाः | श्रीकण्ठे | ८१ | दोषाः |
| भास्करे | ६५ | ” | श्रीपतौ | ९९ | ” |
| रामानुजे | ८६ | ” | वल्लभे | १०४ | ” |
| निम्बार्के | ९१ | ” | विज्ञानभिक्षौ | ३१ | ” |
| मध्वे | १७० | ” | बलदेवे | ४४ | ” |

भवन्ति। तत्रापि दोषसंख्यायाः अल्पाधिक्यतुलनायां कृतायां दृश्यते शंकरे २४ दोषाः, अपरेषां सर्वेषां दोषाधिक्यम् इति। तेन शंकरः यथा व्यासमतानुसारी नापरे तथा। अतः शांकरभाष्यं यथा व्याससम्मतं न तथा अन्यान्यपि भाष्याणि भवन्ति इति अवगन्तुं शक्यते। एतच्च सूत्रार्थविचारं विनैव अधिकसंख्यकभाष्यकाराणां सम्मतिक्रमेण निरूपितम्। न तु

अधिकरणरचनानियमाविष्करणानन्तरम् एतत् निरूपणं कृतम् । अग्रे वयं तं निर्णयं पुनरपि विचारयामः, अधिकरणरचनायां कोऽसौ भाष्यकारः कियद्व्यासमतानुसारी इति । यदपि निरूपणं कृतं, तत्तु आपातसंगतमेव, तद् तु स्थूलदृशां कृते स्थूलदृष्टौ वा इति बोद्धव्यम् । वस्तुतस्तु अत्र यो निर्णयः कृतः, सोऽपि भाष्याणां दोषादोषनिर्णये न सम्यक् पन्था भवितुमर्हति । स तु प्रायत्वेन ग्रहणीय एव, यतः प्राचीनार्वाचीनयोर्मध्ये सम्मतिबाहुल्यमेव अत्र विचारमानदण्डत्वेन गृहीतम् । समशक्तिकानां समविद्याबुद्धिबलवीर्याणां समकालीनानां मध्ये विषयविशेषे सम्मतिबाहुल्यमेव प्रमाणत्वेन ग्रहणीयम्, न तु प्राचीनार्वाचीनयोर्मध्ये सर्वस्मिन् विषये तथा भवितुमुचितम् । अर्वाचीनाः नियमेन प्राचीनानां दायादाः भवन्ति, अतस्तेषां मतं प्राचीनानां मतसापेक्षं प्राचीनानाम् अनुकरणं वा । तेन योऽयं सम्मतिबाहुल्यरूपपन्था अत्र अनुसृतः स न प्रकृतसत्यनिर्णयाय अलं, स न व्यासमतनिर्णये सम्यक् पन्थाः । एतेन सम्भावनाविषयमात्रं विज्ञापयितुं शक्यते । तेन शंकरे ये २४ दोषाः प्रदर्शिताः, भास्करादीनां मतविरोधित्वात्, भास्करे वा ये ६७ दोषाः उपस्थापिताः रामानुजादीनां मतवैलक्षण्यात्, तत्सर्वम् अर्वाचीनैः प्राचीनमतदूषणम्, प्राचीनतरं प्रमाणं विनैव, तेनायं निर्णयः न संशयानाकुलितः । एतेन कतमः भाष्यकारः कियद्व्यासमतानुवर्ती व्यासमतसन्निकृष्टः वा इत्येव ज्ञातुं शक्यते, न तु तस्य दोषसंख्यायाः सत्यत्वम् अभ्रान्तत्वं वा । तथापि अधिकसम्मत्या शंकरमतस्यैव व्यासमतानुवर्तित्वं व्यासमतसन्निकृष्टत्वं वा यथा स्यात् न तथा अन्येषाम् इत्येव सिध्यति । एवं च शंकरव्याख्याने दोषाणाम् अल्पत्वात् पादार्थनिर्णयः यथा शंकरभाष्यतः संगच्छते, तथैव व्याससम्मतपादार्थः भवेत् इति युक्तम् । अयं पादार्थः एव पादसंगतिः, अनया पादसंगत्या अधिकरणार्थः नियम्यते, ततः अधिकरणार्थेन सूत्रार्थः निरूपणीयः इति एतत्सर्वं प्रागेव उक्तम् ।

अत्र केचित् प्रत्यवतिष्ठन्ते—अधिकरणरचनानियमाविष्करणं न प्रयोजनम् । यतः सूत्रार्थाधीनः अधिकरणार्थः, तदधीनश्च पादार्थः । तेन पादार्थेन सूत्रार्थः न निर्णेतव्यः । अन्योन्याश्रयत्वात् ।

नैतद् युक्तम्, तद्व्यक्तित्वनिवेशेन शंकेयं निवार्यते । अधिकसंख्यकसूत्रैः अधिकरणार्थे निरूपिते तथा अधिकसंख्यकैः अधिकरणैः पादार्थे निरूपिते सति तेन पादार्थेन अवशिष्टाधिकरणार्थनिर्णयः सम्भवति । एवं च सूत्रार्थोऽपि निर्णेतव्यः ।

एवं च श्रुतिसंगत्यनुरोधेन सर्वाणि सूत्राणि श्रुत्यर्थपराणि इति कृत्वा अर्थात् श्रुत्यर्थसन्देहनिराकरणकानि इति कृत्वा व्याख्येयानि । शास्त्रसंगतिबलेन सर्वाणि सूत्राणि साक्षाद् वा परम्परया वा ब्रह्मप्रतिपादकानि इति कृत्वा योजनीयानि । ततश्च प्रथमाध्यायान्तर्गतसूत्राणि समन्वयसाधकानि, द्वितीयाध्यायान्तर्गतसूत्राणि अविरोधबोधकानि, तृतीयाध्यायान्तर्गतसूत्राणि साधनपराणि, तथा चतुर्थाध्यायान्तर्गतसूत्राणि फलज्ञापकानि इति कृत्वा व्याख्येयानि । समन्वयादयः च

व्याख्यानसंगतिरिति उच्यते । पादप्रतिपाद्यविषय एव पादसंगतयः । शांकरमतानुसारेण पाद-प्रतिपाद्यविषयाः प्रागेव प्रदर्शिताः, ते एवात्र पादसंगतित्वेन गृहीताः । शांकरव्याख्यानस्यैव अविसंवादित्वेन दोषाल्पत्वात् । तथापि उपलभ्यमानानां भाष्याणां मध्ये प्राचीनतमत्वमपि शांकरव्याख्यानस्य उत्कर्षसाधकम् । शांकरव्याख्यानादीनां खण्डनाय प्रवृत्तानां भाष्याणां शंकर-भाष्यादपि प्राचीनतरभाष्यादीनाम् अप्रदर्शनात् अपकृष्टत्वम् इत्यपि अवधेयम् ।

एवं च सर्वशास्त्रपारदृश्वां अलौकिक-शक्तिसम्पन्नानाम् आसमुद्र-हिमाचलविश्रान्त-सम्प्रदायप्रवर्त्तकानाम् अवतारकल्पानां महात्मनाम् आचार्याणाम् अनुमोदनाधिक्यम् अवलम्ब्य व्याससम्मतसूत्रार्थनिर्णयः—समुचितः इत्येव अविसंवादिमार्गमेकं परिकल्प्य, शंकरसम्मतपादार्थ एव व्यासानुमोदिता पादसंगतिरिति उत्पश्यामः ।

इदानीं द्रष्टव्यं—कीदृशी सा पादसंगतिः अधिकरणसंगतिश्च इति, यच्च संगतिद्वयम् अधिकरणार्थनिर्णयद्वारा सूत्रार्थनिर्णये तथा च व्यासमतविनिर्णये आवश्यकम् । तत्र अधि-करणसंगतिरत्र बहुविधा, यथा, आक्षेपिकी संगतिः, उदाहरणसंगतिः, प्रत्युदाहरणसंगतिः, प्रसंग-संगतिः, एकफलत्वसंगतिः, दृष्टान्तसंगतिः, उपजीव्योपजीवकभावसंगतिः, हेतुहेतुमद्भावसंगति-रित्याद्याः । एतासां बलाबलविनिर्णयद्वारा सूत्रव्याख्यानयौक्तिकत्वमपि निर्णेतव्यम् । यथा यदि केनचित् आचार्येण अधिकरणविशेषस्य पूर्वाधिकरणेन सह सम्बन्धः क्रियते प्रसंगसंगत्या, तदनु-सारेण अधिकरणान्तर्गतसूत्राण्यपि व्याख्यायन्ते, अन्येन तु तदेव आक्षेपसंगत्या दृष्टान्तसंगत्या वा कृतं स्यात्, तदा प्रसंगसंगत्यनुसारिव्याख्यानात् अपरव्याख्यानं युक्ततरमिति भवितुम् उचितम् । प्रसंगसंगत्याः दुर्बलत्वात् । एवं च अन्यत्रापि यथासम्भवं बोद्धव्यम् । अतः अधिकरणसंगतिरपि सूत्रार्थनिर्णये तथा व्यासमतविनिर्णये आवश्यकी । तथैव अधिकरण-मध्येऽपि, यत्र एकाधिकानि सूत्राणि वर्त्तन्ते तत्र सूत्राणाम् अर्थनिर्द्धारणे मिथः संगतिरपि उप-कारिणी भवति । तत्रापि यस्मिन् भाष्ये पूर्वसूत्रेण सह परसूत्रस्य प्रसंगसंगत्या अर्थनिर्द्धारणं क्रियते, तत्र चेद् भाष्यान्तरे आक्षेपादि-संगत्या अर्थान्तरं निर्दिष्टं स्यात्, तदा एतद् भाष्यान्तर-व्याख्यानमेव युक्ततरं भवति । यथा आनन्दमयाधिकरणे अष्टानां सूत्राणां मध्ये सप्तमं यत् "कामाच्च नानुमानापेक्षा" १।१।१८ इति सूत्रं, तस्य वृत्तिकृन्मतेन यद् व्याख्यानं तत्र सांख्यमत-खण्डनात् तत्प्रासंगिकम् इति उक्तं—दृश्यते, परन्तु भगवत्पादीयव्याख्याने तत्सूत्रार्थः आक्षेप-संगत्या लभ्यते । अतः अत्र भगवत्पादीयव्याख्यानस्य केवलं संगतिमात्रविचारेण युक्ततरत्वं प्रमाणयितुं शक्यते । एवं च एतादृशसंगतिविचारस्य महदुपयोगित्वं वर्त्तते एव ।

परन्तु एतदर्थम् अस्माभिः सूत्रकृताम् अधिकरणसूत्रयोः रचनाकौशलम् अवगन्तव्यम् । यतः अधिकरणारम्भसमाप्त्योः तथा अधिकरणान्तर्गतविषयभेदस्यापि न किमपि निदर्शनं सूत्रमध्ये स्पष्टं दृश्यतेइति प्रतीयते । विभिन्नभाष्येषु विषयेऽस्मिन् सम्यक् ऐकमत्यमपि न दृश्यते

एतच्च प्रागेव विस्तरेण प्रतिपादितम्। अतोऽस्माभिः अधुना कोऽप्युपायः निर्णेयः, येन सूत्रकृताम् अधिकरणसूत्रयोः रचनाकौशलं विज्ञायेत। नाप्ययं सम्भवति यत् सूत्रकृद्भिः न कोऽपि नियमोऽनुसृतः, न चेदं युक्तं यत् सूत्रार्थंबुभुत्सुभिः पाठकवृन्दैः व्याससम्मतसूत्रार्थं निर्णेतुं न शक्येत इति सूत्रकृतामाशयः सम्भवेत्। अतः नूनं किमपि निदर्शनम् अधिकरणसूत्ररचनायां प्रदत्तमेव सूत्रकृद्भिः।

एतदर्थं कतिचित् साधारणनियमाः सन्निबद्धाः अस्माभिः पूर्वस्मिन् पादे विशेषनियमास्तु संग्रहीष्यन्ते इति तत्रैव प्रतिज्ञातमपि। अतोऽधुना अस्माभिः अधिकरणरचनाकौशले विशेषनियमाः आविष्करणीयाः तृतीयपादे। तैश्च नियमनिवहैः अधिकरणरचनाऽरचनाजन्यदोषादोषौ निर्णेतव्यौ। नियमनिरपेक्षनिर्णयफलेन सह नियमसापेक्षनिर्णयफले विवेचिते सति यस्य पक्षे दोषाल्पता भवेत् स एव पक्षः समीचीनः व्यासमतसम्मतश्च इत्येवं कल्पयितुं शक्यम्। सूत्राणां यादृशस्वल्पाक्षरत्वं गम्भीरार्थकत्वं तथा अस्पष्टत्वं च प्रतीयते, तेन निःसन्दिग्धतया व्यासमतनिरूपणं नितरां सुदुष्करमेव, अथ किम् असम्भवमेव। विभिन्नाचार्याणां भाष्यरचनानैपुण्यं युक्तिपरिपाट्यादिकं च यथा अतुलनीयं तथैव अपरिमेयं च। अतः व्यासमतसन्निकृष्टत्वनिरूपणमेव अत्र प्रयतामहे इति यावत्। सूत्रार्थविचारादिकं विना अधिकरणरचनारचनाविचारः कथं व्यासमतनिर्णयोपयोगीति अग्रे वक्ष्यते।

इति श्रीचिद्घनानन्दपुरी-विरचिते व्याससम्मत-ब्रह्मसूत्र-भाष्यनिर्णये

द्वितीयः पादः।

---

इति प्रथमो भागः।

---

# अथ द्वितीयो भागः

# अथ तृतीयः पादः ।

## अधिकसम्मतनियमानुसारेण निर्णयः ।

भगवद्व्यासविरचितब्रह्मसूत्रग्रन्थस्य तदनुमोदितसूत्रार्थनिर्णयाय श्रुतिभाष्याध्यायपादाधिकरणादीनां विभागपूर्वकं संगतिनिरूपणम् एकं मुख्यं प्रयोजनं भवति। वस्तुतस्तु सा संगतिः तथा अधिकरणविभागश्च प्रत्येकं भाष्यस्य प्रायेण पृथक् पृथक् दृश्यते। अतः तादृशाधिकरण-संगतिप्रभृति-निरूपणेन व्यासानुमोदितसूत्रतात्पर्य्यनिर्णयार्थम् आदौ तदनुमोदितं भाष्यं निर्णेयम्। तदर्थम् इदानीम् अस्माकम् अधिकरणरचनायाः सूत्ररचनायाश्च विशेषनियमनिचयः आविष्करणीयः। यतः सूत्ररचनायां तथा अधिकरणरचनायामेव व्यासमतस्य वैशिष्ट्यप्रकाशः यथा सम्भवति, न तथा सूत्रार्थविचारे भवितुम् अर्हति, सूत्रार्थस्य श्रुत्यर्थाधीनत्वात्। श्रुत्यनुसार्य्येव सूत्रार्थः करणीयः, यतः श्रुत्यर्थनिर्णयार्थमेव ब्रह्मसूत्रग्रन्थः रचितः भगवता व्यासदेवेन इति हि सर्ववादिसम्मतम्। अतो न सूत्रार्थमध्ये व्यासमतवैशिष्ट्यं प्राचुर्य्येण पूर्णतया वा वर्त्तते, परन्तु सूत्राधिकरणरचनायामेव तत्। तेन यदि सूत्राधिकरणरचनानियमनिवहाः विनिर्णीताः स्युः, तदा व्याससम्मतब्रह्मसूत्रभाष्यनिर्णयप्रयासः अस्माकं कथञ्चित् सफलतां प्राप्नुयात्। यतः तैश्च नियमैः अत्र विभिन्नभाष्याणां दोषादोषनिर्णये कृते तेषां कतमत् व्यासानुमोदितम् इति कथञ्चित् निर्णेतुं शक्यम्। अतः अत्र अधिकरणरचनानियमा निरूपणीयाः सर्वादौ। तत्र एकादश सामान्य-नियमाः प्रथमपादे सन्निबद्धाः, एतदर्थं तेऽपि अत्र स्मर्त्तव्याः। तेषाम् अबाधेनैव एते विशेषनियमाः अधिकसम्मत्या सङ्कलनीयाः। ततश्च प्रथमतः निरूपितनियमाः पश्चाद् येन यत्र लङ्घ्यन्ते तत्र तस्य दोषेण भवितव्यम् इत्येव मन्तव्यम्। अथ यदि एतादृशलङ्घने अधिकसम्मतिरेव पुनः आपद्येत—अधिकसंख्यका आचार्य्या यदि पूर्वनिष्पन्ननियमविरोधिनः स्युः, तदा ततोऽपि विशेषनियमसंकलनेन पूर्वनियमरक्षणं कर्त्तव्यं, न तु प्राङ्निष्पन्नस्य नियमस्य भञ्जनं विकल्पनं वा समुचितं भवेत्। अत्र चेद् विशेषतरनियमसंकलनम् असम्भवि, तदा ते एव अधिकसंख्यका आचार्य्या दूषणीयाः, व्यासमतविप्रकृष्टत्वात्। नात्र संख्याधिक्येन पूर्वनियमनिश्चयस्य फलस्य अन्यथात्वं करणीयम्, अथवा अधिकसंख्यकानाम् आचार्य्याणामपि दोषकल्पना न असंगतं भविष्यति। एवं च अधिकरणरचनानियमानाम् अनुसरणाननुसरणाभ्यां भाष्याणां दोषगुणविनिर्णयः अत्र प्रस्तूयते। पूर्वस्मिन् पादे एतादृशनियमनिरपेक्षैरेव अस्माभिः संख्याधिक्यसम्मतिरेव भाष्याणां दोषगुणनिर्णायकत्वेन परिकल्पिता; अत्र तु तृतीये पादे अधिकरणरचनानियमसापेक्षैः अस्माभिः भाष्याणां दोषगुणनिर्णयः करिष्यते। अयमेव अत्र प्रभेदः। तेन प्रत्येकम् अधिकरणं पृथक्तया अवलम्ब्य तदन्तर्गतसूत्राणि एकत्रीकृत्य भाष्याणां परीक्षणम् आरभ्यते।

## अथ समन्वयनाम-प्रथमाध्याये प्रथमपादे
## प्रथमं जिज्ञासाधिकरणम् ।

अत्र प्रथमं जिज्ञासाधिकरणम् । तत्र—"अथातो ब्रह्मजिज्ञासा" १।१।१ इति एकेन सूत्रेण एतद् अधिकरणं रचितम् । अत्र सर्वे भाष्यकारा अभिन्नमतावलम्बिनः । सूत्रस्थजिज्ञासापदम् आश्रित्य सर्वसम्मत्या एतस्य "जिज्ञासाधिकरणं" नाम । एवं सूत्रपदसाहाय्येन अधिकरण-नाम-करण-रीतिरियं प्रायेण सर्वैः आचार्यैः सर्वत्र अनुसृतेति दृश्यते । यत्र कुत्रचित् एतस्य अन्यथात्वं भविष्यति, तत्र तत्र तत्र प्रदर्शनीयम् अस्माभिः । तत्र प्रायेण अधिकरणप्रतिपाद्यविषयानुसारेण अधिकरण-नामनिर्देशः परिलक्ष्यते । परन्तु अधिकरणप्रतिपाद्यविषयनिर्देशे विप्रतिपत्ति-शंकापत्तेः प्रतिपाद्यविषयानुसारेण अधिकरण-नाम-निर्देश-करणं सर्वत्र नाचिकैः समाश्रितम् इति । अधिकरणारम्भकसूत्रपदेन अधिकरण-नाम-निर्देशरहस्यम् इत्येव सम्भाव्यते । अतः अधिकरणनामनिर्देशे अयमेको नियमः कल्पयितुं शक्यते, यत् "सूत्रान्तर्गतपदानुसारेण अधिकरण-नाम-करणं सम्पादनीयम्" इति । अत इत्येव अत्र एको विशेषनियमो भवतु । इति प्रथमो विशेषः नियमः ।

ततश्च अत्र ग्रन्थाध्यायपादानाम् आरम्भः । अत्र प्रथमसूत्रेण सर्वसम्मत्या अधिकरणारम्भदर्शनात् व्यापकारम्भे व्याप्यस्यापि तथात्वदर्शनात् अपर एको नियमः अत्र कर्तुं शक्यते, यत्—"अध्यायपादानाम् आरम्भे अधिकरणारम्भः नियमेन करणीयः" । तेनायम् अत्र द्वितीयो विशेषनियमः भवतु । तेन यस्तु चतुर्थसामान्यनियमः—"सूत्रमध्ये उद्देश्यतया विधेयतया वा निराकांक्षप्रथमान्त-पदसत्त्वम् अधिकरणारम्भसूचकम्" इति, भूमिकापादे प्रदर्शितः, तस्य नात्र उपयोगिता। तस्य एतद्द्वितीयनियमव्याप्यत्वात् । अतो "ब्रह्मजिज्ञासा" इति प्रथमान्तपदस्य अत्र अधिकरणारम्भसूचकत्वं न व्याहतम् । नियमोऽयम् पादमध्ये प्रयोज्यः । द्वितीयविशेष-नियम-बलेन पादारम्भे प्रथमान्तपदाभावेऽपि अधिकरणारम्भः करणीयः—इत्यपि फलबलात् आयातम् । यथा "सर्वत्र प्रसिद्धोपदेशात्" १।२।१ इत्यत्र अधिकरणारम्भो दृश्यते, प्रथमान्तपदाभावेऽपि । तेन अध्याहरणीयप्रथमान्तपदस्यापि अधिकरणारम्भकत्वम् इति विज्ञेयम् । पञ्चमसामान्यनियमोऽपि अत्र न प्रयोक्तव्यः । तेन अत्र "तद् ब्रह्म" इति प्रथमान्तपदस्य अध्याहर्तव्यत्वेऽपि तद्बलादेव न अस्य अधिकरणारम्भकत्वं, किन्तु पादारम्भादेव अस्य अधिकरणारम्भकत्वम् इति बोद्धव्यम् । इति द्वितीयः विशेषः नियमः ।

ततश्च पश्चात् सामान्य-नियम-बलेन अधिकरणसमाप्ति-सूचकनियमोऽपि आविष्कर्तुं शक्यते । "यावत् अधिकरणारम्भक-तादृश-प्रथमान्तपदघटितं सूत्रं पुनरुपलभ्यते, तावत् पूर्वाधिकरणम् अनुवर्तते" इति । तेनायं तृतीयो विशेषनियमो भवितुम् अर्हति । अनेन अत्र "अथातो ब्रह्मजिज्ञासा" इति एकेनैव सूत्रेण अधिकरणं रचनीयम् । यतो "जन्माद्यस्य यतः" १।१।२ इति द्वितीय-

सूत्रे "जन्मादि" इति निरपेक्षप्रथमान्तपदसत्त्वात् पृथगधिकरणारम्भः समुचितः। अतः "अथातो ब्रह्मजिज्ञासा" इति एकेन सूत्रेण प्रथमं जिज्ञासाधिकरणं समाप्तम् इति बोद्धव्यम्। इति तृतीयः विशेषः नियमः।

आचार्याणां मतभेदेन सूत्रार्थभेदात् अधिकरणावयवेष्वपि मतभेदः संजातः। स तु तत्तद्भाष्येभ्यः अवगन्तव्यः। तत्र सर्वभाष्यकाराणाम् एतेन सूत्रेण एतदधिकरणरचनायाम् ऐकमत्यात् न कस्यापि अत्र कश्चित् दोष इति बोद्धव्यम्। १।१।१

## द्वितीयं जन्माद्यधिकरणम्।

"जन्माद्यस्य यतः" १।१।२ इति द्वितीयं सूत्रम्। अस्य "जन्मादि"-पदात् अस्य "जन्माद्यधिकरणं" नाम। वल्लभभाष्यमतेन "जन्माद्यस्य यतः शास्त्रयोनित्वात्" इत्येवं द्वितीयं सूत्रम्। अन्येषां सर्वेषां मतेन "जन्माद्यस्य यतः" इति द्वितीयं सूत्रम्, ततश्च "शास्त्रयोनित्वात्" इत्येवं तृतीयं सूत्रम्। तथापि सर्वैरेव आचार्यैः अत्र द्वितीयम् अधिकरणं रचितम्। अत्र "जन्मादि" इति प्रथमान्तपदात् तथा "तद् ब्रह्म" इति प्रथमान्तपदाध्याहाराच्च अधिकरणारम्भः करणीयः, चतुर्थ-पंचम-सामान्य-नियमाभ्याम्। अत्र अधिकरणरचना एततसामान्यनियमद्वयेनैव संगच्छते। एतदर्थं चतुर्थः सामान्य-नियमो द्रष्टव्यः। अधिकरण-समाप्तिस्तु "शास्त्रयोनित्वात्" इति सूत्रे "सर्वज्ञं ब्रह्म" इति प्रथमान्तपदाध्याहारस्य आवश्यकत्वात् तेन च तस्य पृथगधिकरणत्वात् कल्पनीया। अध्याहृत-प्रथमान्तपदबलेन तस्य अधिकरणारम्भणीयत्वात्। पञ्चमः सामान्यनियमो द्रष्टव्यः। वल्लभाचार्य्यभिन्नानां नवानाम् आचार्याणां मतेन "शास्त्रयोनित्वात्" इति सूत्रेण तृतीयम् अधिकरणं रचितम्। तेन अधिकसंख्यकाचार्यमतविरोधात् तथा सर्वसम्मतनियमविरोधाच्च वल्लभाचार्यमतम् अत्र सदोषमिति मन्तव्यम्। तथापि सूत्रद्वयैकीकरणात् तन्मते तृतीयसूत्रे पृथक्तया अध्याहारस्य अनावश्यकत्वात्, अन्येषाम् आचार्याणाम् मते तस्य आवश्यकत्वात्, वल्लभमतस्य उत्कर्षः कल्पनीयः। परन्तु एततसूत्रद्वयस्य स्पष्टार्थविचारेण तथा विषयश्रुतिभेदेन च एतयोः पृथक्सूत्रत्वं संमतम् इति मन्तव्यम्। एतत्तु अग्रे तृतीयाधिकरणविचारप्रसंगे व्यक्तीभविष्यति। तेन वल्लभभाष्यस्य अयम् उत्कर्षः लघुतां प्रयाति। इदानीम् अस्य अधिकरणावयवादिकं विचार्यम्—

अत्र केचित् "जन्म आद्यस्य यतः" इति पदच्छेदम् इच्छन्ति। तन्न सम्यक्। अनादिसंसारे आद्यत्वं नास्ति। संसारस्य सादित्वे स्रष्टुः वैषम्यनैर्घृण्यदोषापत्तिः। कल्पान्तर्गत-सर्गीयादित्वकल्पने आदित्वस्य लाक्षणिकत्वापत्तिः, आद्यस्य जन्ममात्रकथने स्थितिभंगबोधनाय उपलक्षणं वक्तव्यं भवति। "यतो वा इमानि" इति विषयश्रुतौ जन्मस्थितिलयानाम् उल्लेखो दृश्यते। तेन "जन्मादि" इति आदि-पदेन स्थितिभंगयोः ग्रहणं स्वारसिकमेव। ततश्च आद्यस्य जन्मबोधिका श्रुतिः अत्र विषयत्वेन न केनापि परिगृहीता इति। अत्र पदच्छेदासम्भवात् आद्यस्य जन्म अन्येषाम्

एकीकरणं न संगतम् । ततश्च आद्यस्य जन्महेतुत्वं कार्यब्रह्मणोऽपि सत्त्वात् सर्वकारण-कारण-स्वरू-पत्वेन ब्रह्मणः अत्र न जिज्ञास्यत्वम् आपद्यते। अत ईदृशी व्याख्या नादरणीयेति मन्यामहे। शङ्क-राद्पि प्राचीनतरस्य व्याख्यानस्य अप्रदर्शितत्वाच्च । अतः एतादृशी व्याख्या न रमणीया इति। तथापि अधिकरणरचनायां नात्र कस्यापि कोऽपि दोषः संजातः ।

## तृतीयं शास्त्रयोनित्वाधिकरणम् ।

"शास्त्रयोनित्वात्" १।१।३ इति तृतीयं सूत्रम् । अस्य शास्त्रयोनित्व-पदात् अस्य "शास्त्र-योनित्वाधिकरणं" नाम । वल्लभभिन्नानां नवानाम् आचार्याणाम् मते एतेन तृतीयसूत्रेण तृतीयम् अधिकरणं सम्मतम् । वल्लभमतेन एतत् सूत्रं "जन्माद्यस्य यतः" इति द्वितीयसूत्रस्य शेषविशेष-मात्रम् । अतः तन्मतेन एतत्सूत्रस्य अधिकरणारम्भकत्वम् असंगतम् । परन्तु तच्च चिन्त्यम् । "शास्त्रयोनित्वात्" इति एतत्सूत्रस्य हेतुबोधकाकाररूपत्वात् अन्वयानुरोधात् उद्देश्यविधेयरूप-त्वेन प्रथमान्तपदाध्याहारः अत्र प्रथमत एव अपेक्षितः । तेन "तद् ब्रह्म सर्वज्ञम्" इत्येवं प्रथमान्त-पदानि अत्र अध्याहर्तव्यानि इति कल्प्यते । तेन अध्याहृतप्रथमान्तपदबलेन अस्य अधिकरणारम्भ-कत्वं संगच्छते । एतदपि पञ्चमसामान्यनिरूपणप्रस्तावे वर्णितमेव । एतदर्थं पञ्चमः सामान्यः नियमो द्रष्टव्यः ।

इदानीं द्रष्टव्यं वल्लभमतेन एतत्सूत्रद्वयस्य एकीकरणं संगतम् असंगतं वा । तत्र "शास्त्रयोनित्वात्" इत्येतत्सूत्रस्य हेतुरूपत्वात् अन्वयानुरोधात् आकांक्षानिवृत्तये च उद्देश्यविधेय-बोधकं पदद्वयमपि आवश्यकम् । तदृते सूत्रार्थः न सम्भवति । ततश्च द्वितीयसूत्रीयविधेयात् अस्य विधेयभेदात् पृथक् सूत्रत्वमेव संगतम् । अतो युक्त्यापि एतस्य पृथक्सूत्रत्वं समर्थितमेव। ततश्च दशानाम् आचार्याणां मध्ये नवानाम् ऐकमत्यात् पृथक्सूत्रत्वमेव अस्य समर्थयितव्यं भवति । अतोऽत्र विशेषनियम एकः संकलनीयः । स च इत्थम्—"उद्देश्यविधेयान्यतरभेदाद् अधिकरणभेदेन सूत्रभेदः साधीयान् । अथवा अधिकरणावयवभेदबोधनात् विधेयभेदाद् वा सूत्रभेदः युक्तः । किंवा अवयवविशेषस्य वैशिष्ट्यसाधनात् सूत्रभेदः करणीयः । अत्र विधेयभेदेन अधिकरणभेदात् सूत्रभेदः युक्तः । तेन वल्लभभाष्यस्य अत्र दोष एव कल्पनीयः । इति चतुर्थः विशेषः नियमः ।

ततश्च अत्र निम्बार्कमतेनापि सह विरोधो दृश्यते । शंकर-भास्कर-रामानुज-मध्व-श्रीकण्ठ-श्रीपति-वल्लभ-विज्ञानभिक्षु-बलदेव-प्रमुखा भाष्यकाराः सर्वे एकेनैव सूत्रेण अत्र अधिकरणं रचितवन्तः, निम्बार्कभाष्ये तु "तत्तु समन्वयात्" इति परवर्त्तिसूत्रमपि एतदधिकरणान्तर्गतं कृतम् । "तत्तु सम-न्वयात्" इति एकेनैव सूत्रेण निम्बार्काचार्य्यभिन्नैः सर्वैः आचार्य्यैः एकमेव अधिकरणं रचितम् । एतस्य अन्वयाकरणेन निम्बार्कभाष्यस्यैव तेन दोषस्पर्शः सञ्जातः—इति कल्पयितुं शक्यते ।

"तत् तु समन्वयात्" इत्यत्र "तत्" इति प्रथमान्तपदसत्त्वात् अस्य सूत्रस्य अधिकरणारम्भकत्वं संगतमेव। तेन च शास्त्रयोनित्वाधिकरणस्य एकेनैव सूत्रेण समाप्तिरपि सूचिता भवति।

ततश्च शांकरभाष्यानुसारेण एतस्य शास्त्रयोनित्वाधिकरणस्य वर्णकद्वयं दृश्यते। नैतच्च अन्येन केनापि भाष्यकारेण कृतम्। तेनाऽत्र शांकरभाष्ये दोषः शंक्यते कैश्चित्। परन्तु तच्च दोषत्वेन परिगणनीयं यावन्न शांकरादपि प्राचीनतरभाष्यबलेन समर्थितं स्यात्। को जानाति सूत्रकृद्भगवतः एतदधिकरणस्य वर्णकद्वयं नाभिप्रेतमिति। अतोऽत्र शांकरभाष्ये दोषकल्पना न संगता। सूत्राणां बह्वर्थसूचनम् अलंकाराय इति—मन्यते सुधीभिः बहुभिः। एवं च अत्र वल्लभनिम्बार्कभाष्ययोः दोषः सूचित इति। १।१।३

## चतुर्थं समन्वयाधिकरणम्।

"तत्तु समन्वयात्" १।१।४ इति चतुर्थं सूत्रम्। अस्य "समन्वय"-पदात् अस्य समन्वयाधिकरणं नाम। "तत्" इति प्रथमान्तपदाद् अत्र अधिकरणारम्भः निम्बार्कभिन्नैः सर्वैः आचार्यैः कृतः। निम्बार्कभाष्ये एतत् सूत्रं शास्त्रयोनित्वाधिकरणान्तर्गतं कृतम् अतः तत्र निम्बार्कमतेन प्रथमान्त-पद-घटित-सामान्य-नियम-लंघनं भवति। तेन इदम् अत्र तस्य दोषाय एव।

न च अत्र 'तु'—शब्देन अधिकरणरचनायां प्रथमान्त-पद-घटित-सामान्य-नियमान्तर्गत-निरपेक्षत्वस्य व्याघातात्, तेन च प्रथमान्त"तत्"पदस्य साकांक्षत्वप्रतिपादनात् सूत्रस्य एतस्य अधिकरणारम्भकत्वम् असंगतम् इति वाच्यम्। आशंकितपूर्वपक्षीयविधेयस्य पूर्वाधिकरणप्रतिपाद्यतः पृथग् विषयत्वात्। पूर्वाधिकरणस्य विधेयन्तु "ब्रह्मणः सर्वज्ञत्वं शास्त्रप्रमाणकत्वं" च, अत्र तु सर्वशास्त्रसमन्वितत्वं विधेयम्। अतः अधिकरणावयवभेदात् यथा सूत्रभेदः कर्त्तव्यः तथा विधेयभेदात् अधिकरणभेदोऽपि करणीयः; चतुर्थविशेषनियमात्। अतः एततसूत्रेण पृथगधिकरणरचनं सुसंगतमेव। तेन निम्बार्कव्याख्यानम् अधिकरणरचननियमविरुद्धमिति सिद्ध्यति। न केवलं नियमविरुद्धं, परन्तु सतानाम् आचार्याणाम् अपि विरोधि। यत्र तु "तु"—शब्देन प्रथमान्तपदस्य अधिकरणारम्भकत्वं व्याहतम्, तत् अग्रे प्रदर्शयिष्यते। अतोऽत्र एकं निम्बार्कभाष्यमेव दोषग्रस्तम् इति कल्पयितुं शक्यते। परसूत्रे पृथगधिकरणारम्भात् एततसूत्रान्तम् एतत् अधिकरणम्। एतच्च सर्वाचार्यसम्मतम्।

अत्रापि शांकरभाष्ये वर्णकद्वयं वर्तते। नान्यैः कैरपि एतत् समाचरितम् इत्यपि दृश्यते। रहस्यं तु सुधीभिर्विज्ञेयम्। तथा हि शांकरमतेन कर्मणा सह यथा ज्ञानोपासनयोः भेदः तथा ज्ञानेन सह उपासनस्यापि भेदः स्वीक्रियते। मतान्तरे तु नैतत् अंगीक्रियते। अतः प्रथमवर्णकेन कर्मणि श्रुतितात्पर्यत्वं निरस्य द्वितीयवर्णकेन ज्ञानस्यैव तत् प्रदर्शितम् इति दिक्। १।१।४

## पंचमम् ईक्षत्यधिकरणम्।

तत्र "ईक्षतेर्नाशब्दम्" १।१।५ इति सूत्रस्य "ईक्षति"—पदात् अस्य ईक्षत्यधिकरणं नाम।

अस्मिन् [illegible] शांकर-भास्कर-मध्व-वल्लभ-विज्ञानभिक्षु-बलदेवमतेन सप्त सूत्राणि, रामानुज-निम्बार्क-श्रीकण्ठ-श्रीपतिमतेन तु अष्ट सूत्राणि परिगृहीतानि। "प्रतिज्ञाविरोधात्" इति एकं सूत्रं रामानुजादिमतेन अतिरिक्तं गृहीतम्। एतत्तु शांकर-भास्कर-भाष्यद्वयमध्ये कथंचित् स्वपद-वर्णनीयभाष्यांशरूपेण दृश्यते। तद् यथा—

अत्र शांकरभाष्यम्—"च-शब्दः प्रतिज्ञाविरोधाभ्युच्चय-प्रदर्शनार्थः। सत्यपि हेयत्ववचने प्रतिज्ञाविरोधः प्रसज्येत। कारण-विज्ञानाद्धि सर्वं विज्ञातम् इति प्रतिज्ञातम्। 'उत तम् आदेशम् अप्राक्ष्यः"—इत्यादि।

अत्र भास्करभाष्यम्—"अतः सच्छब्दवाच्यं चेतनं ब्रह्म इति निश्चीयते, प्रतिज्ञा-विरोधाच्च। 'उत तम् आदेशम् अप्राक्ष्यः येन अश्रुतं श्रुतं भवति, अमतं मतम्, अविज्ञातम् विज्ञातम्" इति।

शांकरभाष्यतः पूर्वतनभाष्यादीनां प्रमाणं विना सूत्रत्वेन अस्य ग्रहणेन स्वपदवर्णनस्य च भाष्यलक्षणत्वात्, तथा हि—

"सूत्रस्थं पदमादाय पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"

इति वचनात्, एतत्सूत्रस्य शंकर-भास्कर-भाष्यांशत्वकल्पनं नासंगतम्।

तानि च अष्टसूत्राणि यथा—

| | |
|---|---|
| १। ईक्षतेर्नाशब्दम् १।१।५ | ५। प्रतिज्ञाविरोधात् १।१।८ (?) |
| २। गौणश्चेन्नात्मशब्दात् १।१।६ | ६। स्वाप्ययात् १।१।९ |
| ३। तन्निष्ठस्य मोक्षोपदेशात् १।१।७ | ७। गतिसामान्यात् १।१।१० |
| ४। हेयत्वावचनाच्च १।१।८ | ८। श्रुतत्वाच्च १।१।११ |

अत्र (१) "ईक्षतेर्नाशब्दम्" १।१।५ इत्यत्र "अशब्दम्" इति प्रथमान्तपदेन अधि-करणारम्भः संगच्छते। चतुर्थसामान्यनियमो द्रष्टव्यः। अत्र सर्वेषाम् ऐकमत्यं च।

(२) "गौणश्चेन्नात्मशब्दात्" १।१।६ इत्यत्र "गौणः" इति प्रथमान्तपदसत्त्वेऽपि न केनापि अधिकरणारम्भः कृतः, अतोऽत्र एको विशेषनियमः करणीयः। स च इत्थम् भवेत्—"अथ यदि सूत्रमध्ये—"चेत्" "चेन्न" "इति चेन्न" इत्यादिपदसत्त्वं तदा अधिकरणं नारम्भणीयम्" इति। अग्रेऽपि प्रायेण एवमेव दृश्यते। अतो यत्र व्यभिचारशंका भवेत्, तत्र विशेषनियमेन सा निवर्तनीया। एतेन अधिकरणारम्भकत्वं निषिद्धम्। इति पञ्चमविशेषनियमः।

(३) "तन्निष्ठस्य मोक्षोपदेशात्" १।१।७ अत्र प्रथमान्तपदाभावात् नात्र अधिकरणारम्भः करणीयः। अत्रापि सर्वेषाम् ऐकमत्यं दृश्यते। अन्वर्थार्थम् उद्देश्यविधेय-बोधक-प्रथमान्त-पदस्य

आवश्यकत्वेऽपि सूत्रार्थस्य साकांक्षार्थकत्वात् नास्य अधिकरणारम्भकत्वं कल्पनीयम्, एतदर्थं चतुर्थसामान्यनियमो द्रष्टव्यः ।

( ४ ) "हेयत्वावचनाच्च" १।१।८ एतदपि तादृशम् । च-कारात् साकांक्षत्वमपि । अतः नाधिकरणारम्भः । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । षष्ठविशेषनियमस्तु "१।१।१५" संख्यकसूत्रे द्रष्टव्यः ।

( ५ ) "प्रतिज्ञाविरोधात्" १।१।८ इति एतदपि तथा । परन्तु षट्सु भाष्येषु न एतत् गृहीतम् । सूत्रमेतत् शांकरभाष्यांशविशेष एवेति प्रतिभाति ।

( ६ ) "स्वाप्ययात्" १।१।९ इदमपि पूर्ववत् । प्रथमान्तपदाभावात् चतुर्थसामान्यनियमात् च नास्य अधिकरणारम्भकत्वम् ।

( ७ ) "गतिसामान्यात्" १।१।१० एतदपि तथैव । चतुर्थसामान्यनियमात् ।

( ८ ) "श्रुतत्वाच्च" १।१।११ प्रथमान्तपदाभावात्, तदध्याहारेऽपि 'च'-कारात् साकांक्षत्वम्, अत एतदपि पूर्ववत् । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । ततश्च इतः परम् "आनन्दमयोऽभ्यासात्" इति सूत्रेण अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगतैव । तेन अधिकरणरचनायाम् अत्र न कस्यापि दोषः इति गम्यते ।

## षष्ठम् आनन्दमयाधिकरणम् ।

अत्र "आनन्दमयोऽभ्यासात्" १।१।१२ इति सूत्रस्य "आनन्दमयः" पदात् अस्य "आनन्दमयाधिकरणं" नाम । अस्मिन् अधिकरणे केवलं श्रीकण्ठाचार्य्यं विहाय सप्त आचार्याः अष्ट सूत्राणि गृहीतवन्तः । श्रीकण्ठाचार्येण एतदधिकरणं द्विधा विभक्तं कृतं, यथा—प्रथमचतुर्भिः सूत्रैः एकम् अधिकरणम्, अन्तिमचतुर्भिः सूत्रैः अपरम् अधिकरणम् । तानि च अष्ट सूत्राणि यथा—

| | |
|---|---|
| १। आनन्दमयोऽभ्यासात् १।१।१२ | ५। नेतरोऽनुपपत्तेः १।१।१६ |
| २। विकारशब्दान्नेति चेन्न प्राचुर्यात् १।१।१३ | ६। भेदव्यपदेशाच्च १।१।१७ |
| ३। तद्धेतुव्यपदेशाच्च १।१।१४ | ७। कामाच्च नानुमानापेक्षा १।१।१८ |
| ४। मान्त्रवर्णिकमेव च गीयते १।१।१५ | ८। अस्मिन्नस्य च तद्योगं शास्ति । १।१।१९ |

अत्र ( १ ) "आनन्दमयोऽभ्यासात्" १।१।१२ इति सूत्रे "आनन्दमयः" इति प्रथमान्तपदात् अनेनैव अधिकरणारम्भः समुचितः । अत्र सर्वेषाम् ऐकमत्यं च दृश्यते । एतदर्थं चतुर्थः सामान्यनियमो द्रष्टव्यः ।

( २ ) "विकारशब्दान्नेति चेन्न प्राचुर्यात्" १।१।१३ अत्र सूत्रमध्ये अन्वयार्थम् कल्पितस्य प्रथमान्तपदस्य अध्याहारेऽपि "इति चेन्न" इति पदात् नास्य अधिकरणारम्भकत्वम् । एतदर्थं पञ्चमविशेषनियमो द्रष्टव्यः ।

( ३ ) "तद्धेतुव्यपदेशाच्च" १।१।१४ अस्य प्रथमान्तपदाभावात् नाधिकरणारम्भकत्वम्। च-कारात् अध्याहारे कृतेऽपि "तद्"-शब्देन साकांक्षत्वात् न तस्य विभिन्नविधेयबोधकत्वम्। अतो नास्यापि अधिकरणारम्भकत्वम्। चतुर्थसामान्यः नियमः तथा षष्ठविशेषनियमोऽत्र द्रष्टव्यः।

( ४ ) "मान्त्रवर्णिकमेव च गीयते १।१।१५ अत्र "मान्त्रवर्णिकम्" इति पदस्य प्रथमान्तत्वेऽपि उद्देश्यविधेयाभेदाद् अस्य नाधिकरणारम्भकत्वम् इति। सर्वेषु भाष्येषु एवमेव दृश्यते। न च च-कारस्य समुच्चायकार्थकत्वात् उद्देश्यविधेययोः मध्ये अनुक्तसन्निवेशः शंक्यः, तस्य हेतुसमुच्चायकार्थकत्वात्। अतः अत्र कस्यचित् विशेषनियमस्य प्रयोजनं, येन एतादृशस्थले सूत्राणाम् आकारमात्रदर्शनेन तेषाम् अधिकरणारम्भकत्वं वार्येत। स च नियमः इत्थम् भवेत्— "च-कारादिपदयोगात् अध्याहृतस्य अनध्याहृतस्य वा प्रथमान्तपदस्य सापेक्षत्वे सिद्धे नाधिकरणारम्भकत्वम्" इति। एतेन अत्र प्रथमान्तपदसत्त्वेऽपि अस्य अधिकरणारम्भकत्वं व्याहतम्। अयं तु चतुर्थसामान्यनियमस्य प्रतिप्रसवः। इति षष्ठः विशेषः नियमः।

( ५ ) "नेतरोऽनुपपत्तेः" १।१।१६ अत्र "इतरः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तं, तथापि "इतर"-शब्दस्य स्वरूपत एव सापेक्षत्वार्थकत्वात् तन्न युक्तम्। एतेन चतुर्थसामान्यनियमोक्तनिरपेक्षत्वार्थस्य व्याघातो भवति। श्रीकण्ठाचार्यस्तु एतेन पृथग् अधिकरणं रचयांचकार। तन्न सम्यक्। अधिकसम्मतेरभावात्, "इतर"-शब्दस्य सापेक्षत्वबोधकत्वेन युक्त्यननुकूलत्वाच्च। तथा च अपर एको नियमोऽत्र आवश्यकः। यथा—"इतरादिशब्दवत् स्वरूपतः सापेक्षत्वार्थकप्रथमान्तपदस्य न अधिकरणारम्भकत्वम्" इति। अयमपि चतुर्थसामान्यनियमस्य प्रतिप्रसवः। इति सप्तमः विशेषः नियमः।

( ६ ) "भेदव्यपदेशाच्च" १।१।१७ अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। प्रथमान्तपदाध्याहारे कृतेऽपि च-कारात् साकांक्षत्वविधानात् तथैव चतुर्थसामान्यनियमात षष्ठविशेषनियमाच्च न तत्।

( ७ ) "कामाच्च नानुमानापेक्षा" १।१।१८ अत्र "अनुमानापेक्षा" इति प्रथमान्तपदसत्त्वेऽपि नास्य पृथग् अधिकरणारम्भकत्वम्, एतच्च सर्वसम्मतमेव। "कामाच्च" इत्यत्र 'च'-शब्दयोगात् साकांक्षत्वविधानात् तन्निषेधः, षष्ठविशेषनियमाच्च।

( ८ ) "अस्मिन्नस्य च तद्योगं शास्ति" १।१।१९ अत्र प्रथमान्तपदाभावात् न पृथगधिकरणारम्भः। च-कारात् तदध्याहारेऽपि साकांक्षत्वात् तन्निषेधः। षष्ठविशेषनियमात्। वस्तुतः पृथग् अधिकरणारम्भोऽत्र अत्रैव अधिकरणसमाप्तिश्च सुसंमता इति।

शांकरभाष्ये अत्रापि वर्णकद्वयं दृश्यते। तत्र शांकरभाष्यटीकातः अवगम्यते—वृत्तिकारमतमेव प्रथमवर्णके एकदेशिमतत्वेन विवृतम्। स्वमतं च द्वितीये वर्णितम् इति।

उपवर्ष-बोधायनानुसारि-भास्कर-रामानुजादिभिः सर्वैः वृत्तिकारसम्मतं व्याख्यानं गृहीतम्। एवं च सर्वत्र वृत्तिकारमतमेव प्रथमवर्णकप्रतिपाद्यम् एकदेशिमतम्। वृत्तिकारोऽपि एक एकाधिको वा इति तु सुधिभिर्विभाव्यम्। शंकरस्य शुकशिष्य-गौडपादसाम्प्रदायिकत्वेन शांकरव्याख्यानं गौडपादानुमोदितमिति कल्पयितुं शक्यते। अयं च वृत्तिकारः बोधायनो वा उपवर्षो वा तन्न निर्णेतुं शक्यते। आपाततः यावन्ति प्रमाणानि उपलब्धानि तेभ्यः तयोः भेद एव प्रतिभाति इति। बोधायनानुगत-रामानुजव्याख्यानात् उपवर्षानुगत-भास्करव्याख्यानस्य भेदात्, रामानुजेन भास्करमतस्य खण्डनाच्च। अतः तौ भिन्नौ एवेति मन्यते। आस्तां तावत्। अत्र तु अधिकरणरचनायां श्रीकण्ठभाष्यस्यैव दोषः, नापरस्य कस्यचित् इत्येव बोद्धव्यम्।

## सप्तमम् अन्तरधिकरणम्। १।१।७

अत्र "अन्तस्तद्धर्मोपदेशात्" १।१।२० इति सूत्रस्य "अन्तर्"-पदात् अस्य "अन्तरधिकरणं" नाम। अस्मिन् अधिकरणे सर्वैः आचार्यैः ऐकमत्येन सूत्रद्वयं गृहीतम्। तद् यथा

१। अन्तस्तद्धर्मोपदेशात् १।१।२०, २। भेदव्यपदेशाच्चान्यः १।१।२१

अत्र (१) "अन्तस्तद्धर्मोपदेशात्" इति १।१।२० सूत्रे "अन्तर्" इति प्रथमान्तपदात् अधिकरणारम्भः चतुर्थसामान्यनियमानुगत एव। नात्र एतत्-प्रथमान्त-पदस्य सापेक्षत्वशंका। "अन्तर्"-शब्दघटित "अथ य एषः अन्तरादित्ये" इति श्रुतेः विषयत्वात्। चतुर्थविशेषनियमो द्रष्टव्यः। नात्र अधिकरणशेषश्च, परसूत्रे अधिकरणस्य अनारम्भणात्।

(२) "भेदव्यपदेशाच्चान्यः" इति १।१।२१ सूत्रे निरपेक्षप्रथमान्तपदस्य अभावात् नात्र अधिकरणारम्भः समुचितः। "अन्यः" इति शब्दस्य प्रथमान्तत्वेऽपि तस्य स्वरूपतः साकांक्षत्वात्। सप्तमविशेषनियमो द्रष्टव्यः। च-कारयोगाच्च अध्याहृतस्यापि साकाङ्क्षत्वात् अत्र नाधिकरणारम्भः षष्ठविशेषनियमात्। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते। अत्र न कस्यापि भाष्यस्य दुष्टत्वम्, अतः न कस्यापि दोषः।

## अष्टमम् आकाशाधिकरणम्। १।१।८

अत्र "आकाशस्तल्लिंगात्" १।१।२२ इति एकेन सूत्रेण इदम् अधिकरणं रचितं सर्वैरेव भाष्यकारैः। अस्य "आकाशः" इति शब्दात् एतस्य "आकाशाधिकरणम्" नाम। परसूत्रेण पृथगधिकरणारम्भणात् अत्रैव अधिकरणसमाप्तिः समुचिता। "आकाशः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वम्। एतदर्थं चतुर्थसामान्यनियमो द्रष्टव्यः। अत्रापि न कस्यापि दोषः। सर्वेषामेव ऐकमत्यात्।

## नवमं प्राणाधिकरणम्। १।१।९

अत्रापि "अतएव प्राणः" १।१।२३ इति एकेनैव सूत्रेण एकम् अधिकरणं रचितं

सर्वैरेव भाष्यकारैः । अस्य सूत्रस्य "प्राण"-शब्दात् एतस्य "प्राणाधिकरणं" नाम । ततश्च "प्राणः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमानुसारेण । परसूत्रे अधिकरणारम्भणात् अत्रैव अधिकरण-समाप्तिरपि संगच्छते । अत्रापि अधिकरणरचनायां न कस्यापि दोषः ।

## दशमं ज्योतिश्चरणाधिकरणम् ।१।१।१०

अत्र "ज्योतिश्चरणाभिधानात्" १।१।२४ इति सूत्रे "ज्योतिश्चरण"-इति पदात् अस्य "ज्योतिश्चरणाधिकरणं" नाम । मध्वाचार्यभिन्नैः सर्वैः सप्तभिः आचार्यैः अत्र चतुर्भिः सूत्रैः अधिकरणं रचितम् । मध्वाचार्यस्तु केवलं "ज्योतिश्चरणाभिधानात्" इति एकेन सूत्रेण एकम् अधिकरणम्, अवशिष्टसूत्रत्रयेण च अपरम् एकम् अधिकरणं रचयामास । तानि च चत्वारि सूत्राणि यथा—

१। ज्योतिश्चरणाभिधानात् १।१।२४

२। छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् १।१।२५

३। भूतादिपादव्यपदेशोपपत्तेश्चैवम् १।१।२६

४। उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् १।१।२७

अत्र ( १ ) "ज्योतिश्चरणाभिधानात्" १।१।२४ इति सूत्रे "ज्योतिः" इति प्रथमान्तपदात् अनेन अधिकरणारम्भः चतुर्थसामान्यनियमानुगत एव ।

( २ ) "छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम्" १।१।२५ अत्र दर्शनम् इति प्रथमान्तपदसत्त्वेऽपि "इति चेन्न" इति पदात् नास्य अधिकरणारम्भकत्वम् । एतदर्थं पञ्चमविशेषनियमो द्रष्टव्यः । मध्वाचार्येण अत्र अधिकरणरचनात् तस्यैव दोषः, बहुमतविरोधात् चतुर्थसामान्यनियमविरोधाच्च ।

( ३ ) "भूतादिपादव्यपदेशोपपत्तेश्चैवम्" १।१।२६ अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । "एवम्" इति न प्रथमान्तं, किन्तु द्वितीयान्तमेव । प्रथमान्तस्य अध्याहृतत्वेऽपि चकारेण साकांक्षत्वात् तन्निषेधः, षष्ठविशेषनियमात् इति ।

( ४ ) "उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् । १।१।२७ इत्यत्र "इति चेन्न" इति पदात् नास्य अधिकरणारम्भकत्वम्, पञ्चमविशेषनियमो द्रष्टव्यः । एवं च अस्मिन् अधिकरणे मध्वभाष्यमेव दूषणीयम् । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः सुसंगतेति बोद्धव्यम् ।

## एकादशं प्रतर्दनाधिकरणम् ।१।१।११

अत्र अधिकरणविषयश्रुतिप्रसंगानुसारेण "प्रतर्दनाधिकरणम्" इति अधिकरणनाम । सूत्रपदानुसारेण नामकरणे कृते अस्यापि "प्राणाधिकरणम्" नाम भवितुम् उचितम् । परन्तु नवमम् अधिकरणं तन्नाम्ना प्रसिद्धिं गतं प्रागेव. अतः अत्र अन्यः पन्थाः अवलम्बितः । तेन

नात्र अधिकरणारम्भः प्रसंगानुसारेण नामकरणं समुचितम् । अतोऽयं नियमो भवतु—"विरोधे सति प्रतिपाद्यानुसारेण अधिकरणनाम करणीयम्" इति । अयमेव अष्टमो नियमः ।

अत्र सर्वैः भाष्यकारैः चत्वारि सूत्राणि गृहीतानि । तानि च सूत्राणि यथा

१। प्राणस्तथानुगमात् १।१।२८

२। न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् १।१।२९

३। शास्त्रदृष्ट्या तूपदेशो वामदेववत् १।१।३०

४। जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् १।१।३१

अत्र ( १ ) "प्राणस्तथानुगमात्" १।१।२८ इति सूत्रे प्रथमान्त-"प्राणः"-पदात् अनेन अधिकरणारम्भः चतुर्थसामान्यनियमानुगत एव ।

( २ ) "न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्" १।१।२९ अत्र "अध्यात्म-संबन्धभूमा" इति प्रथमान्तपदसत्त्वेऽपि "चेत्"-शब्दात् नाधिकरणारम्भः इति पञ्चमविशेष-नियमेन सिध्यति ।

( ३ ) "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" १।१।३० अत्र "उपदेशः" इति प्रथमान्त-पदसत्त्वेऽपि नाधिकरणारम्भः कैरपि कृतः । अतोऽत्र कश्चिद् अवान्तरविशेषनियमः संकलनीयः, येन नियमानुसारित्वमस्य सिध्येत् । स च नियमः एवं भवेत्—"यत्र अनिषेधार्थक 'तु'-शब्देन सह प्रथमान्तपदसत्त्वं तत्र तेन नाधिकरणारम्भः करणीयः" इति । अत्र 'तु'-शब्दः अर्थसंकोचार्थकः आंशिकनिषेधवाचको वा, अतः नात्र दोषः । "तत्तु समन्वयात्" १।१।४ इति सूत्रे यः 'तु'-शब्दः स तु सम्पूर्णतया निषेधति पूर्वपक्षीयशंकाम्, अतः तत्र स तु-शब्दः निषेधार्थकः । अत्र 'तु'-शब्देन पूर्वपक्षीयशंका न सम्पूर्णतया निषिद्धा, तेन स संकोचार्थकः । इति नवमो नियमः ।

( ४ ) "जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्" १।१।३१ अत्र प्रथमान्तपदाभावात् नाधिकरणारम्भः पृथक्तया कृतः । अध्याहारेऽपि उद्देश्यविधेययोः न भेदः सम्भवति । अतः नाधिकरणम् आरम्भणीयम् इति । "चेत्"-शब्द-योगाच्च । पञ्चमविशेषनियमात् । अत्रैव सर्वसम्मतया पादसमाप्तिः अधिकरणसमाप्तिश्च संगतेति बोद्धव्यम् । अत्रापि न कस्यचिद् भाष्यस्य अधिकरणरचनाजन्यदोषः संजातः ।

इदानीं चिन्तनीयं कथम् अत्र पादसमाप्तिः अवगन्तव्या इति । अध्यायसमाप्तौ यथा अन्तिम-सूत्रस्य द्विर्वचनम् "अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्"(४।४।२२) इति, तथा अध्यायसमाप्तौ यथा अन्तिमसूत्रस्य अन्तिमपदस्य अभ्यासः "एतेन सर्वे व्याख्याताः व्याख्याताः"(२।४।२८) इति च, तथा पादसमाप्तौ न किमपि निदर्शनं दृश्यते । न केनापि भाष्यकारेण एतदर्थं किमपि कथितम् । तथापि-लौकिकेन मार्गेण निर्णयः सम्भवति । व्याख्यानकालेन शनैः शनैः प्रतिपादितं ... ।

सूत्रपाठात्, आकरग्रन्थदर्शनेन एतस्य मीमांसायां यदि कोऽपि उपायः अस्थास्यत्, तदैव सौलभ्यम् अभविष्यत्। परन्तु एतस्य न किमपि निदर्शनं लभ्यम्। अतोऽत्र कल्प्यते—व्यासशिष्यसम्प्रदायक्रमेण शिक्षा एवात्र शरणम्। तेनात्र अनुमीयते—"स्वरितेनाऽधिकारः" इति सूत्रानुसारेण पाणिनीयव्याकरणसूत्रपाठवत् स्वरितादिस्वरयोगेन एतत्सूत्रपाठार्थं कश्चित् नियमः सम्प्रदायमध्ये प्रचलित आसीदिति। एतज्जातीयः अपरः कोऽपि नियमः अधिकरणशेषार्थं सूत्रशेषार्थं चापि आसीदेव। स च नियमः परवर्तिकाले बौद्धादिविरुद्धमतप्राबल्यात् सर्वेषां विस्मृतिं गतः। अतएव एतादृशेषु विषयेषु भाष्यकाराणां मतभेदबाहुल्यं सञ्जातम्। तेन व्यासानुमोदितसूत्रार्थनिर्णये व्याससम्प्रदायानुसारि-व्याख्यानाविष्करणमेव मतभेदनिराकरणाय सम्यक् पन्थाः। पाद-, शेषनिर्णयप्रसंगे एतदेव अस्माकं कल्पनम्। अथ कोऽसौ व्यास-सम्प्रदायः कतमत् भाष्यं वा तादृक्सम्प्रदायानुसारि इत्यादिकं सर्वम् अग्रे वक्ष्यते।

## प्रथमाध्याय-प्रथमपादसमालोचनम्।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायाम्—

( १ ) कति कीदृशाश्च नियमाः संकलिताः,

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः,

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः,

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः भवितव्या इति।

एते चत्वारो विषयाः अत्र क्रमेण प्रदर्शनीयाः। तेन षोडशपादानाम् अन्ते एतेषां सर्वेषां निरूपणानाम् उपसंहारे कृते अधिकरणरचननियमानुसारेण कस्य भाष्यस्य कीदृशं व्यासमतानुसारित्वं तत् अनायासेन अवगन्तुं शक्यम्। अत्र प्रथमं तावत् द्रष्टव्यम्—

( १ ) **कति कीदृशाश्च नियमाः संकलिताः** इति।

तत्र प्रथमो नियमः—सूत्रान्तर्गतपदानुसारेण अधिकरणनामकरणं सम्पादनीयम्। ( १म सूत्रम् )

द्वितीयो नियमः—अध्यायपादारम्भे अधिकरणं करणीयम्। ( १ म सूत्रम् )

तृतीयो नियमः—यावन्न अधिकरणारम्भक-प्रथमान्तपदघटितं सूत्रं पुनरुपलभ्यते तावद् आरब्धाधिकरणम् असमाप्तम्। ( १म सूत्रम् )

चतुर्थो नियमः—उद्देश्यविधेयान्यतरभेदात् सूत्रभेदः तथा अधिकरणभेदोऽपि साधीयान्। ( ३य सूत्रम् )

पञ्चमो नियमः—यदि सूत्रमध्ये "चेत्" "चेन्न" "इति चेन्न" इत्यादि पदसत्त्वं तदा अधिकरणं नारम्भणीयम्। ( ६ष्ठ सूत्रम् )

षष्ठो नियमः—च-कार-योगात् प्रथमान्तपदस्य सापेक्षत्वे सिद्धे नाधिकरणारम्भकत्वम्। (१७श सू॰)

सप्तमो नियमः—"इतरा"दिशब्दवत् स्वरूपतः सापेक्षार्थक-प्रथमान्तपदसत्त्वेऽपि अधिकरणं नारम्भणीयम् । ( १६श सूत्रम् )

अष्टमो नियमः—बाधे सति प्रतिपाद्याद्यनुसारेण अधिकरणनाम करणीयम् । ( २८श सूत्रम् )

नवमो नियमः—यत्र अनिषेधार्थक-'तु'-शब्देन सह प्रथमान्तपदसत्त्वं तत्र तेन नाधिकरणारम्भः करणीयः । ( ३०श सूत्रम् )

एते च नव नियमाः प्रथमाध्याये प्रथमपादे संकलिताः । इदानीं द्रष्टव्यम्—

**( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः** इति ।

तृतीयाधिकरणे "शास्त्रयोनित्वात्" १।१।३ इति तृतीयसूत्रे अधिकरणस्य अरचनायां वल्लभभाष्ये दोषः ।

चतुर्थाधिकरणे "तत्तु समन्वयात्" १।१।४ इति चतुर्थसूत्रे अधिकरणस्य अरचनायां निम्बार्कभाष्ये दोषः ।

षष्ठाधिकरणे—'नेतरोऽनुपपत्तेः" १।१।१६ इति षोडशसूत्रे अधिकरणस्य रचनायां श्रीकण्ठभाष्ये दोषः ।

दशमाधिकरणे—"छन्दोऽभिधानान्नेति चेन्न—" १।१।२५ इति पञ्चविंशसूत्रे अधिकरणस्य रचनायां माध्वभाष्ये दोषः ।

तेन अस्मिन् पादे अधिकरणरचनानियमानुसारेण निम्बार्क-मध्व-श्रीकण्ठ-वल्लभ-भाष्याणाम् एकैकः दोषः संजातः ।

तत्र अधिकरणरचनायां श्रीकण्ठ-मध्व-भाष्ययोः दोषः, अधिकरणस्य अरचनायां निम्बार्क-वल्लभ-भाष्ययोः दोषः । एवं च विभागचित्रम्—

| | अधिकरणस्य अरचनायाम् | अधिकरणस्य रचनायाम् | |
|---|---|---|---|
| वल्लभभाष्ये | १ | ० | दोषः |
| निम्बार्कभाष्ये | १ | ० | " |
| श्रीकण्ठभाष्ये | ० | १ | " |
| मध्वभाष्ये | ० | १ | " |

अथ द्रष्टव्यं शांकरभाष्यानुसारेण—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः** इति ।

तत्र प्रथमाधिकरणे—

"अथातो ब्रह्मजिज्ञासा" इति प्रथमसूत्रे वेदान्तवाक्यविचारः विषयत्वेन गृहीतः । तेन "आत्मा वा रे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" ( बृ० २।४।५ ) इत्याद्याः श्रुतयः उपजीव्यत्वेन ग्रहणीयाः इति ।

द्वितीयाधिकरणे—

"जन्माद्यस्य यतः" इति द्वितीयसूत्रे "सत्यं ज्ञानम् अनन्तं ब्रह्म" ( तैः २।१ ); "यतो वा इमानि भूतानि जायन्ते" ( तैः ३।२ )

तृतीयाधिकरणे—

"शास्त्रयोनित्वात्" इति तृतीयसूत्रे "अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदः" ( बृः २।४।१० ) "वाचा विरूप नित्यया" ( ? )
"तं त्वौपनिषदं पुरुषम्" ( बृः ३।९।२६ )

चतुर्थाधिकरणे—

"तत्तु समन्वयात्" इति चतुर्थसूत्रे सर्वे वेदान्ताः विषयत्वेन गृहीताः ।

पञ्चमाधिकरणे—

"ईक्षतेर्नाशब्दम्" इति पञ्चमसूत्रे "सदेव सोम्येदमग्र आसीत्.. तदैक्षत" (छाः ६।१।२,३)
"गौणश्चेन्नात्मशब्दात्" इति षष्ठसूत्रे "तत्तेज ऐक्षत"...."ता आप ऐक्षन्त"(छाः ६।२।३,४)
"सेयं देवता" (छाः ६।३।२) "अनेन जीवेन आत्मना" (छाः ६।३।२)
"तन्निष्ठस्य मोक्षोपदेशात्" इति सप्तमसूत्रे "स आत्मा तत्त्वमसि" ( छाः ६।८।७ ) ।
"अथ सम्पत्स्ये" ( छाः ६।१४।२ )
"हेयत्वावचनाच्च" इति अष्टमसूत्रे "स आत्मा तत्त्वमसि" ( छाः ६।१४।२ )
"स्वाप्ययात्" इति नवमसूत्रे—"सता सोम्य तदा सम्पन्नो भवति" ( छाः ६।८।१ )
"गतिसामान्यात्" इति दशमसूत्रे "आत्मन आकाशः सम्भूतः" ( तैः २।१ )
"श्रुतत्वाच्च" इति एकादशसूत्रे "स कारणं कारणाधिपाधिपः न चास्य कश्चित् जनिता न चाधिपः" । ( श्वेः ६।९ )

षष्ठाधिकरणे—

"आनन्दमयोऽभ्यासात्" इति द्वादशसूत्रे "अन्नमयः"(तैः२।१), "अन्योऽन्तर आत्मा आनन्दमयः" (तैः २।५), "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैः २।१), "ब्रह्म पुच्छं प्रतिष्ठा" ( तैः २।५ ) "असन्नेव स भवति" ( तैः २।६ )
"विकारशब्दान्नेति चेन्न"—इत्यादि त्रयोदशसूत्रे—हेतुप्रदर्शनमात्रं कृतम् ।
"तद्धेतुव्यपदेशात्" इति चतुर्दशसूत्रे "एष ह्येवानन्दयाति" ( तैः २।७ ) "इदं सर्वमसृजत" ( तैः २।६ )
"मान्त्रवर्णिकमेव च गीयते" इति पञ्चदशसूत्रे "ब्रह्मविद् आप्नोति परम्"...."सत्यं ज्ञानम् अनन्तं ब्रह्म" ( तैः २।२ )

"नेतरोऽनुपपत्तेः" इति षोडशसूत्रे "सोऽकामयत बहुस्याम् प्रजायेय।" (तैः २।६)(छाः ६।२।३)

"भेदव्यपदेशाच्च" इति सप्तदशसूत्रे "रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" (तैः २।७)

"कामाच्च नानुमानापेक्षा" इति अष्टादशसूत्रे "सोऽकामयत" ( तैः २।६ ) "आनन्दो ब्रह्म" ( तैः ३।६ )

"अस्मिन्नस्य च तद्योगं शास्ति" इति ऊनविंशसूत्रे—"यदा ह्येवैष एतस्मिन् अदृश्ये अनात्म्ये अनिरुक्ते" ( तैः २।७ )

सप्तमाधिकरणे—

"अन्तस्तद्धर्मोपदेशात्" इति विंशसूत्रे "अथ य एषः अन्तरादित्ये हिरण्मयः पुरुषः" ( छाः १।६।६ ) "एषः अन्तरक्षिणि"। ( १।७।५ )।

"भेदव्यपदेशाच्चान्यः" इति एकविंशसूत्रे "य आदित्ये तिष्ठन्" ( बृः ३।७।९ )।

अष्टमाधिकरणे—

"आकाशस्तल्लिंगात्" इति द्वाविंशसूत्रे "अस्य लोकस्य का गतिरिति आकाश इति होवाच" ( छाः १।९।१ ) "आकाशो ह्येवेभ्यः" ( छाः १।९।१ )

नवमाधिकरणे—

"अतएव प्राणः" इति त्रयोविंशसूत्रे "प्रस्तोतर्या देवताः" ( छाः १।११।४ ) 'कतमा सा देवतेति प्राण इति होवाच' ( छाः १।११।४-५ ) "प्राणमेवाभिसंविशन्ति" ( छाः १।११।५ ) "प्राणं तर्हि वागप्येति" ( शः ब्राः १०।३।३।६ )

दशमाधिकरणे—

"ज्योतिश्चरणाभिधानात्" इति चतुर्विंशसूत्रे "अथ यदतः परो दिवो ज्योतिः दीप्यते…" ( छाः ३।१३।७ ) "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" (छाः ३।१२।६)

"छन्दोऽभिधानान्नेति चेन्न—' इत्यादि पञ्चविंशसूत्रे "गायत्री वा इदं सर्वम्" (छाः ३।१२।१) "एतं ह्येव बह्वृचा महत्युक्थ मीमांसन्ते" ( ऐः आः ३।२।३।१२ )

"भूतादिपादव्यपदेशोपपत्तेश्चैवम्" इति षड्विंशसूत्रे "चतुष्पदा…गायत्री" (छाः ३।१२।५)

"उपदेशभेदान्नेति चेन्न --" इत्यादि सप्तविंशसूत्रे हेतुप्रदर्शनमात्रम्।

एकादशाधिकरणे—

"प्राणस्तथानुगमात्" इति अष्टाविंशसूत्रे "हिततमं मन्यसे" ( कौः ३।१ ) "अथ खलु प्राण एव ( कौः ३।२ )

"न वक्तुरात्मोपदेशादिति चेत्—" इत्यादि ऊनत्रिंशसूत्रे "मामेव विजानीहि" (कौः ३।१) "यावद् हि अस्मिन् शरीरे प्राणः वसति तावदायुः" (कौः ३।२ ) "स एष प्राण एव प्रज्ञात्मानन्दोऽमृतः" (कौः ३।८ )

"शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति त्रिंशसूत्रे "मामेव विजानीहि" (कौः ३।१) "अहं मनुरभवं सूर्यश्च" (बृः १।४।१०)

"जीवमुख्यप्राणलिंगान्नेति चेन्न…" इत्यादि एकत्रिंशसूत्रे "वक्तारं विद्यात्" (कौः ३।८) "इदं शरीरं परिगृह्य उत्थापयति" (कौः ३।३) "मामेव" "प्राणोऽस्मि" "स एष प्राण: एषः प्रज्ञात्मा।" (कौः ३।१-८)

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

## (४) कीदृशी अस्य पादसंगतिः।

सूत्रस्थपदसन्दर्भेण तथा सूत्रोपजीव्यश्रुतितात्पर्यसन्दर्शनेन अतिस्पष्टतया प्रतिभाति यद् अत्र—"ब्रह्मात्मापुरुषसदानन्दमयाकाशज्योतिप्राणप्रभृतीनां पदानां ब्रह्मपरत्वेन प्रतिपाद्यते। एतेन एतत्पादप्रतिपाद्यं स्पष्टब्रह्मलिंगकश्रुतिवाक्यानां समन्वयः इति कल्पयितुं शक्यते। अयमेव एतत्पादार्थः शांकरभाष्यानुसारेण तथा अधिकांशभाष्यकारसम्मत्या। मतभेदेन पादार्थादिकं भूमिकाख्य-प्रथमपादे एव वर्णितम्। तद् यथा—

शांकरमते—सुस्पष्टब्रह्मबोधकश्रुतिवाक्यानां समन्वयः।

भास्करमते—प्रायेण शांकरमतानुरूपम्।

रामानुजमते—अस्पष्टतरजीवादिलिंगकानि वाक्यानि विचारितानि।

माध्वमते—नामात्मकानाम् अन्यत्र प्रसिद्धानां शब्दानां विष्णौ समन्वयः।

निम्बार्कमते—जिज्ञास्ये श्रीवासुदेवे श्रुतीनां समन्वयः।

श्रीकण्ठमते—स्पष्टब्रह्मलिंगवाक्यविचारः।

श्रीकरमते—परमशिवब्रह्मलिंगवाक्यसमन्वयाभिधानम्।

एतेषां मतभेदानां सम्यक् पर्यालोचने कृते स्पष्टब्रह्मलिंगकश्रुतिवाक्यसमन्वय एव एतत्-पादसंगतित्वेन ग्रहणीयः। अनया पादसंगत्या एतत्पादान्तर्गताधिकरणानि सर्वाणि व्याख्येयानि, ततश्च तादृशाधिकरणार्थानुसारेण सर्वाणि सूत्राण्यपि विवृतव्यानि। एवं च श्रुतिवाक्यानां ब्रह्मण्येव तात्पर्यम् इति प्रदर्शनपरत्वमेव एततपादान्तर्गतसूत्रार्थः पर्यवसितः। तेन ब्रह्मणः सगुणत्व-निर्गुणत्वादिकं द्वैतत्वाद्वैतत्वादिकमपि नात्र पादे मुख्यत्वेन वर्णनीयम्, किंतु प्रसंगत एवेति बोद्धव्यम्। एवं च "जन्माद्यस्य यतः" (१।१।२) इति सूत्रतः "आनन्दमयोऽभ्यासात्" (१।१।१२) इति सूत्रतो वा यदि ब्रह्मणः सगुणत्वं प्रतिपादयितुं कोऽपि इच्छेत्, तथैव "नेतरोऽनुपपत्तेः" (१।१।१६) इति सूत्रात् "भेदव्यपदेशाच्च" १।१।१७ इति सूत्राद् वा जीवब्रह्मभेदं प्रतिपाद-यितुं कोऽपि अभिवाञ्छेत्, तदा तस्य चेष्टा न संगता भविष्यति, एवंजातीयविषयाणामत्र प्रसंगत उक्तत्वात्, यत्र यन्मुख्यत्वेन उक्तं तदेव तत्र प्रमाणं भवितुम् उचितम्। प्रसंगत उक्तानां गौणप्रमाणत्वम् प्रयोजनानुरोधेन तस्य अन्यथाकरणं न दूषणीयम्। तथापि एतादृशो

प्रसंगाधीनविचारफले आग्रहश्चेत् तदा पादसंगतीनां शास्त्रसंगतिव्याप्यत्वात् तादृशविचारफलं शास्त्र-संगतिरूपशास्त्रप्रतिपाद्यविषयानुकूलं करणीयम्। शास्त्रप्रतिपाद्यत्वं च प्रथमपादे भूमिकायां विवृतम्। तच्च एतत् शास्त्रस्य निर्विशेषाद्वैतब्रह्मपरत्वम्। तस्य पुनः प्रतिपादनमत्र बाहुल्यमेव। अतोऽत्र विरम्यते।। तेन पूर्वोद्धृतसूत्रनिवहैः ब्रह्मणः सगुणत्वं तथा जीवब्रह्मणोः भेदादिकं न कल्पनीयम्।

### इति प्रथमपादोपसंहारः

---

# अथ प्रथमाध्याये द्वितीयपादः।

## प्रथमं सर्वत्रप्रसिद्धाधिकरणम्।

अत्र सर्वसम्मत्या पादारम्भः दृश्यते। अतोऽत्र अधिकरणारम्भः समुचितः। अत्र "सर्वत्र प्रसिद्धोपदेशात्" १।२।१ इति सूत्रस्य "सर्वत्र प्रसिद्ध"-शब्दात् अस्य "सर्वत्रप्रसिद्धाधिकरणं" नाम। श्रीकण्ठ-वल्लभ-भाष्यभिन्नेषु सर्वेषु भाष्येषु अत्र अष्टसूत्राणि गृहीतानि, श्रीकण्ठस्तु प्रथम-सूत्रद्वयेन एकम् अधिकरणम्, अवशिष्टैः षड्भिः सूत्रैः द्वितीयम् अधिकरणं कृतवान्। वल्लभभाष्ये तु प्रथमचतुर्भिः सूत्रैः एकम् अधिकरणं, ततः पञ्चमादिचतुर्भिः सूत्रैः अन्यद् अधिकरणं रचितम्। तानि च अष्टसूत्राणि यथा—

१। सर्वत्र प्रसिद्धोपदेशात् १।२।१ (३२)
२। विवक्षितगुणोपपत्तेश्च १।२।२ (३३)
३। अनुपपत्तेस्तु न शारीरः १।२।३ (३४)
४। कर्म्मकर्तृव्यपदेशाच्च १।२।४ (३५)
५। शब्दविशेषात् १।२।५ (३६)
६। स्मृतेश्च १।२।६ (३७)
७। अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च १।२।७ (३८)
८। सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् १।२।८ (३९)

तत्र (१) "सर्वत्र प्रसिद्धोपदेशात्" (१।२।१) इति सूत्रेण सर्वसम्मत्या पादारब्ध-त्वात् अधिकरणारम्भः, द्वितीयविशेषनियमानुगत एव। अपि च पूर्वस्मिन् पादे अन्तिमाष्टसु अधिकरणेषु सर्वत्र ब्रह्मणः विधेयत्वात् अत्रापि "तद् ब्रह्म" इत्येवं पदम् अपि अध्याहर्तव्यम्। तेन अध्याहृतप्रथमान्तपदबलेन पञ्चमसामान्यनियमानुसारतः अत्रापि अधिकरणारम्भः समर्थयितुं शक्यते। तृतीय-विशेषनियमेन नात्र अधिकरणसमाप्तिश्च।

(२) "विवक्षितगुणोपपत्तेश्च" (१।२।२) अत्र प्रथमान्तपदाभावात् "उपपत्तेः" इति हेतुबोधक-पदेन सह समुच्चयार्थ-चकार-योगेन प्रथमान्तपदस्य अध्याहारेऽपि [illegible]

विरोधात् अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च। नापि अत्र अधिकरणसमाप्तिः, परसूत्रे बहूनां मतेन अधिकरणस्य अनारम्भात्।

(३) "अनुपपत्तेस्तु न शारीरः" (१।२।३) अत्र "शारीरः" इति प्रथमान्तपदसत्त्वेऽपि अनिषेधार्थक-"तु"-शब्दयोगात् नात्र अधिकरणारम्भः समुचितः। नवमविशेषनियमात् श्रीकण्ठभाष्ये अत्र अधिकरणारम्भः कृतः। नायं तु संगतः। नवमविशेषनियमविरोधात्, भाष्यसप्तकविरोधाच्च, तेन अत्र श्रीकण्ठभाष्यस्यैव दोषः सञ्जातः।

(४) "कर्म्मकर्तृव्यपदेशाच्च" (१।२।४) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। अध्याहृतेऽपि तस्य साकांक्षत्वमेव सिध्यति, न वा तस्य पृथग् विधेयत्वम्, चकारयोगात्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

(५) "शब्दविशेषात्" (१।२।५) अत्रापि प्रथमान्तपदाभावात् नाधिकरणारम्भः संगतः, चतुर्थसामान्यनियमात्। वल्लभभाष्ये तु अत्र अधिकरणारम्भः कृतः, स न साधुः, चतुर्थसामान्यनियमविरोधात्, भाष्यसप्तकविरोधित्वाच्च। अतोऽत्र वल्लभभाष्यस्य दोषः संवृत्तः।

(६) "स्मृतेश्च" (१।२।६) अत्रापि पूर्ववत् नाधिकरणारम्भः संगतः—इति बोध्यम्, प्रथमान्तपदाभावात्। अध्याहृतेऽपि तस्मिन् चकारात् साकांक्षत्वम्। अतः नाधिकरणारम्भः। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

(७) "अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च" (१।२।७) अत्र प्रथमान्तपदाभावात्, "इति चेन्न" इति पदसत्त्वाच्च। पञ्चमविशेषनियमात् नास्य अधिकरणारम्भकत्वम्। चकारात् साकांक्षत्वमपि। चतुर्थसामान्यनियमात्, पञ्चमषष्ठविशेषनियमाभ्याञ्च।

(८) "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" (१।२।८) अत्र "सम्भोगप्राप्तिः" इति प्रथमान्तपदसत्त्वेऽपि "इति चेन्न" इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम्। पञ्चमविशेषनियमात्। परसूत्रैः सर्वसम्मत्या अधिकरणारम्भणात् अत्रैव अधिकरणसमाप्तिः संगता एव।

एवं च अधिकरणेऽस्मिन् श्रीकण्ठभाष्यस्य तथा वल्लभभाष्यस्य अधिकरणरचनायां दोषः सञ्जातः।

## द्वितीयम् अत्त्रधिकरणम्।

"अत्ता चराचरग्रहणात् (१।२।९) इति सूत्रस्य "अत्ता" इति पदात् अस्य "अत्त्रधिकरणं" नाम। रामानुजाचार्य्यभिन्नैः सर्वैः भाष्यकारैः अत्र सूत्रद्वयं गृहीतम्। केवलं तेनैव सर्वसम्मतं परवर्तिसूत्रद्वयात्मकम् अधिकरणमपि अत्र सन्निवेशितम्। तत् च सूत्रद्वयम्—

१। अत्ता चराचरग्रहणात् १।२।९ (४०) २। प्रकरणाच्च १।२।१० (४१)

अत्र (१) "अत्ता चराचरग्रहणात्" (१।२।९) इति सूत्रस्य "अत्ता" इति प्रथमान्तपदसत्त्वात् अत्रैव अधिकरणारम्भः संगत एव। चतुर्थसामान्यनियमो द्रष्टव्यः। अत्र सर्वे भाष्यकाराः सम्मताः।

( २ ) "प्रकरणाच्च" ( १।२।१० ) इति सूत्रे प्रथमान्तपदाभावात् नात्र अधिकरणारम्भः समुचितः। तादृशपदाध्याहारे कृतेऽपि चकारस्य हेतुसमुच्चायकत्वेन साकांक्षत्वात् नाधिकरणारम्भः संगच्छते। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । परसूत्रे पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च जाता। तेन एतस्मिन् अधिकरणे रामानुजभाष्यस्यैव दोषस्पर्शः संज्ञातः। एतच्च अग्रिमाधिकरणे विचारयिष्यते।

## तृतीयं गुहाप्रविष्टाधिकरणम् ।

अत्र "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" ( १।२।११ ) इति सूत्रस्य "गुताप्रविष्ट"-शब्दात् अस्य "गुहाप्रविष्टाधिकरणं" नाम। अत्र केवलं रामानुजभाष्यं विहाय सर्वेषु भाष्येषु सूत्रद्वयेनैव एतदधिकरणं रचितम्। रामानुजमतेन एतदधिकरणं पूर्वाधिकरणान्तर्गतमेव। तच्च सूत्रद्वयम्—

१। गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् १।२।११ ( ४२ )

२। विशेषणाच्च १।२।१२ ( ४३ )

( १ ) अत्र "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" ( १।२।११ ) इति सूत्रे "आत्मानौ" इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भः समुचित एव। चतुर्थसामान्यनियमो द्रष्टव्यः। रामानुजाचार्य्येण अत्र अधिकरणारचनायां न केवलं तस्य आचार्यसप्तकविरोधित्वं, किन्तु चतुर्थसामान्यनियम-लङ्घनजन्यदोषश्चापि। पूर्वाधिकरणस्य विषयश्रुतितः अस्य विषयश्रुतेर्भेदात्, विधेयभेदाच्च । चतुर्थविशेषनियमोऽपि द्रष्टव्यः।

( २ ) "विशेषणाच्च" ( १।२।१२ ) अत्र प्रथमान्तपदाभावात्, चकारेण हेतोरेव समुच्चयकरणात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। परसूत्रे पृथगधिकरणारम्भणाच्च अत्रैव एतदधिकरणस्य समाप्तिः समुचिता सर्वसम्मता च।

## चतुर्थम् अन्तराधिकरणम् ।

अत्र "अन्तर उपपत्तेः" (१।२।१३) इति सूत्रस्य "अन्तर"-पदम् आश्रित्य अस्य "अन्तराधिकरणं" नाम। तत्र शङ्कर-भास्कर-मध्व-श्रीपति-वल्लभाचार्य्यैः, पञ्चभिः सूत्रैः अधिकरणं रचितम्। रामानुजाचार्यस्तु "अतएव च स ब्रह्म" इति सूत्रं, निम्बार्काचार्यस्तु "अतएव च तद् ब्रह्म" इति सूत्रम्, अतिरिक्तं गृहीत्वा षड्भिः सूत्रैः एतदधिकरणं रचितवन्तौ। श्रीकण्ठाचार्यस्तु अत्र "अतएव स ब्रह्म" इत्येवं सूत्रम् अतिरिक्तं गृहीत्वा अन्येषां मतेन यत् अधिकरणशेषसूत्रं तत् च वर्जयित्वा पञ्चभिः सूत्रैः एतदधिकरणं रचयाञ्चकार। तानि च अधिक-सम्मतानि पञ्च सूत्राणि यथा—

( १ ) अन्तर उपपत्तेः १।२।१३ ( ४४ )

( २ ) स्थानादिव्यपदेशाच्च १।२।१४ ( ४५ )

(३) सुखविशिष्टाभिधानादेव च १।२।१५ (४६)

(४) श्रुतोपनिषत्कगत्यभिधानाच्च १।२।१६ (४७)

(५) अनवस्थितेरसम्भवाच्च नेतरः १।२।१७ (४८)

अत्र (१) "अन्तर उपपत्तेः" (१।२।१३) इति सूत्रे "अन्तर" इति प्रथमान्तपद-सत्त्वात् अनेन अधिकरणारम्भः चतुर्थसामान्यनियमानुगत एव, सर्वसम्मतश्च।

(२) "स्थानादिव्यपदेशाच्च" (१।२।१४) अत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम्। चकारात् हेतुसमुच्चयात् तस्य सम्भावनापि दूरमपास्ता, षष्ठविशेषनियमात्।

(३) "सुखविशिष्टाभिधानादेव च" (१।२।१५) एतदपि तथा। इतः परं रामानुज-निम्बार्क-श्रीकण्ठाचार्य्यैः "अतएव च स ब्रह्म" अथवा "अतएव च तद् ब्रह्म" किंवा "अतएव स ब्रह्म" इति एकम् अतिरिक्तं सूत्रं गृहीतम्। एतच्च शांकरभाष्ये तदीयवाक्यांशार्थविशेषत्वेन उपलभ्यते। भास्करभाष्ये तु एवं दृश्यते—"अत्रावसरे अतएव तद् ब्रह्म इति सूत्रम् अन्ये पठन्ति, तत् पुनर्गतार्थम् इति अन्यैः नाभिधीयते" इति। एतेन अनुमीयते अन्यत् भाष्यद्वयं भास्करेण दृष्टमिति। तत्र एकस्मिन् भाष्ये एतद् अतिरिक्तं सूत्रं गृहीतम्, अन्यस्मिन् नेति। भास्करस्तु ग्रहणविरोधीति। अतिरिक्तसूत्रग्रहणजन्यदोषादोषः यथास्थानं प्रदर्शयिष्यते।

(४) "श्रुतोपनिषत्कगत्यभिधानाच्च" (१।२।१६) एतदपि पूर्ववत् नाधिकरणारम्भकम्।

(५) "अनवस्थितेरसम्भवाच्च नेतरः" (१।२।१७) अत्र "इतरः" इति प्रथमान्तपदसत्त्वेऽपि तस्य स्वरूपतः सापेक्षत्वबोधकत्वात् हेतुसमुच्चायक-चकार-सत्त्वात्, चतुर्थसामान्यनियमात्, एवं सप्तमविशेषनियमात्, तथा षष्ठविशेषनियमानुसाराच्च नाधिकरणारम्भः संगतः। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च संगता एव। श्रीकण्ठभाष्ये एतेनैव सूत्रेण पृथगधिकरणमेकं रचितम्। एतत्तु सप्तमविशेषनियमविरुद्धम्। अत्र तेन "नेतरोऽनुपपत्तेः" (१।१।१६) इति सूत्रीयाधिकरणवत् अधिकरणमेकं पृथक्तया उपन्यस्तम्। एतच्च अपरेषां सप्तानाम् आचार्य्याणां मतविरुद्धमेव। अतस्तस्यैव अत्र दोषः सञ्जातः इत्येव कल्पनीयम्।

## पञ्चमम् अन्तर्य्याम्यधिकरणम्।

अत्र "अन्तर्य्याम्यधिदैवादिषु तद्धर्म्मव्यपदेशात्" (१।२।१८) इति सूत्रस्य "अन्तर्य्यामी" इति पदात् अस्य "अन्तर्य्याम्यधिकरणं" नाम। सर्वैः भाष्यकारैः अस्मिन् अधिकरणे सूत्रत्रयं गृहीतम्। तानि च त्रीणि सूत्राणि यथा—

१। अन्तर्य्याम्यधिदैवादिषु तद्धर्म्मव्यपदेशात् १।२।१८ (४९)

२। न च स्मार्त्तमतद्धर्म्माभिलापात् १।२।१९ (५०)

३। शारीरश्चोभयेऽपि हि भेदेनैनमधीयते १।२।२० (५१)

अत्र ( १ ) "अन्तर्य्याम्यधिदैवादिषु तद्धर्म्मव्यपदेशात्" ( १।२।१८ ) इति सूत्रस्य "अन्तर्य्यामी" इति प्रथमान्तपदात् एतेन पृथगधिकरणारम्भः चतुर्थसामान्यनियमानुसारत एव। नात्र कस्यापि मतभेदः।

( २ ) "न च स्मार्त्तमतद्धर्म्माभिलापात्" ( १।२।१९ ) अत्र "स्मार्त्तम्" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् सापेक्षत्वे सिद्धे नास्य अधिकरणारम्भकत्वम् उचितम्। एतदर्थं षष्ठविशेषनियमो द्रष्टव्यः। अत्र रामानुजमतेन श्रीकण्ठमतेन च सह महान् पाठभेदः सञ्जातः। तन्मते तृतीयसूत्रस्य "शारीरश्च" इति पदद्वयम् अस्मिन् सूत्रे संयोजितम्। तथापि अधिकरणरचनायां नान्यथा जातम्।

( ३ ) शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ( १।२।२० ) अत्र "शारीरः" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् तस्य निरपेक्षत्वबाधात् पृथगधिकरणरचनायां षष्ठविशेषनियमेन व्याघातः सञ्जातः। परसूत्रे सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः समुचितैव। निम्बार्कमतेन अत्र सूत्रादौ नकारः पठ्यते। ततोऽपि नाधिकरणरचनव्याघातः। एवं च अस्मिन् अधिकरणविरचने न कस्यापि दोषस्पर्शः। प्राचीनप्रमाणप्रदर्शनं विनैव एतादृशपाठभेदसाधनं सूत्रव्याख्याने युक्त्यनुसरणप्रवणतां सूचयति, न तु सम्प्रदायलब्ध-व्याख्यानुसरणम्। पाठभेदजन्यदोषादोषविचारः अग्रे वक्ष्यते।

## षष्ठम् अदृश्यत्वाद्यधिकरणम्।

अत्र "अदृश्यत्वादिगुणको धर्म्मोक्तेः" ( १।२।२१ ) इति सूत्रस्य "अदृश्यत्वादि"-पदात् अस्य "अदृश्यत्वाद्यधिकरणं" नाम। अत्र बलदेवभिन्नैः सर्वैः भाष्यकारैः सूत्रत्रयं गृहीतम्। बलदेवाचार्यस्तु "प्रकरणात्" इति एकम् अधिकं सूत्रं गृहीत्वा चतुर्भिः सूत्रैः एतदधिकरणं रचितवान्। तच्च सूत्रत्रयं यथा—

"अदृश्यत्वादिगुणको धर्म्मोक्तेः" १।२।२१ ( ५२ )
"विशेषणभेदव्यपदेशाभ्यां च नेतरौ" १।२।२२ ( ५३ )
"रूपोपन्यासाच्च" १।२।२३ ( ५४ )

अत्र ( १ ) "अदृश्यत्वादिगुणको धर्म्मोक्तेः" ( १।२।२१ ) इति सूत्रस्य "अदृश्यत्वादिगुणकः" इति प्रथमान्तपदात् अनेन अधिकरणारम्भः संगत एव। नात्र कस्यापि मतवैषम्यम् चतुर्थसामान्यनियमात्।

( २ ) "विशेषणभेदव्यपदेशाभ्यां च नेतरौ" ( १।२।२२ ) अत्र "इतरौ" इति प्रथमान्तपदसत्त्वेऽपि अस्य स्वरूपतः सापेक्षत्वबोधकत्वात् चकारयोगाच्च नास्य अधिकरणारम्भकत्वम्। अत्रापि न कस्यापि मतवैषम्यम्। चतुर्थसामान्यनियमात्, षष्ठसप्तमविशेषनियमाभ्याम्।

( ३ ) "रूपोपन्यासाच्च" ( १।२।२३ ) अत्र प्रथमान्तपदाभावात्, तस्य अध्याहारे कृतेऽपि चकारयोगेन साकांक्षत्वसिद्धेः नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्य-षष्ठविशेष-नियमाभ्याम्। परसूत्रे सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगतैव। नात्र कस्यापि दोषः सञ्जातः। बलदेवभाष्ये अतिरिक्तसूत्रग्रहणात् दोषादोषविचारः अग्रे वक्ष्यते।

## सप्तमं वैश्वानराधिकरणम्।

अत्र "वैश्वानरः साधारणशब्दविशेषात्" ( १।२।२४ ) इति सूत्रस्य "वैश्वानरः"-इति पदात् अस्य "वैश्वानराधिकरणं" नाम। ततश्च अस्मिन् अधिकरणे सर्वैः भाष्यकारैः नव सूत्राणि गृहीतानि। तानि च सूत्राणि यथा—

( १ ) वैश्वानरः साधारणशब्दविशेषात् १।२।२४ ( ५५ )

( २ ) स्मर्य्यमाणमनुमानं स्यादिति १।२।२५ ( ५६ )

( ३ ) शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते। १।२।२६ ( ५७ )

( ४ ) अतएव न देवताभूतं च १।२।२७ ( ५८ )

( ५ ) साक्षादप्यविरोधं जैमिनिः १।२।२८ ( ५९ )

( ६ ) अभिव्यक्तेरित्याश्मरथ्यः १।२।२९ ( ६० )

( ७ ) अनुस्मृतेर्बादरिः १।२।३० ( ६१ )

( ८ ) संपत्तेरिति जैमिनिस्तथाहि दर्शयति १।२।३१ ( ६२ )

( ९ ) आमनन्ति चैनमस्मिन् १।२।३२ ( ६३ )

अत्र ( १ ) "वैश्वानरः साधारणशब्दविशेषात्" ( १।२।२४ ) इति सूत्रस्य "वैश्वानरः" इति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः संगत एव, चतुर्थसामान्यनियमात्।

( २ ) "स्मर्य्यमाणमनुमानं स्यादिति" ( १।२।२५ ) अत्र "अनुमानम्" इति प्रथमान्तपदसत्त्वेऽपि नात्र अधिकरणारम्भः, "स्यादिति" इति पदात् सापेक्षत्वसिद्धेः। चतुर्थसामान्यनियमोक्तनिरपेक्षत्वस्य वाधात्। अथवा तु-युक्त"स्यात्"-शब्दस्य अभावात् नाधिकरणारम्भः। अष्टविंशविशेषनियमात्।

( ३ ) "शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते" ( १।२।२६ ) इत्यत्र प्रथमान्तपदाभावात्, चेत्-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च।

( ४ ) "अतएव न देवताभूतं च" ( १।२।२७ ) इत्यत्र "देवताभूतम्" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् न तथा। षष्ठविशेषनियमात्।

( ५ ) "साक्षादप्यविरोधं जैमिनिः" (१।२।२८) इत्यत्र "जैमिनिः" इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भः समुचितः, किन्तु सर्वैः भाष्यकारैः तथा न कृतम्, अतोऽत्र कश्चिन्नियमः कर्त्तव्यः, येन एतदधिकरणं नियमानुगतं भवेत्, अन्यत्र लङ्घनं च दोषाय भविष्यति। स च नियमः इत्थं भवतु— "विषयान्तरसूचनादृते प्रथमान्तनामपदेन सिद्धान्तपक्षभूतः स्वमतानुकूलमतान्तरज्ञापने तथा स्वमतज्ञापने च तत्-प्रथमान्तपदस्य नाधिकरणारम्भकत्वम्।" यथा अत्र "जैमिनिः" इति प्रथमान्तपदसत्त्वेऽपि नाधिकरणारम्भः। एतदर्थं चिन्तनीयमेतत्—तत्र नाम्ना येषाम् आचार्याणां मतादिकम् उक्तम्, ते च आचार्याः ( १ ) जैमिनिः ( २ ) आश्मरथ्यः, ( ३ ) बादरिः, ( ४ ) बादरायणः, ( ५ ) औडुलोमिः, ( ६ ) काशकृत्स्नः, ( ७ ) कार्ष्णाजिनिः, ( ८ ) आत्रेयः—इति अष्टौ। तत्र जैमिनिः आश्मरथ्यः बादरिः औडुलोमिः,—एतेषां मतादिकं क्वचित् सिद्धान्तरूपेण क्वचित् पूर्वपक्षरूपेण गृहीतम्। बादरायणस्य तु मतादिकं सर्वत्र सिद्धान्तरूपेण प्रदर्शितम्। काशकृत्स्नस्य तथा कार्ष्णाजिनेः केवलं सिद्धान्तरूपेण, आत्रेयस्य तु केवलं पूर्वपक्षरूपेण गृहीतम्। तस्य विभागश्च इत्थम्—

जैमिनिमतेन—सिद्धान्तसूत्राणि—५९, ६२, १२४, ४६५*, पूर्वपक्षसूत्राणि—९४, ३५८, ४२७, ४४३ *, ५२९, ५३८ *, ५४४

आश्मरथ्यमतेन—सिद्धान्तसूत्रं—६०, पूर्वपक्षसूत्रं—१२६,

बादरिमतेन—सिद्धान्तसूत्राणि—६१, ३०२, ५२४ *, पूर्वपक्षसूत्रं—५४३ *,

बादरायणमतेन—सिद्धान्तसूत्राणि—८९ *, ९६, ३५९, ४२६ *, ४३३, ४४४, ५३२ *, ५४०, ५४५

औडुलोमिमतेन—सिद्धान्तसूत्रं—४७०, पूर्वपक्षसूत्रं—१२७, ५३९

काशकृत्स्नमतेन—सिद्धान्तसूत्रं—१२८, पूर्वपक्षसूत्रं नास्ति।

कार्ष्णाजिनिमतेन—सिद्धान्तसूत्रं—३००, पूर्वपक्षसूत्रं नास्ति।

आत्रेयमतेन—पूर्वपक्षसूत्रं—४६९ *, सिद्धान्तसूत्रं नास्ति।

तत्र तारकाचिह्नितसूत्राणि अधिकरणारम्भकानि। सूत्रसंख्या च आदितः अन्तपर्य्यन्तं प्रदत्तसंख्यानुसारेण बोद्धव्या। एतन्नियमार्थं विंशनियमोऽपि द्रष्टव्यः। तत्र पूर्वपक्षसंक्रान्तनियमः सङ्कलितः। एवं च आश्मरथ्यः औडुलोमिः काशकृत्स्नः कार्ष्णाजिनिः इति एतेषां चतुर्णां मतैः न एकमपि अधिकरणं रचितम्। तथा च—

जैमिनिरिति नाम्ना अधिकरणानि रचितानि ४६५, ४४३, ५३८ सूत्रैः।

बादरिरिति नाम्ना अधिकरणानि रचितानि ५२४, ५४३ सूत्राभ्याम्।

बादरायण इति " " " ८९, ४२६, ५७२ सूत्रैः।

आत्रेय इति " " " ४६९ सूत्रेण। इति दशमो नियमः।

( ६ ) "अभिव्यक्तेरित्याश्मरथ्यः" ( १।२।२९ ) अत्र "आश्मरथ्यः" इति प्रथमान्तपदसत्त्वेऽपि दशमविशेषनियमानुसारेण नाधिकरणारम्भः।

( ७ ) "अनुस्मृतेर्बादरिः" ( १।२।३० ) अत्र "बादरिः" इति प्रथमान्तपदसत्त्वेऽपि दशमविशेषनियमानुसारेण नाधिकरणारम्भः।

( ८ ) "सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति" ( १।२।३१ ) अत्र "जैमिनिः" इति प्रथमान्तपदसत्त्वेऽपि दशमविशेषनियमानुसारेण नाधिकरणारम्भः।

( ९ ) "आमनन्ति चैनमस्मिन् ( १।२।३२ ) अत्र प्रथमान्तपदाभावात् नाधिकरणारम्भः, चकारेण अध्याहृतेऽपि साकांक्षत्वार्थकत्वात् तन्निषेधः। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। पाद-शेषात् अधिकरणशेषश्च। पादसमाप्तिनिदर्शनं तु प्रथमपादवद् विज्ञेयम् इति।

## प्रथमाध्याय-द्वितीयपादसमालोचनम्।

एतत्पादोपसंहारे अस्माकं प्रागुक्तरीत्या प्रथमपादोपसंहारवत् चत्वारो विषया आलोचनीयाः। ते च—

( १ ) कति कीदृशाश्च नियमा अत्र संकलिताः।

( २ ) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

( ३ ) काश्च श्रुतयः कैश्च सूत्रैरुपजीव्यत्वेन गृहीताः।

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिर्भवितव्या इति। तत्र प्रथमम्—

### ( १ ) कति कीदृशाश्च नियमा अत्र संकलिताः।

अत्र एक एव नियमः संकलितः। स च—"विषयान्तरसूचनादृते प्रथमान्तनामपदेन सिद्धान्तपक्षभूतः स्वमतानुकूलमतान्तरज्ञापने तथा स्वमतज्ञापने च तत्प्रथमान्तपदस्य नाधिकरणारम्भकत्वम्"—इति दशमो नियमः। यथा "साक्षादप्यविरोधं जैमिनिः" ( १।२।२८ ) इत्यादिसूत्रेषु अधिकरणं नारब्धम्। इदानीं द्रष्टव्यम्—

### ( २ ) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

१।२।१ अधिकरणे श्रीकण्ठभाष्ये "अनुपपत्तेस्तु न शारीरः" इति १।२।३ सूत्रे अधिकरणरचनायां दोषः।

१।२।१ अधिकरणे वल्लभभाष्ये "शब्दविशेषात्" इति १।२।५ सूत्रे अधिकरणरचनायां दोषः।

१।२।३ अधिकरणे रामानुजभाष्ये "गुहां प्रविष्टावात्मानौ" इत्यादि १।२।११ सूत्रे अधिकरणस्य अरचनायां दोषः।

१।२।४ अधिकरणे श्रीकण्ठभाष्ये "अनवस्थितेरसम्भवाच्च नेतरः" इति १।२।१७ सूत्रे अधिकरणरचनायां दोषः।

तेन अस्मिन् पादे अधिकरणरचनानियमानुसारेण रामानुज-श्रीकण्ठ-वल्लभभाष्याणां दोषः।

तत्र श्रीकण्ठभाष्यस्य अधिकरणरचनायां दोषद्वयम्, वल्लभभाष्यस्य अधिकरणरचनायां एको दोषः, रामानुजभाष्यस्य अधिकरणस्य अरचनायाम् एको दोषः इति । एवं च—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायाम् । | |
|---|---|---|---|
| श्रीकण्ठभाष्ये— | ० | २ | दोषौ |
| वल्लभभाष्ये— | ० | १ | दोषः |
| रामानुजभाष्ये— | १ | ० | ” |

अधुना द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः**

तत्र प्रथमाधिकरणे—

"सर्वत्र प्रसिद्धोपदेशात्" इति प्रथमसूत्रे—"स क्रतुं कुर्वीत" ( छाः ३।१४।१ ) "मनोमयः प्राणशरीरो भारूपः" ( छाः ३।१४।२ ) "सर्वं खल्विदं ब्रह्म" ( छाः ३।१४।१ )

"विवक्षितगुणोपपत्तेश्च" इति द्वितीयसूत्रे—"भारूपः सत्यसंकल्पः" ( छाः ३।१४।२ )

"अनुपपत्तेस्तु न शारीरः" इति तृतीयसूत्रे—( सैव )

"कर्म्मकर्तृव्यपदेशाच्च" इति चतुर्थसूत्रे—"एतमितः प्रेत्याभिसम्भवितास्मि" (छाः ३।१४।४)

"शब्दविशेषात्" इति पञ्चमसूत्रे—"अन्तरात्मन् पुरुषो हिरण्मयः" (शत-ब्राः १०।६।३।२)

"स्मृतेश्च" इति षष्ठसूत्रे—"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया" ( गीः १८।६१ )

"अर्भकौकस्त्वात् तद्व्यपदेशाच्च...." इत्यादि सप्तमसूत्रे—"एष मे आत्मान्तर्हृदये" ( छाः ३।१४।३ ), "अणीयान्" ( सैव ), आराग्रमात्र ( श्वेः ५।८ )

"सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" इति अष्टमसूत्रे—( सैव )

द्वितीयाधिकरणे—

"अत्ता चराचरग्रहणात्" इति नवमसूत्रे—"यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः (कठ १।२।२४)

"प्रकरणाच्च" इति दशमसूत्रे—"न जायते म्रियते वा विपश्चित्" ( कठ १।२।२५ ), "क इत्था वेद यत्र सः" ( कठ १।२।२५ )

तृतीयाधिकरणे—

"गुहां प्रविष्टावात्मानौ" इत्यादि एकादशसूत्रे—"ऋतं पिबन्तौ सुकृतस्य लोके" (कठ १।३।१)

"विशेषणाच्च" इति द्वादशसूत्रे—"सोऽध्वनः पारमाप्नोति" ( कठ १।३।९ ), "देवं मत्वा धीरो हर्षशोकौ जहाति" ( कठ १।२।१२ ) ।

चतुर्थाधिकरणे—

"अन्तर उपपत्तेः" इति त्रयोदशसूत्रे—"य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मा इति होवाच

( छा: ४।१५।१ ) "एतं संयद्वाम इत्याचक्षते" ( छा: ४।१५।२ )

"स्थानादिव्यपदेशाच्च" इति चतुर्दशसूत्रे—"यश्चक्षुषि तिष्ठन्" "तस्य उदिति नाम हिरण्यश्मश्रुः" ( बृ: ३।७।१८ )

"सुखविशिष्टाभिधानादेव च" इति पञ्चदशसूत्रे—"प्राणो ब्रह्म, कं ब्रह्म, खं ब्रह्म, (छा:४।१४।५)

"श्रुतोपनिषत्कगत्यभिधानाच्च" इति षोडशसूत्रे—"अथोत्तरेण तपसा ब्रह्मचर्येण (प्र: २।१०)
"अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" ( गी० ८।२४ ), "आदित्याच्चन्द्रमसम्" ( छा: ४।१५।५ )

"अनवस्थितेरसम्भवाच्च नेतरः" इति सप्तदशसूत्रे—( सैव )

पञ्चमाधिकरणे—

"अन्तर्याम्यधिदैवादिषु...." इत्यादि—अष्टादशसूत्रे—"यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति एष त आत्मान्तर्य्याम्यमृतः" ( बृ: ३।७।३ )

"न च स्मार्त्तमतद्धर्म्माभिलापात्" इति ऊनविंशसूत्रे—"अदृष्टो द्रष्टा अश्रुतः श्रोता" ( बृ: ३।७।२३ )

"शारीरश्चोभयेऽपि हि" इत्यादि विंशसूत्रे—"यो विज्ञाने तिष्ठन्" ( बृ: ३।७।२२ ), "य आत्मनि तिष्ठन्" ( माध्यन्दिन्याम् )

षष्ठाधिकरणे—

"अदृश्यत्वादिगुणको धर्म्मोक्तेः" इति एकविंशसूत्रे—"यत् तदद्रेश्यमग्राह्यमगोत्र.... तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः" ( मुण्डक १।१।६ ), "यः सर्वज्ञः सर्वविद्" ( मुण्डक १।१।९ )

"विशेषणभेदव्यपदेशाभ्यां च नेतरौ" इति द्वाविंशसूत्रे—"दिव्यो ह्यमूर्त्तः पुरुषः.... अक्षरात् परतः परः" ( मुण्डक २।१।२ )

"रूपोपन्यासाच्च" इति त्रयोविंशसूत्रे—"अग्निमूर्धा चक्षुषी चन्द्रसूर्य्यौ" ( मुण्डक २।१।४ )
"पुरुष एवेदं विश्वं कर्म्म" । ( मुण्डक २।१।१० )

सप्तमाधिकरणे—

"वैश्वानरः साधारणशब्दविशेषात्" इति चतुर्विंशसूत्रे—"को नाम आत्मा किं ब्रह्म" ( छा: ५।११।१ ) "आत्मानमेवं वैश्वानरम्" ( छा: ५।११।६ ) "यस्तु एतमेवं प्रादेशमात्रम् अभिविमानम् आत्मानं वैश्वानरमुपास्ते" (छा: ५।१८।१) "मूर्धैव सुतेजाः" ( छा: ५।१८।२ )

"स्मर्य्यमाणमनुमानं स्यादिति" इति पञ्चविंशसूत्रे—"यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः" ( महा: शा: ४७।२८ )

"शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च" इत्यादि षड्विंश सूत्रे—"हृदयं गार्हपत्यः" (छा ५।१८।२) "तद् यद् भक्तं प्रथमम् आगच्छेत् तद् होमीयम्" (छा ५।१९।१) "पुरुषे-ऽन्तः प्रतिष्ठितं वेद ।" शतपथ-ब्रा: (१०।६।१।११) "मनोमयः" (छा: ३।१४।२) "मनो ब्रह्मेत्युपासीत" (छा: ३।१८।१) "मूर्द्धैव सुतेजाः ।" (छा: ५।१८।२) "एत-मेव अग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद ।" (शतपथ-ब्रा: १०।६।१।११)

"अतएव न देवता भूतं च" इति सप्तविंशसूत्रे—( हेतुप्रदर्शनमात्रम् )

"साक्षादप्यविरोधं जैमिनिः" इति अष्टाविंशसूत्रे— ( „ )

"अभिव्यक्तेरित्याश्मरथ्यः" इति ऊनत्रिंशसूत्रे— ( „ )

"अनुस्मृतेर्बादरिः" इति त्रिंशसूत्रे— ( „ )

"सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति" इति एकत्रिंशसूत्रे—"प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसम्पन्ना" ( शतपथ-ब्रा: )

"आमनन्ति चैनमस्मिन्" इति द्वात्रिंशसूत्रे—"य एषः अनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः" ( जाबाल २ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

## ( ४ ) कीदृशी अस्य पादसंगतिः ।

अस्मिन् पादे याश्च श्रुतयः गृहीताः, ताः सर्वाः शङ्करभाष्यानुसारेणेति अवगन्तव्यम् । भाष्यान्तरे तु अत्र क्वचित् वैषम्यं दृश्यते । अधिकरणविषयनिर्देशे विभिन्नश्रुतीनां गृहीतत्वात् । तेन विभिन्नभाष्याणि स्वस्वमतानुसारेण नासंगतानीति मन्तव्यम् । तथापि शांकरभाष्यस्य प्राचीनत्वात् तदुक्तश्रुतीनामेव प्रायेण सर्वैः ग्रहणं कृतम् । अतः तदुक्तपादप्रतिपाद्यमेव संगत-मित्येव सम्भाव्यते । तन्मते अस्मिन् द्वितीयपादे उपास्यब्रह्मवाचकास्पष्टश्रुतिवाक्यानां समन्वयः कृतः इति दृश्यते । भाष्यान्तरेषु अयमेव विषयः तावत् किञ्चित्प्रकारान्तरेण परिगृहीतः । यदेतत् मतान्तरं तत् तु तेषां स्वस्वमतानां तात्त्विकभेदसंरक्षणार्थमेव । तथापि तेषां संग्रहः प्रदर्श्यते—

शाङ्करमते—उपास्यब्रह्मवाचकास्पष्टश्रुतिवाक्यानां समन्वयः ।

भास्करमते—प्रायेण शाङ्करमतानुरूपम् ।

रामानुजमते—पुनरस्पष्टजीवादिलिङ्गकानि वाक्यानि विचारितानि ।

मध्वमते—लिङ्गात्मकानामन्यत्र प्रसिद्धानां शब्दानां विष्णौ समन्वयः ।

निम्बार्कमते—अत्यस्पष्टजीवादिलिङ्गकवाक्यानां तत्र समन्वयः ।

श्रीकण्ठमते—अनतिस्पष्टलिङ्गवाक्यविचारः ।

श्रीकरमते—केषाञ्चित् अस्पष्टलिङ्गानां पदानां ब्रह्मप्रतिपादकत्वम् [illegible] इति सन्देहे परब्रह्मविषयत्वमुपपादितम् ।

(८) प्रतीयते तत्त्वतः एतद्विषये इति तत्त्वतः न महान् मतभेदः परिलक्ष्यते। उपास्यत्वेन ब्रह्मणः शिवविष्णुभावे गृहीत्वैव अयं मतभेदः । अतः अस्पष्टब्रह्मबोधकश्रुतिवाक्यसमन्वयः एव द्वितीयपादार्थः इति वक्तुं शक्यते । इयमेव अत्र पादसंगतिः । एवं च एतादृशपादसंगत्या एतत्पादीयसूत्राणि व्याख्येयानि । तेन एतत्पादीयसूत्रबलेन यज्जीवजगद्ब्रह्मस्वरूप-निरूपणादिकं तत् तु प्रासङ्गिकमेवेति बोद्धव्यम्, तथैव ब्रह्मणः सगुणत्वनिर्गुणत्वादिकमपि ।

इति प्रथमाध्याये द्वितीयपादोपसंहारः ।

---

## अथ प्रथमाध्याये तृतीयपादः ।

### प्रथमं द्युभ्वाद्यधिकरणम् ।

अत्र "द्युभ्वाद्यायतनं स्वशब्दात्" ( १।३।१ ) इति सूत्रस्य "द्युभ्वादि"—शब्दात् अस्य "द्युभ्वाद्यधिकरणं" नाम । अत्र सर्वैः भाष्यकारैः सप्त सूत्राणि गृहीतानि । केवलं रामानुजाचार्यः तथा श्रीकण्ठाचार्यः तृतीयं "नानुमानमतच्छब्दात्" तथा चतुर्थं "प्राणभृच्च" इत्येतत्सूत्रद्वयम् एकीकृत्य षड्भिः सूत्रैः एतदधिकरणं रचितवन्तौ । तानि च सप्त सूत्राणि यथा—

| | | | |
|---|---|---|---|
| १। द्युभ्वाद्यायतनं स्वशब्दात् | १।३।१ (६४) | ४। प्राणभृच्च | १।३।४ (६७) |
| २। मुक्तोपसृप्यव्यपदेशात् | १।३।२ (६५) | ५। भेदव्यपदेशात् | १।३।५ (६८) |
| ३। नानुमानमतच्छब्दात् | १।३।३ (६६) | ६। प्रकरणात् | १।३।६ (६९) |
| | | ७। स्थित्यदनाभ्यां च | १।३।७ (७०) |

तत्र ( १ ) "द्युभ्वाद्यायतनं स्वशब्दात्" ( १।३।१ ) इति सूत्रे "द्युभ्वाद्यायतनम्" इति प्रथमान्तपदवत्त्वात् पादारम्भाच्च अधिकरणारम्भः संगत एव, द्वितीयविशेषनियमात् ।

( २ ) "मुक्तोपसृप्यव्यपदेशात्" (१।३।२) इत्यत्र प्रथमान्तपदाभावात् नास्य अ[धिकरणारम्भकत्वम्], चतुर्थसामान्यनियमात् ।

( ३ ) "नानुमानमतच्छब्दात्" ( १।३।३ ) इत्यत्र "अनुमानम्" इति प्रथमान्तपद-सत्त्वेऽपि नैकस्मिन्नपि मते अधिकरणारम्भः, अतः 'प्राणभृच्च' इति परसूत्रस्थ-चकारेण हेतुबोधक-प्रवाहपातित्वात् ; सापेक्षार्थकत्वकल्पनेन, सप्तदशविशेषनियमेन नाधिकरणारम्भकत्वम् ।

( ४ ) "प्राणभृच्च" ( १।३।४ ) इत्यत्र "प्राणभृत्" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगेन सापेक्षत्वसिद्धौ नास्य अधिकरणारम्भकत्वम् । षष्ठविशेषनियमात् । रामानुज-श्रीकण्ठभाष्यानुसारतः एतत् सूत्रं पूर्वसूत्रान्तर्गतमेव कृत्वा पठितम् । अत्र संशयस्य कोटिद्वयं यत् प्रधानं जीवः आत्मा च इति, तदन्तर्गतप्रधानं विहाय प्राणभृत्-शब्देन जीवस्य बोधकत्वात् विधेयभेदः कल्पनीयः । अतः सूत्रभेदः समर्थनीयः । चतुर्थविशेषनियमात् ।

(५) "भेदव्यपदेशात्" (१।३।५) इत्यत्र प्रथमान्तपदाभावात्, अध्याहृतेऽपि तस्य साकांक्षत्वात् हेतुबोधकत्वाच्च नास्य अधिकरणारम्भकत्वं समुचितम्, चतुर्थसामान्यनियमात्।

(६) "प्रकरणात्" (१।३।६) इत्यत्रापि पूर्ववत् बोद्धव्यम्, चतुर्थसामान्यनियमात्।

(७) "स्थित्यदनाभ्यां च" (१।३।७) इत्यत्रापि पूर्ववत् बोद्धव्यम्। अध्याहृतेऽपि चकारात् बाधः, षष्ठविशेषनियमात् चतुर्थसामान्यनियमाच्च। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता। अधिकरणरचनाविषये नात्र कस्यापि कोऽपि दोषः परिलक्ष्यते।

## द्वितीयं भूमाधिकरणम्।

अत्र "भूमा संप्रसादादध्युपदेशात्" (१।३।८) इति सूत्रस्य "भूमा"-पदम् आश्रित्य अस्य "भूमाधिकरणं" नाम। सर्वैः भाष्यकारैः अत्र सूत्रद्वयेन अधिकरणं रचितम्। तच्च सूत्रद्वयम्—

१। भूमा सम्प्रसादादध्युपदेशात् १।३।८ (७१)

२। धर्म्मोपपत्तेश्च १।३।९ (७२)

अत्र (१) "भूमा सम्प्रसादादध्युपदेशात्" (१।३।८) इति सूत्रस्य "भूमा" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः सर्वसम्मतः, चतुर्थसामान्यनियमानुगतश्च।

(२) "धर्म्मोपपत्तेश्च" (१।३।९) अत्र प्रथमान्तपदाभावात् ततश्च चकारयोगात् नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात्। परसूत्रेण सर्वमतेन अधिकरणारम्भात् एतदेव एतदधिकरणस्य अन्तिमसूत्रम् इत्यपि संगतमेव। तेन अत्र न कस्यापि अधिकरणरचनाविषये कोऽपि दोषः।

## तृतीयम् अक्षराधिकरणम्।

अत्र "अक्षरमम्बरान्तधृतेः" (१।३।१०) इति सूत्रस्य "अक्षर"-शब्दात् अस्य "अक्षराधिकरणं" नाम। अत्र सर्वैः भाष्यकारैः सूत्रत्रयं गृहीतम् एतदधिकरणार्थम्। तच्च सूत्रत्रयं यथा—

१। अक्षरमम्बरान्तधृतेः १।३।१० (७३)

२। सा च प्रशासनात् १।३।११ (७४)

३। अन्यभावव्यावृत्तेश्च १।३।१२ (७५)

अत्र (१) "अक्षरमम्बरान्तधृतेः" (१।३।१०) इति सूत्रे "अक्षरम्" इति प्रथमान्तपदसत्त्वात् अनेन अधिकरणारम्भः संगतः, नियमानुगत एव, चतुर्थसामान्यनियमात्।

(२) "सा च प्रशासनात्" (१।३।११) इति सूत्रे 'सा' इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्, चकारयोगात्, षष्ठविशेषनियमात्।

(३) "अन्यभावव्यावृत्तेश्च" (१।३।१०) इत्यत्र प्रथमान्तपदाभावात् चकारयोगाच्च नास्यापि अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात्। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव

[illegible] सुसंगतम् । तेन अत्र न कस्यापि कोऽपि दोषः अधिकरणरचनाविषये सञ्जातः इति बोद्धव्यम् ।

## चतुर्थम् ईक्षतिकर्माधिकरणम् ।

अत्र "ईक्षतिकर्म्मव्यपदेशात् सः" ( १।३।१३ ) इति सूत्रस्य 'ईक्षतिकर्म्म'-पदात् अस्य "ईक्षतिकर्म्माधिकरणं" नाम । सर्वमतेन अत्र अनेन एकेन सूत्रेण एतदधिकरणं रचितम् । तच्च सूत्रम्—

'ईक्षतिकर्म्मव्यपदेशात् सः' ( १।३।१३ ) अत्र 'सः' इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगत एव । परसूत्रे पृथगधिकरणारम्भात् अत्रैव अधिकरणशेषोऽपि संगत एव । तेन नात्र कस्यापि अधिकरणरचनायां कोऽपि दोषः ।

## पञ्चमं दहराधिकरणम् ।

अत्र 'दहर उत्तरेभ्यः' (१।३।१४) इति सूत्रस्य 'दहरः'-पदात् अस्य "दहराधिकरणं" नाम । शङ्कर-भास्कर-मध्व-श्रीपति-वल्लभाख्येषु पञ्चसु भाष्येषु अत्र अष्ट सूत्राणि गृहीतानि । रामानुज-निम्बार्क-श्रीकण्ठभाष्येषु तु परवर्त्तिसूत्रद्वयमपि गृहीत्वा दशभिः सूत्रैः अधिकरणमिदं रचितम् । एतेन परवर्त्तिसूत्रद्वयेन पृथक् एकम् अधिकरणं भवति प्रागुक्तशङ्करादिभाष्यकाराणां पञ्चानां मतेभ्यः । तानि च अष्ट सूत्राणि, यथा—

१। 'दहर उत्तरेभ्यः' १।३।१४ ( ७७ )
२। 'गतिशब्दाभ्यां तथाहि दृष्टं लिंगं च १।३।१५ ( ७८ )
३। 'धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः' १।३।१६ ( ७९ )
४। 'प्रसिद्धेश्च' १।३।१७ ( ८० )
५। 'इतरपरामर्शात् स इति चेन्नासम्भवात्' १।३।१८ ( ८१ )
६। 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' १।३।१९ ( ८२ )
७। 'अन्यार्थश्च परामर्शः' १।३।२० ( ८३ )
८। 'अल्पश्रुतेरिति चेत् तदुक्तम्' १।३।२१ ( ८४ )

अत्र ( १ ) "दहर उत्तरेभ्यः" ( १।३।१४ ) इति सूत्रस्य "दहरः" इति प्रथमान्तपद-सत्त्वात् अस्यैव अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् ।

( २ ) "गतिशब्दाभ्यां तथाहि दृष्टं लिंगं च" ( १।३।१५ ) इत्यत्र "दृष्टं" "लिंगं" इति प्रथमान्तपदद्वयसत्त्वेऽपि नास्य पृथगधिकरणत्वम् । चकारयोगेन साकांक्षत्वात् । "तथाहि"-पदेनापि अस्य सापेक्षत्वं सूच्यत्येव । चतुर्थसामान्यनियमात्, चतुर्थषष्ठविशेषनियमाभ्यां च । नात्र अधि-[illegible] संगतम् ।

( ३ ) "धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः" ( १।३।१६ ) इत्यत्र [illegible] नास्य अधिकरणारम्भकत्वम् । चकारस्य हेतुसमुच्चयकार्थत्वात् चतुर्थसामान्यनियमात्, तथा [illegible] ।

( ४ ) "प्रसिद्धेश्च" ( १।३।१७ ) अत्रापि प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, चतुर्थषष्ठविशेषनियमाभ्यां च ।

( ५ ) "इतरपरामर्शात् स इति चेन्नासम्भवात्" ( १।३।१८ ) इत्यत्र 'सः' इति प्रथमान्तपदसत्त्वेऽपि 'इति चेत्' इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् तथा पञ्चमविशेषनियमात् । तथापि पञ्चम्यन्तपदात् प्रथमान्तपदसत्त्वम् अधिकरणारम्भबोधकमिति चतुर्दशविशेषनियमात् अधिकरणारम्भः उचितः, परन्तु इतरशब्देन साकांक्षत्वविधानात् अत्र अधिकरणं न आरब्धमिति द्रष्टव्यम् । सप्तमविशेषनियमात् , हेतुबोधकप्रवाहपतितत्वात् चकाराध्याहारेऽपि सप्तदशविशेषनियमेन तस्य निषेधः ।

( ६ ) "उत्तराच्चेदाविर्भूतस्वरूपस्तु" ( १।३।१९ ) इत्यत्र 'आविर्भूतस्वरूपः' इति प्रथमान्तपदसत्त्वेऽपि अनिषेधार्थक-'तु'-शब्दयोगात् अस्य सापेक्षत्वं सिध्यति, तेन अस्य नाधिकरणारम्भकत्वम्, नवमविशेषनियमात् । 'चेत्'-योगाच्च पञ्चमविशेषनियमात् नास्य अधिकरणारम्भकत्वम् । अत्र भारतीतीर्थमतेन तथा भामतीमतेन तु पृथगधिकरणं स्वीकृतम्, परन्तु तन्नियमविरुद्धमेवेति प्रतिभाति ।

( ७ ) "अन्यार्थश्च परामर्शः" (१।३।२०) इत्यत्र 'अन्यार्थः' तथा 'परामर्शः' इति प्रथमान्तपदद्वयसत्त्वेऽपि च-शब्दयोगात् नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात् ।

( ८ ) "अल्पश्रुतेरिति चेत् तदुक्तम्" ( १।३।२१ ) इत्यत्र 'तदुक्तम्' इति प्रथमान्तपदसत्त्वेऽपि 'इति चेत्' इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम् । 'तदुक्तं'-पदेनापि अस्य सापेक्षत्वम् अवगम्यते च । एतदर्थं पञ्चमविशेषनियमो द्रष्टव्यः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः युक्ता एवेति बोद्धव्यम् । अत्र अधिकरणसमाप्तिः तु रामानुज-निम्बार्क-श्रीकण्ठ-मतविरोधिनी । तेन शङ्कर-भास्कर-मध्व-श्रीपति-वल्लभ-सम्मता एव इयं समाप्तिरिति बोद्धव्या ।

## षष्ठम् अनुकृत्यधिकरणम् ।

अत्र 'अनुकृतेस्तस्य च' ( १।३।२२ ) इति सूत्रस्थात् अनुकृतिः-इति-शब्दात् अस्य "अनुकृत्यधिकरणं" नाम । अत्र रामानुजनिम्बार्कश्रीकण्ठ-भिन्नैः पञ्चभिः आचार्य्यैः सूत्रद्वयेनैव अधिकरणं रचितम् । तच्च सूत्रद्वयं यथा—

१। अनुकृतेस्तस्य च १।३।२२ ( ८५ )

२। अपि च स्मर्यते १।३।२३ ( ८६ )

अत्र ( १ ) 'अनुकृतेस्तस्य च' ( १।३।२२ ) इति सूत्रे प्रथमान्तपदाभावात् चतुर्थसामान्यनियमात् । प्रथमान्तपदस्य अध्याहारेऽपि चकारयोगात् नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात् । तथापि पञ्चभिः भाष्यकारैः एतत्सूत्रेण अधिकरणस्य रचितत्वात् [illegible]

अतएव तु अस्य पूर्वाधिकरणान्तर्गतत्वात्, तथा च एतदधिकरणोपजीव्यविषयवाक्यस्य पूर्वाधिकरणविषयवाक्यतः भिन्नत्वात् कश्चिद् विशेषनियमं विरच्य एतत्सूत्रद्वयस्य पृथगधिकरणत्वं समर्थनीयम् इति युक्तम्। स च नियमो यथा—

“प्रथमान्तपदाभावेऽपि उद्देश्यविधेयान्यतरासमुच्चायक-चकारादिशब्दयोगेऽपि एवं च अधिकरणत्वनिषेधेऽपि विषयश्रुतिभेदात् अधिकरणभेदः करणीयः” इति एकादशः नियमः।

अत्र अधिकसम्मत्या विषयश्रुतिस्तु मुण्डकवचनं ‘न तत्र सूर्य्यो भाति’ इत्यादि, पूर्वाधिकरणे तु विषयश्रुतिस्तावत् छान्दोग्यवचनम् ‘यदिदम् अस्मिन् ब्रह्मपुरे दहरम्’ इत्यादि। एवं च श्रुतिभेदः तथैव विषयभेदश्च अत्र अतीव स्पष्टः, विभिन्नश्रुत्यर्थमूलकत्वात्। तेन ‘अनुकृतेस्तस्य च’ इति सूत्रे प्रथमान्तपदाभावेऽपि चकारवशात् अध्याहृतप्रथमान्तपदस्य अधिकरणारम्भकत्वनिषेधेऽपि विषयश्रुतिभेदनिबन्धनः अधिकरणभेदः संगच्छते। अतः अत्र रामानुज-निम्बार्क-श्रीकण्ठभाष्याणां दुष्टत्वम् अनिवार्य्यम्।

( २ ) ‘अपि च स्मर्य्यते’ ( १।३।२३ ) इत्यत्र प्रथमान्तपदाभावात् चकारसत्त्वाच्च नास्य पृथगधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च। तथा च अत्रैव अधिकरणसमाप्तिः बोद्धव्या, परसूत्रे सर्वसम्मत्या अधिकरणारम्भात्।

## सप्तमं प्रमिताधिकरणम्।

अत्र “शब्दादेव प्रमितः” (१।३।२४) इति सूत्रस्य ‘प्रमितः’-पदानुसारेण अस्य “प्रमिताधिकरणं” नाम। सर्वैः भाष्यकारैः अत्र सूत्रद्वयेन अधिकरणं रचितम्। तच्च सूत्रद्वयम्—

१। शब्दादेव प्रमितः १।३।२४ ( ८७ )

२। हृद्यपेक्षया तु मनुष्याधिकारत्वात् १।३।२५ ( ८८ )

( १ ) अत्र “शब्दादेव प्रमितः” ( १।३।२४ ) इत्यत्र ‘प्रमितः’ इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतं नियमानुगतं च। चतुर्थसामान्यनियमात्।

( २ ) “हृद्यपेक्षया तु मनुष्याधिकारत्वात्” ( १।३।२५ ) अत्र प्रथमान्तपदाभावात् चतुर्थसामान्यनियमात् नास्य अधिकरणारम्भकत्वम्, अष्टादशविशेषनियमो नात्र प्रयोक्तव्यः, प्रथमान्तपदाभावात्। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता एव। अतः नात्र कस्यापि भाष्यस्य कोऽपि दोषः।

## अष्टमं देवताधिकरणम्।

अस्मिन् अधिकरणे सूत्रपदानुसारेण न नामकरणं, १।१।११ प्रतर्दनाधिकरणवत्। परन्तु अधिकरणप्रतिपाद्यानुसारेणैव तत्। अत्र रामानुजभाष्यं विहाय सर्वेषु भाष्येषु एतदधिकरणार्थम् अष्ट सूत्राणि गृहीतानि। रामानुजभाष्ये तु प्रथमादिभिः पञ्चभिः सूत्रैः एकम् अधिकरणम्, अन्तिमसूत्रत्रयेण अपरमधिकरणं कृतम्। तानि च अष्ट सूत्राणि, यथा—

१। तदुपर्य्यपि बादरायणः सम्भवात् १।३।२६ ( ८९ )
२। विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् १।३।२७ ( ९० )
३। शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् १।३।२८ ( ९१ )
४। अतएव च नित्यत्वम् १।३।२९ ( ९२ )
५। समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च १।३।३० ( ९३ )
६। मध्वादिष्वसम्भवादनधिकारं जैमिनिः १।३।३१ ( ९४ )
७। ज्योतिषि भावाच्च १।३।३२ ( ९५ )
८। भावं तु बादरायणोऽस्ति हि १।३।३३ ( ९६ )

अत्र ( १ ) “तदुपर्य्यपि बादरायणः सम्भवात्, ( १।३।२६ ) इत्यत्र “बादरायणः” इति प्रथमान्तपदेन स्वमतवर्णनात् विषयान्तरस्य सूचनात् च अधिकरणारम्भः संगतः एव, चतुर्थ-सामान्यनियमात् दशमविशेषनियमाच्च ।

( २ ) “विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्” ( १।३।२७ ) अत्र ‘विरोधः’ इति प्रथमान्तपदसत्त्वेऽपि “इति चेन्न’ पदात् नास्य अधिकरणारम्भकत्वम्। पञ्चमविशेषनियमात्।

( ३ ) “शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्’ ( १।३।२८ ) इत्यत्र ‘शब्दः’ इति प्रथमान्तपदसत्त्वेऽपि “इति चेन्न” पदात् नास्य अधिकरणारम्भकत्वम्, पञ्चमविशेषनियमात् ।

( ४ ) “अतएव च नित्यत्वम्” ( १।३।२९ ) इत्यत्र “नित्यत्वम्” इति प्रथमान्तपद-सत्त्वेऽपि च-शब्दात् नास्य अधिकरणारम्भकत्वम् । षष्ठविशेषनियमात् ।

( ५ ) “समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च” ( १।३।३० ) इत्यत्र “अविरोधः” इति प्रथमान्तपदसत्त्वेऽपि च-शब्दयोगात् हेतुबोधकत्वाच्च नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात् ।

६। “मध्वादिष्वसम्भवादनधिकारं जैमिनिः” ( १।३।३१ ) इत्यत्र “जैमिनिः” इति प्रथमान्त पदसत्त्वेऽपि पूर्वपक्षरूपेण मतान्तरज्ञापनात् विषयान्तरस्य असूचनात् च नास्य अधिकरणा-रम्भकत्वम् । विंशविशेषनियमात् । रामानुजमतेन अधिकरणारम्भात् तद्भाष्यस्य दोषः एव ।

( ७ ) “ज्योतिषि भावाच्च’ ( १।३।३२ ) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वम् । अध्याहृतेऽपि चकारसत्त्वम् अधिकरणवारकमेव ।

( ८ ) “भावं तु बादरायणोऽस्ति हि” ( १।३।३३ ) अत्र ‘बादरायणः’ इति प्रथमान्त-पदसत्त्वेऽपि तु-शब्द-योगात् नास्य अधिकरणारम्भकत्वम्, अतः विषयान्तरस्य असूचनात् दशम-विशेषनियमं बाधित्वा नवमविशेषनियमस्य प्रवृत्तिः । परसूत्रे सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः समुचितैव ।

## नवमम् अपशूद्राधिकरणम् ।

अत्र “शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि” ( १।३।३४ ) इति प्रथ-

करणारम्भकसूत्रपदात् नास्य नामकरणम्, किन्तु अधिकरणतात्पर्य्यम् अवलम्ब्य तत्। शूद्राणां वेदपूर्वकं ब्रह्मविद्यायाम् अधिकाराभावबोधनाय अस्य अपशूद्राधिकरणं नाम। प्रतर्दनाधिकरण-देवताधिकरणद्वयवत्। रामानुज-निम्बार्क-श्रीकण्ठ-बलदेव-भिन्नानां सर्वेषां मतेन अस्मिन् अधिकरणे पञ्च सूत्राणि गृहीतानि। रामानुज-श्रीकण्ठ-मते तु सप्त सूत्राणि, द्वितीय-पञ्चमसूत्रयोः प्रत्येकं द्विधा विभागात्, निम्बार्कमते बलदेव-मते च षट् सूत्राणि, केवलं पञ्चमसूत्रस्य द्विधाकरणात्। तानि च पञ्च सूत्राणि—

१। "शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि" १।३।३४ ( ९७ )

२। "क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्' १।३।३५ ( ९८ )

३। "संस्कारपरामर्शात् तदभावाभिलापाच्च" १।३।३६ ( ९९ )

४। "तदभावनिर्द्धारणे च प्रवृत्तेः" १।३।३७ ( १०० )

५। "श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च" ( १।३।३८ ) ( १०१ )

अत्र ( १ ) "शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि" ( १।३।३४ ) इति सूत्रस्य शुक् इति प्रथमान्त-पदात् अनेन अधिकरणारम्भः, चतुर्थसामान्यनियमानुगतः एव।

( २ ) "क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ( १।३।३५ ) इत्यत्र प्रथमान्तपदा-भावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। अध्याहृतेऽपि चकारः तस्य बाधकः। षष्ठविशेषनियमात्। रामानुज-श्रीकण्ठ-मताभ्याम् एतत् न एकं सूत्रं, किन्तु सूत्रद्वयं, यथा—"क्षत्रियत्वगतेश्च" इति एकम्, "उत्तरत्र-चैत्ररथेन लिंगात्" इति अन्यत। परन्तु तत्र न प्राचीनं प्रमाणं किमपि प्रदर्शितम्; अतः नैतत् समर्थनीयम्। प्राचीनपाठखण्डने प्राचीनतरस्यैव योग्यत्वात्। केवलं युक्त्या वक्तुः अभिप्रायाविष्करणं न सर्वत्र सम्भवति। आकांक्षायाः प्राबल्यात् अस्य एकसूत्रत्वमेव युक्तम्। चतुर्थविशेषनियमात्।

( ३ ) "संस्कारपरामर्शात् तदभिलापाच्च' ( १।३।३६ ) इत्यत्र प्रथमान्त-पदाभावात् नास्य अधिकरणारम्भकत्वम्। चकारात् साकांक्षत्वमपि। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

( ४ ) "तदभावनिर्द्धारणे च प्रवृत्तेः ( १।३।३७ ) एतदपि तथा। चतुर्थसामान्य-नियमात्, षष्ठविशेषनियमाच्च।

( ५ ) श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ( १।३।३८ ) इत्यत्रापि पूर्ववत्। चतुर्थ-सामान्यनियमात्, षष्ठविशेषनियमाच्च।

परसूत्रे अधिकरणारम्भस्य सर्वसम्मतत्वात् अत्रैव अधिकरणसमाप्तिः संगतैव। रामानुज-निम्बार्क-श्रीकण्ठ-बलदेव-मतेन "श्रवणाध्ययनार्थप्रतिषेधात्" इति एकं सूत्रम् "स्मृतेश्च" इति अपरं सूत्रम्। अत्रापि विभागे न किमपि प्राचीनं प्रमाणं प्रदर्शितम्। अत्रापि चतुर्थसामान्यनियमः चिन्तनीयः। एवं च पाठान्तरं विहाय एतदधिकरणरचनायां न कस्यापि दोषः सञ्जातः इति।

## दशमम्–कम्पनाधिकरणम् ।

अत्र "कम्पनात्" ( १।३।३९ ) इति सूत्रात् अस्य "कम्पनाधिकरणं" नाम । रामानुज-निम्बार्क-भिन्नैः सर्वैः भाष्यकारैः अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । रामानुज-निम्बार्क-मतेन तु "ज्योतिर्दर्शनात्" इति परवर्त्तिसूत्रमपि एतदधिकरणान्तर्गतं कृतम् । तन्न सम्यक्, यतः तंत्र अधिकसंख्यकशिष्टभाष्यकारैः पृथगधिकरणं कृतम् । तच्च पुनः नियमानुगतमेव ।

अत्र "कम्पनात ( १।३।३९ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं समुचितमिति आपाततः प्रतिभाति । परन्तु पादसंगतिबलेन तथा अध्याहृतप्रथमान्तपदसामर्थ्याच्च अत्र अधिकरणरम्भः कर्त्तुं शक्यते । पञ्चमसामान्यनियमात्, एकादशविशेषनियमाच्च ।

विज्ञानभिक्षुसम्मतपाठे तु "प्राणः" इति एकः अतिरिक्तः शब्दः अत्र परिगृहीतः दृश्यते । तेन अस्य अधिकरणारम्भकत्वं संगतमेव भवति । तथापि तत्र प्राणशब्दग्रहणं प्राचीनतर-प्रमाणं विनैव, तेन तत्र न सम्यक् प्रामाण्यबुद्धिः उदेति । तथापि सप्तमसंख्यके प्रमिताधिकरणे कठवल्ली-श्रुत्युक्तस्य अङ्गुष्ठमात्रपुरुषस्य जीवत्वसंशयं निवार्य्य ब्रह्मत्वप्रतिपादनात्, एतदधि-करणप्रतिपाद्यप्राणकम्पनस्य तादृशसंशयनिवार्य्यत्वात च अत्र प्राणशब्दस्य अनुषङ्गः न असंगतो भवति । अष्टमदेवताधिकरणेन तथा नवमापशूद्राधिकरणेन व्यवहितमपि एतदधिकरणम् अर्थतः प्रमिताधिकरणसम्पर्कितमेव । प्रसंगसंगत्या अष्टमाधिकरणस्य तथा तस्य दृष्टान्त-संगत्या नवमाधिकरणस्य च अवतारणात् । प्रमिताधिकरणोपजीव्य-कठवल्ली-श्रुतेरपि अस्य उपजीव्यत्वाच्च । अतः प्रथमान्तप्राणपदस्य अध्याहारेण अत्र अधिकरणारम्भः संगतः एव । तथैव परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च समुचितैव ।

## एकादश ज्योतिरधिकरणम् ।

अत्र "ज्योतिर्दर्शनात्" ( १।३।४० ) इति सूत्रस्य "ज्योतिः" इति पदात् अस्य "ज्योतिर-धिकरणं" नाम । रामानुज-निम्बार्कभिन्नैः सर्वैः भाष्यकारैः अनेन एकेन सूत्रेण एतत् अधिकरणं रचितम् । तयोर्मते एतत् सूत्रं, दशमकम्पनाधिकरणस्य अन्तिमसूत्रम् । परन्तु तत् असंगतम् । "ज्योतिः" इति प्रथमान्तपदस्य सत्त्वात्, चतुर्थसामान्यनियमात् । तेन अत्र रामानुजनिम्बार्काख्य-भाष्यद्वयमेव दूषणीयम् । परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## द्वादश–अर्थान्तरत्वादिव्यपदेशाधिकरणम् ।

अत्र "आकाशोऽर्थान्तरत्वादिव्यपदेशात्" ( १।३।४१ ) इति सूत्रस्य "अर्थान्तरत्वादि-व्यपदेश" इति शब्दात् अस्य "अर्थान्तरत्वादिव्यपदेशाधिकरणं" नाम । आकाशाधिकरणस्य पूर्वम् उक्तत्वात् अत्र "आकाश"-पदेन न नामकरणम् अस्य अधिकरणस्य । अत्र रामानुज-निम्बार्क-श्रीकण्ठभिन्नैः शिष्टैः पञ्चभिः भाष्यकारैः अनेन एकेन सूत्रेण एतदधिकरणं रचितम् । रामानुज-निम्बार्क-श्रीकण्ठभाष्येषु तु परवर्त्तिसूत्रद्वयमपि एतदधिकरणान्तर्गतमेव दृश्यते ।

अत्र "आकाशः" इति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः समुचितः एव । चतुर्थसामान्य-नियमात् । सर्वेषु भाष्येषु नात्र मतान्तरम् । परसूत्रे पञ्चभिः भाष्यैः अधिकरणारम्भात् अत्रैव अधिकरण-समाप्तिः संगता एव ।

## त्रयोदश—सुषुप्त्युत्क्रान्त्यधिकरणम् ।

अत्र "सुषुप्त्युत्क्रान्त्योर्भेदेन" इति ( १।३।४२ ) सूत्रस्य "सुषुप्त्युत्क्रान्ति"—शब्दात् अस्य "सुषुप्त्युत्क्रान्त्यधिकरणं" नाम । रामानुज-निम्बार्क-श्रीकण्ठभिन्नैः पञ्चभिः भाष्यकारैः अत्र अधिकरणं रचितम् । रामानुजादीनां मतेन एतत् सूत्रं तथा परवर्त्ति सूत्रमपि पूर्वाधिकरणान्त-र्गतमेव । तदेतत् सूत्रद्वयं—

१। सुषुप्त्युत्क्रान्त्योर्भेदेन ( १।३।४२ ) ( १०५ ) २। पत्यादिशब्देभ्यः (१।३।४३) (१०६)

अत्र ( १ ) "सुषुप्त्युत्क्रान्त्योर्भेदेन" ( १।३।४२ ) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं संगतम् । तेन रामानुज-निम्बार्क-श्रीकण्ठ-मतान्येव अत्र सम्यक् । परन्तु यतः पञ्चभिः आचार्य्यैः, एतस्य अन्यथाकृतम् इति दृश्यते, तेन केनचित् प्रथमान्तपदाध्या-हारेण अस्य अधिकरणारम्भकत्वं समर्थनीयम्, पञ्चमसामान्यनियमात्—इति युक्तं कल्पनम् । ततश्च अन्यदपि एकं कारणम् अस्ति अधिकरणभेदाय । पूर्वाधिकरणविषयवाक्यात् अस्य विषयवाक्यस्य भेदात् "अनुकृत्यधिकरण"वत् एकादशविशेषनियमानुसारेण अस्य पृथगधि-करणत्वं संगतमेव । पूर्वाधिकरणे छान्दोग्यवाक्यस्य विषयवाक्यत्वम् आसीत्, अत्र तु बृह-दारण्यकवाक्यमेव विषयवाक्यम् । एतदपि पुनः रामानुज-निम्बार्क-श्रीकण्ठभाष्य-सम्मतमेव । अतः आपातदृष्ट्या रामानुजादीनां भाष्याणां साधुत्वेऽपि न क्षोदक्षमत्वं तेषाम्, विषय-भेदात् । तेन रामानुज-निम्बार्क-श्रीकण्ठभाष्याणामेव दोषः सिद्ध्यति ।

( २ ) "पत्यादिशब्देभ्यः" ( १।३।४३ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम् । चतुर्थसामान्यनियमात् । पादशेषात् अत्रैव अधिकरणसमाप्तिश्च सुसंगतैव । माध्वमतेन तु अत्र पृथगधिकरणं कृतम्, तन्न संगतम्, प्रथमान्तपदघटितत्व-नियमविरोधात् । अतः अत्र माध्वभाष्यस्यैव दोषः कल्पनीयः ।

## तृतीयपादसमालोचनम्

अधुना एतत्पादोपसंहारे अस्माकं प्रागुक्तरीत्या प्रथमादिपादोपसंहारवत् चत्वारो विषयाः आलोचनीयाः, ते च—

१। कति कीदृशाश्च नियमा अत्र संकलिताः ।

२। कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

३। काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

४। उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः उचिता इति । तत्र प्रथमम्—

कति कीदृशाश्च नियमा अत्र संकलिताः ।

अत्रापि एकादशसंख्यकः एकः एव नियमः संकलितः । स तु "अनुकृतेस्तस्य च" (१।३।२२) इति सूत्रे रचितः । स च यथा—"प्रथमान्तपदाभावेऽपि उद्देश्यविधेयान्यतरा-समुच्चायक-हेतुसमुच्चायक—चकारादिशब्दयोगेऽपि एवं च अधिकरणनिषेधेऽपि विषयश्रुतिभेदात् अधिकरणभेदः करणीयः" इति । इदानीं द्रष्टव्यम्—

(२) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः

१।३।६ अधिकरणे रामानुज-निम्बार्क-श्रीकण्ठ-भाष्येषु "अनुकृतेस्तस्य च" इति (१।३।२२) सूत्रे अधिकरणस्य अरचनायां दोषः ।

१।३।८ अधिकरणे रामानुजभाष्ये "मध्वादिष्वसम्भवादनधिकारं जैमिनिः" इति (१।३।३१) सूत्रे अधिकरणरचनायां दोषः ।

१।३।११ अधिकरणे रामानुज-निम्बार्क-भाष्ययोः "ज्योतिर्दर्शनात्" इति (१।३।४०) सूत्रे अधिकरणस्य अरचनायां दोषः ।

१।३।१३ अधिकरणे रामानुज-निम्बार्क-श्रीकण्ठ-भाष्येषु "सुषुप्त्युत्क्रान्त्योर्भेदेन" इति १।३।४२ सूत्रे अधिकरणस्य अरचनायां दोषः ।

१।३।१३ अधिकरणे माध्वभाष्ये "पत्यादिशब्देभ्यः" इति (१।३।४२) सूत्रे अधिकरण-रचनायां दोषः ।

तेन अधिकरणरचनायां रामानुजभाष्ये एकः दोषः, माध्वेऽपि एकः दोषः, ततः अधिकरणस्य अरचनायां रामानुजभाष्ये दोषत्रयं, निम्बार्के दोषत्रयं, तथा श्रीकण्ठभाष्ये दोषद्वयम् । एवं च—

| भाष्यनाम | अधिकरणस्य अरचनायाम् | अधिकरणस्य रचनायाम् |
|---|---|---|
| रामानुजभाष्ये | ३ दोषाः | १ दोषः |
| निम्बार्कभाष्ये | ३ दोषाः | ० |
| श्रीकण्ठभाष्ये | २ दोषौ | ० |
| माध्वभाष्ये | ० | १ दोषः |

अधुना द्रष्टव्यम्—

(३) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

तत्र प्रथमाधिकरणे—

प्रथमसूत्रे—"द्युभ्वाद्यायतनं स्वशब्दात्" १।३।१ इत्यत्र "यस्मिन् द्यौः पृथिवी चान्तरिक्षम् ओतम्...." (मु: २।२।५)

द्वितीयसूत्रे—"मुक्तोपसृप्यव्यपदेशात्" १।३।२ इत्यत्र "तथा विद्वान् नामरूपाद् विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" (मु: ३।२।८)

तृतीयसूत्रे—"नानुमानमतच्छब्दात्" ( १।३।३ ) इत्यत्र "यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः" ( मुः १।१।९ )

चतुर्थसूत्रे—"प्राणभृच्च" ( १।३।४ ) इत्यत्र श्रुतिः नोद्धृता।

पञ्चमसूत्रे—"भेदव्यपदेशात्" ( १।३।५ ) इत्यत्र "तमेवैकं जानथ" ( मुः २।२।५ )

षष्ठसूत्रे—"प्रकरणात्" ( १।३।६ ) इत्यत्र "कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातम भवति" ( मुः १।१।३ )

सप्तमसूत्रे—"स्थित्यदनाभ्यां च" ( १।३।७ ) इत्यत्र "द्वा सुपर्णा सयुजा... "( मुः ३।१।१ )

द्वितीयाधिकरणे—

प्रथमसूत्रे—"भूमा सम्प्रसादादध्युपदेशात्" ( १।३।८ ) इत्यत्र "तरति शोकम् आत्मवित्" ( छाः ७।१।३ ) "भूमा त्वेव विजिज्ञासितव्यः इति भूमानं भगवो विजिज्ञास इति' ( छाः ७।२३।१ )। "यत्र नान्यत् पश्यति" ( छाः ७।२४।१ ) "एषः तु वा अतिवदति यः सत्येन अतिवदति"। ( ७।१६।१ )

द्वितीयसूत्रे —"धर्मोपपत्तेश्च" ( १।३।९ ) इत्यत्र "यत्र नान्यत् पश्यति" ( छाः ७।२४।१ )

तृतीयाधिकरणे—

प्रथमसूत्रे—"अक्षरमम्बरान्तधृतेः" ( १।३।१० ) इत्यत्र "एतद् वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलम्...."( बृः ३।८।७–८ ) "एतस्मिन् नु खलु अक्षरे गार्गि आकाश ओतश्च प्रोतश्च" ( बृः ३।८।११ )

द्वितीयसूत्रे—"सा च प्रशासनात्' ( १।३।११ ) इत्यत्र "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः" ( बृः ३।८।९ )

तृतीयसूत्रे—"अन्यभावव्यावृत्तेश्च" ( १।३।१२ ) इत्यत्र "तद् वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ. ..( बृः ३।८।११ )

चतुर्थाधिकरणे—

प्रथमसूत्रे—"ईक्षतिकर्म्मव्यपदेशात् सः" ( १।३।१३ ) इत्यत्र "यः पुनः एतं त्रिमात्रेण ओमिति एतेन एव अक्षरेण परं पुरुषम् अभिध्यायीत" ( प्रश्नः ५।२।५ ) "परात् परं पुरिशयं पुरुषम् ईक्षते" ( प्रश्न ५।५ )

पञ्चमाधिकरणे—

प्रथमसूत्रे—"दहर उत्तरेभ्यः" ( १।३।१४ ) इत्यत्र "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन् अन्तराकाशः" ( छाः ८।१।१ ) "यावान् वा अयमाकाशः तावान् एषोऽन्तर्हृदय आकाशः उभेऽस्मिन् द्यावापृथिवी अन्तरेव समाहिते एष आत्मा अपहतपाप्मा" ( छाः ८।१।३ )

द्वितीयसूत्रे—"गतिशब्दाभ्यां तथाहि दृष्टं लिंगं च" (१।३।१५) इत्यत्र—"इमाः सर्वाः प्रजा अहरहः गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति" (छाः८।३।२)" सता सोम्य तदा सम्पन्नो भवति" (छाः ६।८।१)

तृतीयसूत्रे—"धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः' (१।३।१६) इत्यत्र "अथ य आत्मा स सेतुः विधृतिः एषां लोकानाम् असम्भेदाय" (छाः ८।४।१) "एष भूतपालः एष सेतुः विधरणः" (बृः ४।४।२२)

चतुर्थसूत्रे—"प्रसिद्धेश्च" (१।३।१७) इत्यत्र "आकाशो वै नाम नामरूपयो र्निर्वहिता" (छाः ८।१४।१)

पञ्चमसूत्रे—"इतरपरामर्शात् स इति चेन्नासम्भवात्" (१।३।१८) इत्यत्र "एष सम्प्रसादः....' (छाः ८।३।४)

षष्ठसूत्रे—"उत्तराच्चेदाविर्भूतस्वरूपस्तु" (१।३।१९) इत्यत्र "य एषः अक्षिणि पुरुषो-दृश्यते" (छाः ८।७।४) "परं ज्योतिः उपसंपद्य स्वेन रूपेण अभिनिष्पद्यते" (छाः ८।३।४)

सप्तमसूत्रे—"अन्यार्थश्च परामर्शः" (१।३।२०) इत्यत्र "संप्रसादः"...."अभिनिष्पद्यते" (छाः ८।३।४)

अष्टमसूत्रे—"अल्पश्रुतेरिति चेत् तदुक्तम्" (१।३।२१) इत्यत्र "दहरोऽस्मिन्नन्तराकाशः" (छाः ८।१।१)

षष्ठाधिकरणे—

प्रथमसूत्रे—"अनुकृतेस्तस्य च" (१।३।२२) इत्यत्र "परं ज्योतिरूपसंपद्य" (छाः ८।३।४) "तच्छुभ्रं ज्योतिषां ज्योतिः" (कठः २।५।२५) "आयुर्ह उपासतेऽमृतम्" (बृः ४।४।१६) "न तत्र सूर्यो भाति न चन्द्रतारकम्" (मुः २।२।१०) "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"। (मुः २।२।१०)

द्वितीयसूत्रे—"अपि च स्मर्य्यते" (१।३।२३) इत्यत्र "न तद् भासयते सूर्यो न शशाङ्को न पावकः (गीः १५।६) "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्" (गीता १५।१२)

सप्तमाधिकरणे—

प्रथमसूत्रे—"शब्दादेव प्रमितः" (१।३।२४) इत्यत्र "अङ्गुष्ठमात्रः पुरुषः ज्योतिरिवाधूमकः" (कठ २।४।१३)" ईशानो भूतभव्यस्य" (कठ २।४।१३)

द्वितीयसूत्रे—"हृद्यपेक्षया तु मनुष्याधिकारात्" (१।३।२५) इत्यत्र श्रुतिः नोद्धृता।

अष्टमाधिकरणे—

प्रथमसूत्रे—"तदुपर्य्यपि बादरायणः संभवात्" ( १।३।२६ ) इत्यत्र "तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत् ( बृः १।४।१० )

द्वितीयसूत्रे—"विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" ( १।३।२७ ) इत्यत्र—"स एकधा भवति त्रिधा भवति" । ( छाः ७।२६।२ )

तृतीयसूत्रे—"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" ( १।३।२८ ) इत्यत्र "एत इति वै प्रजापतिर्देवानसृजत" ( अथर्ववेदः ? ) "वेदशब्देभ्य एवादौ" ( महाः शाः मोः २३१।५६ )

चतुर्थसूत्रे—"अतएव च नित्यत्वम्" ( १।३।२९ ) इत्यत्र श्रुतिः नोद्धृता ।

पञ्चमसूत्रे—"समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च" ( १।३।३० ) इत्यत्र-"धाता यथा पूर्वमकल्पयत्" ( नारायणोपनिषत् २३, ऋग्वेदः १०।१९०।३ ) "यथर्तुष्वृतुलिंगानि नाना रूपाणि पर्य्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ( स्मृतिः ? )

षष्ठसूत्रे—"मध्वादिष्वसम्भवादनधिकारं जैमिनिः" ( १।३।३१ ) इत्यत्र "असौ वा आदित्यो देवमधु" (छाः ३।१।१) "आदित्यो ब्रह्म इत्यादेशः" ( छाः ३।११।१ )

सप्तमसूत्रे—"ज्योतिषि भावाच्च" ( १।३।३२ ) इत्यत्र श्रुतिः नोद्धृता।

अष्टमसूत्रे—"भावं तु बादरायणोऽस्ति हि" ( १।३।३३ ) इत्यत्र श्रुतिः नोद्धृता ।

नवमाधिकरणे—

प्रथमसूत्रे—"शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि" ( १।३।३४ ) इत्यत्र—"अहहारे त्वा शूद्र तवैव सह गोभिरस्तु" ( छा ४।२।३ )

द्वितीयसूत्रे—"क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्" ( १।३।३५ ) इत्यत्र ( ताण्ड्यः ब्रा० २०।१२।५, छाः ४।३।५ वचनानि )

तृतीयसूत्रे—"संस्कारपरामर्शात् तदभावाभिलापाच्च" ( १।३।३६ ) "तं होपनिन्ये" ( शतपथ ब्राः ११।५।३।१३ ) "अधीहि भगव इति होपससाद" ( छाः ७।१।१ ) "न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति" ( मनु १०।१२।६ )

चतुर्थसूत्रे—"तदभावनिर्द्धारणे च प्रवृत्तेः" ( १।३।३७ ) इत्यत्र ( छाः ४।४।५ )

पञ्चमसूत्रे—"श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च" ( १।३।३८ ) इत्यत्र—"अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्" ( गौतमसंहिता २२ अः ) "तस्माच्छूद्रसमीपे नाध्येतव्यम्" ( तैः सं ७।१।१।६ ) "न शूद्राय मतिं दद्यात्" ( मनु ४।८० ) "द्विजातीनामध्ययनमिज्यादानम्" ( मनु १।८९ ) "पद्यु ह वा एतच्छ्मशानं यच्छूद्रः" ( तैः सं ७।१।१।६ )

दशमाधिकरणे—

प्रथमसूत्रे—"कम्पनात्" ( १।३।३९ ) इत्यत्र—"यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम्" ( कठ २।३।२ ) "प्राणस्य प्राणः" ( वृः ४।४।१८ ) "न प्राणेन नापानेन" ( कठ २।२।५ )

एकादशाधिकरणे—

प्रथमसूत्रे—"जोतिर्दर्शनात्" (१।३।४०) इत्यत्र "य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं जोतिः उपसंपद्य" ( छाः ८।१२।३ ) "य आत्मा अपहतपाप्मा" ( छाः ८।७।१ )

द्वादशाधिकरणे—

प्रथमसूत्रे—"आकाशोऽर्थान्तरत्वादिव्यपदेशात्" ( १।३।४१ ) इत्यत्र "आकाशो वै नाम नामरूपयोः निर्वहिता" ( छाः ८।१४।१ ) "ते यदन्तरा" ( छाः ८।१४।१ ) तद् ब्रह्म तदमृतं स आत्मा ( छाः ८।१४।१ )

त्रयोदशाधिकरणे—

प्रथमसूत्रे—"सुषुप्त्युत्क्रान्त्योर्भेदेन" ( १।३।४२ ) इत्यत्र "प्राज्ञेन आत्मना सम्परिष्वक्तः" ( वृः ४।३।२१ ) "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" ( वृः ४।३।७ )" "प्राज्ञेनात्मना अन्वारूढ उत्सर्जन् याति" ( ४।३।३५ )"

द्वितीयसूत्रे—"पत्यादिशब्देभ्यः" ( १।३।४३ ) इत्यत्र "सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः" ( वृः ४।४।२२ ) " स न साधुना कर्म्मणाभूयान्" ( कौ ३।८ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिवलेन—

### ( ४ ) कीदृशी अस्य पादसंगतिः

अस्मिन् पादे याश्च श्रुतयः गृहीताः ताः सर्वाः शाङ्करभाष्यानुसारेण इति वोद्धव्यम् । भाष्यान्तरे तु किञ्चिद् वैषम्यं दृश्यते । नात्र सर्वे ऐकमत्यं भजन्ते । तत्र हेतुश्च तत्त्वांशे मतवैषम्यमेव, न तु प्राचीनभाष्यादिमूलकत्वं तस्य । तथापि मतभेदेन पादप्रतिपाद्यम् अत्र प्रदर्श्यते—

शाङ्करमते—ज्ञेयब्रह्मप्रतिपादकास्पष्टश्रुतिवाक्यानां समन्वयः ।

भास्करमते—प्रायेण शाङ्करमतानुरूपम् ।

रामानुजमते—स्पष्टलिंगानि वाक्यानि विचारितानि ।

माध्वमते—अन्यत्रप्रसिद्धानां शब्दानां विष्णौ समन्वयः ।

निम्बार्कमते—अस्पष्टस्पष्टजीवादिलिंगकवाक्यानां समन्वयः ।

श्रीकण्ठमते—स्पष्टास्पष्टलिंगवाक्यविचारः ।

श्रीकरमते—स्पष्टास्पष्टश्रुतिवाक्यसन्देहशूकनिर्मूलकतया स्पष्टार्थकथनम् ।

तथा च एतेषां सम्यक् पर्य्यालोचने कृते तत्त्वतः न महान् मतभेदः परिलक्ष्यते । अतः अत्र शाङ्कर-भास्कर-सम्मत-पदार्थ एव अत्र पादसंगतित्वेन ग्रहणीय इति युक्तम् । तयोः प्राचीनत्वात् । एवं च एतादृशपादसंगत्या एतत्पादीयसूत्राणि व्याख्येयानि । तेन एतत्पादीय-सूत्रबलेन जीव-जगद्-ब्रह्म-स्वरूपनिरूपणादिकं प्रासंगिकमित्येव बोद्धव्यम्, ब्रह्मबोधकास्पष्ट-श्रुतीनां ब्रह्मणि समन्वयः एव मुख्यं तात्पर्य्यम् ।

इति प्रथमाध्याये तृतीयपादोपसंहारः ।

# अथ प्रथमाध्याये चतुर्थपादः ।

## प्रथमम् आनुमानिकाधिकरणम् ।

अत्र "आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" ( १।४।१ ) इति सूत्रस्य "आनुमानिकम्" इति पदम् अवलम्ब्य अस्य "आनुमानिकाधिकरणं" नाम । तत्र माध्व-भाष्य-भिन्नेषु सर्वेषु भाष्येषु सप्त सूत्राणि गृहीतानि । माध्वभाष्ये तु परवर्त्त्यधिकरणस्य प्रथमं सूत्रम् अत्र गृहीतम्, तथा पञ्चमं सूत्रं द्विधा विभज्य अस्मिन् अधिकरणे नव सूत्राणि संगृहीतानि । तानि च सप्त सूत्राणि यथा—

१। "आनुमानिकमप्येकेषामिति चेन्न शरीररूपक-विन्यस्तगृहीतेर्दर्शयति च १।४।१ (१०७)

२। "सूक्ष्मं तु तदर्हत्वात्" १।४।२ (१०८)

३। "तदधीनत्वादर्थवत्" १।४।३ (१०९)

४। "ज्ञेयत्वावचनाच्च" १।४।४ (११०)

५। "वदतीति चेन्न प्राज्ञो हि प्रकरणात्" १।४।५ (१११)

६। "त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" १।४।६ (११२)

७। "महद्वच्च" १।४।७ (११३)

अत्र ( १ ) "आनुमानिकमप्येषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च" ( १।४।१ ) इति सूत्रस्य "आनुमानिकम्" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भ-कत्वम् । "इति चेन्न' इति पदसत्त्वं तन्निषेधकमपि सर्वसम्मत्या पादारम्भात् अस्य अधिकरणा-रम्भकत्वं न वारयति । द्वितीयविशेषनियमात्, पञ्चमविशेषनियमाच्च ।

( २ ) "सूक्ष्मं तु तदर्हत्वात्" ( १।४।२ ) अत्र "सूक्ष्मम्" इति प्रथमान्तपदसत्त्वेऽपि तु-शब्दयोगात् नास्य अधिकरणारम्भकत्वम्, नवमविशेषनियमात् ।

( ३ ) "तदधीनत्वादर्थवत्" । ( १।४।३ ) अत्र प्रथमान्तपदाभावात् नाधिकरणा-रम्भः । चतुर्थसामान्यनियमात् "अर्थवत्" इत्यस्य प्रथमान्तत्वेऽपि साकांक्षत्वाच्च ।

( ४ ) "ज्ञेयत्वावचनाच्च" ( १।४।४ ) अत्रापि प्रथमान्तपदाभावात् चकारयोगाच्च नाधि-करणारम्भः, षष्ठविशेषनियमात् ।

( ५ ) "वदतीति चेन्न प्राज्ञो हि प्रकरणात्" ( १।४।५ ) अत्र "प्राज्ञः" इति प्रथमान्तपदसत्त्वेऽपि "इति चेन्न" पदात् नास्य अधिकरणारम्भकत्वम्। पञ्चमविशेषनियमात्। माध्वभाष्ये तु एतत्सूत्रं द्विधा कृतम्। अधिकसमर्थनाभावात् तत् न संगतम्। चतुर्थविशेषनियमश्चात्र चिन्तनीयः।

( ६ ) "त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" ( १।४।६ ) अत्र "उपन्यासः" तथा "प्रश्नः" इति प्रथमान्त-पदद्वयसत्त्वेऽपि चकारयोगात् नास्य अधिकरणारम्भकत्वम्। षष्ठविशेषनियमात्।

( ७ ) "महद्वच्च" ( १।४।७ ) अत्र प्रथमान्तपादाभावात् नास्य अधिकरणारम्भकत्वम्। महद्वत् इत्यस्य प्रथमान्तत्वकल्पनेऽपि चकारयोगात् नाधिकरणारम्भः, षष्ठविशेषनियमात्। परसूत्रे बहुसम्मताधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगतैव। अत्र माध्वमतेन न समाप्तिः, परन्तु-परसूत्रे एव तथा।

## द्वितीयं चसमाधिकरणम्।

अत्र "चमसवदविशेषात्" ( १।४।८ ) इति सूत्रस्य "चमस"-शब्दात् अस्य "चमसाधिकरणं" नाम। माध्वभिन्नेषु सर्वेषु भाष्येषु अत्र सूत्रत्रयं गृहीतम्। माध्वमतेन तु "चमसवदविशेषात्" इति सूत्रम् पूर्वाधिकरणान्तर्गतं कृतम्। शिष्टसूत्रद्वयेन द्वितीयाधिकरणं रचितम्। तच्च सूत्रत्रयं यथा—

१। "चमसवदविशेषात्" १।४।८ ( ११४ )

२। "ज्योतिरूपक्रमा तु तथा ह्यधीयते एके" १।४।९ ( ११५ )

३। "कल्पनोपदेशाच्च मध्वादिवदविरोधः" १।४।१० ( ११६ )

( १ ) अत्र "चमसवदविशेषात्" ( १।४।८ ) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् समुचितम्, तथापि माध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु तथा एव कृतत्वात् प्रथमान्तोद्देश्यपदमेकम् अध्याहृत्य अथवा चमसवत्-शब्दस्य प्रथमान्तत्वाभ्युपगमेऽपि अधिकरणारम्भः कर्तुं शक्यते। यतः सर्वैः भाष्यकारैः अत्र "अजा"-शब्दस्य ब्रह्मबोधकत्वं वर्णिम्। एवं च उपजीव्यश्रुतिभेदात्, पूर्वाधिकरणात् विधेयभेदाच्च अस्य पृथगधिकरणत्वमपि समर्थयितुं शक्यम्। एतदर्थम् एकादशविशेषनियमो द्रष्टव्यः। सूत्राक्षरमात्रावलम्बनेन अस्य पूर्वाधिकरणाङ्गत्वं संगच्छते। तथा च माध्वभाष्यस्य युक्ततरत्वं तदा कल्पनीयम्। परन्तु अधिकविरोधात् तन्न ग्रहणीयम्। अतः अस्मिन् सूत्रे अधिकरणस्य अरचनायां माध्वभाष्यस्यैव दोषः सञ्जातः इति बोद्धव्यम्।

( २ ) ज्योतिरूपक्रमा तु तथा ह्यधीयते एके" १।४।९ अत्र "ज्योतिरूपक्रमा" तथा "एके" इति प्रथमान्तपदद्वयसत्त्वात् अत्र पृथगधिकरणं सम्भाव्यते, परन्तु अनिषेधार्थक-"तु"-शब्दात् तस्य व्याघातः सञ्जातः, नवमविशेषनियमात् इति। माध्वभाष्ये तु अत्र पृथगधिकरणं कृतम्। तेन अत्र अधिकरणरचनायां पुनस्तस्यैव दोषः।

( ३ ) कल्पनोपदेशाच्च मध्वादिवदविरोधः" इति १।४।१० सूत्रे प्रथमान्तपदात् अस्य पृथगधिकरणारम्भकत्वं संगतम्, तथापि च-शब्द-योगेन सापेक्षत्वसाधनात् तस्य व्याघातः सञ्जातः, षष्ठ-विशेषनियमादिति। अतः परं सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव एतदधिकरणसमाप्तिः।

## तृतीयं संख्योपसंग्रहाधिकरणम्।

अत्र 'न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च" इति ( १।४।११ ) सूत्रस्य "संख्योपसंग्रह"-शब्दात् अस्य "संख्योपसंग्रहाधिकरणं" नाम। निम्बार्क-श्रीकण्ठभिन्नैः सर्वैः भाष्यकारैः अत्र सूत्रत्रयं गृहीतम्। निम्बार्कभाष्ये सूत्रचतुष्टयं, तथा श्रीकण्ठभाष्ये सूत्रपञ्चकम् अत्र गृहीतं दृश्यते। तच्च सूत्रत्रयं यथा—

१। "न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च" १।४।११ ( ११७ )

२। "प्राणादयो वाक्यशेषात्' १।४।१२ ( ११८ )

३। "ज्योतिषैकेषामसत्यन्ने' १।४।१३ ( ११९ )

अत्र ( १ ) "न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च" इति ( १।४।११ ) सूत्रे प्रथमान्तपदाभावात् नात्र अधिकरणारम्भः समुचितः। तथापि सर्वैः भाष्यकारैः तथैव कृतम् इति दृश्यते। प्रथमान्तपदाध्याहारेणापि तन्न सम्भवति, चकार-योगात्। अतः अत्र एको नियमः सङ्कल्पनीयः, येन एतादृशस्थले नियमानुगतत्वं सम्भवेत्। स च नियमः इत्थं भवतु—

"प्रथमान्तपदाभावेऽपि यत्र "अपि" "च" "वा"-प्रभृतिप्रसंगान्तरत्वबोधकशब्देन उद्देश्य-विधेयान्यतरभेदः प्रसज्येत, तत्र पृथगधिकरणं युक्तम्।" अत्र "अपि"-शब्देन पूर्वोक्तात् अन्य-विषयत्वं सूचयति। अतः एतत्सूत्रस्य पृथगधिकरणत्वं संगच्छते। यद् वा श्रुतिभेदेन विधेय-भेदात्, एकादशविशेषनियमानुसारेण, तथा द्वादशविशेषनियमानुसारेण अस्य पृथगधि-करणत्वं युक्तम्।

( २ ) "प्राणादयो वाक्यशेषात्" ( १।४।१२ ) इति सूत्रे "प्राणादयः" इति प्रथमान्त-पदसत्त्वात् अस्य अधिकरणारम्भकत्वं समुचितमेव, परन्तु नैकस्मिन्नपि भाष्ये एतत् कृतं दृश्यते। तेन "वाक्यशेषात्" इति पदस्य "इतरादि" शब्दवत् स्वरूपतः सापेक्षार्थकत्वात् प्राणा-दयः इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्; सप्तमविशेषनियमात्।

( ३ ) ज्योतिषैकेषामसत्यन्ने" ( १।४।१३ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम्; चतुर्थसामान्यनियमात्। अपितु "एकेषाम्" इति पदेन प्रकृतत्वस्य बोधनात् नास्य पृथगधिकरणत्वसूचकत्वम्। परसूत्रेण निम्बार्क-श्रीकण्ठ-भिन्न-सर्वैः भाष्यकारैः अधि-करणस्य रचितत्वात् एतेनैव अधिकरणसमाप्तिः सुसंगता।

## चतुर्थं कारणत्वाधिकरणम्।

अत्र "कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः" इति ( १।४।१४ ) सूत्रस्य

कारणत्व"-शब्दात् अस्य "कारणत्वाधिकरणं" नाम। अत्र निम्बार्क-मध्व-श्रीकण्ठभिन्नेषु सर्वेषु भाष्येषु सूत्रद्वयं गृहीतम्। तच्च सूत्रद्वयम्—

१। "कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः" १।१४।१४ ( १२० )

२। "समाकर्षात्" १।४।१५ (१२१)

अत्र (१) "कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः" इति (१।४।१४) सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम्। निम्बार्क-श्रीकण्ठभाष्यद्वये न तथा कृतम्। निम्बार्कमतेन अत्रैव तृतीयाधिकरणस्य समाप्तिः, माध्वमते तु अनेन एकेन सूत्रेण एतदधिकरणं रचितम्, तेन तन्मतेऽपि अत्रैव अधिकरणस्य समाप्तिः दृश्यते। श्रीकण्ठमतेन तु इतोऽपि परस्मिन् सूत्रे तस्यैव तृतीयाधिकरणस्य समाप्तिः परिलक्ष्यते। तथापि षण्णां भाष्याणां मतेन अनेनैव अधिकरणारम्भात् प्रथमान्तपदाध्याहारेणैव तथा करणीयम्। तेन अधिकरणस्य अरचनायां निम्बार्क-श्रीकण्ठभाष्यद्वयमेव दोषभाग् भवति; पञ्चमसामान्यनियमात्। च-शब्देन प्रसंगभेदात् च द्वादशविशेषनियमात्।

(२) "समाकर्षात्" (१।४।१५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम् चतुर्थसामान्यनियमात्। निम्बार्क-मध्व-बल्लभमतेषु तु अनेन पृथक् एकम् अधिकरणाम् आरब्धम्। तेन अधिकसंख्यकमतविरोधात् तेषामेव दोषः। तथा च अधिकसम्मत्या अत्रैव अधिकरणसमाप्तिः समुचिता।

## पञ्चमं वालाक्यधिकरणम्।

अत्र प्रथमं सूत्रं "जगद्वाचित्वात् (१।४।१६)। अत्र सूत्रपदानुसारेण नास्य नामकरणम्, किन्तु उपजीव्यश्रुत्यनुसारेणेति। मध्वाचार्य्यभिन्नैः सर्वैः भाष्यकारैः "जगद्वाचित्वात्" इति सूत्रेण अधिकरणारम्भः कृतः। मध्वमतेन तु "समाकर्षात्" इति पूर्वस्मात् सूत्रात् अधिकरणम् आरब्धम्। तच्च अधिकरणम् अष्टभिः सूत्रैः रचितम्। "अवस्थितेरिति काशकृत्स्नः" (१।४।२२) इत्येव तत्र अन्तिमसूत्रम्। निम्बार्कमतेन "जगद्वाचित्वात्" इति सूत्रात् त्रयोदशभिः सूत्रैः एतदधिकरणं रचितम्। तन्मते अस्य अन्तिमं सूत्रं "एतेन सर्वे व्याख्याताः व्याख्याताः" इति पादशेषसूत्रम्। तेन अत्र "जगद्वाचित्वात" इति सूत्रात् एतत्पदशेषपर्य्यन्तं शङ्कर-भास्कर-रामानुज-श्रीकण्ठ-श्रीपतिमतेषु अधिकरणचतुष्टयम्। निम्बार्कमतेन एकमेव अधिकरणं, मध्व-बल्लभमतद्वयेन अधिकरणत्रयमिति दृश्यते। विस्तरस्तु ग्रन्थस्य अस्य द्वितीयपादे प्रथमसरणिमध्ये द्रष्टव्यः। तथा च शङ्करादिषण्णां मतेषु तच्च सूत्रत्रयम्—

१। "जगद्वाचित्वात्" १।४।१६ (१२२)

२। "जीवमुख्यप्राणलिंगान्नेति चेत् तद् व्याख्यातम्" १।४।१७ (१२३)

३। "अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके" १।४।१८ (१२४)

अत्र ( १ ) "जगद्वाचित्वात्" ( १।४।१६ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं समुचितमिति। तथापि अधिकसंख्यकैः भाष्यकारैः तथैव कृतम्, अतः पञ्चम-सामान्यनियमानुसारेण प्रथमान्तपदाध्याहारेण एतत्सम्पादनीयम् इति बोद्धव्यम्। विषयश्रुति-भेदाच्च; एकादशविशेषनियमात्। माध्वभाष्ये एतस्य अन्यथाकरणात् तथाच अत्र अधिकरणस्य अनारम्भात् तस्य दोषः एव सञ्जातः इति।

( २ ) "जीवमुख्यप्राणलिंगान्नेति चेत् तद् व्याख्यातम्" ( १।४।१७ ) अत्र "तद्-व्याख्यातम्" इति प्रथमान्तपदसत्त्वेऽपि "इति चेत्" इति पदात् नास्य अधिकरणारम्भकत्वम्; पञ्चमविशेषनियमात्। भास्करमते तु परसूत्रेण सह मिलित्वा एतत् एकं सूत्रम् इति दृश्यते। तत् तु अधिकमतविरुद्धम्, दर्शितं च एतत् सूत्रद्वयैकीकरण-प्रसंगे।

( ३ ) अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके" ( १।४।१८ ) इत्यत्र "जैमिनिः" तथा "एके" इति प्रथमान्तपदद्वयसत्त्वेऽपि नामपदेन स्वसिद्धान्तानुकूलमतान्तरज्ञापनात् विषयान्तरस्य असूचनाच्च, दशमविशेषनियमात्, तथा "तु"-शब्दयोगात् अर्थतश्च सापेक्षत्वबो-धकत्वात् नवमविशेषनियमात् नास्यापि अधिकरणारम्भकत्वम्। परसूत्रेण अधिकरणारम्भे षण्णां सम्मतत्वात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## षष्ठं वाक्यान्वयाधिकरणम्

अत्र "वाक्यान्वायात्" इति ( १।४।१९ ) सूत्रात् अस्य "वाक्यान्वयाधिकरणं" नाम। तत्र निम्बार्क-माध्व-भिन्नेषु सर्वेषु भाष्येषु सूत्रचतुष्टयं गृहीतम्। निम्बार्कमतेन एतत् सूत्रं "वाला-क्यधिकरण"नामपूर्वाधिकरणस्य चतुर्थं सूत्रम्, माध्वमतेन तु पूर्वं "समाकर्षा"-ख्याधिकरणस्य पञ्चमं सूत्रं भवति। तच्च सूत्रचतुष्टयं—

१। "वाक्यान्वयात्" १।४।१९ ( १२५ )

२। "प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः" १।४।२० ( १२६ )

३। "उत्क्रमिष्यत एवंभावादित्यौडुलोमिः" १।४।२१ ( १२७ )

४। "अवस्थितेरिति काशकृत्स्नः" १।४।२२ ( १२८ )

अत्र (१) "वाक्यान्वयात्" इति ( १।४।१९ ) सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वं संगतम्। तथापि विषयश्रुतिभेदात् अधिकरणारम्भस्य बहुसम्मतत्वात् प्रथमान्तपदा-ध्याहारेण तस्य सांगत्यम् कल्पनीयम्; पञ्चमसामान्यनियमात् एकादशविशेषनियमाच्च। निम्बार्क-माध्वमतद्वयेन तु अधिकरणस्य अनारम्भात् तयोः दुष्टत्वम्।

( २ ) "प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः" (१।४।२०)इत्यत्र "लिंगम्" तथा "आश्मरथ्यः" इति प्रथमान्त-पदद्वयसत्त्वेऽपि पूर्वपक्षरूपेण परमतवर्णनात् विषयान्तरस्य असूचनाच्च न अस्य अधिकरणारम्भकत्वम्। एतदर्थं दशमः विशेषनियमः स्मर्तव्यः।

( ३ ) "उत्क्रमिष्यत एवंभावादित्यौडुलोमिः" ( १।४।२१ ) इत्यत्र "औडुलोमिः" इति प्रथमान्तपदसत्त्वेऽपि पूर्वपक्षरूपेण परमतवर्णनात् विषयान्तरस्य असूचनाच्च दशमविशेष-नियमेन नास्य अधिकरणारम्भकत्वम् ।

( ४ ) "अवस्थितेरिति काशकृत्स्नः" ( १।४।२२ ) इत्यत्र "काशकृत्स्नः" इति प्रथ-मान्तपदसत्त्वात् स्वसम्मतपरमतवर्णनात्, विषयान्तरस्य असूचनात् च दशमविशेषनियमेनैव नास्य पृथगधिकरणारम्भकत्वम् । परसूत्रेण निम्बार्कभिन्नैः सर्वैः भाष्यकारैः अधिकरणं रचितम् । तेन अत्रैव अधिकरणसमाप्तिः संगतैव ।

## सप्तमं प्रकृत्यधिकरणम् ।

अत्र "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति ( १।४।२३ ) सूत्रस्य प्रकृति-पदात् अस्य "प्रकृत्यधिकरणं" नाम । अत्र निम्बार्कभाष्यभिन्नैः सर्वैः अधिकरणम् आरब्धम् । तन्मतेन तु एतत्-सूत्रं पूर्वोक्तवालाक्यधिकरणस्य अष्टमं सूत्रम् । शङ्कर-भास्कर-मध्व-श्रीपतिमतेषु अत्र पञ्च सूत्राणि गृहीतानि । रामानुजमतेन तथा श्रीकण्ठमतेन तु षट् सूत्राणि । तत्र "आत्मकृतेः परिणामात्" इति एकस्य सूत्रस्य द्विधाकरणात् अयं भेदः सञ्जातः । अन्यथा तयोः मतद्वयेऽपि पञ्च सूत्राणि भवन्त्येव । वल्लभमतेन तु एतत्पादस्य अन्तिमसूत्रम् एतदधिकरणान्तर्गतं कृतम् । निम्बार्कमतेऽपि तथैव आचरितम् । तानि पञ्च सूत्राणि यथा—

१। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" १।४।२३ ( १२९ )
२। "अभिध्योपदेशाच्च" १।४।२४ ( १३० )
३। "साक्षाच्चोभयाम्नानात्" १।४।२५ ( १३१ )
४। "आत्मकृतेः परिणामात्" १।४।२६ ( १३२ )
५। "योनिश्च हि गीयते" १।४।२७ ( १३३ )

अत्र ( १ ) "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् (१।४।२३) इत्यत्र "प्रकृतिः" इति प्रथ-मान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, किन्तु चकारयोगात् तस्य निषेधः प्रसज्येत, षष्ठविशेषनियमात् । परन्तु सप्तभिः भाष्यकारैः अत्रैव अधिकरणम् आरब्धम् । अतः केनचित् विशेषनियमसंकलनेन एतस्य नियमसांगत्यं विधेयम् । स च नियमः इत्थं भवेत्—

"चकारेण उद्देश्यविधेयान्यतरातिरिक्तविषयस्य उद्देश्यविधेयविशेषणरूपेण सन्निवेशे चकारस्य न अधिकरणारम्भबाधकत्वम्" इति त्रयोदशविशेषनियमः।

अत्र प्रकृति-शब्दवाच्यब्रह्मणः निमित्तकारणत्वरूपातिरिक्तविषयस्य उद्देश्यरूप-प्रकृतिपद-वाच्येन सह सन्निवेशे कृते पृथगधिकरणारम्भः संगच्छते । तेन निम्बार्कमतेन अधिकरणस्य अनारम्भात् दोषः वक्तव्यः ।

( २ ) "अभिध्योपदेशाच्च" ( १।४।२४ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वम् । च-कारात् प्रथमान्तपदाध्याहारेऽपि तथैव । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च ।

( ३ ) "साक्षाच्चोभयाम्नानात्" ( १।४।२५ ) इति अत्रापि तथैव । चतुर्थसामान्यनिय-मात्, षष्ठविशेषनियमाच्च ।

( ४ ) "आत्मकृतेः परिणामात्" ( १।४।२६ ) इत्यत्रापि प्रथमान्तपदाभावात् तथैव; चतुर्थसामान्यनियमात् । अत्र रामानुज-श्रीकण्ठ-भाष्यद्वयमध्ये सूत्रद्वयं पठितम् । "आत्मकृतेः" इति एकं सूत्रं, "परिणामात्" इति अपरं सूत्रम् इति । तत् तु अधिकसम्मत्या असंगतमेव इति वक्तव्यम् । च-काराभावात हेतुद्वयस्य साकांक्षत्वात् च पृथक्करणं न युक्तम् । चतुर्थनियमश्च अत्र चिन्तनीयः ।

( ५ ) "योनिश्च हि गीयते" ( १।४।२७ ) इत्यत्र "योनिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । परन्तु च-शब्दयोगात् षष्ठविशेषनियमात् तस्य निषेधः इति बोद्धव्यम्, त्रयोदशविशेषनियमबोधितातिरिक्तविषयस्य असूचनात् । हि-शब्देन एतत्सूत्रार्थस्य हेतुबोधकत्वमपि सूचयति; षष्ठविशेनियमात् । हेतोः समुच्चायकत्वे चकारस्य हेतुबोधक-प्रथमान्तपदस्यापि नाधिकरणारम्भकत्वम् । परसूत्रे प्रायेण सर्वैः अधिकरणस्य आरब्धत्वात् अत्रैव अधिकरणसमाप्तिः समुचिता एवेति कल्प्यते ।

## अष्टमं सर्वव्याख्यानाधिकरणम् ।

अत्र "एतेन सर्वे व्याख्याता व्याख्याताः" (१।४।२८) इति सूत्रस्य "सर्वे" तथा 'व्याख्याताः' इति पदद्वयात् अस्य "सर्वव्याख्यानाधिकरणं" नाम । अत्र निम्बार्क-वल्लभभिन्नैः सर्वैः भाष्यकारैः अनेन एकनैव सूत्रेण एतदधिकरणं रचितम् । निम्बार्कमतेन एतत् सूत्रं "वाक्यान्वय"-पञ्चमाधि-करणस्य त्रयोदशसूत्रम्, वल्लभमतेन तु "प्रकृत्यधिकरणं" नाम अष्टमाधिकरणस्य षष्ठं सूत्रम् ।

अत्र "सर्वे व्याख्याताः" इति प्रथमान्तपदद्वयात् अधिकरणारम्भः युक्तः । चतुर्थ-सामान्य-नियमात् । निम्बार्क-वल्लभ-भाष्यद्वये तस्य अन्यथाकरणात् तद्भाष्यद्वयमेव दोषभाग् भवति । सूत्र-पदस्य अभ्यासात् अत्रैव यथा अध्यायसमाप्तिः तथा पादसमाप्तिः, तथैव अधिकरणसमाप्तिश्च ।

## चतुर्थपाद-समालोचनम् ।

इदानीं एतत्पादोपसंहारे अस्माकं प्रागुक्तरीत्या प्रथमादिपादोपसंहारवत् चत्वारो विषयाः आलोचनीयाः, ते च—

१। कति कीदृशाश्च नियमाः अत्र सङ्कलिताः ।

२। कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

३। काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

४। उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः उचिता इति ।

तत्र तावत् प्रथमं आलोच्यम्—

**( १ ) कति कीदृशाश्च नियमाः अत्र संकलिताः ।**

अस्मिन् पादे अतिरिक्तनियमद्वयं सङ्कलितम् । तत्र तावत् प्रथमः "न संख्योपसंग्रहात्" (१।४।११ ) इत्यादि सूत्रे द्वादशविशेषनियमः सङ्कलितः । स च "यत्र" "अपि" प्रभृति-प्रसंगान्तर-

बोधकशब्देन उद्देश्य-विधेयान्यतरस्मात् भेदः प्रसज्येत, तत्र पृथगधिकरणं मन्तव्यमिति।"

द्वितीयस्तु "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" ( १।४।२३ ) इति सूत्रे त्रयोदशविशेष-नियमरूपेण सङ्कलितः। स च—'च-कारेण प्रागुक्तोद्देश्यविधेयातिरिक्तविषयस्य उद्देश्यविधेय-विशेषणरूपेण सन्निवेशे हेतोः समुच्चये वा नास्य अधिकरणारम्भबाधकत्वम्" इति ।

इदानीं द्रष्टव्यम्—

## ( २ ) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः

तत्र १।४।२ अधिकरणे माध्वभाष्ये "चमसवदविशेषात्" इति ( १।४।८ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

पुनः तत्रैव १।४।२ अधिकरणे माध्वभाष्ये "ज्योतिरुपक्रमा तु...." इति ( १।४।९ ) सूत्रे अधिकरणस्य रचनायां दोषः।

ततः १।४।४ अधिकरणे निम्बार्क-श्रीकण्ठभाष्ययोः "कारणत्वेन चाकाशादिषु...." इति ( १।४।१४ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

पुनः तत्रैव १।४।४ अधिकरणे निम्बार्क-माध्व-वल्लभ-भाष्येषु "समाकर्षात्" इति (१।४।१५) सूत्रे अधिकरणस्य रचनायां दोषः।

ततः १।४।५ अधिकरणे माध्वभाष्ये "जगद्वाचित्वात्" इति ( १।४।१६ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

ततः १।४।६ अधिकरणे निम्बार्क-माध्वभाष्ययोः "वाक्यान्वयात्" इति ( १।४।१९ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

ततः १।४।७ अधिकरणे निम्बार्कभाष्ये "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति ( १।४।२३ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

ततः १।४।८ अधिकरणे निम्बार्क-वल्लभभाष्ययोः "एतेन सर्वे व्याख्याता व्याख्याताः" इति ( १।४।२८ ) सूत्रे अधिकरणस्य अरचनायां दोषः।

तेन अधिकरणरचनायां माध्वभाष्ये दोषद्वयम्, तथा निम्बार्कवल्लभभाष्ययोः प्रत्येकम् एकैकः दोषः। तथैव अधिकरणस्य अरचनायां माध्वभाष्ये दोषत्रयम्, निम्बार्कभाष्ये दोषचतुष्टयम्, श्रीकण्ठभाष्ये एको दोषः, वल्लभभाष्ये च एको दोषः इति परिलक्ष्यते। एवं च—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
| --- | --- | --- |
| माध्वभाष्ये | २ दोषौ | ३ दोषाः |
| निम्बार्कभाष्ये | ४ दोषाः | १ दोषः |
| वल्लभभाष्ये | १ दोषः | १ दोषः |
| श्रीकण्ठभाष्ये | १ दोषः | ० इति। |

अधुना द्रष्टव्यम्—

## ३। काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

तत्र प्रथमाधिकरणे—

प्रथमसूत्रे—"आनुमानिकमप्येकेषाम्...." (१।४।१) सूत्रे "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" (कठ १।३।१०), "आत्मानं रथिनं विद्धि शरीरं रथमेव तु" (कठ १।३।३)

द्वितीयसूत्रे—"सूक्ष्मं तु तदर्हत्वात्" ( १।४।२ ) सूत्रे "गोभिः श्रीणीत मत्सरम्" ( ऋः सं ९।४६।४ )

तृतीयसूत्रे—"तदधीनत्वादर्थवत्" ( १।४।३ ) सूत्रे "मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्" ( श्वेः ४।१० )

चतुर्थसूत्रे—"ज्ञेयत्वावचनाच्च" ( १।४।४ ) सूत्रे श्रुतिः नोद्धृता

पञ्चमसूत्रे—"वदतीति चेन्न प्राज्ञो हि प्रकरणात्" ( १।४।५ ) इत्यत्र "महतः परं ध्रुवं निचाय्य" ( कठ १।३।११ ), "पुरुषान्न परं किञ्चित्" ( कठ १।३।११ )

षष्ठसूत्रे—"त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" ( १।४।६ ) इत्यत्र "स त्वमग्निम्" ( कठ १।१।१३), "येयं प्रेते विचिकित्सा" ( कठ १।१।१० ), "अन्यत्र धर्म्मात्" ( कठ १।२।१४ )

सप्तमसूत्रे—"महद्वच्च" ( १।४।६ ) इत्यत्र "बुद्धेरात्मा महान् परः" ( कठ १।३।१० )

द्वितीयाधिकरणे

प्रथमसूत्रे—"चमसवदविशेषात्" ( १।४।८ ) इत्यत्र "अजामेकां लोहितशुक्लकृष्णां" ( श्वेः ४।५ )

द्वितीयसूत्रे—"ज्योतिरूपक्रमा तु तथा ह्यधीयत एके" ( १।४।९ ) इत्यत्र "यदग्ने रोहितं रूपम्" ( छाः ६।४।१ )

तृतीयसूत्रे—"कल्पनोपदेशाच्च मध्वादिवदविरोधः" ( १।४।१० ) इत्यत्र "असौ वा आदित्यो देवमधु" ( छाः ३।१।१ )

तृतीयाधिकरणे—

प्रथमसूत्रे—"न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च" ( १।१।११ ) इत्यत्र "यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः" ( बृः ४।४।१७ )

द्वितीयसूत्रे—"प्राणादयो वाक्यशेषात्" (१।१।१२) इत्यत्र "प्राणस्य प्राणम् उत चक्षुषश्चक्षुः" ( बृः ४।४।२८ )

तृतीयसूत्रे—"ज्योतिषैकेषामसत्यन्ने" ( १।१।१३ )इत्यत्र "तद्देवा ज्योतिषां ज्योतिः" ( बृः ४।४।१६ )

चतुर्थाधिकरणे—

प्रथमसूत्रे—"कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः" (१।१।१४) इत्यत्र "आत्मन आकाशः सम्भूतः" ( तैः २।१ ) "तत् तेजोऽसृजत" ( छाः ६।२।३ )

द्वितीयसूत्रे—"समाकर्षात्" ( १।१।१५ ) इत्यत्र "असदेवेदमग्र आसीत्" ( छाः ३।१९।१, ६।२।१, तैः २।७ )

पञ्चमाधिकरणे—

प्रथमसूत्रे—"जगद्वाचित्वात्" ( १।१।१६) इत्यत्र "ब्रह्म ते "ब्रवाणि" ( कौः ४।१८), यो वै वालक एतेषां पुरुषाणां कर्त्ता यस्य वै तत् कर्म्म स वै वेदितव्यः" (कोः ४।१८), "एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते" ( कौः ४।१९ )

द्वितीयसूत्रे—"जीवमुख्यप्राणलिंगान्नेति चेत् तद्व्याख्यातम्" ( १।४।१७ ) इत्यत्र "प्राणबन्धनं हि सोम्य मनः ( छाः ६।८।२ )

तृतीयसूत्रे—"अन्यार्थं तु जैमिनिः"....(१।४।१७) इत्यत्र "क्वैष एतद्वालाके पुरुषोऽशयिष्ट क्व वा एतदभुत्" ( कौः ४।१९ ), "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथ अस्मिन् प्राण एवैकधा भवति" (कौः ४।१९ ), "य एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागात्" ( बृः २।१।१६ ), "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते" ( बृः २।१।१७)

षष्ठाधिकरणे—

प्रथमसूत्रे—"वाक्यान्वयात्" (१।४।१९) इत्यत्र "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" ( बृः २।४।५, ४।४।६ )

द्वितीयसूत्रे—"प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः" (१।४।२०) इत्यत्र "आत्मनि...विज्ञाते सर्वमिदं विज्ञातं भवति" ( बृः ४।५।६ ), "इदं सर्वं यदयमात्मा" ( बृः ४।५।७ )

तृतीयसूत्रे—"उत्क्रमिष्यत एवंभावादित्यौडुलोमिः" (१।४।२१) इत्यत्र "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय" ( छाः ८।१२।३ )

चतुर्थसूत्रे—"अवस्थितेरिति काशकृत्स्नः" ( १।४।२२ ) इत्यत्र "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" ( छाः ६।३।२ ), "धीरो नामानि कृत्वा अभिवदन् यदास्ते" ( तैः आः ३।१२।७ )

सप्तमाधिकरणे—

प्रथमसूत्रे—"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" ( १।४।२३ ) इत्यत्र "तदैक्षत बहु स्याम्" ( छाः ६।२।३ ), "येनाश्रुतं श्रुतं भवति" ( छाः ६।१।३ ), "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" ( छाः ६।१।४ )

द्वितीयसूत्रे—"अभिध्योपदेशाच" ( १।४।२४ ) इत्यत्र "सोऽकामयत बहु स्याम् इति" ( तैः २।६ ) "तदैक्षत बहु स्यां प्रजायेय ( छाः ६।२।३ )

तृतीयसूत्रे—'साक्षाच्चोभयाम्नानात्" ( १।४।२५ ) इत्यत्र "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" ( छाः १।९।१ )

चतुर्थसूत्रे—"आत्मकृतेः परिणामात्" ( १।४।२६ ) इत्यत्र "तदात्मानं स्वयमकुरुत" ( तैः २।७ ), "सच्च त्यच्चाभवत" ( तैः २।६ )

पञ्चमसूत्रे—"योनिश्च हि गीयते" ( १।४।२७ ) इत्यत्र "यद्भूतयोनिं परिपश्यन्ति"। ( मुः १।१।६ ), "यथोर्णनाभिः सृजते गृह्णते च" ( मुः १।१।७ )

अष्टमाधिकरणे—

प्रथमसूत्रे—"एतेन सर्वे व्याख्याता व्याख्याताः" (१।४।२८) इत्यत्र "अण्व्य इवेमा धानाः" ( छाः ६।१२।१-३ ), "असदेवेदमग्र आसीत्" ( छाः ३।१९।१ ), "स्वभावमेके" ( श्वेः १।२ ) इति।

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

( ४ ) कीदृशी अस्य पादसंगतिः।

अत्र याश्च श्रुतयः सूत्रोपजीव्यत्वेन प्रदर्शिताः ताः सर्वाः शाङ्करभाष्यानुमताः। भाष्यान्तरे अत्र सर्वथा न ऐक्यं दृश्यते। तथापि मतान्तरीयभाष्यभेदेन यथा पादप्रतिपाद्यरूपाः पादसंगतयः कल्यन्ते, ताश्च अत्र प्रदश्यन्ते—

शाङ्करमते—अव्यक्तादिसन्दिग्धपदमात्राणामेव समन्वयः।

भास्करमते—शाङ्करमतानुरूपम्।

रामानुजमते—स्पष्टतरजीवादिलिंगकानि वाक्यानि विचारितानि।

निम्बार्कमते—कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधानादिप्रतिपादकवाक्यानां ब्रह्मणि समन्वयः।

माध्वमते—अन्यत्रैव प्रसिद्धानां शब्दानां विष्णौ समन्वयः।

श्रीकण्ठमते—अस्पष्टलिंगवाक्यविचारः।

श्रीपतिमते—क्वचित् शाखासु प्रधानजगत्कारणत्वप्रतिपादकशब्दानां स्पष्टार्थकथनम्।

एतेषां पादप्रतिपाद्यानां पर्य्यालोचने कृते तत्त्वतः नास्ति महान् मतभेदः—इत्येव प्रतीयते। तत्त्वविषये साम्प्रदायिकसिद्धान्त एव अत्र मतभेदहेतुः। अन्यथा नूनम् अत्र एतादृशः स्वल्पोऽपि मतभेदः न स्यात्। तथापि पादोऽयं ब्रह्मणि श्रुतीनां समन्वयप्रदर्शनार्थं प्रधानमल्ल-निवर्हणन्यायेन श्रुतिसाहाय्येन प्रधानस्य अश्रौतत्वप्रतिपादनेन जगत्कारणत्वखण्डनपरः एवेति बोद्धव्यम्। अत्र न कस्यापि मतविरोधः वर्त्तते। एवं च एतत्पादप्रतिपाद्यरूपपादसंगत्यनुसारेण सर्वाणि एतत्पादीयाधिकरणानि व्याख्येयानि। परन्तु तथापि अधिकरणसंख्यायाम्,

अधिकरणारम्भकसूत्रनिर्णये, अधिकरणान्तर्गतसूत्रसंख्यायां च, अस्मिन् पादे यादृशमतभेदबाहुल्यं दृश्यते, तादृशं न प्रथमादिपादत्रये दृश्यते। विचित्रं बुद्धिकौशलं भाष्यकाराणां, यतः ते श्रुतिशास्त्राध्यायपादसंगतिचतुष्टयमपि अनुसृत्यैव एतादृशं व्याख्यानभेदं कृतवन्तः। तेषां सर्वेषां सूत्रार्थवर्णनं विचारनैपुण्यञ्च अखण्डनीयमिव प्रतिभाति। तथापि अधिकरणरचनाविषयकं यथासम्भवं कौशलम् अत्र अवलम्ब्य सूत्रार्थविचारं विनैव सूत्रकृत्सम्मतभाष्यनिर्णयप्रयासमात्रम् अत्र कृतम् इति।

## प्रथमाध्यायसमालोचनम्।

एवं च यदि एतदध्यायान्तर्गतपादचतुष्टयस्य समालोचनफलम् अत्र समाह्रियते, तदा तत इत्थमेव भवति—

| | प्रथमपादे | | द्वितीयपादे | | तृतीयपादे | | चतुर्थपादे | | |
|---|---|---|---|---|---|---|---|---|---|
| भाष्यनाम | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | समष्टिदोषाः |
| शङ्करः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| भास्करः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| रामानुजः | ० | ० | ० | १ | १ | ३ | ० | ० | ५ |
| निम्बार्कः | ० | १ | ० | ० | ० | ३ | १ | ४ | ९ |
| मध्वः | १ | ० | ० | ० | १ | ० | २ | ३ | ७ |
| श्रीकण्ठः | १ | ० | २ | ० | ० | २ | ० | १ | ६ |
| श्रीपतिः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| वल्लभः | ० | १ | १ | ० | ० | ० | १ | १ | ४ |
| समष्टिः | २ | २ | ३ | १ | २ | ८ | ४ | ९ | ३१ |

एवं च एकत्रितत्द्दोषाणां संक्षिप्तविभागः—

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| रामानुजभाष्ये | ५ | दोषाः | तत्र | अधिकरणस्य रचनायां | १ | अधिकरणस्य अरचनायां | ४ |
| निम्बार्कभाष्ये | ९ | ,, | ,, | ,, | १ | ,, | ८ |
| माध्वभाष्ये | ७ | ,, | ,, | ,, | ४ | ,, | ३ |
| श्रीकण्ठभाष्ये | ६ | ,, | ,, | ,, | ३ | ,, | ३ |
| वल्लभभाष्ये | ४ | ,, | ,, | ,, | २ | ,, | २ |

अत्र केवलं शङ्कर-भास्कर-श्रीपतिभाष्येषु दोषाभावः इति ।

ये च त्रयोदश नियमाः अत्र सङ्कलिताः तेषाम् अयं संक्षेपः । तत्र—

**प्रथमनियमः** "अथातो ब्रह्मजिज्ञासा" इति १।१।१ सूत्रे सङ्कलितः, यथा—सूत्रपदद्वारा अधिकरणनामकरणम् ।

**द्वितीयनियमः** "अथातो ब्रह्मजिज्ञासा" इति १।१।१ सूत्रे सङ्कलितः, यथा—"अध्याय-पादारम्भे अधिकरणारम्भः करणीयः ।"

**तृतीयनियमः** "अथातो ब्रह्मजिज्ञासा" इति १।१।१ सूत्रे सङ्कलितः, यथा—पुनः तादृशप्रथमान्तपदप्राप्तिपर्यन्तम् अधिकरणस्थितिः ।"

**चतुर्थनियमः** "शास्त्रयोनित्वात्" इति १।१।३ सूत्रे संकलितः, यथा—"चकारादिपदेन अन्यथा वा उद्देश्यविधेयान्यतरभेदात् सूत्राधिकरणभेदौ" ।

**पञ्चमनियमः** "गौणश्चेन्नात्मशब्दात्" इति १।१।६ सूत्रे संकलितः, यथा—"चेत, चेन्न" इत्यादि पदात् सूत्रस्य नाधिकरणारम्भकत्वम्" ।

**षष्ठनियमः** "मान्त्रवर्णिकमेव च गीयते" इति १।१।१५ सूत्रे संकलितः, यथा—"चकार-योगात् प्रथमान्तपदस्य साकांक्षत्वे नाधिकरणारम्भकत्वम्" ।

**सप्तमनियमः** "नेतरोऽनुपपत्तेः" इति १।१।१७ सूत्रे संकलितः, यथा—"इतरादि-शब्देन साकांक्षत्वे नाधिकरणारम्भकत्वम्" ।

**अष्टमनियमः** "प्राणस्तथानुगमात्" इति १।१।२८ सूत्रे संकलितः, यथा—"विरोधे सति प्रतिपाद्यानुसारेण अधिकरणनाम साधनीयम्" ।

**नवमनियमः** "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति १।१।३० सूत्रे संकलितः, यथा—"अनिषेधार्थक-तु-शब्दयोगेन प्रथमान्तपदस्य नाधिकरणारम्भकत्वम् ।

**दशमनियमः** "साक्षादप्यविरोधं जैमिनिः" इति १।२।२८ सूत्रे संकलितः, यथा—"प्रथमान्तनामपदेन मतान्तरज्ञापने नाधिकरणारम्भकत्वम् ।

**एकादशनियमः** "अनुकृतेस्तस्य च इति १।३।२२ सूत्रे संकलितः, यथा—"नियमान्तरेण अधिकरणनिषेधेऽपि विषयश्रुतिभेदात् अधिकरणभेदः" ।

**द्वादशनियमः** "न संख्योपसंग्रहादपि" इति १।४।११ सूत्रे संकलितः यथा—"अपि च" प्रभृति-शब्देन प्रसंगान्तरत्वे अधिकरणारम्भकत्वम् ।

**त्रयोदशनियमः** "प्रकृतिश्च प्रतिज्ञाः....." इति १।४।२३ सूत्रे संकलितः, यथा—चकारेण उद्देश्यविधेयान्यतरविशेषणस्य हेतुसमुच्चये वा नाधिकरणरम्भकत्वम् ।

एते एव प्रथमाध्याये संकलिताः नियमाः । विस्तरस्तु यथास्थानं द्रष्टव्यः ।

इदानीं द्रष्टव्यम्—केषु सूत्रेषु कस्य भाष्यस्य कियत्-संख्यकः दोषः संजातः इति—

| | | | | | | |
|---|---|---|---|---|---|---|
| शास्त्रयोनित्वात् | १।१।३ सूत्रे | वल्लभभाष्यस्य | अधिकरणस्य | अरचनायां | दोषः । | |
| तत् तु समन्वयात् | १।१।४ सूत्रे | निम्बार्कभाष्यस्य | " | " | " | |
| नेतरोऽनुपपत्तेः | १।१।१६ सूत्रे | श्रीकण्ठभाष्यस्य | अधिकरणस्य | रचनायां | दोषः | १ |
| छन्दोभिधानात्....इत्यादि | १।१।२५ सूत्रे | माध्वभाष्यस्य | " | " | " | १ |
| अनुपपत्तेस्तु न शारीरः | १।२।३ सूत्रे | श्रीकण्ठभाष्यस्य | " | " | " | १ |
| शब्दविशेषात् | १।२।५ सूत्रे | वल्लभभाष्यस्य | " | " | " | १ |
| गुहां प्रविष्टावात्मानौ.... | १।२।११ सूत्रे | रामानुजभाष्यस्य | अधिकरणस्य | अरचनायां | दोषः | १ |
| अनवस्थितेरसम्भवाच्च नेतरः | १।२।१७ | श्रीकण्ठभास्यस्य | अधिकरणस्य | रचनायां | दोषः | १ |
| अनुकृतेस्तस्य च | १।३।२२ सूत्रे | रा, नि, श्री-भाष्याणां | अधिकरणस्य | अरचनायां | दोषाः | ३ |
| मध्वादिष्वसम्भवादनधिकारं जैमिनिः | १।३।३१ | रा-भाष्यस्य | अधिकरणस्य | रचनायां | दोषः | १ |
| ज्योतिर्दर्शनात् | १।३।४० सूत्रे | रा,नि-भाष्ययोः | अधिकरणस्य | अरचनायां | दोषौ | २ |
| सुषुप्त्युत्क्रान्त्योर्भेदेन... | १।३।४२ सूत्रे | रा, नि, श्री-भाष्याणां | अधिकरणस्य | अरचनायां | दोषाः | ३ |
| पत्यादिशब्देभ्यः | १।३।४३ सूत्रे | म-भाष्यस्य | " | रचनायां | दोषः | १ |
| चमसवदविशेषात् | १।४।८ सूत्रे | म-भाष्यस्य | " | अरचनायां | " | १ |
| ज्योतिरुपक्रमा तु तथाह्यधीयते.... | १।४।९सूत्रे | म-भाष्यस्य | " | रचनायां | " | १ |
| कारणत्वेन चाकाशादिषु.... | १।४।१४ | नि,श्री-भाष्ययोः | " | अरचनायां | दोषौ | २ |
| समाकर्षात् | १।४।१५ सूत्रे | नि, म, व भाष्याणां | " | रचनायां | दोषाः | ३ |
| जगद्वाचित्वात् | १।४।१६ सूत्रे | म-भाष्यस्य | " | अरचनायां | दोषः | १ |
| वाक्यान्वयात् | १।४।१९ सूत्रे | नि, म-भाष्ययोः | " | " | दोषौ | २ |
| प्रकृतिश्च प्रतिज्ञादृष्टान्ता.... | १।४।२३ सूत्रे | नि भाष्यस्य | " | " | दोषः | १ |
| एतेन सर्वे व्याख्याताः.... | १।२।४८ सूत्रे | नि, व, भाष्ययोः | " | " | दोषौ | २ |
| | | | | | समष्टिः | ३१ |

तथा च प्रथमाध्यायस्य १३४ सूत्राणां मध्ये एकविंशतिसूत्रेषु पञ्चानां भाष्याणां एकत्रिंशत् दोषाः सञ्जाताः ।

एवं च येषु सूत्रेषु प्रत्येकं भाष्यस्य दोषाः तानि सूत्राणि यथा-

वल्लभस्य दोषाय—शास्त्रयोनित्वात् १।१।३
शब्दविशेषात् १।२।५
समाकर्षात् १।४।१५
एतेन सर्वे व्याख्याता १।४।२८

निम्बार्कस्य दोषाय—तत् तु समन्वयात् १।१।४
अनुकृतेस्तस्य च १।३।२२
ज्योतिर्दर्शनात् १।३।४०
सुषुप्त्युत्क्रान्तो ··· १।३।४२
कारणत्वेन चाकाशा १।४।१४
समाकर्षात् १।४।१५
वाक्यान्वयात् १।४।१९
प्रकृतिश्च प्रतिज्ञा···· १।४।२३
एतेन सर्वे व्याख्याता··· १।४।२८

श्रीकण्ठस्य दोषाय—नेतरेऽनुपपत्तेः १।१।१६
अनुपपत्तेस्तु न शारीरः १।२।३
अनवस्थितेरसम्भवाच्च १।२।१७
अनुकृतेस्तस्य च १।३।२२
सुषुप्त्युत्क्रान्तोर्भेदेन १।३।४२
कारणत्वेन चाकाशा···· १।४।१४

मध्वस्य दोषाय—छन्दोभिधानात्···· १।१।२५
पत्यादिशब्देभ्यः १।३।४३
चमसवदविशेषात् १।४।८
ज्योतिरूपक्रमा तु.... १।४।९
समाकर्षात् १।४।१५
जगद्वाचित्वात् १।४।१६
वाक्यान्वयात् १।४।१९

रामानुजस्य दोषाय—गुहां प्रविष्टावात्मानौ··· १।२।११
अनुकृतेस्तस्य च १।३।२२
मध्वादिष्वसम्भवात्···· १।३।३१
ज्योतिर्दर्शनात् १।३।४०
सुषुप्त्युत्क्रान्तोर्भेदेन··· १।३।४२

समष्टिः ३१

एवं च अधिकरणरचनानियमानुसारेण विभिन्नभाष्याणां पर्य्यालोचने कृते शाङ्कर-भास्कर-श्रीपति-भाष्याणामेव व्यासमतसन्निकृष्टत्वम् उपलभ्यते। रामानुज-निम्बार्क-मध्व-श्रीकण्ठ-वल्लभ-भाष्याणां दोषसद्भावात् व्यासमतविप्रकृष्टत्वं कल्पनीयम् इति। अधिकरणरचनानियम-निरपेक्ष-दोषविचारस्तु द्वितीयपादे कृतः।

॥ इति श्रीचिद्घनानन्दपुरीविरचिते व्याससम्मतब्रह्मसूत्रभाष्यनिर्णये

प्रथमाध्यायः ॥

## अथ अविरोधनाम-द्वितीयाध्याये प्रथमपादे

### प्रथमं स्मृत्यधिकरणम्

अत्र "स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्" इति (२।१।१) सूत्रस्य स्मृतिपदम् अवलम्ब्य अस्य "स्मृत्यधिकरणं" नाम । माध्व-वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु अत्र सूत्रद्वयं गृहीतम् । माध्वमते तु सूत्रत्रयम्, वल्लभमते च एकमेव । तत्र सूत्रद्वयम्—

१। "स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् २।१।१। (१३५)

२। "इतरेषां चानुपलब्धेः" २।१।२ (१३६)

अत्र (१) "स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्" इति (२।१।१) सूत्रे स्मृत्यनवकाशदोषप्रसंगः इति प्रथमान्तपदम् । तत्सत्त्वेऽपि "इति चेन्न" इति पदात् नास्य अधिकरणारम्भकत्वं युक्तं, पञ्चमविशेषनियमात् । तथापि सर्वमतेनैव अध्यायारम्भात् द्वितीय-विशेषनियमेन अस्य अधिकरणारम्भकत्वं समुचितमेव ।

(२) "इतरेषां चानुपलब्धेः" २।१।२ (१३६) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् । हेतुबोधक-चकारयोगात् च तथा । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता । वल्लभमतेन तु अनेनैव एकस्य अधिकरणस्य रचनायां सर्वमतविरोधात् नियमविरोधाच्च तस्यैव दोषः गणनीयः ।

### द्वितीयं योगप्रत्युक्त्यधिकरणम् ।

अत्र "एतेन योगः प्रत्युक्तः" २।१।३ (१३७)-सूत्रस्य "योग." तथा "प्रत्युक्तः" इति पदाभ्यां अस्य "योगप्रत्युक्त्यधिकरणं" नाम । मध्वाचार्य्यभिन्नैः सर्वैः भाष्यकारैः अनेन एकेन सूत्रेण एतद् द्वितीयम् अधिकरणं रचितम् । माध्वभाष्ये तु एतत् सूत्रं प्रथमाधिकरणस्य अन्तिमं सूत्रम् ।

अत्र "योगः" तथा "प्रत्युक्तः" एतत्प्रथमान्तपदद्वयसद्भावात् अनेन पृथगधिकरण-रचनं समुचितमेव, चतुर्थसामान्यनियमात् । पूर्वस्मिन् सूत्रे "इतरेषां" पदेन योगमतस्य ग्रहणेऽपि पुनः ग्रहणात् अस्य विषयान्तरत्वं सूचितं भवति । अतः अस्य पृथगधिकरणत्वं युक्तमेव । तेन अधिकसम्मतत्वात् नियमविरुद्धत्वाच्च माध्वभाष्यस्यैव अत्र अधिकरणस्य अरचनायां दोषः ।

### तृतीयं विलक्षणत्वाधिकरणम् ।

अत्र "न विलक्षणत्वादस्य तथात्वं च शब्दात्" २।१।४ (१३८) इति सूत्रस्य "विलक्षणत्व-" शब्दात्, अस्य "विलक्षणत्वाधिकरणं" नाम । अत्र शङ्कर-भास्कर-निम्बार्क-श्रीपति-भाष्येषु अष्ट सूत्राणि गृहीतानि । रामानुजभाष्ये "तर्काप्रतिष्ठानात्" इत्यादिसूत्रस्य द्विधाकरणात् नवभिः सूत्रैरेव एतदधिकरणं सङ्कलितम् । माध्वभाष्ये सूत्रद्वयेन, श्रीकण्ठभाष्ये सूत्रचतुष्टयेन, तथा वल्लभभाष्ये सूत्रत्रयेण एतदधिकरणं रचितम् । तत्र सूत्राष्टकम्—

१। न विलक्षणत्वादस्य तथात्वं च शब्दात् २।१।४ ( १३८ )

२। अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् २।१।५( १३९ )

३। दृश्यते तु २।१।६ ( १४० )

४। असदिति चेन्न प्रतिषेधमात्रत्वात् ( २।१।७ १४१ )

५। अपीतौ तद्वत्प्रसंगादसमञ्जसम् २।१।८ ( १४२ )

६। न तु दृष्टान्ताभावात् २।१।९ ( १४३ )

७। स्वपक्षदोषाच्च २।१।१० ( १४४ )

८। तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेद् एवमप्यनिर्मोक्षप्रसंगः २।१।११ ( १४५ )

अत्र ( १ ) "न विलक्षणत्वादस्य तथात्वं च शब्दात्" २।१।४ ( १३८ ) इति सूत्रस्य "तथात्वम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगच्छते, चतुर्थसामान्य-नियमात् । "तथात्वं" पदस्य स्वरूपतः साकांक्षत्वं कल्पयितुं शक्यम्, "तत्" शब्दस्य पूर्वप्रकृतापेक्षत्वात् । अतः सप्तमविशेषनियमात् अधिकरणारम्भः न युज्यते इति चेत् ? न, अव्यवहित-पूर्वाधिकरणे योगमतस्य प्रत्युक्तत्वात्, "तथात्वं" पदेन ततपूर्वप्रकृतसांख्यमतखण्डनं पुनः प्रस्तूयते । सांख्यमतस्य योगप्रत्युक्त्यधिकरणेन व्यवहितत्वेऽपि सांख्यमतेन सह साकांक्षत्वं न व्याहतम् । अतः अत्र पृथगधिकरणारम्भः संगच्छते । माध्वमते तु एतदनन्तरं तृतीयं "दृश्यते तु" इति एकं सूत्रं पठ्यते । तच्च सर्वमतविरुद्धं प्राचीनतरप्रमाणविरहितं च । तत्रैव तन्मतेन एतदधिकरणस्य समाप्तिरपि ज्ञाप्यते ।

( २ ) "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" २।१।५ (१३९) अत्र "अभिमानि-व्यपदेशः" इति प्रथमान्तपदसत्त्वेऽपि "तु"-शब्दयोगात् अस्य अधिकरणारम्भकत्वं वाधितम् । नवमविशेषनियमात् । माध्वमते अत्र तृतीयाधिकरणस्य आरम्भात् दोषः, सर्वमतविरोधात् ।

( ३ ) "दृश्यते तु" २।१।६ ( १४० ) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भ-कत्वम् । चतुर्थसामान्य-नवमविशेषनियमाभ्याम् । माध्वमते तु अत्र "दृश्यते च" इत्येकं सूत्रं पठ्यते । तत्रैव तन्मतेन द्वितीयाधिकरणसमाप्तिः । तदपि सर्वमतविरोधि ।

( ४ ) "असदिति चेन्न प्रतिषेधमात्रत्वात्" २।१।७ ( १४१ ) अत्र "असत्" इति-प्रथमान्तपदसत्त्वेऽपि "इति चेन्न" पदयोगात् नास्य अधिकरणारम्भकत्वम् । पञ्चमविशेष-नियमात् । माध्वमतेन अत्र चतुर्थाधिकरणस्य रचनायां तथा वल्लभेन पञ्चमाधिकरणस्य रचनात् द्वावेव अत्र दोषभाजौ भवतः ।

( ५ ) "अपितौ तद्वत्प्रसंगादसमञ्जसम्" २।१।८ ( १४२ ) अत्र "असमञ्जसम्" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वम् युक्तम् । श्रीकण्ठभाष्ये तथैव कृतम् । परन्तु "तद्-वत्प्रसंगात्" इत्यत्र तत्-पदात् साकांक्षत्वविधानात् सप्तमविशेषनियमेन एतस्य अधिकरणारम्भकत्वं व्याहतम् । एवं च सर्वमतविरोधादपि अत्र श्रीकण्ठभाष्यस्यैव अधिकरणरचनायां दोषः प्रसज्यते ।

( ६ ) "न तु दृष्टान्ताभावात्" २।१।९ ( १४३ ) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं संगतम्, चतुर्थसामान्यनियमात् ।

( ७ ) "स्वपक्षदोषाच्च" २।१।१० ( १४४ ) अत्रापि पूर्ववत् बोध्यव्यम्, चतुर्थसामान्य-नियमात्, षष्ठविशेषनियमाच्च ।

( ८ ) "तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेद् एवमप्यनिर्मोक्षप्रसंगः" २।१।११ ( १४५ ) अत्र "अनिर्म्मोक्षप्रसंगः" इति प्रथमान्तपदसत्त्वेऽपि "इति चेत्"-पदयोगात् नास्य अधिकरणा-रम्भकत्वम् युक्तम् । पञ्चमविशेषनियमात् । रामानुजभाष्ये तथा श्रीकण्ठभाष्ये च एतत्सूत्रं द्विधा विभक्तं कृतं दृश्यते, तन्न युक्तम्, अतिरिक्तविषयस्य असूचनात् । चतुर्थविशेषनियमश्चिन्तनीयः । परसूत्रे प्रायेण सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणस्य समाप्तिः समुचितैव । एवम् अत्र शङ्करादीनां मते तृतीयाधिकरणं समाप्तम् । माध्वमते परसूत्रे चतुर्थाधिकरणं समाप्तम् । श्रीकण्ठ-मतेन चतुर्थाधिकरणं, तथा वल्लभमतेन पञ्चमाधिकरणं समाप्तम् इति बोद्धव्यम् ।

## चतुर्थं शिष्टापरिग्रहाधिकरणम् ।

अत्र "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" २।१।१२ ( १४६ ) इति सूत्रस्य "शिष्टा-परिग्रहाः" इति पदात् अस्य "शिष्टापरिग्रहाधिकरणं" नाम । अत्र माध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु एतेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । माध्वभाष्ये तु एतत् सूत्रं चतुर्थाधिकरणस्य षष्ठं तथा अन्तिमं सूत्रम् ।

अत्र "शिष्टापरिग्रहाः" तथा "व्याख्याताः इति प्रथमान्तपदद्वयात् अस्य अधिकरणारम्भ-कत्वं संगतमेव, चतुर्थसामान्यनियमात् । परसूत्रे सर्वैः अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च सुसंगता एव । तेन अत्र अधिकरणस्य अरचनायां माध्वभाष्यस्यैव दोषः ।

## पञ्चमं भोक्त्रापत्त्यधिकरणम् ।

अत्र "भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" २।१।१३ ( १४७ ) इति सूत्रस्य "भोक्त्रा-पत्तिः" इति पदात्" अस्य "भोक्त्रापत्त्यधिकरणं" नाम । अत्र सर्वैः भाष्यकारैः अनेन एकेनैव सूत्रेण एतद् अधिकरणं रचितम् ।

अत्र "अविभागः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं संगतम्, किन्तु "चेत्"-शब्दयोगात् तस्य बाधः; पञ्चमविशेषनियमात् । तथापि सर्वैः अत्र अधिकरणं रचितम्, अतोऽत्र एकः नियमः सङ्कल्पनीयः येन एतस्य नियमानुगत्यं संरक्षितं स्यात् । स च इत्थं भवतु—

"चेत्, इति चेन्" प्रभृति पदसत्त्वेऽपि अत्र शङ्काभागे पञ्चम्यन्तप्रथमान्तपदद्वयसत्त्वम्, तत्र अधिकरणारम्भः युक्तः इति चतुर्दशविशेषनियमः ।

"अत्र भोक्त्रापत्तेः" इति पञ्चम्यन्तपदात् "अविभागः" इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणरचना संगच्छते एव । ततश्च "भोक्त्रापत्तेः" इति पदात् प्रसंगान्तरत्वं सूचितमेव इति

स्पष्टम् । परवर्त्तिसूत्रे सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः । पूर्वसूत्रे "व्याख्यातम्"-पदेन अधिकरणसमाप्तिसूचनादपि अत्र अधिकरणारम्भः संगच्छते । पञ्चदश-विशेषनियमात् । नात्र उनविंशविशेषनियमस्य प्रयोगसम्भावना, तस्य विशेषरूपत्वात् ।

## षष्ठम् आरम्भणाधिकरणम् ।

अत्र "तदनन्यत्वमारम्भणशब्दादिभ्यः" २।१।१४ ( १४८ ) इति सूत्रस्य आरम्भण-शब्दात् अस्य "आरम्भणाधिकरणं" नाम । तत्र श्रीकण्ठ-वल्लभभिन्नैः सर्वैः अत्र सप्त सूत्राणि गृहीतानि । तत्रापि रामानुज-निम्बार्कभाष्ययोः चतुर्थं पञ्चमं च सूत्रं एकीकृत्य सप्त सूत्राणि षट्सु सूत्रेषु परिणमितानि । श्रीकण्ठभाष्ये परवर्त्तिनः अधिकरणस्य सूत्रत्रयं गृहीत्वा नव सूत्राणि तथा वल्लभभाष्ये प्रथमत्रीणि सूत्राणि गृहीतानि इत्ययमेव अत्र विशेषः । तेन श्रीकण्ठभाष्ये अत्र अधिकरणद्वयम् एकीकृतम् । वल्लभभाष्ये तु एकम् अधिकरणं द्विधा कृतम् इति फलम् । तानि च सप्त सूत्राणि—

१। "तदनन्यत्वमारम्भणशब्दादिभ्यः" २।१।१४ ( १४८ )
२। "भावे चोपलब्धेः" २।१।१५ ( १४९ )
३। "सत्त्वाच्चावरस्य" २।१।१६ ( १५० )
४। "असद्व्यपदेशान्नेति चेन्न धर्म्मान्तरेण वाक्यशेषात्" २।१।१७ ( १५१ )
५। "युक्तेः शब्दान्तराच्च" २।१।१८ ( १५२ )
६। "पटवच्च" २।१।१९ ( १५३ )
७। "यथा च प्राणादि" २।१।२० ( १५४ )

अत्र ( १ ) "तदनन्यत्वमारम्भणशब्दादिभ्यः" २।१।१४ ( १४८ ) इति सूत्रे "तद-नन्यत्वम्" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं संगच्छते । चतुर्थसामान्यनियमात् ।

( २ ) "भावे चोपलब्धेः" २।१।१५ ( १४९ ) अत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ३ ) "सत्त्वाच्चावरस्य" २।१।१६ ( १५० ) इत्यपि पूर्ववत् अंगसूत्रम्, चतुर्थ-सामान्यनियमात् ।

( ४ ) "असद्व्यपदेशान्नेति चेन्न धर्म्मान्तरेण वाक्यशेषात्" २।१।१७ ( १५१ ) इति अत्रापि प्रथमान्तपदाभावः । ततश्च "इति चेन्न" पदानां सत्त्वम् । अतः अस्य अंगसूत्रत्व-मेव संगतम् । चतुर्थसामान्य-पञ्चमविशेषनियमाभ्याम् । रा-नि-श्री-भाष्येषु परसूत्रेण सह एतत् सूत्रं पठ्यते, तन्न युक्तम्; पृथक्तया अतिरिक्तविषयस्य सूचनात् । चतुर्थविशेषनियमः द्रष्टव्यः । तथापि तेषां मते षड्भिः सूत्रैः एतदधिकरणं रचितम् । वल्लभमते तु अत्र नवमम् अधिकरणम् आरब्धम् । तदपि नियमविरुद्धम् । तेन अत्र अधिकरणरचनायां तस्य अयं एकः दोषः सञ्जातः ।

( ५ ) "युक्तेः शब्दान्तराच्च" २।१।१८ ( १५२ ) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमाच्च । रा, नि, श्री मतेषु एतत् सूत्रं पूर्वसूत्रेण सह पठितं दृश्यते ।

( ६ ) "पटवच्च" २।१।१९ ( १५३ ) एतस्यापि पूर्ववत् अंगसूत्रत्वम्। चतुर्थ-सामान्यनियमात्, षष्ठविशेषनियमाच्च।

( ७ ) "यथा च प्राणादि" २।१।२० ( १५४ ) अत्र "प्राणादि" इति प्रथमान्तपद-सत्त्वेऽपि चकारयोगात् "यथा"-शब्देन साकांक्षत्वविधानाच्च नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात् च। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः। श्रीकण्ठभाष्ये परवर्तिसूत्रद्वयमपि एतदधिकरणान्तर्गतं कृतं दृश्यते।

## सप्तमम् इतरव्यपदेशाधिकरणम्।

अत्र "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" २।१।२१ ( १५५ ) इति सूत्रस्य "इतरव्यपदेश"-शब्दात् अस्य "इतरव्यपदेशाधिकरणं" नाम। तत्र मध्व-श्रीकण्ठ-भिन्नैः सर्वैः भाष्यकारैः सूत्रत्रयं गृहीतम्। माध्वमतेन तत्र षट् सूत्राणि, श्रीकण्ठमतेन च एतदधिकरणं पूर्वाधिकरणान्तर्गतमेव कृतम्। तच्च सूत्रत्रयम्—

( १ ) इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २।१।२१ ( १५५ )

( २ ) अधिकं तु भेदनिर्देशात् २।१।२२ ( १५६ )

( ३ ) अश्मादिवच्च तदनुपपत्तिः २।१।२३ ( १५७ )

अत्र ( १ ) "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" २।१।२१ ( १५५ ) इत्यत्र "हिताकरणादिदोषप्रसक्तिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव। चतुर्थ-सामान्यनियमात्। श्रीकण्ठभाष्ये तु तन्न कृतम् अतः तस्यैव दोषः।

( २ ) "अधिकं तु भेदनिर्देशात्" २।१।२२ ( १५६ ) इत्यत्र "अधिकम्" इति प्रथमान्तपदसत्त्वेऽपि "तु"-शब्दयोगात् नास्य अधिकरणारम्भकत्वम्; नवमविशेषनियमात्।

( ३ ) "अश्मादिवच्च तदनुपपत्तिः" २।१।२३ ( १५७ ) इत्यत्र "अनुपपत्तिः" इति प्रथमान्तपदसत्त्वेऽपि "च"-शब्दयोगात् नास्य अधिकरणारम्भकत्वम्। षष्ठविशेषनियमात्। परसूत्रे सर्वसम्मत्या पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः।

## अष्टमम् उपसंहारदर्शनाधिकरणम्।

अत्र "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ ( १५८ ) इति सूत्रस्य "उपसंहारदर्शनाधिकरणं" नाम। मध्व-वल्लभभिन्नैः सर्वैः भाष्यकारैः अत्र सूत्रद्वयं गृहीतम्। मध्वेन तु अत्र अधिकरणं न आरब्धम्। तन्मतेन एतत् सूत्रं पूर्वाधिकरणस्य सूत्रषट्कान्तर्गतं चतुर्थं सूत्रम्। वल्लभभाष्ये तु अत्र षट् सूत्राणि गृहीतानि। तच्च सूत्रद्वयम्—

( १ ) "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ ( १५८ )

( २ ) "देवादिवदपि लोके" २।१।२५ ( १५९ )

अत्र ( १ ) "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ ( १५८ ) इत्यत्र

"उपसंहारदर्शनात्" इति पञ्चम्यन्तपदात् प्रथमान्तपदस्य अन्वयानुरोधात् अध्याहर्तव्यत्वे अधिकरणारम्भः समुचितः, चतुर्दशविशेषनियमात् , पञ्चमविशेषनियमात् च "इति चेन्न" इति पदसत्त्वस्य न तद्बाधकत्वम्, पञ्चमविशेषनियमात् । तेन च अत्र अधिकरणारम्भः संगच्छते। माध्वभाष्ये अनेन सूत्रेण अधिकरणस्य अनारम्भात् तस्य दोषप्रसंगः ।

( २ ) "देवादिवदपि लोके" २।१।२५ ( १५९ ) इत्यत्र "देवादिवद्"इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम् । "अपि"-शब्देन तस्य साकांक्षत्वविधानात्। निरपेक्षप्रथमान्तपदस्य एव अधिकरणारम्भकत्वम् । परसूत्रे सर्वैः अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिरिति ।

## नवमम् कृत्स्नप्रसक्त्यधिकरणम् ।

अत्र "कृत्स्नप्रसक्तिर्निरवयत्वशब्दकोपो वा" २।१।२६ ( १६० ) इति सूत्रस्य "कृत्स्नप्रसक्तिः"-पदात अस्य "कृत्स्नप्रसक्त्यधिकरणं" नाम । अत्र शङ्करभाष्ये तथा भास्कर-भाष्ये सूत्रचतुष्टयं गृहीतम् । रामानुज-निम्बार्क-श्रीकण्ठ-भाष्येषु षट् सूत्राणि, तथैव श्रीपतिभाष्ये अष्ट सूत्राणि गृहीतानि । माध्वभाष्ये एतत् सूत्रं षट्सूत्रात्मकपूर्वाधिकरणस्य अन्तिमं सूत्रम् । वल्लभभाष्ये तु एतत् सूत्रम् षट्सूत्रात्मकपूर्वाधिकरणस्य तृतीयं सूत्रम् इति बोद्धव्यम् । तत्र शङ्कर-भास्करभाष्यसम्मतं सूत्रचतुष्टयं यथा—

१। "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" २।१।२६ ( १६० )

२। श्रुतेस्तु शब्दमूलत्वात् २।१।२७ ( १६१ )

३। आत्मनि चैवं विचित्राश्च हि २।१।२८ ( १६२ )

४। स्वपक्षदोषाच्च २।१।२९ ( १६३ )

अत्र ( १ ) "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" २।१।२६ ( १६० ) इति सूत्रस्य "कृत्स्नप्रसक्तिः" तथा "शब्दकोपः" इतिप्रथमान्तपदद्वयात् अस्य अधिकरणारम्भकत्वं संगतमेव । वा-शब्देन नात्र तस्य प्रथमान्तपदद्वयस्य साकांक्षत्वविधानं शङ्कनीयम् । अर्थानुरोधात् । चतुर्थ-सामान्यनियमात् । माध्व-वल्लभभाष्यद्वयमध्ये अधिकरणस्य अनारम्भात् तयोरेव दोषभाक्त्वम् ।

( २ ) "श्रुतेस्तु शब्दमूलत्वात्" २।१।२७ ( १६१ ) अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं संगतम्, चतुर्थसामान्यनियमात् । केवलं माध्वभाष्ये अधिकरणारम्भात् तस्यैव दुष्टत्वम् । तु-शब्देनापि व्याघातात् नवमविशेषनियमात् च ।

( ३ ) "आत्मनि चैवं विचित्राश्च हि" २।१।२८ ( १६२ ) अत्र "विचित्राः" इति प्रथमान्तपदसत्त्वेऽपि च-शब्दयोगात् अस्य अधिकरणारम्भकत्वं सर्वसम्मत्या निषिध्यते । चतुर्थ-सामान्यनियमात् तथा षष्ठविशेषनियमात् ।

( ४ ) "स्वपक्षदोषाच्च" २।१।२९ ( १६३ ) अत्र प्रथमान्तपदाभावात् पूर्ववत

नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। परसूत्रे भाष्यत्रयेण पृथगधिकरणारम्भात् अत्र अधिकरणसमाप्तिकल्पनं न समुचितम्, भाष्यपञ्चकविरोधात्। तथापि प्राचीनसम्मतत्वात् न उपेक्षनीयं तत् इति। किंच परसूत्रे विषयान्तरसूचनात् तस्य पृथगधिकरणारम्भकत्वं संगतमेव।

## दशमं सर्वोपेताधिकरणम्।

अत्र "सर्वोपेता च तद्दर्शनात्" २।१।३० ( १६४ ) इति सूत्रस्य "सर्वोपेता"-पदात् अस्य "सर्वोपेताधिकरणं" नाम। अत्र शङ्कर-भास्कर-भाष्यद्वयमध्ये सूत्रद्वयं गृहीतम्। वल्लभ-भाष्ये तु अष्ट सूत्राणि गृहीतानि। रामानुज-निम्बार्क-माध्व-श्रीकण्ठ-श्रीपतिभाष्येषु नात्र अधिकरणं रचितम्। अत्र एतत्सूत्रद्वयं पूर्वाधिकरणान्तर्गतमेव इति दृश्यते। तच्च सूत्रद्वयम्—

( १ ) "सर्वोपेता च तद्दर्शनात्" २।१।३० ( १६४ )

( २ ) "विकरणत्वान्नेति चेत् तदुक्तम्" २।१।३१ ( १६५ )

अत्र ( १ ) "सर्वोपेता च तद्दर्शनात्" २।१।३० ( १६४ ) इति सूत्रे "सर्वोपेता" इति प्रथमान्तपदसत्त्वात्, चतुर्थसामान्यनियमात्, अस्य अधिकरणारम्भकत्वं युक्तम्। षष्ठविशेषनियमानुसारेण चकारस्य तद्बाधकत्वेऽपि त्रयोदशविशेषनियमात् तस्य निषेधः। तेन रा, नि, म, श्री, श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् तेषामेव दुष्टत्वम्, संख्याविरोधादपि नियमविरोधस्य प्राबल्यात्। किंच विषयान्तरस्य सूचनात् अत्र अधिकरणारम्भः संगच्छते एव।

( २ ) "विकरणत्वान्नेति चेत् तदुक्तम्" २।१।३१ ( १६५ ) इत्यत्र "तदुक्तम्" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् अधिकरणारम्भः संगतः, तथापि "नेति चेत्" इति पदस्य सत्त्वात् नास्य अधिकरणारम्भकत्वम्, पञ्चमविशेषनियमात्। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते। श्रीपति-भाष्ये तथा वल्लभ-भाष्ये नात्र अधिकरण-समाप्तिः कृता। अत्र "तदुक्तम्" इति पदमपि अधिकरणसमाप्तिज्ञापकम् इत्यादि कल्पयितुं शक्यते।

## एकादशं प्रयोजनवत्त्वाधिकरणम्।

अत्र "न प्रयोजनवत्त्वात्" २।१।३२ ( १६६ ) इति सूत्रस्य "प्रयोजनवत्त्व" इति शब्दात् अस्य "प्रयोजनवत्त्वाधिकरणं" नाम। अत्र शङ्कर-भास्कर-माध्व-श्रीकण्ठभाष्येषु सूत्रद्वयं गृहीतम्, रामानुज-निम्बार्क-भाष्यद्वये तु सूत्रपञ्चकं गृहीतम्। श्रीपति-वल्लभ-भाष्ययोः अत्र न अधिकरणं रचितम्। तच्च सूत्रद्वयम्—

( १ ) "न प्रयोजनवत्त्वात्" २।१।३२ ( १६६ )

( २ ) "लोकवत्तु लीलाकैवल्यम्" २।१।३३ ( १६७ )

अत्र ( १ ) "न प्रयोजनवत्त्वात्" २।१।३२ ( १६६ ) इति सूत्रे प्रथमान्तपदासत्त्वात् नास्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात्। तथापि सर्वेषां भाष्याणां तथाकरणात्

केनचित् नियमसङ्कलनेन एतस्य नियमानुगतत्वं साधनीयम् । स च नियमः एवं भवतु—

"यत्र पूर्वसूत्रे व्याख्यातम्" "तदुक्तम्" एवंविधं प्रसंगसमाप्तिसूचकं पदं, तत्र निरपेक्षत्वबोधकत्वे सति अधिकरणारम्भः करणीयः । इति पञ्चदशविशेषनियमः ।

अत्र पूर्वसूत्रे "तदुक्तम्" इति पदं दृश्यते, अतोऽत्र अधिकरणारम्भः समुचितः एव । न च "जीवमुख्यप्राणलिंगान्नेति चेत् तद्व्याख्यातम्" १।४।१७ ( १२३ ) इत्यत्र परसूत्रेण अधिकरणारम्भप्रसंगः इति वाच्यम्, तत्र "अन्यार्थस्तु जैमिनिः" इत्यादि परसूत्रस्य तु-शब्देन निरपेक्षत्वबोधकत्वाभावात् । अतः अत्र श्रीपति-वल्लभ-भाष्ययोः दोषः, ताभ्यां अधिकरणस्य अरचितत्वात् ।

( २ ) "लोकवत्तु लीलाकैवल्यम्" २।१।३३ (१६७) इत्यत्र "कैवल्यम्" इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्, अनिषेधार्थक तु-शब्दयोगात् । नवमविशेषनियमात् । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः समुचिता ।

## द्वादशं वैषम्यनैर्घृण्याधिकरणम् ।

अत्र "वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति" २।१।३४ (१६८) इति सूत्रस्य "वैषम्यनैर्घृण्ये"-इति शब्दात् अस्य "वैषम्यनैर्घृण्याधिकरणं" नाम । अत्र शाङ्कर-भास्कर-माध्व-श्रीकण्ठ-भाष्येषु सूत्रत्रयं गृहीतम् । श्रीपतिभाष्ये तु सूत्रद्वयम् । रामानुज-निम्बार्क-वल्लभ-भाष्येषु नात्र अधिकरणं रचितम् । तत्र रामानुज-निम्बार्क-भाष्ययोः एतत् सूत्रं पञ्चसूत्रात्मक-दशमाधिकरणस्य तृतीयं सूत्रम् । वल्लभभाष्ये तु अष्टसूत्रात्मक-द्वादशाधिकरणस्य पञ्चमं सूत्रम् इति दृश्यते । तच्च सूत्रत्रयम्—

( १ ) 'वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति" २।१।३४ ( १६८ )

( २ ) "न कर्म्माविभागादिति चेन्नानादित्वात्" २।१।३५ ( १६९ )

( ३ ) "उपपद्यते चाप्युपलभ्यते च" २।१।३६ ( १७० )

अत्र ( १ ) "वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति" २।१।३४ (१६८) इति सूत्रे "वैषम्यनैर्घृण्ये" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वम् संगतम् । चतुर्थसामान्यनियमात् । रामानुज-निम्बार्क-वल्लभ-भाष्येषु अधिकरणस्य अनारम्भात् तेषां दोषेण भवितव्यम् ।

( २ ) "न कर्म्माविभागादिति चेन्नानादित्वात्" २।१३५ ( १६९ ) अत्र प्रथमान्तपदाभावात्, चतुर्थसामान्यनियमात् "इति चेन्न" पदसत्त्वाच्च नात्र अधिकरणारम्भः समुचितः । पञ्चमविशेषनियमात् । रा-नि-श्री-श्रीप-भाष्येषु एतत् सूत्रं परसूत्रेण सह पठ्यते । तच्च सम्यक्, विषयबाहुल्यात् । चतुर्थविशेषनियमाच्च ।

( ३ ) "उपपद्यते चाप्युपलभ्यते च"-२।१।३६ (१७०) अत्र प्रथमान्तपदाभावात् "च"-योगात् ततः "अपि" योगात् च न अधिकरणारम्भः युक्तः । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । श्रीपतिमतेन एतत्सूत्रस्य पूर्वसूत्रशेषत्वं, चतुर्थविशेषनियमात् तच्च संगतम्, परसूत्रे चतुर्षु-भाष्येषु [illegible]अधिकरणारम्भात्, अधिकरणस्य समाप्तिः कल्पयितुं शक्यते ।

## त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम् ।

अत्र "सर्वधर्मोपपत्तेश्च" २।१।२७ (१७१) इति सूत्रस्य "सर्वधर्मोपपत्तिः"-पदात् अस्य "सर्वधर्मोपपत्त्यधिकरणं" नाम। अत्र शाङ्कर-भास्कर-मध्व-श्रीपति-भाष्येषु अनेन एतद् अधिकरणं रचितम् । रामानुज-निम्बार्क-श्रीकण्ठ-वल्लभ-भाष्येषु अस्य पूर्वाधिकरणान्तर्गतत्वात् नात्र अधिकरणं रचितम् ।

अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम् । चतुर्दशसामान्यनियमात् । तस्य अध्याहारे कृतेऽपि चकारयोगात् षष्ठविशेषनियमेन तस्य बाधा भवति । तेन श-भा-म-श्रीप-भाष्याणां दोषेन भवितव्यम् । तथापि यद्यपि अत्र सूत्रार्थः अपि अध्याहारेण तदा तेषां समर्थनं कर्तुं शक्यते । किञ्च यतः पूर्वं सूत्रम् "उपपद्यते चापि उपलभ्यते च" इति, तत्र "चकारः" तत "अपि"-शब्दः, ततः समुच्चयार्थकः "चकारः"—एवं पदत्रयं दृश्यते, अतः एतेन वक्तव्य-परिसमाप्तिः सूच्यते । यतः लोके त्रिहेतुवर्णनं वक्तव्यसमाप्तिसूचकम् इति प्रसिद्धम् । अतः पूर्व-सूत्रे एव अधिकरणसमाप्तिः कल्प्यते । अतः षोडशविशेषनियमात् अधिकरणारम्भः युक्तः । ततश्च सूत्रार्थावलम्बने कृते "सर्वधर्माः" इति पदेन प्रागुक्तविचाराणाम् उपसंहारः अत्र क्रियते इत्यपि बुध्यते । तेन उपसंहाररूप-पृथग्विषयस्य सूचनात् अत्र पृथगधिकरणं भवितुं उचितम् । एवं च अत्र एकः नियमोऽपि भवितुम् अर्हति । स च यथा—

"यत्र हेतुत्रयं चकारादिपदेन समाह्रियते तत्र अधिकरणसमाप्तिकल्पनम् उचितम् ।" इति षोडशः विशेषनियमः ।

तथा सति अत्र रा-नि-श्री-व-भाष्याणि अधिकरणस्य अरचनायां दोषग्रस्तानि भवन्ति ।

## प्रथमपादसमालोचनम् ।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

( १ ) कति कीदृशाश्च नियमाः अत्र सङ्कलिताः

( २ ) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः, इति ।

एते चत्वारः विषयाः अधस्तात् क्रमेण पूर्ववत् प्रदर्शनीयाः । तत्र प्रथमं तावत्—

( १ ) कति कीदृशाश्च नियमाः अत्र संकलिताः

इति द्रष्टव्यम् । तथा सति अस्मिन् पादे अतिरिक्तं यत् नियमत्रयं संकलितम्, तं च क्रमशः यथा—

चतुर्दशनियमः—"चेत्" "इति चेत्" प्रभृतिशब्दसत्त्वेऽपि यत्र उत्तरभागे विरोधाभावः प्रथमान्तपदसत्त्वम् तेषाम् आरम्भकत्वाभावोपपन्नम्, तत्र अधिकरणारम्भः युक्तः । यथा—"भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" इति २।१।१३ (१५६) सूत्रे ...

पक्षद्वयनियमः—"यत्र पूर्वसूत्रे "व्याख्यातं" "तदुक्तम्" इत्येवंविधं प्रसंग-समाप्तिसूचकं पदं, तत्र निरपेक्षत्वबोधकत्वे सति अधिकरणारम्भः करणीयः"। एतदर्थं "न प्रयोजनवत्त्वात्" २।१।३२ (१६६) इति सूत्रं द्रष्टव्यम्।

पौरस्त्यनियमः—"यत्र हेतुत्रयं चकारादिपदेन समाह्रियते तत्र अधिकरणसमाप्तिकल्पनम् उचितम्"। एतदर्थं "सर्वधर्मोपपत्तेश्च" २।१।३७(१७१) इति सूत्रं द्रष्टव्यम्। इदानीं द्रष्टव्यम्—

**( २ ) कति दोषाः कस्य भाष्यस्य कथं संवृत्ताः**

तत्र २।१।१ अधिकरणे वल्लभभाष्ये "इतरेषां चानुपलब्धेः" २।१।२ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।२ अधिकरणे माध्वभाष्ये "एतेन योगः प्रत्युक्तः" २।१।३ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।३ अधिकरणे माध्वभाष्ये "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां" २।१।५ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।३ अधिकरणे मध्व-वल्लभ-भाष्ययोः "असदिति चेन्न प्रतिषेधमात्रत्वात्" २।१।७ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।३ अधिकरणे श्रीकण्ठभाष्ये "अपितौ तद्वत्प्रसंगादसमञ्जसम्" २।१।८ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।४ अधिकरणे माध्वभाष्ये "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" २।१।१२ सूत्रेण अधिकरणस्य अरचनायां दोषः।

१।१।६ अधिकरणे वल्लभभाष्ये "असद्व्यपदेशान्नेति चेन्न धर्म्मान्तरेण वाक्यशेषात्" २।१।१७ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।७ अधिकरणे श्रीकण्ठभाष्ये "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" २।१।२१ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।८ अधिकरणे माध्वभाष्ये "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।९ अधिकरणे—~~मध्व-वल्लभ-भाष्ययोः~~ "कृत्स्नप्रसक्तिः निरवयवत्वशब्दकोपो वा" २।१।२६ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।९ अधिकरणे माध्वभाष्ये "श्रुतेस्तु शब्दमूलत्वात्" २।१।२७ सूत्रेण अधिकरणस्य रचनायां दोषः।

२।१।१० अधिकरणे "रा-ब-नि-श्री-श्रीक-भाष्येषु "सर्वोपेता च तद्दर्शनात्" २।१।३० सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।११ अधिकरणे श्रीपति-वल्लभ-भाष्ययोः "न प्रयोजनवत्त्वात्" २।१।३२ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।१२ अधिकरणे रा-नि-व-भाष्येषु "वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति" २।१।३४ सूत्रेण अधिकरणस्य अरचनायां दोषः।

२।१।१३ अधिकरणे रा-नि-श्री-व-भाष्येषु "सर्वधर्मोपपत्तेश्च" २।१।३७ सूत्रेण अधिकरणस्य अरचनायां दोषः। एवं च—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| वल्लभभाष्ये | ४ दोषाः | ३ दोषाः |
| माध्वभाष्ये | ५ ,, | ३ ,, |
| श्रीकण्ठभाष्ये | ३ ,, | १ दोषः |
| रामानुजभाष्ये | ३ ,, | ० |
| निम्बार्कभाष्ये | ३ ,, | ० |
| श्रीपतिभाष्ये | २ दोषौ | ० |

इति वक्तुं शक्यते। तेन शङ्कर-भास्कर-भाष्ययोः दोषाभावः। इदानीं द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः**

तत्र प्रथमाधिकरणे—

प्रथमसूत्रे—"स्मृत्यनवकाशदोषप्रसंगः ····" (२।१।१) इत्यादौ स्मृतिवाक्यं "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति ( महाभाः शाः मोः ३३५।३१ ), "ऋषिं प्रसूतं कपिलं" (श्वेः ५।२), "यद् वै किंच मनुरवदत् तद्भेषजम्" (तैः सं २।२।१०।२) "सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि" ( मनु १२।९१ )

द्वितीयसूत्रे—"इतरेषां चानुपलब्धेः" ( २।१।२ ) इत्यत्र सांख्यस्मृतिप्रसिद्धमहदादिबोधकवाक्यानि। "प्रकृतेर्महान् ततोऽहंकारः" ( सां काः २२ )

द्वितीयाधिकरणे—

प्रथमसूत्रे—"एतेन योगः प्रत्युक्तः" (२।१।३) इत्यत्र योगस्मृतिप्रसिद्धप्रधानतात्पर्यकवाक्यानि। "अथ तत्त्वदर्शनोपायो योगः" (योगशास्त्रं)" "नावेदविन्मनुते तं बृहन्तम् ( तैः ब्राः ३।१२।९।७ )

तृतीयाधिकरणे—

प्रथमसूत्रे—"न विलक्षणत्वादस्य तथात्वं च शब्दात्" (२।१।४) इत्यत्र "विज्ञानं चाविज्ञानं चाभवत्" ( तैः २।६ ) —[illegible]

द्वितीयसूत्रे—"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" (२।१।५) इत्यत्र "ते हेमे प्राणाः

अहंश्रेयसे विवदमाना:" ( बृ ६।१।७ ), "अग्निर्वाग् भूत्वा मुखं प्राविशत्" ( ऐ: आ २।४।२।४ )

तृतीयसूत्रे—"दृश्यते तु" (२।१।६) इत्यत्र "को अद्धा वेद क इह प्रवोचत्"। "इयं विसृष्टिर्यत आबभूव" ( ऋ: सं: १०।१२९।६ ), "अचिन्त्याः खलु ये भावाः" ( महाभा: भीष्मपर्व ) "अव्यक्तोऽयम्" ( गीता २।२५ )

चतुर्थसूत्रे—"असदिति चेन्न प्रतिषेधमात्रत्वात्" (२।१।७) इत्यत्र "तस्मात् असतः सत् जायेत" ( छा: ६।२।१ ) "कुतस्तु खलु सोम्य एवं स्यात् इति होवाच कथम् असतः सत् जायेत" ( छा: ६।२।२ )

पञ्चमसूत्रे—"अपीतौ तद्वत्प्रसंगादसमञ्जसम्" (२।१।८) इत्यत्र युक्तिमात्रप्रदर्शनम्।

षष्ठसूत्रे—"न तु दृष्टान्तभावात्" (२।१।९) इत्यत्र "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते" ( गौडपा: का: १।१६ ) "इमाः सर्वाः प्रजाः सति सम्पद्य" ( छा: ६।९।२-३ )

सप्तमसूत्रे—"स्वपक्षदोषाच्च" (२।१।१०) इत्यत्र युक्तिमात्रप्रदर्शनम्।

अष्टमसूत्रे—"तर्काप्रतिष्ठानात्...." (२।१।११) इत्यादौ "प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्" ( मनु १२।१०५ ), "आर्षं धर्मोपदेशं च" (मनु १२।१०६)

चतुर्थाधिकरणे—

प्रथमसूत्रे—"एतेन शिष्टापरिग्रहा अपि व्याख्याताः" (२।१।१२) इत्यत्र युक्तिमात्रप्रदर्शनम्।

पञ्चमाधिकरणे—

प्रथमसूत्रे—"भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" (२।१।१३) इत्यत्र "तत् सृष्ट्वा तदेवानुप्राविशत्" ( तै: २।६ )

षष्ठाधिकरणे—

प्रथमसूत्रे—"तदनन्यत्वमारम्भणशब्दादिभ्यः" (२।१।१४) इत्यत्र "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा: ६।१।१) "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा" (छा:६।८।७) "ब्रह्मैवेदं सर्वम्" ( मुण्डक २।२।११ )

द्वितीयसूत्रे—"भावे चोपलब्धेः" (२।१।१५) इत्यत्र युक्तिमात्रप्रदर्शनम्।

तृतीयसूत्रे—"सत्त्वाच्चावरस्य" ( २।१।१६ ) इत्यत्र "सदेव सोम्येदमग्र आसीत्" ( छा: ६।२।१ ) "ब्रह्म वा इदमग्र आसीत्" ( बृ: १।४।१०-११ )

चतुर्थसूत्रे—"असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" (२।१।१७) इत्यत्र "असद् वा इदमग्र आसीत्" ( तै: २।७।१ ) 'तत् सत् आसीत्' ( छा: ३।१९।१ )

पञ्चमसूत्रे—"युक्तेः शब्दान्तराच्च" ( २।१।१८ ) इत्यत्र "सदेव सोम्येदमग्र आसीत्" ( छा: ६।२।१ ) "[illegible]" ( छा: ६।२।२ )

षष्ठसूत्रे—“पटवच्च” ( २।१।१९ ) इत्यत्र युक्तिमात्रप्रदर्शनम्।

सप्तमसूत्रे—“यथा च प्राणादि” (२।१।२०) इत्यत्र “येनाश्रुतं श्रुतं” ( छः ६।१।३ )

सप्तमाधिकरणे—

प्रथमसूत्रे—“इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः” (२।१।२१) इत्यत्र “तत्त्वमसि” ( छा० ६।८।७ ), “अनेन जीवेन आत्मना अनुप्रविश्य” ( छा० ६।३।२ ) “तत् सृष्ट्वा तदेवानुप्राविशत्” ( तैः २।६ )

द्वितीयसूत्रे—“अधिकंतु भेदनिर्देशात्” (२।१।२२) इत्यत्र “आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यः” ( बृः २।४।५ )

तृतीयसूत्रे—“अश्मादिवच्च तदनुपपत्तिः” ( २।१।२३ ) इत्यत्र हेतुमात्रप्रदर्शनम्।

अष्टमाधिकरणे—

प्रथमसूत्रे—“उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि” (२।१।२४) इत्यत्र—“न तस्य कार्य्यं करणं च विद्यते” ( श्वे ६।८ )

द्वितीयसूत्रे—“देवादिवदपि लोके” ( २।१।२५ ) इत्यत्र सैव श्रुतिः।

नवमाधिकरणे—

प्रथमसूत्रे—“कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा” ( २।१।२६ ) इत्यत्र “निष्कलम्” ( श्वे० ६।१९ )

द्वितीयसूत्रे—“श्रुतेस्तु शब्दमूलत्वात्”(२।१।२७) इत्यत्र “तावानस्य महिमा” (छा० ३।१२।६

तृतीयसूत्रे—“आत्मनि चैवं विचित्राश्च हि” (२।१।२८) इत्यत्र “न तत्र रथा न रथयोगाः” ( बृः ४।३।१० )

चतुर्थसूत्रे—“स्वपक्षदोषाच्च” (२।१।२९) इत्यत्र हेतुमात्रप्रदर्शनम्।

दशमाधिकरणे—

प्रथमसूत्रे—“सर्वोपेता च तद्दर्शनात्” (२।१।३०) इत्यत्र “सर्वकर्म्मा सर्वकामः” (छः ७।१४।४)

द्वितीयसूत्रे—“विकरणत्वान्नेति चेत् तदुक्तम्” (२।१।३१) इत्यत्र “अचक्षुष्कम् अश्रोत्रम्” (बृः ३।८।८) “अपाणिपादो जवनो ग्रहीता” ( श्वेः ३।१९ )

एकादशाधिकरणे—

प्रथमसूत्रे—“न प्रयोजनवत्त्वात्” ( २।१।३२ ) इत्यत्र हेतुमात्रप्रदर्शनम्।

द्वितीयसूत्रे—“लोकवत्तु लीलाकैवल्यम्” ( २।१।३३ ) इत्यत्र हेतुमात्रप्रदर्शनम्।

द्वादशाधिकरणे—

प्रथमसूत्रे—“वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति” (२।१।३४) इत्यत्र “एष ह्येव साधु कर्म कारयति” ( कौ० ३।८ ),

द्वितीयसूत्रे—"न कर्माविभागादिति चेन्नानादित्वात्" (२।१।३५) इत्यत्र—"सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्" ( छा: ६।२।१ )

तृतीयसूत्रे—"उपपद्यते चाप्युपलभ्यते च" (२।१।३६) इत्यत्र "धाता यथापूर्वमकल्पयत्" (ऋक् सं० १०।१९०।३), "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा"। ( गीता १५।३ ), "अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरोत्।" ( छा: ६।३।२ )

त्रयोदशाधिकरणे—

प्रथमसूत्रे—"सर्वधर्मोपपत्तेश्च" (२।१।३७) इत्यत्र "निर्गुणम्" इत्यादि ( श्वे: ६।१९ ) "सर्वज्ञं सर्वशक्ति महामायं च ब्रह्म" (?)

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

**( ४ ) कीदृशी अस्य पादसङ्गतिः**

अत्र याश्च श्रुतयः सूत्रोपजीव्यत्वेन प्रदर्शिताः ताः सर्वाः शाङ्करभाष्यानुसारतः। भाष्यान्तरे किञ्चित् वैलक्षण्यं वर्त्तते एव। एवं च मतान्तरीयभाष्यभेदेन यथा पादप्रतिपाद्यरूपाः पाद-संगतयः कल्प्यन्ते ताश्च अत्र आदौ प्रदर्श्यन्ते—

शङ्करमते—"सांख्यादिस्मृतिप्रयुक्ततर्कैः वेदान्तसमन्वयस्य विरोधपरिहारः"।

भास्करमते—शङ्करमतानुरूपा।

रामानुजमते—"सांख्यादिस्मृतिभिः बाधस्य परिहारः"।

निम्बार्कमते—"परैः स्वसिद्धान्ते उद्भाविताः दोषाः निराक्रियन्ते"।

मध्वमते—"युक्त्यविरोधः"।

श्रीकण्ठमते—"सांख्यादितर्कविरोधशङ्कापूर्वकस्वपक्षस्थापनम्"।

श्रीपतिमते—"वेदान्तविरुद्धस्मृतितर्कादिनिराकरणपूर्वकं जगज्जन्मादिकारणत्वं परब्रह्म-शिवस्यैव इति प्रतिपादनम्।

एतेषां पर्यालोचने कृते नात्र कोऽपि मतभेदः परिलक्ष्यते; यद्यपि वैलक्षण्यं तत् तु भाषण-वैचित्र्यमात्रम्। एवं च सांख्यस्मृतिविचारमुखेन पादस्य प्रवर्तनात् संक्षेपतः अयं स्मृतिपादः इत्यभिधीयते। पादेऽस्मिन् श्रुतिस्मृत्यादयः ये च तत्र प्रदर्शिताः ते च युक्त्यनुकूलत्वेन परिगृहीताः इति बोद्धव्यम्। युक्तिश्च अनुभवाधीना, यादृशो यस्यानुभवः युक्तिरपि तादृशी तेन प्रदर्श्यते। तेन युक्तिप्रधानः पादोऽयं भवति। अतः द्वैत-द्वैताद्वैत-विशिष्टाद्वैताद्वैतादिमतवादिभिः सर्वैः युक्तिबलेनैव स्व-स्व-मतानुकूल्यार्थं सूत्राणां योजना कृता। साऽपि एतादृशनैपुण्येन सम्पादिता यत् तासां तारतम्यनिर्णयः सुदुष्करः एव प्रतिभाति। एवं च अत्र [illegible] [illegible]निरूपणं न सुकरं भवति। द्वैतादिमतवादानां परस्परविरोधात्। तथापि [illegible]बलेन पादोऽयं

निर्विशेषाद्वैतप्रतिपादनपरः इति वक्तुं शक्यते। तादृक्शास्त्रीय एतद्ग्रन्थस्य तात्पर्यत्वेन प्रागेव प्रतिपादितत्वात्। पादप्रतिपाद्यस्य शास्त्राध्यायप्रतिपाद्यव्याप्यत्वाच्च।

अथ यदि एतत्पादीयसूत्रार्थबलेनैव शास्त्रतात्पर्य्यस्यापि सविशेषब्रह्मपरत्वं प्रतिपादयितुम् इष्यते, तदा एतत्पादस्य सूत्रार्थः एवात्र कथञ्चित् संक्षेपतः आलोचनीयः। तथाहि सूत्रमात्रपाठतः, ब्रह्मणः जगत्स्रष्टौ अभिन्ननिमित्तोपादानकारणत्वं सूत्रार्थत्वेन प्रायेण सर्वसम्मतया उपलभ्यते। तथाच ब्रह्मणः तादृशकारणत्वस्वीकारे तस्य विकारित्वादिकम् अवश्यम्भाव्येव भवति। तद्वारणाय च बहूनि सूत्राणि प्रवृत्तानि सन्त्यपि दोषशङ्का न निर्मूलतां याति। लौकिकयुक्त्यादिभिः तद्दोषोद्धारस्य असम्भावितत्वम् आशङ्क्य श्रुतिप्रमाणेनैव तदेव साधितम् "श्रुतेस्तु शब्दमूलत्वात्" इत्यतः तथापि कार्य्यमिथ्यात्वादृते, कार्य्यस्य प्रातिभासिकत्वं प्रातीतिकत्वं वा विना कारणस्य सर्वथा अविकारित्वं न कस्यापि बुद्ध्यारूढं भवति। अतएव "तदनन्यत्व"-सूत्रेण कार्य्यकारणयोः भेदाभावं प्रतिपाद्य कारणरूपब्रह्मणः अविकारित्वं जगतः मिथ्यात्वं च सिद्धान्तितम्। अयमेव एतत्पदार्थत्वेन सूत्रकृतां आशयः इत्येव कल्पनं समीचीनमिति प्रतिभाति। कार्य्यकालेऽपि कार्य्यकारणयोरभेदकल्पनं कार्य्यस्य कल्पितत्वं भ्रान्तिविजृम्भितत्वं विना कथमपि न सम्भवति। लोके तु कार्य्यकाले कार्य्यकारणयोः कथञ्चित् भेदः एव स्वीक्रियते। अन्यथा व्यवहारस्य अनुपपत्तिर्दुर्वारा। "तदनन्यत्व"-सूत्रलक्षिता "मृत्तिकेत्येव सत्यम्" इति श्रुतिः एवकारेण कार्य्यस्यैव मिथ्यात्वं प्रतिपादयति। तेन च निर्विशेषाद्वैतसिद्धान्तः एव अत्र उपदिष्टः इत्येव अनुमीयते। अतः सूत्रार्थमात्रालोचनेन एतत् पादस्य निर्विशेषब्रह्मप्रतिपादनपरत्वमेव सिद्ध्यति। ततश्च अस्य अविरोधाध्यायस्य प्रथमे पादे कीदृशोऽविरोधः प्रदर्शितः, कीदृक् च अविरोधप्रदर्शनकौशलम् अवलम्बितं सूत्रकृद्भगवता व्यासेन एतदपि अवगन्तव्यम्। तत्र प्रथमं तावत् युक्तितर्काभ्यां परकृताक्षेपपरिहाररूपम्, द्वितीयं तु परमतेषु मतभेदप्रदर्शनरूपम्, तृतीयं तु परमतस्य अश्रौतत्वप्रतिपादनं, चतुर्थं दोषसाम्यप्रदर्शनम् एतत्पादीयसूत्राणां विश्लेषणे कृते एतदेव कौशलचतुष्टयम् अविरोधप्रदर्शनार्थम् अवलम्बितम् इति दृश्यते। एतत् सर्वम् अस्मिन् पादे अविरोधप्रदर्शनकौशलमिति अवगन्तव्यम्। तेन च स्वपक्षस्थापनपरोऽयं पादः इत्यपि अभिधीयते। द्वितीये तु पादे युक्तितर्काभ्यां एव परपक्षप्रत्याख्यानं कृतम्। यतः बहवः मतवादिनः सन्ति, ये खलु श्रुतिसिद्धान्तपूर्वपक्षभूतमतादिकं श्रुतितः स्वतन्त्रीकृत्येन अवगम्य श्रुतिमपि अवजानन्ति। तेषां मतनिरसनं युक्तितर्काभ्यामेव करणीयम्। अतः पादोऽसौ परपक्षखण्डनपरः इत्युच्यते। एवम् अत्र अविरोधाध्याये प्रथमादिपादद्वयेन [illegible] वेदान्त-सिद्धान्तः एव प्रतिष्ठापितः। श्रुतिविरोधपरिहार[illegible] श्रीमतां जीवजगद्ब्रह्मस्वरूपादिविषये अयमेव [illegible]।

इति द्वितीयाध्याये प्रथमपादोपसंहारः।

# अथ द्वितीयाध्याये द्वितीयपादः

## प्रथमं रचनानुपपत्त्यधिकरणम्

अत्र "रचनानुपपत्तेश्च नानुमानम्" २।२।१ ( १७२ ) इति सूत्रस्य "रचनानुपपत्ते:" इति पदात् अस्य "रचनानुपपत्त्यधिकरणं" नाम। तत्र शङ्कर-भास्कर-निम्बार्क-भाष्येषु अत्र दश सूत्राणि गृहीतानि। रामानुज-श्रीकण्ठ-श्रीपतिभाष्येषु तावत्सूत्राणां प्रथमसूत्रद्वयं एकीकृत्य नव सूत्राणि, माध्वभाष्ये दशानां प्रथमादिचत्वारि सूत्राणि, वल्लभ-भाष्ये तेषां प्रथमादिषट्-सूत्राणि अत्र गृहीतानि। माध्वभाष्ये एतैः दशभिः सूत्रैः पञ्च अधिकरणानि रचितानि, यथा प्रथमादिचतुर्भिः एकं, पञ्चमेन एकं, षष्ठेन एकं, सप्तमाष्टम्याम् एकं, नवमदशमाभ्यां च एकमिति। वल्लभेन तु अधिकरणद्वयम्। यथा प्रथमादिषड्भिः एकं, सप्तमाष्टमनवमदशमैः अपरमिति।

तानि च दश सूत्राणि यथा—

१। रचनानुपपत्तेश्च नानुमानम् २।२।१ ( १७२ )

२। प्रवृत्तेश्च २।२।२ ( १७३ )

३। पयोऽम्बुवच्चेत् तत्रापि २।२।३ ( १७४ )

४। व्यतिरेकानवस्थितेश्चानपेक्षत्वात् २।२।४ ( १७५ )

५। अन्यत्राभावाच्च न तृणादिवत् २।२।५ ( १७६ )

६। अभ्युपगमेऽप्यर्थाभावात् २।२।६ ( १७७ )

७। पुरुषाश्मवदिति चेत् तथापि २।२।७ ( १७८ )

८। अंगित्वानुपपत्तेश्च २।२।८ ( १७९ )

९। अन्यथानुमितौ च ज्ञशक्तिवियोगात् २।२।९ ( १८० )

१०। विप्रतिषेधाच्चासमञ्जसम् २।२।१० ( १८१ )

अत्र ( १ ) "रचनानुपपत्तेश्च नानुमानम् २।२।१ ( १७२ ) इत्यत्र "नानुमानम्" इति प्रथमान्तपदसत्त्वात् चतुर्थसामान्यनियमात् अत्रैव अधिकरणारम्भः समुचितः, तथापि च-कारात् पञ्चमविशेषनियमेन तस्य निषेधः अवगन्तव्यः; परन्तु सर्वसम्मतया अत्रैव पादारम्भात् अत्र अधिकरणारम्भः संगच्छते। द्वितीयविशेषनियमात्। रा-श्री-श्रीप-मतेषु परसूत्रस्यापि एतत्सूत्रांशत्वं दृश्यते। तत्र युक्तम्, पृथक्तया अतिरिक्तहेतोः ग्रहणात्। चतुर्थविशेषनियमात्।

( २ ) "प्रवृत्तेश्च" २।२।२ ( १७३ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं। चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात्। रा-श्री-श्रीप-मतेषु एतत्सूत्रस्य प्रथमसूत्रांशत्वं दृश्यते। अस्माभिरेकमतानुगतत्वात् अत्र तेषामेव ग्रहणाम् असंगतिः। एतत् तु सूत्रद्वयैकीकरणप्रस्तावे प्रदर्शितम्। चतुर्थविशेषनियमात् एकीकरणं न संगतम्। पृथक्तया अतिरिक्तहेतोः ग्रहणात्।

( ३ ) "पयोऽम्बुवच्चेत् तत्रापि" २।२।३ ( १७४ ) इत्यत्र "पयोऽम्बुवत्" इति पदात् तथा पञ्चमसामान्यनियमात् प्रथमान्तपदस्य अध्याहारे कर्तव्येऽपि "चेत्"-शब्दयोगात् अधिकरणारम्भः बाधितः । पञ्चमविशेषनियमात् ।

( ४ ) "व्यतिरेकानवस्थितेश्चानपेक्षत्वात्" २।२।४ ( १७५ ) इत्यत्र प्रथमान्तपदा-भावात् नास्य अधिकरणारम्भकत्वम्; चतुर्थसामान्यनियमात् षष्ठविशेषनियमात् च ।

( ५ ) "अन्यत्राभावाच्च न तृणादिवत्" २।२।५ ( १७६ ) इत्यत्र "तृणादिवत्" इति पदात् प्रथमान्तपदाध्याहारे कर्तव्येऽपि चकारयोगात् अधिकरणारम्भः न संगच्छते; पञ्चमसामान्य-नियमः षष्ठविशेषनियमेन बाधितः । माध्वभाष्ये अत्र अधिकरणस्य रचनाया दोषः ।

( ६ ) "अभ्युपगमेऽप्यर्थाभावात्" २।२।६ ( १७७ ) इत्यत्र प्रथमान्तपदाभावात् "अपि"-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्; प्रथमसामान्यनियमः षष्ठविशेषनियमेन बाधितः। माध्वभाष्ये तु अधिकरणस्य रचनाया दोषः । रा-श्री-श्रीप-मतेषु नवमसूत्रात् परम् इदं सूत्रं पठ्यते । एतत् तु सूत्रक्रमविपर्ययप्रस्तावे प्रदर्शितम् ।

( ७ ) "पुरुषाश्मवदिति चेत् तत्रापि" २।२।७ ( १७८ ) इत्यत्र "पुरुषाश्मवत्" इति पदात् प्रथमान्तपदाध्याहारे कर्तव्येऽपि चेत्-शब्दयोगात् नास्य अधिकरणारम्भकत्वं समुचितम्; पञ्चमसामान्यनियमः पञ्चमविशेषनियमेन बाधितः । माध्वभाष्ये तथा वल्लभभाष्ये तु अधिकरणा-रम्भात् तयोरेव दोषः ।

( ८ ) "अङ्गित्वानुपपत्तेश्च" २।२।८ ( १७९ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चकारयोगाच्च । प्रथमसामान्यनियमः षष्ठविशेषनियमेन बाधितः ।

( ९ ) "अन्यथानुमितौ च ज्ञशक्तिवियोगात्" २।२।९ ( १८० ) इत्यत्र प्रथमान्त-पदाभावात् नास्य अधिकरणारम्भकत्वम् । प्रथमसामान्यनियमः षष्ठविशेषनियमेन बाधितः । माध्वभाष्ये अधिकरणारम्भात् तस्यैव दोषः । इतः परं रा-श्री-श्रीप-मतेषु "अभ्युपगमेऽप्यर्था-भावात्" इति एतत् सूत्रं पठ्यते । परन्तु न किमपि प्राचीनप्रमाणं प्रदर्शितम् ।

( १० ) "विप्रतिषेधाच्चासमञ्जसम्" २।२।१० ( १८१ ) इत्यत्र "असमञ्जसम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तं, किन्तु च-शब्दयोगात् तस्य निषेधः । चतुर्थसामान्यनियमः षष्ठविशेषनियमेन बाधितः । [illegible] अधिकरणारम्भात् [illegible] संगता । एवं च माध्वभाष्यस्य [illegible] दोषः, [illegible] तु [illegible] एव इति [illegible] अधिकारे दृश्यते ।

द्वितीयं महद्दीर्घाधिकरणम्

अथ "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्" २।२।११ ( १८२ ) इति सूत्रात् [illegible] "महद्दीर्घाधिकरणम्" [illegible] । [illegible]

[illegible] सूत्रैः द्वितीयम् अधिकरणं रचितम्। रामानुज-निम्बार्क-मध्व-श्रीकण्ठ-वल्लभ-भाष्येषु [illegible] सप्त सूत्राणि अस्मिन् द्वितीयाधिकरणे गृहीतानि। तेन शङ्कर-भास्कर-श्रीनिवासेषु अन्यैः षड्भिः सूत्रैः तृतीयम् अन्यत् एकम् अधिकरणं कृतम्।

[illegible] "महद्दीर्घवत्" इति पदात् यत् प्रथमान्तपदस्य अध्याहरणम् भवति, तद्वलेनैव अस्य अधिकरणारम्भकत्वं संगच्छते। प्रथमासामान्यनियमात्। तथाच अत्रैव अधिकरणसमाप्तिरपि, "उभयथापि न कर्मातस्तदभावः" इति परसूत्रे "कर्म" तथा "तदभावः" इति प्रथमान्तपदद्वय-सत्त्वेन तत्रैव पृथगधिकरणारम्भस्य समुचितत्वात्, तृतीयविशेषनियमात्। अत्र शङ्करादीनां त्रयाणाम् अल्पसंख्यकगणान्तर्गतत्वात् रामानुजादीनां पञ्चानाञ्च अधिकसंख्यकगणान्तर्गतत्वात् शङ्करादीनां त्रयाणामेव दोषेण भवितव्यम्। सत्यम्। तथापि शङ्करादीनां त्रयाणां नियमानुसारित्वात् रामानुजादीनां पञ्चानां नियमविरुद्धत्वात् रामानुजादीनां पञ्चानामेव दुष्टत्वं कल्पनीयम्। दोषग्रस्तानां संख्याधिक्यं न दोषस्य गुणत्वाय भवति। अतः शङ्करादीनाम् व्याससमतसन्निकृष्टत्वं सिद्धयति।

ततश्च अत्र शङ्करादीनां मतेन एतत् सूत्रं स्वपक्षस्थापनपरत्वेन व्याख्यातम्, रामानुजादीनां मतेन तु परपक्षखण्डनपरत्वेन। तेन शङ्करादीनां मतेन एतस्य पूर्ववर्तिस्मृति-पादान्तर्गतत्वं समुचितं भवति, रामानुजादीनां मतेन तु एतस्य एतत्परपक्षखण्डनपरपादा-न्तर्गतत्वमेव युक्तम्। अतः शङ्करादीनां मतेन अत्र पादसंगतिः लंघिता भवति, रामा-नुजादीनां मतेन तु न तथा। तथापि "महद्दीर्घवद् वा" इत्यादिसूत्राक्षरमात्रदर्शनेन एतस्य खण्डन-परत्वं न प्रतिभाति, परन्तु परपक्षाक्षेपवारकत्वरूप-स्वपक्षस्थापनपरत्वम् एव प्रतीयते। एतत्पादीय-विशेषत्वसूचकाधिकरणारम्भक-न-कारादि-निषेधबोधक-पदाभावात् वत्-कारस्य प्रयोगदर्शनाच्च। एतद्दोषवारणाय रामानुजादिमतेन "विप्रतिषेधाच्चासमञ्जसम्" इति सूत्रात् निषेधबोधकम् "असम-ञ्जसम्" इति पदस्य अनुषङ्गं कृत्वा एतत्सूत्रस्य निषेधार्थकत्वं विहितं, तदनुयायिसूत्रार्थं च कृतम्। तद् यथा—"अतः ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवत् अन्यच्च तदभ्युपगतं सर्वम् असमञ्जसम् इत्येव सूत्रार्थः"। परन्तु तन्न संगतम्। अधिकरणारम्भे यत्र अनुषंगः प्रयोजनं भवति, तत्र पूर्वाधिकरणारम्भकसूत्रादेव तत् करणीयम्। अत्र तन्न कृतम्। ततश्च एतत्सूत्रस्य उप-संहारार्थबोधकत्वं रामानुजमतेन सिद्धयति। "अन्यच्च तदभ्युपगतं सर्वम्" इत्युक्तेः। तथा सति ततः न अन्या असमञ्जसत्वदर्शनचेष्टा संगच्छते। किन्तु "उभयथापि" इत्यादिसूत्रव्याख्या-नावतरणिकायां "किमन्यद् असमञ्जसम्" इत्येवं उक्तम्। एवं च उपसंहारानन्तरम् [illegible] वर्णनं कृतम्। एतत्तु नैव संगतम्। समाप्तपुनरात्तत्वदोषापत्तेः। अतः एतत्सूत्रस्य पूर्वैः [illegible] सूत्रैः सह एकाधिकरणत्वं न संगतम्, [illegible] त्वेन व्याख्यानं न समीचीनम् इति प्रतिभाति। किंच अत्र अधिकरणान्तर्गतेषु सर्वेषु अधिकरणारम्भकसूत्रेषु [illegible] -कारः, कश्चित् "असमञ्जसम्", कश्चित् "[illegible]", कश्चित् "[illegible]" [illegible]

[illegible] न तथा [illegible] दृश्यते । अतः [illegible] एतत् "[illegible]" इत्यादि [illegible] परमाणु[illegible] इति स्पष्टम् । सूत्रकारस्यैव [illegible] अभिप्रायः इति मन्यते ।

रामानुजभाष्येऽपि अत्र पादसंगतिः [illegible] अपि अस्मिन् [illegible] संगतिः [illegible] एव इति दृश्यते । अतः उत्पत्त्यधिकरणे तत्र [illegible] कृतम् । परमत-[illegible] एतत् तु नैव युक्तं भवति । प्रायेण सर्वैः भाष्यकारैः एतेन [illegible] वा दुष्टांशः खण्डितः एव । अतः रामानुजमतपक्षपातिनाम् अत्र एतदर्थं शंकरमतदूषणं न [illegible] इति । ततश्च एतत्सूत्रस्य शंकरसम्मत-व्याख्याने या पुनरुक्तिदोषापत्तिः प्रदर्शिता, "न विल-क्षणत्वादि"सूत्रेण तथोक्तः, सा अपि न संगता, यतः तत्र न वैशेषिकमतम् अवलम्ब्य [illegible] कारणत्वे बाधा उपस्थापिता, कार्य्ये कारण-सजातीय-गुणोत्पादः वैशेषिकैः स्वीक्रियते, तदनुसारेण वैशेषिकमतखण्डनात् प्राक् जगतः चेतनत्वोत्पादकत्वशंका-वारणाय "शिष्टापरिग्रह"-सूत्रस्य प्रपञ्च-रूपा एतत्सूत्रस्य अवतारणा अत्रैव आवश्यकी । आदौ आत्मरक्षणं ततः पराक्रमणम् इति न्यायात् । अतः रामानुजादीनां व्याख्यानं न अत्र समर्थयितुं शक्यते—इत्येवं मन्यते । तेन अत्र सप्तभिः सूत्रैः अधिकरणद्वय-रचनमेव संगतं भवति ।

## तृतीयं परमाणुजगदकारणत्वाधिकरणम् ।

अत्र सूत्रपदानुसारेण नास्य अधिकरणस्य नाम । अतः सूत्रम् अत्र "उभयथापि न कर्म्मा-तस्तदभावः" इति । किन्तु अधिकरणप्रतिपाद्यानुसारेण अस्य नामकरणं जातम्, यथा १।१।११ प्रतर्दनाधिकरणं, १।३।९ अपशूद्राधिकरणं, १।४।६ बालाक्यधिकरणम् इति । अत्र शंकर-भास्कर-श्रीपति-भाष्येषु षट् सूत्राणि गृहीतानि, रामानुज-निम्बार्क-मध्व-श्रीकण्ठ-वल्लभ-भाष्येषु पूर्वोक्त-महद्दीर्घ-सूत्रेण सह सप्त सूत्राणि गृहीतानि । तेन तेषां मते एतानि षट् सूत्राणि महद्दीर्घाधिक-रणान्तर्गतानि एव भवन्ति । शङ्करादीनां त्रयाणां मते तु पृथगधिकरणम् इति । तानि च षट् सूत्राणि यथा—

| | |
|---|---|
| १ "उभयथापि न कर्म्मातस्तदभावः" २।२।१२ ( १८३ ) | ४ । "रूपादिमत्त्वाच्च विपर्य्ययो दर्शनात्" २।२।१५ ( १८६ ) |
| २ . "समवायाभ्युपगमाच्च साम्यादनवस्थितेः" २।२।१३ ( १८४ ) | ५ । "उभयथा च दोषात्" २।२।१६ (१८७) |
| ३ । "नित्यमेव च भावात्" २।२।१४ ( १८५ ) | ६ । "अपरिग्रहाच्चात्यन्तमनपेक्षा" २।२।१७ ( १८८ ) |

अत्र (१) "उभयथापि न कर्म्मातस्तदभावः" १।२।१२ ( १८३ ) इति सूत्रे "कर्म्म" तथा "तदभावः" इति [illegible] [illegible] अधिकरण[illegible] संगतः एव । विशेषान्तरत् तथा अपि-शब्दात् । [illegible] । [illegible] [illegible] इति [illegible] पूर्वाधिकरणान्तर्गतं [illegible], [illegible]

नधिकरणत्वम् [illegible] । अत तेषां सङ्गतत्वेऽपि नियमविरुद्धत्वात् तेषां चैव पृथक्त्वम् ।

( २ ) "समवायाभ्युपगमाच्च साम्यादनवस्थितेः" २।२।१३ ( १८४ ) इत्यत्र चकार-योगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ३ ) "नित्यमेव च भावात्" २।२।१४ ( १८५ ) इत्यत्र नित्यम् इति प्रथमान्तपद-सत्त्वेऽपि चकारयोगात्, चतुर्थसामान्यनियमस्य षष्ठविशेषनियमेन बाधात् अस्यापि नाधिकरणा-रम्भकत्वम् ।

( ४ ) "रूपादिमत्त्वाच्च विपर्ययो दर्शनात्" २।२।१५ ( १८६ ) इत्यत्र "विपर्ययः" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनिय-मस्य षष्ठविशेषनियमेन बाधः ।

( ५ ) "उभयथा च दोषात्" २।२।१६ ( १८७ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमस्य षष्ठविशेषनियमेन बाधः ।

( ६ ) "अपरिग्रहाच्चात्यन्तमनपेक्षा" २।२।१७ ( १८८ ) इत्यत्र "अनपेक्षा" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् षष्ठविशेषनियमेन चतुर्थसामान्यनियमस्य बाधात् नास्य अधिकरणारम्भकत्वम् । परस्मिन् [illegible] अत्रैव अधिकरणसमाप्तिः संगतैव ।

चतुर्थं—समुदायाधिकरणम् ।

अत्र "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" २।२।१८ (१८९) इति सूत्रस्थ "समुदाय"-पदात् अस्य समुदायाधिकरणं नाम । अत्र शंकर-रामानुज-श्रीपति-वल्लभ-भाष्येषु दश सूत्राणि, भास्करभाष्ये नव सूत्राणि, "उभयथा च दोषात्" इति शंकर-[illegible] वर्जनात्, [illegible] अष्ट सूत्राणि, निम्बार्कभाष्ये [illegible] सूत्राणि शंकरानुमोदित-परवर्त्यधिकरणस्य अस्मिन्नेव अन्तर्भावात्; श्रीकण्ठभाष्ये माध्वभाष्यवत् अष्ट सूत्राणि गृहीतानि, शंकरोक्तस्य एतदधिकरणस्य अत्र द्विधाकृतत्वात् । तानि च दश सूत्राणि—

१। "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" २।२।१८ ( १८९ )

२। "इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्र-निमित्तत्वात्" २।२।१९ ( १९० )

३। "उत्तरोत्पादे च पूर्वनिरोधात्" २।२।२० ( १९१ )

४। "असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा" २।२।२१ ( १९२ )

५। "प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरवि-च्छेदात्" २।२।२२ ( १९३ )

६। "उभयथा च दोषात्" २।२।२३ (१९४)

७। "आकाशे चाविशेषात्" २।२।२४ (१९५)

८। "अनुस्मृतेश्च" २।२।२५ (१९६)

९। "नासतोऽदृष्टत्वात्" २।२।२६ (१९७)

१०। "उदासीनानामपि चैवं सिद्धिः" २।२।२७ (१९८)

अत्र (१) "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" २।२।१८ (१८९) इत्यत्र "तदप्राप्तिः"

इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् । "अपि"-शब्दः नाम वाचकः, असंभेद्यात्; अत्र [illegible]विशेषनियमः द्रष्टव्यः

(२) "इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्" २।२।१९ (१९०) इत्यत्र प्रथमान्तपदाभावात् "चेत्"-शब्दस्य योगाच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च ।

(३) "उत्तरोत्पादे च पूर्वनिरोधात्" २।२।२० (१९१) इत्यत्रापि तथा, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(४) "असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा" २।२।२१ (१९२) इत्यत्र "प्रतिज्ञोपरोधः" तथा "यौगपद्यम्" इति प्रथमान्तपदद्वयसत्त्वात् अस्य अधिकरणारम्भकत्वम् उचितम्, किन्तु एकस्मिन्नपि भाष्ये नैतद् दृश्यते । अतः "अन्यथा" इति पदात् प्रथमान्तपदद्वयस्य निराकाङ्क्षत्वस्य व्याघातं कल्पयित्वा नास्य अधिकरणारम्भकत्वं समर्थनीयम् । चतुर्थसामान्यनियमात्, सप्तमविशेषनियमाच्च ।

(५) "प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्" २।२।२२। (१९३) इत्यत्र "अप्राप्तिः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम्, किन्तु एकस्मिन्नपि भाष्ये नैतत् कृतम्, अतः "अप्राप्तिः" इति पदेनैव साकाङ्क्षत्वं कल्पयित्वा नास्य अधिकरणारम्भकत्वं समर्थनीयम् । चतुर्थसामान्यनियमात्, सप्तमविशेषनियमाच्च ।

(६) "उभयथा च दोषात्" २।२।२३ (१९४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । भास्कर-भाष्ये सूत्रमिदम् न दृश्यते । तत्र प्राचीनं प्रमाणं न किमपि प्रदर्शितम् ।

(७) "आकाशे चाविशेषात्" २।२।२४ (१९५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(८) "अनुस्मृतेश्च" २।२।२५ (१९६) इत्यत्रापि तथा । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(९) "नासतोऽदृष्टत्वात्" २।२।२६ (१९७) इत्यत्रापि तथा । पूर्वसूत्रे [illegible]-सत्त्वात् साकाङ्क्षत्वं सिद्धम् । चतुर्थसामान्यनियमात्, सप्तदशविशेषनियमाच्च । माध्वभाष्ये [illegible] श्रीकण्ठभाष्ये [illegible] नूतनाधिकरणस्य आरम्भात् तयोरेव दोषः ।

(१०) "उदासीनानामपि चैवं सिद्धिः" २।२।२७ (१९८) इत्यत्र "सिद्धिः" इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भः समुचितः, चतुर्थसामान्यनियमात् । तथापि [illegible] [illegible] निरोधः, [illegible]विशेषनियमात् । [illegible] पूर्वसम्बन्धात् अधिकरणारम्भाभावात् [illegible] अधिकरणारम्भः [illegible] संगतः प्रतीयते ।

## [illegible] अभावाधिकरणम्।

अत्र "नाभाव उपलब्धेः" २।२।२८ (१९९) इति सूत्रस्य प्रथमपदमादाय अस्य "अभावाधिकरणं" नाम। अत्र शंकरभाष्ये तथा भास्करभाष्ये पञ्च सूत्राणि गृहीतानि, भास्करभाष्ये तेषां मध्ये "क्षणिकत्वाच्च" तथा "सर्वथानुपपत्तेश्च" इति अन्तिमसूत्रद्वयवर्जनात् त्रीणि सूत्राणि, रामानुजभाष्येऽपि "क्षणिकत्वाच्च" इति चतुर्थसूत्रवर्जनात् पञ्चमसूत्रेण पृथगधिकरणकरणात् त्रीणि सूत्राणि, निम्बार्कभाष्ये तथा माध्वभाष्ये अत्र अधिकरणं न कृतं, श्रीकण्ठभाष्ये तथा श्रीपतिभाष्ये रामानुजभाष्यवत् त्रीणि सूत्राणि एव गृहीतानि। तानि च पञ्च सूत्राणि—

| | |
|---|---|
| १। "नाभाव उपलब्धेः" २।२।२८ (१९९) | ४। "क्षणिकत्वाच्च" २।२।३१ (२०२) |
| २। "वैधर्म्याच्च न स्वप्नादिवत्" २।२।२९ (२००) | ५। "सर्वथाऽनुपपत्तेश्च" २।२।३२ (२०३) |
| ३। "न भावोऽनुपलब्धेः" २।२।३० (२०१) | |

(१) अत्र "नाभाव उपलब्धेः" २।२।२८ (१९९) इति सूत्रे "अभावः" इति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः संगत एव। चतुर्थसामान्यनियमात्। अत्र मध्वनिम्बार्कभाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

(२) "वैधर्म्याच्च न स्वप्नादिवत्" २।२।२९ (२००) इत्यत्र "स्वप्नादिवत्" इति पदात् प्रथमान्तपदस्य अध्याहारस्य कर्तव्यत्वेऽपि चतुर्थसामान्यनियमात्, चकारात् नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात्।

(३) "न भावोऽनुपलब्धेः" २।२।३० (२०१) इत्यत्र "भावः" इति प्रथमान्तपदसत्त्वेऽपि माध्वभाष्यं विना कुत्रापि अधिकरणं न रचितम्। अतः अस्य साकांक्षत्वम् अनुमाय सर्वेषां भाष्याणां समर्थनं करणीयम्। माध्वभाष्ये अधिकरणरचनायां माध्वभाष्यस्यैव दोषः कल्पनीयः। एवं च अत्र एको नियमः कर्तुं शक्यते, स यथा—

"यत्र पूर्वापरसूत्रयोर्मध्ये चकारयोगो भवेत्, तत्र मध्यपतितसूत्रस्य साकांक्षत्वम् अनुमाय अनारम्भकत्वं कल्पनीयम्"। इति सप्तमविशेषनियमः।

अत्र "वैधर्म्याच्च न स्वप्नादिवत्" तथा "क्षणिकत्वाच्च" इति अत्र अस्य पूर्वापरसूत्रद्वयम्। उभयत्र चकारात् तन्मध्यवर्ति "न भावोऽनुपलब्धेः" इति सूत्रस्य न अधिकरणारम्भकत्वम् इति सिध्यति।

(४) "क्षणिकत्वाच्च" १।२।३१ (२०२) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात्। एतत् सूत्रं भा-रा-श्री-श्रीप-भाष्येषु परित्यक्तम्। अतः तेषां मते सूत्रमेतदेव एतदधिकरणम् [illegible]।

(५) "सर्वथानुपपत्तेश्च" २।२।३२ (२०३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च। भास्करभाष्ये एतदपि परित्यक्तम्।

रा-श्री-श्रीप-भाष्येषु अत्र पृथगधिकरणारम्भात् तेषां चतुर्णां मतेषु प्रथमादिसूत्रत्रयेण एत-दधिकरणं रचितम् । अतः रा-श्री-श्रीप-भाष्याणामेव पृथगधिकरणात् दोषः, प्रथमान्तपदाभावात् । परसूत्रे सर्वसम्मतया पृथगधिकरणरचनात् अत्रैव अधिकरणसमाप्तिः ।

## षष्ठम् एकस्मिन्नसम्भवाधिकरणम्

अत्र "नैकस्मिन्नसंभवात्" २।२।३३ (१०४) इति सूत्रस्य "एकस्मिन्नसंभवः" इति पदात् अस्य "एकस्मिन्नसम्भवाधिकरणं" नाम । तत्र श्रीपतिभिन्नेषु सर्वेषु भाष्येषु अस्मिन् अधिकरणे चत्वारि सूत्राणि गृहीतानि । श्रीपतिभाष्ये "शरीराणामनवस्थितपरिमाण-त्वात्" इति एकं सूत्रम् अतिरिक्तं पठित्वा पञ्चसूत्राणि कृतानि, यथा—

| | |
|---|---|
| "नैकस्मिन्नसम्भवात्" २।२।३३ (२०४) | ४। "अन्त्यावस्थितेश्चोभयनित्यत्वाद-विशेषः" २।२।३६ (२०७) |
| २। "एवं चात्माऽकार्त्स्न्यम्" २।२।३४ (२०५) | |
| ३। "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" २।२।३५ (२०६) | |

अत्र (१) "नैकस्मिन्नसम्भवात्" २।२।३३ (२०५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वमेव युक्तम् । चतुर्थसामान्यनियमात् । तथापि सर्वैः भाष्यकारैः तथा कृतत्वात् परवर्त्तिसूत्रद्वये चकारयोगात् अत्र षोडशविशेषनियमेन अधिकरणारम्भः समर्थनीयः ।

अत्र "न भावोऽनुपलब्धेः" २।२।३० "क्षणिकत्वाच्च" २।२।३१ "सर्वथानुपपत्तेश्च" २।२।३२ इति सूत्रेषु चकारद्वयेन हेतुत्रयस्य समुच्चयात् अस्य पूर्वसूत्रेण पूर्वाधिकरणसमाप्तेः अस्य पृथगधिकरणारम्भकत्वं सङ्गच्छते । तेन अत्र भावाभावादिरूपः विरुद्धधर्म्मः अत्र प्रथमान्त-पदत्वेन ग्रहणीयः । एतौ च भावाभावौ पूर्वाधिकरणस्य "नाभाव उपलब्धेः" तथा "न भावोऽनुप-लब्धेः" इति सूत्रद्वयात् लभ्यौ । विरुद्धधर्म्मस्यैव एकस्मिन् असम्भाव्यता, अतः अर्थतोऽपि तादृशप्रथमान्तपदस्यैव लाभः ।

(२) "एवं चात्माऽकार्त्स्न्यम्" २।२।३४ (२०५) इत्यत्र "अकार्त्स्न्यम्" इति प्रथ-मान्तपदसत्त्वेऽपि चकारात् अधिकरणारम्भः निषिद्धः । चतुर्थसामान्यनियमात् षड्विशेषनियमाच्च ।

(३) "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" २।२।३५ (२०६) इत्यत्र "अवि-रोधः" इति प्रथमान्तपदसत्त्वेऽपि चकारात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनिय-मात् तथा षड्विशेषनियमात् ।

(४) "अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः" २।२।३६ (२०७) इत्यत्र "अविशेषः" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् नास्य अधिकरणारम्भकत्वम् । षड्विशेषनियमात् तथा चतुर्थसामान्यनियमात् । परसूत्रे अधिकरणान्तरस्य अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## सप्तमं पत्यधिकरणम्

अथ "पत्युरसामञ्जस्यात्" २।२।३७ (२०८) इत्यस्य सूत्रस्य "पति"-शब्दात् [illegible] अस्य "पत्यधिकरणं" नाम । तत्र शंकर-निम्बार्क-मध्व-श्रीपति-वल्लभभाष्येषु पञ्च सूत्राणि गृहीतानि, भास्कर-रामानुज-श्रीकण्ठ-भाष्येषु "सम्बन्धानुपपत्तेश्च" इति सूत्रस्य वर्जनात् चत्वारि सूत्राणि गृहीतानि । तानि च पञ्च सूत्राणि:—

१। "पत्युरसमञ्जस्यात्" २।२।३७ (२०८)
२। "सम्बन्धानुपपत्तेश्च" २।२।३८ (२०९)
३। "अधिष्ठानानुपपत्तेश्च" २।२।३९ (२१०)
४। "करणवच्चेन्न भोगादिभ्यः" २।२।४० (२११)
५। "अन्तवत्त्वमसर्वज्ञता च" २।२।४१ (२१२)

अत्र (१) "पत्युरसामञ्जस्यात्" २।२।३७ (२०८) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । तथापि सर्वैः भाष्यकारैः तथा कृतत्वात्, कस्यचित् प्रथमान्तपदस्य अध्याहारेण अधिकरणारम्भः समर्थनीयः । अत्र पादस्य अस्य खण्डनपरत्वेन पूर्वाधिकरणात् यथा नकारस्य अनुवृत्तिः कर्तव्यः, तथा असामञ्जस्यसिद्धये एकस्यैव पत्युः ब्रह्मणः जगन्निमित्तमात्रत्वम् इत्यर्थकम् एकं प्रथमान्तपदम्, पूर्वाधिकरणस्य "एकस्मिन् भावाभावौ" इतिवत् अध्याहर्तव्यम् । एवं च अत्र अधिकरणारम्भः संगच्छते । तेन सूत्रार्थः—पत्युः जगन्निमित्तमात्रत्वं न असामञ्जस्यात् इति । अथवा पूर्वाधिकरणस्य अन्तिमसूत्रद्वये चकारद्वयात् "अन्यथावस्थितेश्च" इत्यादि सूत्रेण अधिकरणसमाप्तेः अतः पृथगधिकरणारम्भः संगतः इति । षष्ठविशेषनियमात् ।

(२) "सम्बन्धानुपपत्तेश्च" २।२।३८ (२०९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च । इदं तु सूत्रं भास्कर-रामानुज-श्रीकण्ठभाष्येषु परित्यक्तम्, प्राचीनतरप्रमाणप्रदर्शनं विना ।

"अधिष्ठानानुपपत्तेश्च" २।२।३९ (२१०) इत्यत्रापि प्रथमान्तपदाभावात् अधिकरणारम्भः न युक्तः । चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात् ।

(४) "करणवच्चेन्न भोगादिभ्यः" २।२।४० (२११) इत्यत्र "करणवत्" इति [illegible] कस्यचित् प्रथमान्तपदे अध्याहर्तव्येऽपि "चेन्न" पदात् नास्य अधिकरणारम्भकत्वम् । षष्ठविशेषनियमात् ।

(५) "अन्तवत्त्वमसर्वज्ञता वा" २।२।४१ (२२१) इत्यत्र "[illegible]" तथा "[illegible]" इति [illegible] अत्र पृथग् [illegible], चतुर्थसामान्यनियमात्; किन्तु [illegible] तथा "वा"-[illegible] [illegible] तत्र [illegible] अधिकरणस्य समाप्तिः संगच्छते ।

## अष्टमम् उत्पत्त्यसम्भवाधिकरणम् ।

अत्र "उत्पत्त्यसम्भवात्" २।२।४२ ( २१३ ) इति सूत्रस्य "उत्पत्त्यसम्भवः" इति पदात् अस्य "उत्पत्त्यधिकरणं" नाम । तत्र भास्करभिन्नेषु सर्वेषु भाष्येषु चत्वारि सूत्राणि गृहीतानि । भास्करभाष्ये "विप्रतिषेधाच्च" इति सूत्रस्य वर्जनात् त्रीण्येव सूत्राणि तत्र गृहीतानि, तानि च चत्वारि सूत्राणि यथा—

१। "उत्पत्त्यसम्भवात्" २।२।४२ ( २१३ )
२। "न च कर्त्तुः करणम्" २।२।४३ ( २१४ )
३। "विज्ञानादिभावे वा तदप्रतिषेधः" २।२।४४ ( २१५ )
४। "विप्रतिषेधाच्च" २।२।४५ ( २१६ )

अत्र ( १ ) "उत्पत्त्यसम्भवात्" २।२।४२ ( २१३ ) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम्, तथापि सर्वैः भाष्यकारैः तथा कृतत्वात् अत्र प्रथमान्तपदम् एकम् उहनीयम् । पञ्चमसामान्यनियमात् । किं तत् पदम् ? तत्र पादस्यास्य परमतखण्डनपरत्वेन पूर्वाधिकरणवत् अत्र एको नकारः अनुसञ्जनीयः । अतः उत्पत्तेः निषेधात् उत्पत्तिरेव अत्र पूर्वपक्षत्वेन आशङ्किता । अतः प्रश्नः—कस्य उत्पत्तिविषयिनी शङ्का, यस्याः अत्र निषेधः ? स च शङ्काविषयः अत्र जीवः । यतः पूर्वाधिकरणात् ब्रह्मणः जगदुपादाननिमित्तकारणत्वे सिद्धे किं जगदन्तर्गतजीवस्यापि उत्पत्तिः तथाभूतब्रह्मणः जायते, न वा ? इति जिज्ञासा स्वाभाविकी । वर्त्तते च भागवतपाञ्चरात्रादिमतेषु जीवस्य उत्पत्तिवर्णनम् । अतः सूत्रं—"न जीवोत्पत्तिः उत्पत्त्यसम्भवात्" इति ; तेन "जीवोत्पत्तिः" इति अध्याहृतप्रथमान्तपदेन अत्र अधिकरणारम्भः संगच्छते एव । रामानुजभाष्ये अस्मिन् अधिकरणे स्वमतस्थापनं कृतं दृश्यते, तदर्थं च तन्मते अत्र प्रथमादिसूत्रद्वयं पूर्वपक्षसूत्रम्, अन्तिमद्वयं तु सिद्धान्तसूत्रं कृतम् । निम्बार्क-मध्व-बलदेव-भाष्येषु अत्र शाक्तमतखण्डनं कृतम् । परन्तु तदर्थं न किमपि प्राचीनप्रमाणं प्रदर्शितं केनापि । अतः तत्र रामानुजभाष्ये पादसंगतिलङ्घनरूपः दोषः प्रसज्यते । निम्बार्कादीनां भाष्येषु तथा न सम्भवति, तेषां खण्डनपरत्वात् । तथापि पुरुषम् अन्तरेण शक्तितः उत्पत्तिः न सर्वेषां शाक्तानां सिद्धान्तः तस्याः अनित्यत्वस्वीकारात् । नित्यत्वे तु न उत्पत्तिः सम्भवति । अतः तेषां मतेन सूत्रयोजना न सुष्ठु भवेत् ।

( २ ) "न च कर्त्तुः करणम्" २।२।४३ ( २१४ ) इत्यत्र "करणम्" इति प्रथमान्त-पदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वं युक्तम् । चकार-योगात् । चतुर्थसामान्य-नियमात्, तथा षष्ठ-विशेषनियमात् ।

( ३ ) "विज्ञानादिभावे वा तदप्रतिषेधः" २।२।४४ (२१५) इत्यत्र "तदप्रतिषेधः" इति प्रथमान्तपदसत्त्वेऽपि "वा" शब्देन सांकाङ्क्षत्वविधानात् नास्य अधिकरणारम्भकत्वम् । चतुर्थ-सामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ४ ) "विप्रतिषेधाच्च" २।२।४५ ( २१६ )" इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च। पादसमाप्तेः अत्रैव अधिकरण-समाप्तिः। भास्करभाष्ये सूत्रमेतत् परित्यक्तम्, न तु किमपि प्राचीनप्रमाणं प्रदर्शितम्।

## षष्ठपादसमालोचनम्।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

( १ ) कति कीदृशाश्च नियमा अत्र सङ्कलिताः।

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसङ्गतिः।

एते चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्शनीयाः। तत्र प्रथमं तावत्—

### ( १ ) कति कीदृशाश्च नियमा अत्र संकलिताः

इति द्रष्टव्यम्। अत्र तु एकः एव अतिरिक्तः नियमः सङ्कलितः। स खलु अत्र संख्यया सप्तदशः, तथा च—

"यत्र पूर्वापरसूत्रयोः मध्ये चकार-योगो भवेत् तत्र मध्यपतितसूत्रस्य साकांक्षत्वम् अनुमाय अङ्गसूत्रत्वं कल्पनीयम्।" एतदर्थं "न भावोऽनुपलब्धेः" (२।२।३०) सूत्रं द्रष्टव्यम्। इदानीं द्रष्टव्यम्—

### ( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः इति।

अत्र २।२।१ अधिकरणे माध्वभाष्ये "अन्यत्राभावाच्च न तृणादिवत्" इति २।२।५ सूत्रे अधिकरणस्य रचनायां दोषः।

तथा तत्रैव २।२।१ अधिकरणे माध्वभाष्ये "अभ्युपगमेऽप्यर्थाभावात्" इति २।२।६ सूत्रे अधिकरणस्य रचनायां दोषः।

तथा तत्रैव २।२।१ अधिकरणे मध्ववल्लभभाष्ययोः "पुरुषाश्मवत् इति चेत् तथापि" इति २।२।७ सूत्रे अधिकरणस्य रचनायां दोषः।

पुनः तत्रैव २।२।१ अधिकरणे माध्वभाष्ये "अन्यथानुमितौ च ज्ञशक्तिवियोगात्" इति २।२।९ सूत्रे अधिकरणस्य रचनायां दोषः।

२।२।२ अधिकरणे रा-नि-श्री-व-भाष्येषु "उभयथापि न कर्म्मातस्तदभावः" इति २।२।१२ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।२।४ अधिकरणे मध्व-श्रीकण्ठ-भाष्ययोः "नासतोऽदृष्टत्वात्" इति २।२।२६ सूत्रे अधिकरणस्य रचनायां दोषः।

२।२।८ अधिकरणे माध्वभाष्ये तथा निम्बार्कभाष्ये "नाभाव उपलब्धेः" इति २।२।२८ सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव २।२।७ अधिकरणे माध्वभाष्ये "न भावोऽनुपलब्धेः" इति २।२।३० सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव २।२।५ अधिकरणे रा-श्री-श्रीप-भाष्येषु "सर्वथानुपपत्तेश्च" इति २।२।३२ सूत्रे अधिकरणस्य रचनायां दोषः। एवं च—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | २ दोषौ | ६ दोषाः |
| वल्लभभाष्ये | १ दोषः | १ दोषः |
| रामानुजभाष्ये | १ " | १ " |
| निम्बार्कभाष्ये | २ दोषौ | ० |
| श्रीकण्ठभाष्ये | १ दोषः | २ दोषौ |
| श्रीपतिभाष्ये | १ " | ० |

इति वक्तुं शक्यते। तथा च शङ्कर-भास्कर-भाष्ययोः दोषाभावः। इदानीं द्रष्टव्यम्—

### ( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

तत्र (१) प्रथमाधिकरणे प्रथमसूत्रे "रचनानुपपत्तेश्च नानुमानम्" इत्यत्र नैकापि श्रुतिः उपजीव्यत्वेन गृहीता। अस्य उपजीव्यं सांख्योक्त-प्रधानानुमानमेव। एवं च अस्मिन् पादे सर्वेषु अधिकरणेषु तथा सर्वेषु सूत्रेषु प्रायेण श्रुतिवाक्यादिकं न अवलम्बितम्, किन्तु युक्तिमात्रम्। केवलं "पयोम्बुवच्चेत् तत्रापि" इति (२।२।३)सूत्रे "योऽप्सु तिष्ठन्"(बृ. ३।७।४)इति एकं श्रुतिवाक्यं उद्धृतं दृश्यते। किन्तु युक्तिमात्रस्य अवलम्बने अत्र श्रुतिसंगतिः व्याहन्यते। तन्न युक्तं, तस्याः सर्वसंगतिव्यापकतमत्वात्, शास्त्रस्यास्य श्रुतिमीमांसारूपत्वात्, श्रुतीनां सर्वज्ञानाकरत्वाच्च। लोकेऽपि न एकोऽपि मतवादो दृश्यते, यस्य वीजं न वेदमध्ये वर्त्तते। किम् अधिकम् सर्वेषां श्रुतिसम्पर्कविरहितत्वं मन्यमानानां पाश्चात्यदार्शनिकानामपि यावन्तः मतवादाः वर्त्तन्ते, तेषां सर्वेषां सिद्धान्तवीजं वेदमध्ये एव उपलभ्यते। बुद्धिमतां विदुषां प्रयत्नेन तानि च वीजानि महापादपत्वेन परिणतानि इति एतावन्मात्रम्। अतः कल्प्यते एतत्पादीयमतवादानां वीजं श्रुतिमध्ये पूर्वपक्ष-रूपेण वर्त्तते एव। तेन तदनुकूलाः श्रुतयः एव एतत्पादीयाधिकरणानां विषयत्वेन कल्पयितुं शक्यन्ते। तथा सति अत्र पादे श्रुतिसंगतिः न दुर्लभा भवति। वस्तुतस्तु एतत्पादस्य प्रथमा-धिकरणं सांख्यमतखण्डनपरम्। पूर्वपक्षत्वेन तस्य मतं श्रुतिमध्ये वर्त्तते, एतच्च ईक्षत्यधिकरणा-दिषु स्पष्टतया प्रतिभाति। अतः सांख्योपस्थापिततर्के अपि श्रुतिसंगतिः कथं न स्थास्यति? एवं च अत्र श्रुतिसंगतिः वर्त्तते एव। अतः (२)द्वितीयाधिकरणे वैशेषिकाक्षेपपरिहारः, (३)तृतीयाधिकरणे [illegible]म्। [illegible] श्रुतिमध्ये लभ्यते। [illegible] मतांतरात्। श्वेताश्वतरोपनिषदः "कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष

इति चिन्त्यम्" इति १।२ वाक्यस्य, तथा "असद् वा इदमग्र आसीद्" इति (तै: २।७।१) वाक्यस्य च "भूतानि"-पदात् तथा "असतः"-पदाच्च वैशेषिकमतबीजस्य लभ्यमानत्वात्। "भूतानि"-पदात् परमाणुवादः, तथा "असद्" इति पदात् असत्कार्यवादः एव तन्मतस्य बीजत्वेन उपलभ्यते। अतः अत्रापि श्रुतिसंगतिः न दुर्लभा। (४) चतुर्थाधिकरणे बौद्धानां सर्वास्तित्ववादखण्डनं कृतम्। दृश्यानां क्षणिकत्वप्रतिपादनमेव तेषाम् आशयः। तच्च क्षणिकत्वं दृश्यानाम् अनित्यत्वबोधक-श्रुतिवाक्यानां विकृतिरूपमेवेति कल्पयितुं शक्यते। मतं च एतत् वैशेषिकाणामेव विधान्तरम्। बौद्धाः हि निरन्वयविनाशपक्षपातिनः वैनाशिकाः। वैशेषिकास्तु अर्द्धवैनाशिकाः सान्वयविनाशवादिनः—इत्येव तयोः भेदः इति सूत्रभाष्यतः अवगम्यते। तथापि वैशेषिकाः वेदप्रामाण्यवादिनः, अतः तत्रापि श्रुतिसंगतिः न दुर्लभा। (५) पञ्चमाधिकरणे विज्ञानवादिबौद्धमतखण्डनं तथा शून्यवादिमतखण्डनं च। एतन्मतबीजं "विज्ञानेनैव विजानाति" ( छा ७।७।१) "विज्ञानमानन्दं ब्रह्म" (बृ:३।९।२८) "असद् वा इदमग्र आसीत्" (छा ३।१९।१) इत्याद्याः श्रुतयः इति वक्तुं शक्यते। (६) षष्ठाधिकरणम् जैनमतखण्डनपरम्। तदपि दृश्यानाम् अनिर्वचनीयत्वबोधकश्रुतिवाक्यतः उद्भूतम् इति कल्पयितुं शक्यते। अनैकान्तिकत्वस्य स्थूलतः अनिर्वचनीयत्वान्तर्गतत्वात्। विष्णुपुराणे बौद्धजैनमतोत्पत्तिः यथा वर्णिता, ततोऽपि तन्मतद्वयस्य वेदमूलकत्वकल्पने न कापि बाधा दृश्यते। अतः तन्मतद्वयेऽपि श्रुतिसंगतिः वर्त्तते एव। अतः (७) सप्तमाधिकरणं पाशुपतमतखण्डनपरम्। एतन्मतबीजं "पतिं पतीनां परमं परस्तात्" ( श्वे: ६।७ ) "न तस्य कश्चित् पतिरस्ति लोके" (श्वे: ६।९) "उमापतिं पशुपतिं" ( नृ: ता: १।६ ) "सर्वेश्वर ईशः पशुपतिः, संसारी जीव एव पशुः" ( जाबाल्युपनिषत् ) इत्यादिश्रुतिभ्यः उपलभ्यते। अत्र एकस्मात् पतिशब्दात् ईश्वरस्य निमित्तकारणत्वम् अतिस्पष्टतया अवगम्यते। तेषां मतं तु केवलम् अधिष्ठाता ईश्वरः जगतः नोपादानमिति एवं निमित्तकारणवादरूपम्। अतः अत्रापि श्रुतिसंगतिः न दुर्लभा। ततश्च ( ८ ) अष्टमम् अधिकरणम्। तत्र जीवाद्युत्पत्तिवादि-पाञ्चरात्रमतं भागवतमतं च खण्डितम्। एतदेव चतुर्व्यूहमतम् इत्येव अभिधीयते। तन्मतबीजमपि उपनिषद्येव उपलभ्यते। चतुर्व्यूहकथा त्रिशीखब्राह्मणोपनिषदि ( १ ) श्लोके दृश्यते। महाभारते शान्तिपर्वणि नारायणीयपर्वाध्याये ३३९ अध्याये जीवाद्युत्पत्तिवादिपाञ्चरात्रमतमेकम् उपलभ्यते। तद् यथा—

"नित्यं हि नास्ति जगति भूतं स्थावरजंगमम्। ऋते तमेकं पुरुषं वासुदेवं सनातनम्॥२२
सर्वभूतात्मभूतो हि वासुदेवो महाबलः। पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्॥ २३
ते समेता महात्मानः शरीरमिति संज्ञितम्। तदाविशति यो ब्रह्मन्नदृश्यो लघुविक्रमः॥ २४
उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः। न विना धातुसंघातं शरीरं भवति क्वचित्॥
न च जीवं विना ब्रह्मन् वायवश्चेष्टयन्त्युत। स जीवः परिसंख्यातः शेषः संकर्षणः प्रभुः॥२५

स मनः सर्वभूतानां प्रद्युम्नः परिपठ्यते । तस्मात् प्रसूतो यः कर्त्ता कारणं कार्य्यमेव च ॥३८
तस्मात् सर्वं सम्भवति जगत् स्थावरजंगमम् । सोऽनिरुद्धः स ईशानोऽव्यक्तः स सर्वकर्म्मसु ॥३९
यो वासुदेवो भगवान् क्षेत्रज्ञो निर्गुणात्मकः । ज्ञेयः स एव राजेन्द्र जीवः संकर्षणः प्रभुः ॥४०
संकर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते । प्रद्युम्नात् योऽनिरुद्धस्तु सोऽहङ्कारः स ईश्वरः ॥ ४१

अत्र वासुदेवात् संकर्षणरूपस्य जीवस्य ततः प्रद्युम्नरूपस्य मनसः, ततः अनिरुद्धरूपस्य अहंकारस्य उत्पत्तिः वर्णिता । एतदेव महाभारतोक्तपाञ्चरात्रमतम् । इदानीं ये पाञ्चरात्रमतप्रतिपादक-ग्रन्थादयः उपलभ्यन्ते, तत्र जीवादीनाम् उत्पत्तिकथनम् अनुपलभ्य रामानुजाचार्य्यादिभिः शांकर-भाष्योपरि यः आक्षेपः कृतः, स तु न समीचीनः इति प्रतिभाति । शाङ्करभाष्ये जीवाद्युत्पत्तिवादि-पाञ्चरात्रमतस्यैव खण्डनात्, महाभारतस्य प्रामाण्याधिक्याच्च । एवं च अत्रापि श्रुतिसंगतिः वर्त्तते ।

एवं च पादे अस्मिन् सर्वत्र श्रुतिसंगतिः वर्त्तते एवेति मन्यामहे । भाष्यकृद्भिः अप्रदर्शि-तायामपि तस्यां तत्प्रदर्शनं न तेषां सम्मतिविरुद्धम् । तथा च तर्कबलेनैव अत्र परपक्षः खण्डितो-ऽपि अत्र यादृश्यः श्रुतयः उपजीव्यत्वेन अवलम्बनीयाः भवितुम् अर्हन्ति, ता सर्वाः स्वल्पायासेनैव संग्रहणीया उपनिषत्शरणैः प्रेक्षावद्भिः इति मन्यामहे ।

इदानीं द्रष्टव्यम् एतादृशाधिकरणतात्पर्य्यबलेन—

## ( ४ ) कीदृशी अस्य पादसंगतिः भवितुमुचिता ।

एतद् हि पञ्चमपादोपसंहारप्रस्तावे प्रायेण वर्णितमेव । तथापि द्वितीयम् एकम् एव अधि-करणं विहाय सर्वेषु अधिकरणेषु परमतखण्डनमेव कृतम् इति दृश्यते । तदपि सूत्रकृतां परमता-सहिष्णुतां न सूचयति । परन्तु तेषां सन्मार्गप्रदर्शनाभिलाषप्रकर्षमात्रम् । तथा च विभिन्नभाष्य-कृतां मतेन एतत्पादस्य यत् प्रतिपाद्यं तद् अत्र प्रदर्श्यते—

शांकरमतेन—सांख्यादिमतानां दुष्टत्वप्रदर्शनेन वेदान्तसमन्वयस्य विरोधपरिहारः ।

भास्करमतेन—प्रायेण तथैव ।

रामानुजमतेन—प्रतिपक्षतर्काणां वेदान्तवाक्यानुसारिभिः सत्तर्कैः निराकरणम् ।

निम्बार्कमतेन—परोक्तयुक्तीनाम् आभासत्वप्रदर्शनरूपपरपक्षखण्डनम् ।

मध्वमतेन—समयाविरोधः ।

श्रीकण्ठमतेन—सांख्यादिमतानां दुष्टत्वप्रदर्शनम् ।

श्रीपतिमतेन—सांख्यादिदुर्मतनिरसनेन मुमुक्षूणां शुद्धवैदिकमार्गनिष्ठत्वस्यैव दृढीकरणम् ।

वस्तुतः सर्वमतेनैव एतत्पादप्रतिपाद्यं परमतखण्डनमेव । तेन एतत्पादसंगतिरपि परमतखण्डनात्मिका इत्येव बोद्धव्यम् । तथा सति [illegible] संगत्या [illegible] तान्येव सर्वाणि सूत्राणि अपि व्याख्येयानि । ततश्च पादेऽस्मिन् अधिकरणानां [illegible] नैकानि श्रुतिवाक्यानि तेषामपि भाष्यकारैः अदर्शितम् । तथापि यदि पूर्वमीमांसावत् [illegible]

एव एतत्पादस्य प्रयोजनं भवेत्, येन च श्रुतिसंगतिरेव सर्वापेक्षया व्यापकसंगतित्वेन परिगृहीता भाष्यटीकाकृद्भिः, तदा सर्वेषु अधिकरणेषु विषयरूपेण श्रुतिवाक्यादिकं कथं न उपलभ्यनीयम् ! वस्तुतस्तु एतत्पादीय-सांख्य-वैशेषिक-बौद्ध-जैन-पाशुपत-पाञ्चरात्रमतानां बीजभूतं श्रुतिवाक्यं न दुर्लभम्। यदि श्रुतिरेव सर्वज्ञानाकरत्वेन स्वीक्रियते, यदि श्रुतिरेव ब्रह्मणैव कल्पादौ मनुष्यसमाजे वर्णात्मकभाषाव्यवहारादिशिक्षार्थं प्रचारिता, तदा सर्वेषाम् अतीतानागतवर्तमानमतवादानां बीजभूतं श्रुतिवाक्यं पूर्वपक्षत्वादिरूपेण प्रासंगिकरूपेण वा श्रुतिमध्येषु प्रापणीयम् एव। भाष्यकारवृन्दैः अप्रदर्शितमपि तत्र तेषाम् सिद्धान्तविरुद्धमिति मन्तुम् उचितम्। एतदपि अत्र चिन्तनीयम्। इति षष्ठपादसमालोचनम्।

इति द्वितीयाध्याये द्वितीयपादोपसंहारः।

---

# अथ द्वितीयाध्याये तृतीयपादः।

## प्रथमं वियदधिकरणम्।

तत्र 'न वियदश्रुतेः" २।३।१ ( २१७ ) इति सूत्रस्य "वियद्" इति पदात् अस्य "वियदधिकरणं" नाम। तत्र शंकर-भास्कर-मध्व-श्रीकण्ठ-वल्लभभाष्येषु सप्त सूत्राणि, रामानुजभाष्ये नव सूत्राणि, निम्बार्कभाष्ये पञ्चदश सूत्राणि तथा श्रीपतिभाष्ये षट् सूत्राणि गृहीतानि। एवं च यत्र शंकरभाष्ये चतुर्थाधिकरणम् आरब्धम्, तत्र रामानुजभाष्ये द्वितीयम् अधिकरणम् आरब्धम्। तथा शंकरभाष्ये यत्र दशमाधिकरणम् आरब्धम्, तत्र निम्बार्कभाष्ये द्वितीयम् अधिकरणम् आरब्धम्। तानि च सप्त सूत्राणि:—

१। "न वियदश्रुतेः" २।३।१ ( २१७ )
२। "अस्ति तु" २।३।२ ( २१८ )
३। "गौण्यसम्भवात्" २।३।३ ( २१९ )
४। "शब्दाच्च" २।३।४ ( २२० )
५। "स्याच्चैकस्य ब्रह्मशब्दवत् २।३।५ (२२१)
६। "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः" २।३।६ ( २२२ )
७। "यावद् विकारं तु विभागो लोकवत्" २।३।७ ( २२३ )

अत्र (१) "न वियदश्रुतेः" २।३।१ (११७) इत्यत्र "वियत्" इति प्रथमान्तपदात् तथा अत्र पादारम्भात् अत्रैव अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्, द्वितीयविशेषनियमाच्च।

(२) "अस्ति तु" २।३।२ ( २१८ ) इत्यत्र प्रथमान्तपदाभावात् तु-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्।

(३) "गौण्यसम्भवात्" २।३।३ ( २१९ ) इत्यत्र "गौणी" इति प्रथमान्तपदसत्त्वात् अत्र न अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्। किन्तु केनापि भाष्यकारेण

नात्र अधिकरणम् आरब्धम् । अतः "गौणी" इति शब्दस्य साकांक्षत्वं कल्पयित्वा सप्तम-विशेषनियमात् नास्य अधिकरणारम्भकत्वं युज्यते । रा नि-श्री-श्रीप-वल्लभ—भाष्येषु परसूत्रमपि एतत्सूत्रस्य शेषत्वेन पठ्यते; तत् न युक्तं, चकारेण हेतुभेदसूचनात् । चतुर्थविशेषनियमात् ।

( ४ ) "शब्दाच्च" २।३।४ ( २२० ) इत्यत्र प्रथमान्तपदाभावात् न अस्यापि अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । रा-नि-श्री-श्रीप-वल्लभ-भाष्येषु एतस्य पूर्वसूत्रशेषत्वं दृश्यते । तत् न युक्तम्, चकारेण हेतुभेदसूचनात् चतुर्थविशेषनियमाच्च । तेषां मते चकारात् "गौणी" इति शब्दस्यअधिकरणारम्भकत्वं व्याहन्यते इति बोद्धव्यम् ।

( ५ ) "स्याच्चैकस्य ब्रह्मशब्दवत्" २।३।५ ( २२१ ) इत्यत्र "ब्रह्मशब्दवत्" इति शब्दात् प्रथमान्तपदस्य अध्याहारे कर्त्तव्येऽपि चकारात् नास्य अधिकरणारम्भकत्वम् चतुर्थसामान्यनियमात् । षष्ठविशेषनियमाच्च । तु-वर्जित-प्रथमान्तपदात् स्यात्-शब्दवत्त्वं नाधिकरणारम्भकम् ऊनविंशविशेषनियमाच्च ।

( ६ ) "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः" २।३।६ ( २२२ ) इत्यत्र "प्रतिज्ञाहानिः" इति प्रथमान्तपदसत्त्वात् अत्र पृथगधिकरणारम्भः समुचितः । चतुर्थसामान्यनियमात् । किन्तु न केनापि तथा कृतम् । अतः "प्रतिज्ञाहानिः" इति शब्दस्य साकांक्षत्वं कल्पयित्वा समञ्जसनीयम् । सप्तमविशेषनियमात् । ततश्च अत्र रा-श्री-भाष्यद्वयमध्ये "शब्देभ्यः" इति पदेन पृथक् एकं सूत्रं कृतम् । एतदर्थं चतुर्थसामान्यनियमः चिन्तनीयः । चकाराभावात् न अत्यन्तपृथग्हेतुत्वम्, अतः पृथक्करणं न युक्तम् ।

( ७ ) "यावद्विकारं तु विभागो लोकवत्" २।३।७ ( २२३ ) इत्यत्र "विभागः" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् "तु" शब्दयोगात् तस्य साकांक्षत्वं साधितम्, नवमविशेषनियमात् । अतः नात्र पृथगधिकरणारम्भः संगच्छते । परसूत्रे बहुभिः भाष्यकारैः अधिकरणस्य आरब्धत्वात् अत्रैव अधिकरणसमाप्तिः संगच्छते । रामानुजभाष्ये इतः परं सूत्रद्वयम् अत्र गृहीतम् । तथा निम्बार्कभाष्ये इतः परं अष्ट सूत्राणि अत्र गृहीतानि । तेन तयोः मते नात्र अधिकरणसमाप्तिः इति बोद्धव्यम् ।

## द्वितीयं मातरिश्वाधिकरणम् ।

अत्र "एतेन मातरिश्वा व्याख्यातः" २।३।८ (२२४) इति सूत्रस्य "मातरिश्वा" इति पदात् अस्य "मातरिश्वाधिकरणं" नाम । तत्र रामानुज-निम्बार्क-श्रीपति-भाष्यभिन्नेषु सर्वत्र [illegible] एकं सूत्रं गृहीतम् । रामानुजमतेन तथा निम्बार्कमतेन एतत् सूत्रं पूर्वाधिकरणान्तर्गतत्वेन कृतम् । श्रीपतिमतेन तु परवर्त्तिसूत्रेण सह तयोः सूत्रद्वयेनैव एतदधिकरणं रचितम् । अत्र "मातरिश्वा" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव, चतुर्थसामान्यनियमात् । [illegible] च कृतं सर्वैः भाष्यकारैः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् [illegible]

संगच्छते। तेन रामानुज-निम्बार्कभाष्ययोः अधिकरणस्य अनारम्भात् दोषेण भवितव्यम्।

### तृतीयम् असंभवाधिकरणम्।

अत्र "असम्भवस्तु सतोऽनुपपत्तेः" २।३।९ (२२५) इति सूत्रस्य "असम्भवः" इति पदात् अस्य "असम्भवाधिकरणं" नाम। तत्र रामानुज-निम्बार्क-श्रीपति-भाष्यभिन्नेषु सर्वेषु भाष्येषु एतदेव एकं सूत्रं गृहीतम्। रामानुजभाष्ये तु एतत् प्रथमाधिकरणस्य नवानां सूत्राणां मध्ये अन्तिमं सूत्रम्। निम्बार्कभाष्ये एतत् हि प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये अष्टमं सूत्रम्। श्रीपतिभाष्ये च एतच्च द्वितीयाधिकरणस्य अन्तिमं सूत्रम्। अत्र "असम्भवः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव, चतुर्थसामान्यनियमात्"। तु शब्दस्य निषेधार्थकत्वात् "तत् तु समन्वयात्" इतिवत् नास्य अधिकरणारम्भकत्वे व्याघातः सञ्जातः। नवमविशेषनियमात् अष्टादशविशेषनियमाच्च। परसूत्रेण अधिकसंख्यकैः भाष्यकारैः अधिकरणस्य आरब्धत्वात् अत्रैव अधिकरणसमाप्तिः। तेन रा-नि-श्रीप-भाष्याणाम् अधिकरणस्य अरचनायां दोषः।

### चतुर्थं तेजोऽधिकरणम्।

अत्र "तेजोऽतस्तथा ह्याह" २।३।१० (२२६) इति सूत्रस्य "तेजः" पदात् अस्य इति। "तेजोऽधिकरणं" नाम। तत्र रामानुज-निम्बार्क-श्रीपति-भिन्नेषु भाष्येषु एतेनैव एकेन सूत्रेण एतदधिकरणं रचितम्। रामानुजभाष्ये तस्य द्वितीयाधिकरणस्य अष्टानां सूत्राणां मध्ये एतद् हि प्रथमं सूत्रम्, निम्बार्कभाष्ये तस्य प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये एतद् हि नवमं सूत्रम्। श्रीपतिभाष्ये तस्य चतुर्थाधिकरणस्य पञ्चानां सूत्राणां मध्ये एतदेव प्रथमं सूत्रम्। अत्र "तेजः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमानुगतमेव। "अतः" इति शब्दस्य अत्र हेत्वर्थकत्वस्य अभावात् नात्र साकांक्षत्वं शंकनीयम्। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भदर्शनात् अत्रैव अधिकरणसमाप्तिश्च संगच्छते। तेन अत्र अधिकरणस्य अरचनायां निम्बार्कभाष्यस्यैव दोषसंस्पर्शः सञ्जातः।

### पञ्चमम् अबधिकरणम्।

अत्र "आपः" २।३।११ ( २२१ ) इति सूत्रस्य "अप्" शब्दात् अस्य "अबधिकरणं" नाम। तत्र रामानुज-निम्बार्क-श्रीकण्ठ-भिन्नेषु भाष्येषु सर्वत्र एतदेव एकं सूत्र गृहीतम्। रामानुज-मतेन एतत् सूत्रं तस्य द्वितीयाधिकरणस्य अष्टसु सूत्रेषु मध्ये द्वितीयं सूत्रम्। निम्बार्कमतेन तु एतत् सूत्रं तस्य प्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु मध्ये दशमं सूत्रम्। तथैव श्रीकण्ठमतेन एतत् सूत्रं तस्य चतुर्थाधिकरणस्य पञ्चसु सूत्रेषु मध्ये द्वितीयं सूत्रम्। अत्र "आपः" इति प्रथमान्त-पदात् अस्य अधिकरणारम्भकत्वं समुचितमेव। चतुर्थसामान्यनियमात्। तेन रामानुज-निम्बार्क-श्रीकण्ठभाष्याणां अधिकरणस्य अरचनेन दोषः। परसूत्रे अधिकसम्मत्या अधिकरणा-रम्भात् अत्रैव अधिकरणसमाप्तिः।

## षष्ठं पृथिव्यधिकाराधिकरणम् ।

अत्र "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" २।३।१२ (२२८) इति सूत्रस्य "पृथिव्यधिकार"-पदात् अस्य "पृथिव्यधिकाराधिकरणं" नाम । तत्र रामानुज-निम्बार्क-श्रीकण्ठ-भिक्षु-भाष्येषु सर्वत्र एतदेव एकं सूत्रं एतदधिकरणार्थं गृहीतम् । तत्र "पृथिवी" इति एकं सूत्रं रा-भि-श्री-भाष्येषु दृश्यते, ततः "अधिकाररूपशब्दान्तरेभ्यः" इति द्वितीयं सूत्रं रा-श्री-भाष्यमध्ये दृश्यते । निम्बार्क-भाष्ये तु "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" इति अपरं सूत्रम् । एवं च रा-नि-श्री-भाष्येषु एतत्सूत्रद्वयेन अधिकरणं न रचितम् । "पृथिवी" इति सूत्रं तु रामानुजमतेन द्वितीयाधिकरणस्य अष्टानां सूत्राणां मध्ये तृतीयं सूत्रम्, निम्बार्कमतेन तु प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये एकादशं सूत्रम् । तथा श्रीकण्ठमतेन चतुर्थाधिकरणस्य सूत्रपञ्चकमध्ये तृतीयं सूत्रं भवति। "अधिकाररूपशब्दान्तरेभ्यः" इति सूत्रं च रामानुजमतेन द्वितीयाधिकरणस्य अष्टानां सूत्राणां मध्ये चतुर्थं सूत्रम्, श्रीकण्ठमतेन तु चतुर्थाधिकरणस्य पञ्चानां सूत्राणां मध्ये चतुर्थं सूत्रम् । "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" इति सूत्रं तु निम्बार्कमतेन प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये एकादशं सूत्रम् इति विवेकः ।

अत्र "पृथिवी" इति सूत्रे प्रथमान्तपदसत्त्वात् अधिकरणस्य आरम्भः युक्तः। रा-नि-श्री-भाष्याणि दुष्टानि तदकरणात् । निम्बार्कमते "पृथिवी" तथा "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" इति सूत्र-द्वयमध्ये पृथक्प्रथमान्तपदसत्त्वेऽपि अधिकरणस्य अनारम्भात् पुनरपि दोषापत्तिः । तेन निम्बार्कमते अपरः एकः अतिरिक्तः दोषः भवति । एवं च "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" इति सूत्रे "पृथिवी" इति प्रथमान्तपदसत्त्वात् रा-भा-म-श्रीप-ब-भाष्येषु अधिकरणारम्भः संगच्छते एव । चतुर्थसामान्यनियमात् । अत्र सूत्रविभागः न युक्तः, आकांक्षाप्राबल्यात्, चतुर्थविशेषनियमात् । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगतापि ।

## सप्तमं तदभिध्यानाधिकरणम् ।

अत्र "तदभिध्यानादेव तु तल्लिङ्गात् सः" २।३।१३ (२२९) इति सूत्रस्य "तदभिध्यान-" शब्दात् अस्य "तदभिध्यानाधिकरणं" नाम । तत्र रामानुज-निम्बार्क-श्रीकण्ठ-भाष्यभिन्नेषु सर्वत्र एकेन सूत्रेण एतदधिकरणं रचितम् । रामानुजमतेन एतत् सूत्रं तदीय-द्वितीयाधिकरणस्य अष्टसु सूत्रेषु पञ्चमं सूत्रम् । निम्बार्कमतेन तदीय-प्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु त्रयोदशं सूत्रम् । श्रीकण्ठमतेन तदीय-चतुर्थाधिकरणस्य पञ्चसु सूत्रेषु पञ्चमं सूत्रम् ।

अत्र "सः" इति प्रथमान्तपदस्य सत्त्वात् अनेन अधिकरणारम्भः संगच्छते; चतुर्थसामान्य-नियमात् । "तु"-शब्दस्य तत्र न बाधकत्वं, निषेधार्थकत्वात् । नवमविशेषनियमात् नात्र प्रकृतपूर्व-पक्षस्य-शङ्का कर्त्तव्या, तेन अष्टदशविशेषनियमात् न बाधा । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगतैव । तेन अत्र रा-नि-श्री-भाष्याणि अधिकरणरचनायां दोषग्रस्तानि इति वक्तुं शक्यते ।

## अष्टमं विपर्य्ययाधिकरणम् ।

अत्र "विपर्य्ययेण तु क्रमोऽतः उपपद्यते च" २।३।१४ ( २३० ) इति सूत्रस्य "विपर्य्यय"-शब्दात् अस्य "विपर्य्ययाधिकरणं" नाम । अत्र रामानुज-निम्बार्क-श्रीकण्ठभाष्यभिन्नेषु सर्वत्र एतद् एकमेव सूत्रं गृहीतम् । तत्र रामानुजमतेन तदीय-द्वितीयाधिकरणस्य अष्टानां सूत्राणां मध्ये एतत् हि षष्ठं सूत्रम् । निम्बार्कमतेन तु तदीय-प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये एतत् हि चतुर्दशसूत्रम् । श्रीकण्ठमतेन तदीय-पञ्चमाधिकरणस्य सूत्रद्वयमध्ये एतत् तु प्रथमं सूत्रम् । अतः एतेन सूत्रेण अधिकरणस्य अनारम्भात् रामानुज-निम्बार्कभाष्यद्वयं दोषयुक्तम् ।

अत्र "क्रमः" इति प्रथमान्तपदात् चतुर्थसामान्यनियमात् अधिकरणारम्भः संगत एव । तत्रापि "तु च" इति पदद्वयात् नवमविशेषनियमात् तथा षष्ठविशेषनियमात् द्वादशविशेषनियमाच्च अत्र अधिकरणारम्भे वाधा न शङ्कनीया । तु-शब्दस्य-पूर्वपक्षीय-शङ्कावारणार्थत्वात् नवमविशेषनियमात् चकारस्य हेतोरेव समुच्चयार्थत्वात् द्वादशविशेषनियमात् । अत्र अष्टादशविशेषनियमोऽपि द्रष्टव्यः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च संगतैव इति सिद्ध्यति ।

## नवमम् अन्तराविज्ञानाधिकरणम् ।

अत्र "अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्" २।३।१५ ( २३१ ) इति सूत्रस्य "अन्तारा"शब्दात्, तथा "विज्ञान"शब्दात् अस्य "अन्तराविज्ञानाधिकरणं" नाम । तत्र शंकर-भास्कर-श्रीपति-भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । मध्व-वल्लभ-भाष्यद्वयमध्ये सूत्रद्वयेन । रामानुज-निम्बार्क-श्रीकण्ठभाष्येषु अधिकरणं न रचितम् । अत्र रामानुजमतेन तदीय-द्वितीयाधिकरणस्य अष्टानां सूत्राणां मध्ये एतद् सप्तम सूत्रम् । निम्बार्कमतेन तदीय-प्रथमाधिकरणस्य पञ्चदशानां सूत्राणां मध्ये एतद् हि अन्तिमं सूत्रम् । श्रीकण्ठमतेन तदीय-पञ्चमाधिकरणस्य सूत्रद्वयमध्ये अन्तिमं सूत्रम् । तेन अधिकसम्मत्या अनेन अधिकरणस्य आरम्भात् अत्र अधिकरणस्य अरचनायां रा-नि-श्रीभाष्याणां दोषः ।

अत्र "विज्ञानमनसी" इति प्रथमान्तपदसत्त्वात् अनेन अधिकरणारम्भः समुचितः एव, चतुर्थसामान्यनियमात् । तथापि सूत्रमध्ये "इति चेन्न" इति वाक्यांशात् नात्र अधिकरणम् आरम्भनीयम्, पञ्चमविशेषनियमात् । परन्तु अधिकरणरचनायाम् अष्टानां भाष्याणां मध्ये पञ्चानां ऐक्यमत्यात् अरचनायां तु त्रयाणाम् असम्मतेश्च केनचिद् विशेषनियमेनैव अधिकरणरचनमेव समर्थनीयम् । स च चतुर्दशविशेषनियमः प्रागेव कृतः । यथा—"प्रथमान्तपदात् परं यदि पञ्चम्यन्तपदसत्त्वं, ततः परं यदि "इति चेन्न" इति पदं, तदा अधिकरणारम्भः समुचितः एव" इति । एवं चेत् अत्र "विज्ञानमनसी" इति प्रथमान्तपदात् परं "तल्लिंगात्" इति पञ्चम्यन्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युज्यते एव । न च "इतरपरामर्शात् स इति चेन्नासम्भवात्" १।३।१८ इति सूत्रे "इतरपरामर्शात्" इति पञ्चम्यन्तपदात् "सः" इति प्रथमान्तपदसत्त्वेऽपि

अधिकरणस्य अनारम्भात् दोषः इति वाच्यम्, अत्र "इतर"-शब्देन साकांक्षत्वस्य विधानात्। न वा "तर्काप्रतिष्ठानादपि अन्यथानुमेयमिति चेद् एवमपि अनिर्मोक्षप्रसंगात्" २।१।११ इति सूत्रे "तर्काप्रतिष्ठानाद्" इति पञ्चम्यन्तपदात् "अन्यथानुमेयम्" इति प्रथमान्तपदसत्त्वेऽपि अधिकरणस्य अनारम्भात् दोषः स्यात् इति वाच्यम्। तत्र "अपि" शब्देन हेतोरेव समुच्चयात् साकांक्षत्वस्य विहितत्वात्। "भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" २।१।१३ इति सूत्रं तु अत्र अनुकूलमेव। यद्यपि "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ इति सूत्रे प्रथमान्त-पदाभावेऽपि अधिकरणस्य आरम्भात् प्रकृतनियमस्य प्रतिकूलत्वं प्रसज्येत, तथापि तत्र आवश्यक-प्रथमान्तपदस्य अध्याहर्तव्यत्वात् न दोषः—इत्येव कल्पनीयम्, चतुर्दशविशेषनियमात् इति। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः युज्यते एव। तेन अत्र अधिकरणस्य अरचनायां रा-नि-श्रीभाष्याणां दोषः इति प्रागेव उक्तम्।

## दशमं चराचरव्यपाश्रयाधिकरणम्

अत्र "चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" २।३।१६ (२३२) इति सूत्रस्य "चराचरव्यपाश्रयः" इति पदात् अस्य "चराचरव्यपाश्रयाधिकरणं" नाम। अत्र शङ्कर-भास्कर-निम्बार्क-श्रीकण्ठ-श्रीपति-भाष्येषु अधिकरणम् आरब्धम्। तत्र शङ्कर-भास्कर-श्रीकण्ठ-श्रीपति-भाष्येषु एतदर्थम् एतद् एकमेव सूत्रं गृहीतम्। निम्बार्कभाष्ये तु एतदारभ्य सूत्रद्वयं गृहीतम्। रामानुज-मध्व-वल्लभभाष्येषु किन्तु अधिकरणं न रचितम्। रामानुजभाष्ये एतद् हि तदीय-द्वितीयाधिकरणस्य अष्टसु सूत्रेषु अष्टमं सूत्रम्। मध्व-वल्लभ-भाष्यद्वयमध्ये-तदीय-नवमाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम्।

अत्र "चराचरव्यपाश्रयः" "तद्व्यपदेशः" "भाक्तः" इति प्रथमान्तपदत्रयस्य सत्त्वात् अनेनैव अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्। तु-शब्दस्य निषेधार्थकत्वेन नवमविशेष-नियमात्। अनुक्तपूर्वपक्षत्वमपि अत्र साधकम्। अष्टादशविशेषनियमात् अधिकरणारम्भः संगतः एव। अथवा प्रथमान्तपदात् "तु-शब्दयुक्त-'स्यात्'-शब्दसत्त्वम् अधिकरणारम्भकम्" इति ऊनविंशविशेष-नियमात् अधिकरणारम्भः युक्तः। तेन रा-म-व-भाष्येषु अधिकरणस्य अनारम्भात् तेषामेव दोषः।

## एकादशम् आत्माधिकरणम्।

अत्र "नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः" २।३।१७ (२३३) इति सूत्रस्य "आत्मा" इति पदात् अस्य "आत्माधिकरणं" नाम। तत्र निम्बार्क-भाष्यभिन्नेषु सर्वत्र इति एकेनैव सूत्रेण एतद-धिकरणं रचितं दृश्यते। निम्बार्क-भाष्ये एतत् सूत्रं तदीय-द्वितीयाधिकरणस्य द्वितीयं सूत्रम्, तेन तत्र एतेन अधिकरणं न रचितमेव।

अत्र "आत्मा" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव, चतुर्थसामान्य-नियमात्। न च चकार-सत्त्वम् अस्य तादृशत्वे बाधकम् इति वाच्यम्, षष्ठविशेषनियमात्, तथाच

च-कारेण विशेषणान्तरत्वविधानात् त्रयोदशविशेषणनियमात् अधिकरणारम्भः संगच्छते। तेन निम्बार्कभाष्यस्यैव अधिकरणस्य अरचनायां दोषापत्तिः। परसूत्रे अधिकरणान्तरस्य अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगता।

## द्वादशं ज्ञाधिकरणम्

अत्र "ज्ञोऽत एव" २।३।१८ ( २३४ ) इति सूत्रस्य "ज्ञः" इति पदात् अस्य "ज्ञाधिकरणं" नाम। अत्र रामानुजभाष्य-भिन्नेषु सर्वेषु भाष्येषु एतद् एकमेव सूत्रं गृहीतम्। रामानुजभाष्ये तदीय-चतुर्थाधिकरणस्य चतुर्दशसु सूत्रेषु मध्ये एतत् तु प्रथमं सूत्रम्। तेन सर्वसम्मत्या अत्रैव अधिकरणारम्भः समुचितः भवति।

अत्र "ज्ञः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं सङ्गच्छते। चतुर्थसामान्यनियमात्। परवर्तिसूत्रेण अधिकसंख्यकभाष्येषु पृथगधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिरपि युज्यते। माध्वभाष्ये अतःपरं "युक्तेश्च" इति एकम् अतिरिक्तं सूत्रं पठितम् इति दृश्यते। तच्च तस्य द्वादशाधिकरणस्य अष्टसु सूत्रेषु प्रथमं सूत्रम्। तेन तत्र अधिकरणस्य रचनायां तस्य एकः अपरः दोषः संजातः।

## त्रयोदशम् उत्क्रान्तिगत्यधिकरणम्।

अत्र "उत्क्रान्तिगत्यागतीनाम्" २।३।१९ ( २३५ ) इति सूत्रस्य "उत्क्रान्तिगति-" इति शब्दात् अस्य "उत्क्रान्तिगत्यधिकरणं" नाम। अत्र शंकर-भास्कर-भाष्यद्वयमध्ये चतुर्दश सूत्राणि गृहीतानि। रामानुजभाष्ये तदीय-चतुर्थाधिकरणस्य चतुर्दशानां सूत्राणां मध्ये एतदेव द्वितीयं सूत्रम्। पूर्वसूत्रेण अधिकरणस्य आरब्धत्वात्, नवमदशमसूत्रद्वयस्य एकीकरणाच्च। निम्बार्कभाष्ये तु तदीय-चतुर्थाधिकरणस्य त्रयोदशानां सूत्राणां मध्ये एतद्धि प्रथमं सूत्रम्। अत्रापि नवमं दशमं च सूत्रद्वयम् एकीकृतम्। मध्वभाष्ये तदीय-द्वादशाधिकरणस्य अष्टानां सूत्राणां मध्ये एतदेव द्वितीयं सूत्रम्। तन्मते इतः पूर्वं "युक्तेश्च" इति एकम् अधिकं सूत्रं पठितं, तेनैव अधिकरणस्य आरब्धत्वात्। नवम-दशम-सूत्रद्वयस्य एकीकरणात् च श्रीकण्ठभाष्ये तदीय-नवमाधिकरणस्य त्रयोदशानां सूत्राणां मध्ये एतद्धि प्रथमं सूत्रम्। अत्रापि नवमं दशमं च सूत्रद्वयम् एकीकृतम्। श्रीपतिभाष्ये च तदीय-द्वादशाधिकरणस्य त्रयोदशानां सूत्राणां मध्ये एतच्च प्रथमं सूत्रम्। अत्रापि नवमं दशमं च सूत्रद्वयम् एकीकृतम्। वल्लभभाष्ये तदीय-द्वादशाधिकरणस्य दशानां सूत्राणां मध्ये एतच्च प्रथमं सूत्रम्। अत्रापि नवमं दशमं च सूत्रद्वयम् एकीकृतम्। एवं च अधिकरणारम्भविषये रामानुज-मध्व-भिन्नेषु सर्वेषु भाष्येषु ऐकमत्यं वर्तते। तेन रामानुज-मध्व-भाष्यद्वयमेव अत्र अधिकरणस्य अरचनायां दोषभाग् भवति। ननु अत्र प्रथमान्तपदाभावात् अधिकरणं न आरम्भणीयम्। तत् कथं षट् भाष्यकाराः अधिकरणरचनापक्षपातिनः जाताः? अत्र उच्यते—सूत्रस्य सम्बन्धीविभक्त्यन्तत्वात् "स्वात्मना चोत्तरयोः" इति परसूत्रस्यापि

तथात्वात् ततश्च "नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्" इति तत्परवर्तिसूत्रे अणुपदवाच्यजीवेन सह सम्बन्धकरणात् "उत्क्रान्तिगत्यागतीनां श्रवणात् अणुः जीवः" इत्येव समग्रसूत्रं भवति। एवं "अणुः जीवः" इति प्रथमान्तपदद्वयस्य ऊहनीयत्वात् अत्र अधिकरणारम्भः संगच्छते। रामानुजभाष्ये एतत्सूत्रस्य पूर्वाधिकरणाङ्गत्वात् "विधेयभेदात् अधिकरणभेदः" इति नियमस्य लंघनं कृतं स्यात्; तन्न युक्तम्, चतुर्थविशेषनियमात्। ततश्च शांकरमते प्रथमम् आरभ्य दश सूत्राणि पूर्वपक्षत्वेन योजितानि। रामानुजमते तु तानि सर्वाण्येव सिद्धान्तसूत्राणि। परन्तु एवं सति "तद्गुणसारत्वात् तु" इत्याद्येकादशसूत्रस्थ-तु-शब्दस्य पूर्वपक्षव्यावृत्त्यर्थत्वं व्याहन्येत। एतस्य यौक्तिकत्वं सुधीभिः विभाव्यम्। वस्तुतस्तु आत्मनः अणुत्वविभुत्ववादद्वयं प्रति आग्रहानाग्रहाभ्यामेव अयं मतभेदः संजातः, न तु सूत्राक्षरानुसारतः। सूत्राक्षरानुकूल्यं तु शांकरभाष्यस्यैव इति प्रतिभाति। तानि च चतुर्दश सूत्राणि—

| | |
|---|---|
| १। "उत्क्रान्तिगत्यागतीनाम्" २।३।१९ (२३५) | ९। "तथा च दर्शयति" २।३।२७ (२४३) |
| २। "स्वात्मना चोत्तरयोः" २।३।२० (२३६) | १०। "पृथगुपदेशात्" २।३।२८ (२४४) |
| ३। "नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्" २।३।२१ (२३७) | ११। "तद्गुणसारत्वात तु तद्व्यपदेशः प्राज्ञवत" २।३।२९ (२४५) |
| ४। "स्वशब्दोन्मानाभ्यां च" २।३।२२ (२३८) | १२। "यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात" २।३।३० (२४६) |
| ५। "अविरोधश्चन्दनवत्" २।३।२३ (२३९) | १३। "पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात" २।३।३१ (२४७) |
| ६। "अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि" २।३।२४ (२४०) | १४। "नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा २।३।३२ (२४८) |
| ७। "गुणाद् वा लोकवत्" २।३।२५-(२४१) | |
| ८। "व्यतिरेको गन्धवत्" २।३।२६ (२४२) | |

अत्र (१) "उत्क्रान्तिगत्यागतीनाम्" २।३।१९ (२३५) इति सूत्रे प्रथमान्तपदाभावेऽपि अस्य षष्ठ्यन्तत्वात् तृतीयसूत्रस्य "अणुः" इति प्रथमान्तपदेन सह सम्बन्धात् प्रथमान्तपदस्य ऊहनीयत्वात् अधिकरणारम्भः पञ्चमसामान्यनियमेन संगच्छते। रा-म-भाष्यद्वये तथात्वस्य अकरणात् तयोरेव दोषः।

(२) "स्वात्मना चोत्तरयोः" २।३।२० (२३६) इत्यत्र प्रथमान्तपदाभावात् तथा पूर्वसूत्रानुरूपं परसूत्रस्य "अणुः" इति पदेन सह सम्बन्धात् चकाराच्च अस्य पूर्वसूत्रारब्धाधिकरणस्य अंगसूत्रत्वमेव संगतम्, साकांक्षत्वात्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

(३) 'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्" २।३।२१ (२३७) इत्यत्र "अणुः" इति प्रथमान्तपदसत्त्वात् ततश्च "अतच्छ्रुतेः" इति पञ्चम्यन्तपदस्य विद्यमानत्वात् अतः अधिकरणारम्भकत्वम् "इति चेन्न" इति अधिकरणारम्भबाधकपदस्य सत्त्वेऽपि संगच्छते। चतुर्थ-

विशेषनियमात् । परन्तु तन्नाम सम्भवेत् ; "अणुः" इति पदस्य पूर्ववर्तिनः "उत्क्रान्तिगत्यागतीनाम्" इति षष्ठ्यन्तसूत्रस्य सम्बन्धिघटकत्वात् आकांक्षापरिपूरकत्वाद् वा , "उत्क्रान्तिगत्यागतीनाम्" इति सूत्रस्य अधिकरणारम्भकत्वसम्पादनाय प्रवृत्तस्य नोचितं स्वस्य पृथगधिकरणारम्भकत्वम् । अतो न चतुर्दशविशेषनियमस्य व्याघातः । ततश्च न एकस्मिन्नपि भाष्ये अस्य अधिकरणारम्भकत्वं दृश्यते । अतः नासंगतम् एतादृशकल्पनम् । चतुर्थसामान्यनियमः द्रष्टव्यः, तथा पञ्चमचतुर्दशविशेषनियमौ: द्रष्टव्यौ ।

( ४ ) "स्वशब्दोन्मानाभ्यां च" २।३।२२ (२३७) इत्यत्र प्रथमान्तपदाभावात् अध्याहृतेऽपि चकारयोगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात् ।

( ५ ) "अविरोधश्चन्दनवत्" २।३।२३ ( २३९ ) इत्यत्र प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्, चन्दनदृष्टान्तेन अविरोधसाधनात् । कस्य केन सह अविरोधः इति आकांक्षायां सूत्रस्य साकांक्षत्वं सिद्ध्यति । चतुर्थसामान्यनियमात् ततः सप्तमविशेषनियमात च नास्य अधिकरणारम्भकत्वं युक्तम् ।

( ६ ) "अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि" २।३।२४ ( २४० ) इत्यत्र प्रथमान्तपदाभावात् ततश्च "इति चेन्न" इति पदस्य सत्त्वात् नास्यापि अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् , पञ्चमविशेषनियमाच्च ।

( ७ ) "गुणाद् वा लोकवत्" २।३।२५ ( २४१ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् । तादृशपदस्य अध्याहारेऽपि "वा" शब्देन विकल्पविधानात् अत्र साकांक्षत्वं कल्पयितुं शक्यम् । षष्ठविशेषनियमात ।

( ८ ) "व्यतिरेको गन्धवत्" २।३।२६ ( २४२ ) इत्यत्र "व्यतिरेकः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम् । माध्वभाष्येऽपि तथैव कृतमिति दृश्यते । परन्तु सप्तसु भाष्येषु नैतत् कृतम् । अतः "व्यतिरेकः"-शब्देन कस्य व्यतिरेकः इत्येवं साकांक्षत्वं कल्पयित्वा अधिकरणारम्भस्य अनौचित्यं कल्पनीयम् ; सप्तमविशेषनियमात् । अतः माध्वभाष्ये अधिकरणारम्भात् दोषः । तन्मते अत्र त्रयोदशाधिकरणस्य आरम्भः । रा-नि-म-श्री-श्रीप-भाष्येषु एततसूत्रशेषत्वेन परसूत्रं पठ्यते । तन्न युक्तम् । चकारात् पृथगहेतुत्वस्य सूचनात् , चतुर्थसामान्यनियमाच्च ।

( ९ ) "तथा च दर्शयति" २।३।२७ ( २४३ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । अध्याहारेऽपि चकारः एव तस्य बाधकः । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च । रा-नि-म-श्री-श्रीप-भाष्येषु एतत्सूत्रं पूर्वसूत्रस्य शेषतया पठितम् । तत्रापि नि-श्री-वल-भाष्येषु चकारस्थाने हिकारस्य पाठः दृश्यते । माध्वभाष्ये पूर्वसूत्रस्य अंगतया अनेन अधिकरणम् आरब्धम् । एतस्य पूर्वसूत्रांगत्वं न युक्तम् इति तूक्तमेव । चतुर्थसामान्यनियमात् ।

( १० ) "पृथगुपदेशात्" २।३।२८ ( २४८ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् ; चतुर्थसामान्यनियमात् । तेन माध्वभाष्ये अत्र अधिकरणारम्भस्तु तस्य दोषाय कल्प्यते ।

( ११ ) "तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत्" २।३।२९ ( १४५ ) इत्यत्र "तद्व्यपदेशः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तमपि "तु"-शब्देन निषेधार्थकेन तस्य व्याघातः । अतोऽत्र अधिकरणारम्भः समुचितः । तथापि अत्र पूर्वपक्षस्य उक्तत्वात् स न कर्त्तव्यः । अनुक्ते पूर्वपक्षे यथा "तत् तु समन्वयात्" इत्यत्र "तु"-शब्दस्य निषेधार्थकत्वे अधिकरणारम्भस्य अबाधकत्वम् । अन्यत्र यथा उक्तपूर्वपक्षे, अनिषेधार्थकत्वे वा तु-शब्दस्य अधिकरणारम्भे बाधकत्वम् इत्येव बोद्धव्यम् । तथाच अत्र नियमः—"उक्तपूर्वपक्षे प्रथमान्तपदेन सह निषेधार्थक-तु-शब्दस्य न अधिकरणारम्भकत्वम्" इति अष्टादशविशेषनियमः, बल्लभ-भाष्ये अधिकरणस्य आरम्भात् तस्य अत्र दोषः कल्पनीयः ।

( १२ ) "यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" २।३।३० ( २४६ ) इत्यत्र "दोषः" इति प्रथमान्तपदस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तं । परं तु चकारस्य योगात् तन्निषेधः । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । माध्वभाष्ये अत्र अधिकरणस्य रचनायां दोषः वक्तव्यः ।

( १३ ) "पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात्" २।३।३१ ( २४७ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात् । माध्वभाष्ये अत्र पृथगधिकरणकरणात् दोषो वाच्यः ।

( १४ ) "नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा" २।३।३२ ( २४८ ) इत्यत्र "नित्योपलब्ध्यनुपलब्धिप्रसंगः" तथा "अन्यतरनियमः" इति प्रथमान्तपदद्वयात् अत्र अधिकरणारम्भः संगच्छते, चतुर्थसामान्यनियमात् । किन्तु "वा"-शब्देन विकल्पविधानात् तथा अन्यथा "शब्देनापि साकांक्षत्वस्य कल्पनीयत्वात् । षष्ठविशेषनियमात् स न कर्त्तव्यः इति कल्प्यते । परसूत्रे सर्वसम्मत्या पृथगधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिकल्पनं संगतमेव ।

एवं च अस्मिन् अधिकरणे—

| | | | | |
|---|---|---|---|---|
| रामानुजभाष्ये | अधिकरणस्य अरचनायां | एको दोषः | रचनायां | दोषाभावः |
| माध्वभाष्ये | " | " | " | चत्वारो दोषाः |
| वल्लभभाष्ये | " | " | " | दोषाभावः |

अन्येषां उभयत्र दोषाभावः इति विज्ञेयम् ।

## चतुर्दशं कर्त्रधिकरणम् ।

अत्र "कर्त्ता शास्त्रार्थवत्त्वात्" २।३।३३ ( २४९ ) इति सूत्रस्य "कर्त्ता" इति पदस्य सत्त्वात् "कर्त्रधिकरणं" नाम । तत्र शंकर-भास्कर-रामानुज-श्रीकण्ठ-श्रीपति-भाष्येषु सप्त-सूत्राणि, निम्बार्क-

वल्लभ-भाष्यद्वयमध्ये सप्त सूत्राणि, माध्वभाष्ये तु दश सूत्राणि गृहीतानि । तानि च सप्त सूत्राणि यथा—

१। "कर्त्ता शास्त्रार्थवत्त्वात्" २।३।३३ (२४९)
२। "विहारोपदेशात्" २।३।३४ ( २५० )
३। "उपादानात्" २।३।३५ ( २५१ )
४। "व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः २।३।३६ ( २५२ )
५। "उपलब्धिवदनियमः" २।३।३७ (२५३)
६। "शक्तिविपर्य्ययात्" २।३।३८ ( २५४)
७। "समाध्यभावाच्च" २।३।३९ (२५५)

अत्र ( १ ) "कर्त्ता शास्त्रार्थवत्त्वात्" २।३।३३ (२४९) इति सूत्रे "कर्त्ता" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतम्, चतुर्थसामान्यनियमात् । सर्वसम्मतं च एतत् ।

( २ ) "विहारोपदेशात्" २।३।३४ ( २५० ) इत्यत्र प्रथमान्तपदाभावात् नात्र अधिकरणारम्भः संगच्छते, कृतमपि तथैव सर्वेषु भाष्येषु । चतुर्थसामान्यनियमात् । रा-श्री-श्रीप-भाष्येषु एतत्सूत्रस्य परसूत्राङ्गत्वं साधितम् । तन्न युक्तम्, हेतोरेव उक्तत्वात् ; चतुर्थविशेषनियमात् ।

( ३ ) "उपादानात्" २।३।३५ ( २५१ ) इत्यत्रापि तथैव ; चतुर्थसामान्यनियमात् । रा-श्री-श्रीप-भाष्येषु एतत्सूत्रम् पूर्वसूत्रेण सह विपर्य्यस्तक्रमेण पठितम् "उपादानाद् विहारोपदेशात् इति । नापि अत्र किमपि प्राचीनपाठादिकं प्रदर्शितम् । ततश्च एतत्सूत्रद्वयस्य एकीकरणं न युक्तम् । पृथग्हेतोः निर्देशात् । चकाराभावेऽपि न क्षतिः, परसूत्रात् तस्य अत्र ऊहनीयत्वं कल्पयितुं शक्यते । हेतुप्रदर्शनप्रवाहपतितत्वात् । अतः एतयोः एकसूत्रत्वं न युक्तम् । चतुर्थविशेषनियमात् ।

( ४ ) "व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः" २।३।३६ ( २५२ ) इत्यत्र "निर्देशविपर्य्ययः" इति प्रथमान्तपदस्य सत्त्वात् अनेन अधिकरणारम्भः संगतः, तथापि न एकस्मिन्नपि भाष्ये तथा कृतम् । अतः चकारयोगात् "चेत्" शब्दसत्त्वाच्च नास्य अधिकरणारम्भकत्वम् इत्येव कल्पनीयम् । चतुर्थसामान्यनियमात्, पञ्चमषष्ठनियमाभ्यां च ।

( ५ ) "उपलब्धिवदनियमः" २।३।३७ ( २५३ ) इत्यत्र "अनियमः" इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भः संगच्छते । परन्तु कुत्रापि भाष्ये तन्न दृश्यते, अतः "अनियमः" इति पदेन साकांक्षत्वं कल्पयित्वा तद्वारणं कर्त्तव्यम् । सप्तमविशेषनियमात् ।

( ६ ) "शक्तिविपर्य्ययात्" २।३।३८ ( २५४ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम् ; चतुर्थसामान्यनियमात् । तथैव कृतमिति सर्वेषु भाष्येषु दृश्यते ।

( ७ ) "समाध्यभावाच्च" २।३।३९ ( २५५ ) इत्यत्र प्रथमान्तपदाभावाद् नात्र अधिकरणम् आरब्धम् सर्वेषु भाष्येषु । चकारात् अध्याहारेऽपि तन्निषेधः । चतुर्थसामान्यनियमात्, चतुर्थविशेषनियमाच्च । परसूत्रेण शांकर-भास्कर-भाष्यद्वये-अधिकरणारम्भात् अत्र अधिकरणसमाप्तिः

तयोः मतेन संगच्छते । रा-नि-श्री-श्रीप-व-भाष्येषु परवर्त्तिसूत्रमपि एतदधिकरणान्तर्गतं कृतम् । माध्वभाष्ये तु परवर्त्तिसूत्रद्वयमपि तथा कृतम् । अत्र अधिकरणरचनाऽरचनाजन्यः न कस्यापि दोषसंस्पर्शः संजातः ।

## पञ्चदशं तक्षाधिकरणम् ।

अत्र "यथा च तक्षोभयथा" २।३।४० ( २५६ ) इति सूत्रस्य "तक्षा" इति पदस्य सत्त्वात् अस्य "तक्षाधिकरणं" नाम । तत्र शङ्कर-भास्कर-भाष्यद्वयमध्ये एतेन एकेन सूत्रेण एतदधिकरणं रचितमिति दृश्यते । रामानुजभाष्ये तु एतद् हि तदीयपञ्चमाधिकरणस्य सप्तसु सूत्रेषु अन्तिमं सूत्रम् । निम्बार्कभाष्ये तदीयपञ्चमाधिकरणस्य अष्टसु सूत्रेषु एतत् च अष्टमं सूत्रम् । माध्वभाष्ये तदीयसप्तदशाधिकरणमध्ये दशसु सूत्रेषु एतद् हि अष्टमं सूत्रम् । श्रीकण्ठ-भाष्ये तदीयदशमाधिकरणस्य सप्तसु सूत्रेषु एतच्च अन्तिमं सूत्रम्, श्रीपतिभाष्ये तदीय-त्रयोदशाधिकरणस्य सप्तसु सूत्रेषु एतत् अन्तिमं सूत्रम् । तथैव वल्लभभाष्ये तदीय-चतुर्दशाधिकरणस्य अष्टसु सूत्रेषु एतत् अन्तिमं सूत्रम् । तत्र रा-श्री-श्रीप-भाष्येषु "विहारो-पदेशात्" तथा "उपादानात्" इति सूत्रद्वयस्य एकीकरणात् एतदधिकरणस्य सप्तसंख्यक-सूत्रात्मकत्वम् । निम्बार्क-वल्लभ-भाष्यद्वयमध्ये तथा अकरणात् तदीयाधिकरणस्य अष्टसंख्यक-सूत्रात्मकत्वम् इति विशेषः । एवं च अस्मिन् सूत्रे शङ्कर-भास्कर-भिन्नाः षट् भाष्यकाराः एकमता-वलम्बिनः । तेन शङ्कर-भास्कर-भाष्ययोरेव दुष्टत्वं कल्पनीयम् ।

अत्र "तक्षा" इति प्रथमान्तपदस्य सत्त्वात् चतुर्थसामान्यनियमात् यद्यपि अधिकरणारम्भः समुचितः एव, तथापि चकारयोगात् तथा "यथा"-पदेन प्रकृतस्य दृष्टान्तरूपत्वात् नात्र अधिकरणारम्भः संगच्छते, षष्ठविशेषनियमात् । परन्तु तथापि अस्ति अत्र कश्चिद् विशेषः । तथाहि पूर्वाधिकरणे बुद्धेः कर्त्तृत्वं निरस्य जीवात्मनः कर्त्तृत्वं व्यवस्था-पितम् इत्यत्र सर्वेषामेव ऐकमत्यम् । ततःपरमेव यदि "यथा च तक्षोभयथा" इति उक्तं भवेत्, तदा किं चिन्तनीयम् ? आत्मनः तादृशकर्त्तृत्वप्रसंगाद् अनन्तरं तद्विषयिनी या एव स्वाभाविकी आकांक्षा जिज्ञासा वा भवति, सा यदि "यथा च तक्षा उभयथा" इति वाक्येन अभिव्यक्ता भवेत्, तदा तस्य कर्त्तृत्वस्य प्रकारतामात्रम् अत्र उच्यते—इत्येव कल्पनीयं भवति । तेन तत्र कर्त्तृत्वं तक्ष्णः उभयविधकर्त्तृत्ववत् कर्त्तृत्वम् इत्येव अत्र बोद्धव्यम् । अतः अत्र विधेयविषयिनी अतिरिक्ता काचित् कथा प्रस्तुता । तेन च अतिरिक्तविषयत्वेन विषय-भेदात् अस्य पृथगधिकरणत्वं युक्तमेव । वस्तुतस्तु "यथा च" पदेन सः अतिरिक्तः विषयः एव अत्र प्रस्तूयते इत्येव स्पष्टम् । चतुर्थसामान्यविशेषनियमाभ्यां तथा द्वादशविशेषनियमात् । अतः शङ्करभास्करभाष्यद्वयमेव अत्र संमतं भवति । अपरे सर्वे अत्र अधिकरणस्य अस्वतन्त्रतां बोधयन्तः इत्येव समीचीनमिति प्रतिभाति । यद्यपि निर्णयोऽयम् अधिकमतविरोधी, तथापि युक्त्युपेतत्वात्

तस्य निर्दोषत्वमेव वक्तव्यम्। "युक्तियुक्तमुपादेयं वचनं बालकादपि" इति प्रसिद्धेः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिरिति। एवं च अत्र रा-नि-म-श्री-श्रीप-ब-भाष्येषु अधिकरणस्य अरचनायां दोषः।

## षोडशं परायत्ताधिकरणम्।

अत्र "परात् तु तच्छ्रुतेः" २।३।४१ ( २५७ ) सूत्रस्य "परात्" इति पदात् अस्य "परायत्ताधिकरणं" नाम। तत्र निम्बार्क-मध्वभाष्य-भिन्नेषु भाष्येषु सूत्रद्वयं गृहीतम्। निम्बार्कभाष्ये अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम्। माध्वभाष्ये तु तदीयसप्तदशाधिकरणस्य दशसु सूत्रेषु एतत् नवमं सूत्रम्। तच्च सूत्रद्वयं—

( १ ) "परात् तु तच्छ्रुतेः" २।३।४१ (२५७)

( २ ) "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" २।३।४२ ( २५८ )

अत्र "परात् तु तच्छ्रुतेः" २।३।४१ (२५९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं, तथापि "तत् तु समन्वयात्" इति सूत्रवत् तु-शब्दस्य अनुक्तपूर्वपक्षव्यावृत्त्यर्थकत्वात् प्रकृतं "जीवकर्तृत्वादि" इति एकं पदम् अनुसञ्जनीयम्, प्रतियोगिज्ञानं विना निषेधस्य अनुपपत्तेः। तेन माध्वभाष्ये अत्र अधिकरणस्य अनारम्भात् तस्यैव दोषः कल्प्यते। पञ्चमसामान्यनियमात् तथा अष्टादशविशेषनियमात्।

( २ ) "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" २।३।४२ ( २५८ ) इत्यत्र "कृतप्रयत्नापेक्षः" इति प्रथमान्तपदसत्त्वेऽपि पूर्वपक्षव्यावर्त्तक-तु-शब्दयोगादपि उक्तपूर्वपक्षत्वात् अधिकरणारम्भः प्रतिषिध्यते। चतुर्थसामान्यनियमात् अष्टादशविशेषनियमाच्च। नवमविशेषनियमोऽपि द्रष्टव्यः। निम्बार्कभाष्ये अत्र अधिकरणारम्भात् तस्यैव दोषः। परसूत्रे सर्वत्र अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः सङ्गतैव। एवं च अस्मिन् अधिकरणे माध्वभाष्यस्य अधिकरणस्य अरचनायां एकः दोषः, निम्बार्कभाष्ये अधिकरणस्य रचनायाम् एकः दोषः।

## सप्तदशम् अंशाधिकरणम्।

अत्र "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" २।३।४३ ( २५९ ) इति सूत्रस्य "अंशः" इति पदात् अस्य "अंशाधिकरणं" नाम। तत्र माध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु एकादश सूत्राणि गृहीतानि। माध्वभाष्ये तु अत्र अधिकरणद्वयं कृतम्। तत्र अस्मिन् अधिकरणे अष्ट सूत्राणि, नवमसूत्रतः अन्यद् अधिकरणम्। तानि च एकादशसूत्राणि—

(१) "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" २।३।४३ (२५९)

(२) "मन्त्रवर्णाच्च" २।३।४४ (२५०)

(३) "अपि च स्मर्यते" २।३।४५ (२६१)

(४) "प्रकाशादिवन्नैवं परः" २।३।४६ (२६२)

(५) "स्मरन्ति च" २।३।५७ (२६३)

(६) "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्" २।३।४८ (२६४)

(७) "असन्ततेश्चाव्यतिकरः" २।३।४९ (२६५)

(८) "आभास एव च" २।३।५० (२६६)

(९) "अदृष्टानियमात्" २।३।५१ (२६७)

(१०) "अभिसन्ध्यादिष्वपि चैवम्" २।३।५२ (२६८)

(११) "प्रदेशादिति चेन्नान्तर्भावात्" २।३।५३ (२६९)

अत्र (१) "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वम् अधीयत एके" २।३।४३ (२५९) इति सूत्रस्य "अंशः" इति प्रथमान्तपदसत्त्वात् अनेन अधिकरणारम्भः संगतः एव। चतुर्थसामान्यनियमात्। सर्वेषां च अत्र ऐकमत्यम्। "अन्यथा चापि" इत्यादिपदैः साकांक्षत्वस्य अविधानात्, न वाधितम्। त्रयोदशविशेषनियमात्।

(२) "मन्त्रवर्णाच्च" २।३।४४ (२६०) इत्यत्र प्रथमान्तपदाभावात् तथैव चकार-सत्त्वात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च।

(३) "अपि च स्मर्य्यते" २।३।४५ (२६१) इत्यत्र तथैव। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

(४) "प्रकाशादिवन्नैवं परः" २।३।४६ (२६२) इत्यत्र "परः" इति प्रथमान्तपद-सत्त्वात् यद्यपि अधिकरणारम्भः संगतः, चतुर्थसामान्यनियमात, तथापि "एवं" इति शब्देन एतस्य साकांक्षत्वसाधनात् नात्र अधिकरणारम्भः संगच्छते। सप्तमविशेषनियमात्।

(५) "स्मरन्ति च" २।३।४७ (२६३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। अध्याहारेऽपि चकारस्य वाधकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेष-नियमाच्च।

(६) "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्" २।३।४८ (२६४) इत्यत्र "अनु-ज्ञापरिहारौ" इति प्रथमान्तपदसत्त्वेऽपि सर्वसम्मत्या एव नास्य अधिकरणारम्भकत्वम्, 'वत्'-शब्द-योगात् अर्थतः प्रसंगतश्च साकांक्षत्वसिद्धेः। चतुर्थसामान्यनियमात्।

(७) "असन्ततेश्चाव्यतिकरः" २।३।४९ (२६५) इत्यत्र "अव्यतिकरः" इति प्रथमान्तपदसत्त्वेऽपि, चतुर्थसामान्यनियमात्, चकारस्य योगात्, नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात्। "अव्यतिकर"-शब्दस्य अर्थतः तथा प्रसंगतश्च साकांक्षत्वम्। अतः न अधि-करणारम्भः।

(८) "आभास एव च" २।३।५० (२६६) इत्यत्र "आभासः" इति प्रथमान्तपदसत्त्वे अपि चकारयोगात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात्।

(९) "अदृष्टानियमात्" २।३।५१ (२६७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम्, चतुर्थसामान्यनियमात्। माध्वभाष्ये अधिकरणारम्भात् तत्रैव दोषः।

(१०) "अभिसन्ध्यादिष्वपि चैवम्" २।३।५२ (२६८) इत्यत्र "एवम्" इति प्रथमान्त-

पदसत्त्वेऽपि अस्य साकांक्षार्थकत्वात् नात्र अधिकरणारम्भः करणीयः। सप्तमविशेषनियमात्। चकारयोगात् अपि नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

( ११ ) "भक्ताविति चेन्नान्तर्भावात्" २।३।५३ ( २६९ ) इत्यत्र प्रथमान्तपदाभावात् तथैव "इति चेत्" इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् पञ्चमविशेषनियमाच्च। सर्वसम्मत्या पादशेषाच्च अत्रैव अधिकरणसमाप्तिश्च संगतैव। एवं च अत्र केवलं माध्वभाष्यस्य अधिकरणरचनायां दोषः एकः एव।

## सप्तमपादोपसंहारः

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

( १ ) कति कीदृशाश्च नियमाः अत्र सङ्कलिताः

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः भवितुम् उचिता इति।

एते च चत्वारो विषयाः अधस्तात् क्रमेण प्रदर्शनीयाः। तत्र प्रथमः तावत्—

### ( १ ) कति कीदृशाश्च नियमाः अत्र संकलिताः।

अत्र नियमद्वयमेव अतिरिक्तं सङ्कलितम्, यथा—

अष्टादशः नियमः—"प्रथमान्तपदात् परं यदि पञ्चम्यन्तपदसत्त्वं ततः परं यदि "इति-चेन्न" इति पदं, तदा अधिकरणारम्भः समुचितः एव"। एतदर्थम् "अन्तरा विज्ञानमनसी" इत्यादि २।३।१५ सूत्रं द्रष्टव्यम्।

ऊनविंशः नियमः—"उक्तपूर्वपक्षे प्रथमान्तपदेन सह निषेधार्थक-तु-शब्दस्य न अधिकरणस्य आरम्भकत्वम्"। एतदर्थं "तद्गुणसारत्वात्" इत्यादि २।३।२९ सूत्रं द्रष्टव्यम् इति।

इदानीं द्रष्टव्यम्—

### ( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः

तत्र २।३।२ अधिकरणे रा-नि-भाष्ये "एतेन मातरिश्वा व्याख्यातः" इति २।३।८ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।३ अधिकरणे रा-नि-श्रीप-भाष्येषु "असम्भवस्तु सतोऽनुपपत्तेः" इति २।४।९ सूत्रे-अधिकरणस्य अरचनायां दोषः।

२।३।४ अधिकरणे निम्बार्क-भाष्ये "तेजोऽतस्तथा ह्याह" इति २।३।१० सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।५ अधिकरणे रा-नि-श्री-भाष्येषु "आपः" इति २।३।११ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।६ अधिकरणे रा-नि-श्री-भाष्येषु "पृथिव्यधिकाररूपशब्दान्तरेभ्यः" इति २।३।१२ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।६ अधिकरणे निम्बार्कभाष्ये तदीये "पृथिवी" इति सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।७ अधिकरणे रा-नि-श्री-भाष्येषु "अभिध्यानादेव तु तल्लिङ्गात् सः" इति २।३।१३ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।८ अधिकरणे रा-नि-भाष्ययोः "विपर्य्ययेण तु क्रमोऽत उपपद्यते च" इति २।३।१४ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।९ अधिकरणे रा-नि-श्री-भाष्येषु "अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गात् सः" इति २।३।१५ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।१० अधिकरणे रा-म-व-भाष्येषु "चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" इति २।३।१६ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।११ अधिकरणे निम्बार्कभाष्ये "नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः" इति २।३।१७ सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।१२ माध्वीये अधिकरणे "युक्तेश्च" इति २।३।१९ सूत्रे अधिकरणस्य रचनायां दोषः।

२।३।१३ अधिकरणे रा-म-भाष्ययोः "उत्क्रान्तिगत्यागतीनाम्" इति २।३।१९ सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव माध्वभाष्ये "व्यतिरेको गन्धवत्" इति २।३।२६ सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "पृथगुपदेशात्" इति २।३।२८ सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव बल्लभभाष्ये "तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत्" इति २।३।२९ सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" इति २।३।३० सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात्" इति २।३।३१ सूत्रे अधिकरणस्य रचनायां दोषः।

२।३।१५ अधिकरणे रा-नि-म-श्री-श्रीप-व-भाष्येषु "यथा च तक्षोभयथा" इति २।३।४० सूत्रे अधिकरणस्य अरचनायां दोषः।

२।३।१६ अधिकरणे माध्वभाष्ये "परात् तु तच्छ्रुतेः" इति २।३।४१ सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव निम्बार्कभाष्ये "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" इति २।३।४२ सूत्रे अधिकरणस्य रचनायां दोषः।

२।३।१७ अधिकरणे माध्वभाष्ये "अदृष्टानियमात्" इति २।३।५१ सूत्रे अधिकरणस्य रचनायां दोषः ।

एवं च पादेऽस्मिन् भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | ६ दोषाः | ४ दोषाः |
| वल्लभभाष्ये | १ दोषः | २ दोषौ |
| निम्बार्कभाष्ये | २ दोषौ | १० दोषाः |
| रामानुजभाष्ये | ० | १० " |
| श्रीपतिभाष्ये | ० | २ दोषौ |
| श्रीकण्ठभाष्ये | ० | ५ दोषाः |

इति वक्तुं शक्यते । तथा च पादेऽस्मिन् शाङ्कर-भास्कर-भाष्ययोः दोषाभावः ।

इदानीं द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।**

प्रथमाधिकरणे—

न "वियदश्रुतेः" २।३।१ सूत्रे "तत् तेजोऽसृजत" ( छा: ६।२।३ ) "आत्मन आकाश सम्भूतः" ( तैः २।१ )

"शब्दाच्च" २।३।४ सूत्रे "वायुश्चान्तरिक्षं च एतदमृतम्" ( बृः २।३।३ )

"स्याच्चैकस्य ब्रह्मशब्दवत्" २।३।५ सूत्रे "अन्नं ब्रह्म" ( तैः ३।२।१ ) "आनन्दो ब्रह्म" ( तैः ३।६।१ )

"प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः" २।३।६ सूत्रे "सदेव सोम्येदमग्र आसीत्" (छा: ६।२।१) "ऐतदात्म्यमिदं सर्वम्" ( छाः ६।८।७ ) "तत् तेजोऽसृजत" ( छा: ६।२।३ )

द्वितीयाधिकरणे—

"एतेन मातरिश्वा व्याख्यातः" २।३।८ सूत्रे "आकाशाद् वायुः ( तैः २।१ ), सैषानस्तमिता देवता यद् वायुः ( बृः १।५।२२ )

तृतीयाधिकरणे—

"असम्भवस्तु सतोऽनुपपत्तेः" २।३।९ इति सूत्रे "न चास्य कश्चिज्जनिता न चाधिपः" ( श्वे० ६।९ ) "त्वं जातो भवसि विश्वतोमुखः" ( श्वेः ४।३ )

चतुर्थाधिकरणे—

"तेजोऽतस्तथा ह्याह" २।३।१० इति सूत्रे "वायोरग्निः" ( तैः २।१ ) "तत् तेजोऽसृजत" ( छा: ६।२।३ ) ।

पञ्चमाधिकरणे—

"आपः" २।३।११ इति सूत्रे "अग्नेरापः" ( तैः २।१ ) "तदपोऽसृजतः" (छाः ६।२।३)

षष्ठाधिकरणे—

"पृथिव्यधिकाररूपशब्दान्तरेभ्यः" २।३।१२ इति सूत्रे "अद्भ्यः पृथिवी" ( तैः २।१ ) "ता अन्नमसृजन्त" ( छाः ६।२।४ ) "तत् तेजोऽसृजत" (छाः ६।२।३) "यत् कृष्णं तदन्नस्य" (छाः ६।४।२ )।

सप्तमाधिकरणे—

"तदभिध्यानादेव तु तल्लिंगात् सः" २।३।१३ इति सूत्रे "आकाशाद् वायुः" (तैः २।१) "यः पृथिव्यां तिष्ठन्" ( बृ ३।७।३)।

अष्टमाधिकरणे—

"विपर्य्ययेण तु क्रमोऽत उपपद्यते च" २।३।१४ इति सूत्रे "यत् प्रयन्ति अभिसंविशन्ति" ( तैः ३।१ )

नवमाधिकरणे—

"अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्" २।३।१५ इति सूत्रे "एतस्माज्जायते प्राणः ( मु २।१।३ )"

दशमाधिकरणे—

"चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" १।३।१६ इति सूत्रे "न जीवो म्रियते ( छाः ६।११।३ )

एकादशाधिकरणे—

"नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः" २।३।१७ इति सूत्रे "सर्व एत आत्मनो व्युच्चरन्ति" ( बृः २।१।२० )"स वा एष महानज आत्मा" (बृः ८।८।२२) "अजो नित्यः" ( कठः २।१७ )

द्वादशाधिकरणे—

"ज्ञोऽत एव" २।३।१८ इति सूत्रे "आत्मैवास्य ज्योतिः" ( बृः ४।३।१ ) "पश्यंश्चक्षुः" ( बृः १।४।७ )

त्रयोदशाधिकरणे—

"उत्क्रान्तिगत्यागतीनाम्" २।३।१९ इति सूत्रे "सर्वव्यापी" ( श्वेः ६।११ ) "एषः अणुरात्मा" (मुः ३।१।९) "अस्माच्छरीरादुत्क्रामति" (कैः ३।९) "चन्द्रमसमेव ते सर्वे गच्छन्ति" (कैः १।२) "तस्माल्लोकात् पुनरेति" ( बृः ४।४।६ )

"नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्" २।३।११ इति सूत्रे "सर्वव्यापी" (श्वेः ६।११)

"स्वशब्दोन्मानाभ्यां च" २।३।२२ इति सूत्रे "एषोऽणुरात्मा" ( मु ३।१।९ ) "बाला-ग्रशतभागस्य" (श्वे: ५।८)

"अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद् हृदि हि" २।३।२४ इति सूत्रे "हृद्यन्तर्ज्योतिः" ( बृ: ४।३।७ )

"तथा च दर्शयति" २।३।२७ इति सूत्रे "आलोमभ्य आनखाग्रेभ्यः" ( छा: ८।८।१ )

"पृथगुपदेशात्" २।३।२८ इति सूत्रे "प्रज्ञया शरीरं समारुह्य" ( कौ ३।६ )

"यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" २।३।३० इति सूत्रे "स समानः सन्नुभौ लोकावनुसञ्चरति" ( बृ:८।३।७ )

"नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा" २।३।३२ इति सूत्रे "कामः संकल्पः" ( बृ: १।५।३ )

चतुर्दशाधिकरणे—

"विहारोपदेशात्" २।३।३४ इति सूत्रे "स्वे शरीरे यथाकामं परिवर्त्तते" ( बृ: २।१।१८)

"उपादानात्" २।३।३५ इति सूत्रे "प्राणानां विज्ञानेन विज्ञानमादाय" ( बृ: २।१।१७ )

"व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः" २।३।३६ इति सूत्रे "विज्ञानं यज्ञं तनुते" ( तैः २।५।१ )

"समाध्यभावाच्च" २।३।३९ इति सूत्रे "आत्मा वा अरे द्रष्टव्यः" ( बृ: २।४।५ )

पञ्चदशाधिकरणे—

"यथा च तक्षोभयथा" २।३।४० इति सूत्रे—"असङ्गो ह्ययं पुरुषः" ( बृ: ४।३।१५ )

षोडशाधिकरणे—

"परात् तु तच्छ्रुतेः" २।३।४१ इति सूत्रे "एष ह्येव साधु कर्म्म कारयति" (कौः ३।८)

"कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" २।३।४२ इति सूत्रे "ज्योतिष्टोमेन यजेत" ( तैः ब्रा ? ) "ब्राह्मणो न हन्तव्यः" ( श्रुतिः ? )

सप्तदशाधिकरणे—

"अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" २।३।४३ इति सूत्रे "तत्त्वमसि" ( छा: ६।८।७ ) "य आत्मनि तिष्ठन्" ( बृ: माध्य ) "ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः" ( श्रुतिः ? )

"मन्त्रवर्णाच्च" २।३।४४ इति सूत्रे—"पादोऽस्य विश्वा भूतानि" ( छा: ३।१२।६ )

"अपि च स्मर्य्यते" २।३।४५ इति सूत्रे "ममैवांशो जीवलोके जीवभूतः सनातनः" (गी:१५।७)

"स्मरन्ति च" २।३।४७ इति सूत्रे—"तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा" ( महा भा: १२।३४३।१५ )

"अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्" २।३।४८ इति सूत्रे "नान्यः अतोऽस्ति द्रष्टा" (बृः ३।७।२३)

इदानीं प्रकृतम् एतत्पादसूत्रोपजीव्यश्रुतिकलेन—

### (४) कीदृशी अस्य पादसंगतिः

अत्र दृश्यते—प्रथमादिनवानां अधिकरणानां मध्ये, "अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्" इति पञ्चदशसूत्रपर्य्यन्तं भूतभौतिकोत्पत्तिविषयक-श्रुतिविरोधः मीमांसितः, दशमाधिकरणम् आरभ्य सप्तदशाधिकरणपर्य्यन्तं च, तेन च पादान्तपर्य्यन्तं जीवोत्पत्ति-तत्-स्वरूपादिविषयकश्रुतिविरोधः परिहृतः इति। तर्कपादः नाम पूर्वस्मिन् पादे अश्रौतानां सांख्यादिमतवादिनां मतविरोधः तर्कयुक्तिबहिर्भूततया निराकृतः, अधुना श्रुतीनां मध्येऽपि परस्परविरोधाभावं प्रदर्शयितुं पादोऽयं प्रारब्धः इति च। तथापि विभिन्नभाष्यकृतां मते यथा एतत्पादप्रतिपाद्यं भवति तदपि अधस्तात् प्रदर्श्यते—

शांकरमते—पूर्वभागेन पञ्चमहाभूतश्रुतीनाम्, उत्तरभागेन च जीवश्रुतीनां परस्परविरोधपरिहारः।

भास्करमते—शाङ्करमतानुरूपम्।

निम्बार्कमते—ब्रह्मकार्य्यवियदाद्युत्पत्तौ जीवविषये च श्रुतीनाम् अविरोधप्रदर्शनम्।

रामानुजमते—आकाशादेः कार्य्यत्वनिरूपणम्।

माध्वमते—केवलश्रुत्यविरोधः।

श्रीकण्ठमते—श्रुतिवाक्यानां परस्परविरोधपरिहारः।

श्रीपतिमते—श्रुतीनाम् अन्योन्यविरुद्धत्वद्योतनात् जगतः ब्रह्मकारणत्वशङ्कानिरसनम्।

एतेषां पर्य्यालोचने कृते नात्र विशेषेण मतभेदः भाष्यकृतां मध्ये दृश्यते इत्येव अवगम्यते। इति सप्तमपादसमालोचनम्।

इति द्वितीयाध्याये तृतीयपादोपसंहारः।

---

## अथ द्वितीयाध्याये चतुर्थपादः।

### प्रथमं प्राणोत्पत्त्यधिकरणम्

अत्र "तथा प्राणाः" २।४।१ (२७०) इति सूत्रस्य "प्राणाः" इति पदात् तथा पादप्रतिपाद्यत्वात् अस्य "प्राणोत्पत्त्यधिकरणं" नाम। तत्र शांकर-भास्कर-निम्बार्क-भाष्येषु अस्मिन् अधिकरणे चत्वारि सूत्राणि, रामानुज-माध्व-श्रीकण्ठ-श्रीपति-भाष्येषु त्रीणि सूत्राणि, द्वितीय-तृतीय-सूत्रयोः एकीकरणात्। तथैव वल्लभभाष्ये पञ्च सूत्राणि गृहीतानि, परसूत्रस्यापि ग्रहणात्। तत् च सूत्रचतुष्टयम्—

१। "तथा प्राणाः" २।४।१ ( २७० ) | ३। "तत्प्राक्श्रुतेश्च" २।४।३ ( २७२ )
२। "गौण्यसम्भवात्" २।४।२ ( २७१ ) | ४। "तत्पूर्वकत्वाद् वाचः" २।४।४ ( २७३ )

अत्र ( १ ) "तथा प्राणाः" २।४।१ (२७०) इति सूत्रे "प्राणाः" इति प्रथमान्तपदात् तथा अनेन पादस्य आरम्भात् अस्य अधिकरणारम्भकत्वं संगतमेव । चतुर्थसामान्यनियमात् द्वितीयविशेषनियमाच्च ।

( २ ) "गौण्यसम्भवात्" २।४।२ (२७१) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं शक्नोयम् अपि। समस्तपदत्वेन व्याख्यानस्य दृष्टत्वात्। गौणी इति न पृथक्-पदत्वेन बोद्धव्यम्। चतुर्थसामान्यनियमात्। रा-श्री-श्रीप-भाष्येषु परसूत्रमपि एतदंगत्वेन पठ्यते। तत् न सम्यक्। चतुर्थसामान्यनियमात्।

( ३ ) "तत्प्राक्श्रुतेश्च" २।४।३ (२७२) इत्यत्र तथैव। चकारात् प्रथमान्तपदस्य अध्याहारेऽपि निषेधः, षष्ठविशेषनियमात् चतुर्थसामान्यनियमाच्च । रा-श्री-श्रीप-भाष्येषु पूर्व-सूत्रेण सह अस्य पाठात् तत्तन्मतेषु सूत्रत्रयेण अधिकरणं रचितम् । तन्न युक्तं, चकारेण पृथग्हेतुत्वस्य बोधनात् । चतुर्थविशेषनियमात् । माध्वभाष्ये तु तथा न कृतेऽपि "प्रतिज्ञानुरोधाच्च" इति एकम् अतिरिक्तं सूत्रं पठितम्, तेनैव अधिकरणं समाप्तं च। ततश्च "तत्प्राक्श्रुतेश्च" इति सूत्रेण एव एतत् द्वितीयम् अधिकरणं रचितम्; अतः तन्मतेऽपि एतदधिकरणे त्रीणि सूत्राणि भवन्ति । परन्तु "तत्प्राक्श्रुतेश्च" इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं संगतम्। अतः अधिकरणरचनायां माध्वभाष्यस्यैव दोषः।

( ४ ) "तत्पूर्वकत्वाद् वाचः" २।४।४ (२७३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम्। "वाचः" इति षष्ठ्यन्तं पदम्। चतुर्थसामान्यनियमात्। परसूत्रे अधिकसम्मत्यां पृथगधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः। माध्वभाष्ये अनेन एकेन सूत्रेण तदीय-तृतीयम् अधिकरणं रचितम्। तेन अत्र अधिकरणरचनायां माध्वभाष्यस्यैव दोषः। एवं च अस्मिन् अधिकरणे अधिकरणरचनायां माध्वभाष्यस्य दोषद्वयम्।

## द्वितीयं सप्तगत्यधिकरणम्

अत्र "सप्त गतेर्विशेषितत्वाच्च" २।४।५ (२७४) इति सूत्रस्य "सप्त-गति" शब्दात् अस्य "सप्तगत्यधिकरणं" नाम । अत्र श्रीपति-वल्लभमाध्वभिन्नेषु सर्वेषु भाष्येषु सूत्रद्वयं गृहीतम् । माध्वमते तु तदीयचतुर्थाधिकरणस्य सूत्रद्वयमध्ये एतत् प्रथमं सूत्रम् । वल्लभभाष्ये एतत् सूत्रं तदीय-प्रथमाधिकरणस्य सप्तसु सूत्रेषु अन्तिमं सूत्रम् । तेन तन्मते अनेन अधिकरणस्य अनारम्भात् तत्रैव दोषः । श्रीनिम्बार्कभाष्ये एतत्सूत्रद्वयम् एकसूत्रत्वेन पठितम्, तेनैव द्वितीयम् अधिकरणं रचितं च । तत् न युक्तम्—

१। "सप्त गतेर्विशेषितत्वाच्च" २।४।५ ( २७४ )

२। "हस्तादयस्तु स्थितेऽतो नैवम्" २।४।६ ( २७५ )

अत्र ( १ ) "सप्त गतेर्विशेषितत्वाच्च" २।४।५ (२७४) इति सूत्रे "सप्त" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं नियमानुगतमेव । चतुर्थसामान्यनियमात् । चकारात् अध्याहृतस्य प्रथमान्तपदस्यापि तथात्वं बाधितम् । षष्ठविशेषनियमात् । वल्लभभाष्ये अनेन अधिकरणस्य अरचनायां दोषः । चकारस्य हेतुसमुच्चायकत्वेन न बाधकत्वशङ्का । तत्र श्रीपतिभाष्ये परसूत्रस्य एतत्सूत्रांगत्वं दृश्यते । तत्र युक्तं । 'तु-शब्देन हेतौ' पृथक्त्वविधानात् । चतुर्थविशेषनियमात् ।

( २ ) "हस्तादयस्तु स्थितेऽतो नैवम्" २।४।६ (२७५) इत्यत्र "हस्तादयः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं प्रसज्यते, चतुर्थसामान्यनियमात्, तथापि संकोचार्थकस्य अथवा अनिषेधार्थकस्य तु-शब्दस्य योगात् तत्र संगच्छते; नवमविशेषनियमात् । अतः वल्लभभाष्ये अत्र अधिकरणारम्भात् दोषः । श्रीपतिभाष्ये एतत्सूत्रद्वयम् एकीकृत्य एकमेव अधिकरणं कृतम् । तेन तस्य सूत्रद्वयैककरणजन्यः दोषः, अधिकसम्मतेरभावात्, चतुर्थविशेषनियमाच्च । न तु अधिकरणरचनाऽरचनाजन्यदोषापत्तिः ।

## तृतीयं प्राणाणुत्वाधिकरणम् ।

अत्र "अणवश्च" २।४।७ (२७६) इति सूत्रस्य अणु-पदात् ततश्च अस्य प्रतिपाद्यानुसारेण अस्य "प्राणाणुत्वाधिकरणम्" नाम । तत्र शङ्कर-भास्कर-निम्बार्क-मध्व-श्रीकण्ठ-वल्लभभाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । रामानुज-श्रीपतिभाष्ययोः तु सूत्रद्वयं गृहीतम् ।

अत्र "अणवः" इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणारम्भः संगतः । चकारयोगात् नास्य तत्र बाधकं किञ्चित्, यतः अत्र विधेयभेदः सूच्यते । चतुर्थविशेषनियमात्, त्रयोदशविशेषनियमाच्च । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## चतुर्थं प्राणश्रैष्ठ्याधिकरणम्

अत्र "श्रेष्ठश्च" २।४।८ (२७७) इति सूत्रस्य श्रेष्ठ-पदात् ततश्च तात्पर्यानुरोधात् अस्य "प्राणश्रैष्ठ्याधिकरणं" नाम । तत्र शङ्कर-भास्कर-भाष्ययोः एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । रामानुज-श्रीपति-भाष्ययोः तदीयतृतीयाधिकरणस्य एतद्धि अन्तिमं सूत्रम् । तत्र न अनेन अधिकरणम् आरब्धम् । शङ्कर-भास्कर-भाष्यद्वयवत् निम्बार्क-मध्व-श्रीकण्ठ-वल्लभभाष्येषु तु अधिकरणम् आरब्धम् । तथापि निम्बार्कभाष्ये एतद्धि तदीयचतुर्थाधिकरणस्य षट्सु सूत्रेषु प्रथमं सूत्रम् । माध्वभाष्ये तदीयषष्ठाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम् । श्रीकण्ठभाष्ये तदीयचतुर्थाधिकरणस्य पञ्चसु सूत्रेषु प्रथमं सूत्रम् । वल्लभभाष्ये तदीयचतुर्थाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रं भवति । शंकर-भास्कर-निम्बार्क-श्रीकण्ठ-वल्लभ-भाष्येषु एतच्च चतुर्थाधिकरणम् ।

तत्र "दोषः" इति प्रथमान्तपदस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं युज्यते एव । चकारस्य विशेषभेदबोधकत्वात् नात्र अधिकरणारम्भे बाधा कापि वर्तते । चतुर्थसामान्यनियमात् त्रयोदशविशेषनियमाच्च । अत्र रामानुज-श्रीपति-भाष्यद्वयमध्ये अधिकरणस्य अनारम्भात् तयोरेव दोषः । परसूत्रे चतुर्षु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## पञ्चमं वायुक्रियाधिकरणम्

अत्र "न वायुक्रिये पृथगुपदेशात्" २।४।९ (२७८) इति सूत्रस्य "वायुक्रिये" पदात् अस्य "वायुक्रियाधिकरणं" नाम । तत्र शांकर-भास्कर-रामानुज-श्रीपति-भाष्येषु अत्र अधिकरणं रचितम् । शंकर भास्कर-मतद्वये तु एतत् पञ्चमम् अधिकरणम् । रामानुज-श्रीपतिमते च चतुर्थम् अधिकरणम् । शंकर-भास्कर-रामानुजभाष्येषु अत्र चत्वारि सूत्राणि गृहीतानि । श्रीपतिभाष्ये तु पञ्च सूत्राणि गृहीतानि । निम्बार्कभाष्ये तदीयचतुर्थाधिकरणस्य षट्सु सूत्रेषु एतत् द्वितीयं सूत्रम्, माध्वभाष्ये तदीयपञ्चमाधिकरणस्य सूत्रद्वयमध्ये एतद् हि द्वितीयं सूत्रम् । श्रीकण्ठभाष्ये तदीयचतुर्थाधिकरणस्य पञ्चसु सूत्रेषु द्वितीयं सूत्रम् । श्रीपति-भाष्ये तदीयचतुर्थाधिकरणस्य पञ्चसु सूत्रेषु एतत् प्रथमं सूत्रम् । वल्लभभाष्ये तदीयचतुर्थाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् इति विशेषः । तेन निम्बार्क-मध्व-श्रीकण्ठ-वल्लभ-भाष्येषु अधिकरणस्य अनारम्भात् तेषामेव दोषस्पर्शः । तानि च सूत्रचतुष्टयम्—

| | |
|---|---|
| १। "न वायुक्रिये पृथगुपदेशात्" २।४।९ ( २७८ ) | ३। अकरणत्वाच्च न दोषस्तथाहि दर्शयति २।४।११ ( २८० ) |
| २। चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः २।४।१० ( २७९ ) | ४। पञ्चवृत्तिर्मनोवद् व्यपदिश्यते २।४।१२ ( २८१ ) |

अत्र ( १ ) "न वायुक्रिये पृथगुपदेशात्" २।४।९ (२७८) इत्यत्र "वायुक्रिये" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं नियमानुमतम् एव । चतुर्थसामान्यनियमात् । नि-म-श्री-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ।

( २ ) "चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः" २।४।१० (२७९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चक्षुरादिवत् इत्यतः प्रथमान्तपदस्य अध्याहारेऽपि शङ्कानिरासक-तु-शब्दयोगात् न तत्सिद्धिः । चतुर्थसामान्यनियमात् । त्रयोदशविशेषनियमाच्च । मध्व वल्लभभाष्यद्वयमध्ये अधिकरणारम्भात् तयोरेव दोषः ।

( ३ ) "अकरणत्वाच्च न दोषस्तथाहि दर्शयति" २।४।११ (२८०) इत्यत्र "दोषः" इति प्रथमान्तपदसत्त्वेऽपि हेतुसमुच्चायकचकारस्य सत्त्वात् नास्य अधिकरणारम्भकत्वं युक्तम् । तत्र सर्वसम्मतमेव । चतुर्थसामान्यनियमात् त्रयोदशविशेषनियमाच्च ।

( ४ ) "पञ्चवृत्तिर्मनोवद् व्यपदिश्यते" २।४।१२ (२८१) इत्यत्र "पञ्चवृत्तिः" इति

प्रथमान्तपदत्वात् अत्र अधिकरणारम्भकत्वं युक्तम्, तथापि पूर्वसूत्रे च-कारात् साकांक्षत्व-प्रसक्तेः नात्र तथात्वं संगतम् । चतुर्थसामान्यनियमात् सप्तदशविशेषनियमाच्च । परसूत्रे पञ्चसु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते । माध्वभाष्ये अत्र अधिकरणस्य आरम्भात् तस्य दोषः ।

## षष्ठं श्रेष्ठाणुत्वाधिकरणम् ।

अत्र "अणुश्च" २।४।१३ (२८२) इति सूत्रस्य "अणु"-शब्दात् तथा तत्पूर्वसूत्रानुरोधात् अस्य "श्रेष्ठाणुत्वाधिकरणं" नाम । तत्र शंकर-भास्कर-रामानुज-मध्व-श्रीकण्ठ-भाष्येषु अधिकरणम् आरब्धम् । तत्र शंकर-भास्कर-रामानुज-मध्व-भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । श्रीकण्ठभाष्ये तु एतदारभ्य सूत्रद्वयेन एतदधिकरणम् । तत्र च रामानुजभाष्ये तदीयपञ्चमा-धिकरणस्य, माध्वभास्ये तदीयनवमाधिकरणस्य, तथा श्रीकण्ठभाष्ये तदीयपञ्चमाधिकरणस्य एतत् सूत्रम् इति बोद्धव्यम् । श्रीकण्ठभाष्ये तु तदीयपञ्चमाधिकरणस्य सूत्रद्वयमध्ये एतदेव प्रथमं सूत्रम् । निम्बार्कभाष्ये तदीयचतुर्थाधिकरणस्य षट्सु सूत्रेषु एतद्धि अन्तिमं सूत्रम् । श्रीपतिभाष्ये तदीयचतुर्थाधिकरणस्य पञ्चसु सूत्रेषु एतदेव पञ्चमं सूत्रम् । तथैव वल्लभ-भाष्ये तदीयपञ्चमाधिकरणस्य चतुर्षु सूत्रेषु एतदपि चतुर्थं सूत्रम् । तेन निम्बार्क-श्रीपति-वल्लभ-भाष्येषु एतेन अधिकरणस्य अनारम्भात् दोषः एव कल्पनीयः ।

अत्र "अणुः" इति प्रथमान्तपदस्य सत्त्वात् अधिकरणारम्भः समुचितः । चतुर्थ-सामान्यनियमात् । चकारयोगस्तु नात्र तस्य व्याघातकः, विधेयभेदस्य सूचनात् । त्रयोदश-विशेषनियमात् । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणस्य समाप्तिश्च संगच्छते ।

## सप्तमं ज्योतिराद्यधिकरणम्

अत्र "ज्योतिराद्यधिष्ठानं तु तदामननात्" २।४।१४ (२८३) इति सूत्रस्य ज्योतिरादिपदात् अस्य "ज्योतिराद्यधिकरणं" नाम । तत्र शंकर-भास्कर-मध्व-भाष्येषु सूत्रत्रयं गृहीतम् । रामानुज-श्रीपति-भाष्यद्वयमध्ये सूत्रद्वयम्, प्रथमद्वितीयसूत्रयोः एकीकरणात् । निम्बार्कभाष्ये पञ्च सूत्राणि, वल्लभभाष्ये एकमेव सूत्रम् । श्रीकण्ठभाष्ये तु एतेन अधिकरणं न रचितम् । तत्र तदीयपञ्चमाधिकरणस्य सूत्रद्वयमध्ये एतद्धि अन्तिमं सूत्रं भवति । एवं च एकं श्रीकण्ठ-भाष्यं विहाय सर्वेषु भाष्येषु अत्र अधिकरणं रचितम् । तानि च सूत्रत्रयम्—

१ । "ज्योतिराद्यधिष्ठानं तु तदामननात्" २।४।१४ (२८३)
२ । "प्राणवता शब्दात्" २।४।१५ (२८४)
३ । "तस्य च नित्यत्वात्" २।४।१६ (२८५)

(१) अत्र "ज्योतिराद्यधिष्ठानं तु तदामननात्" २।४।१४ (२८३) इत्यत्र "ज्योतिराद्यधिष्ठानम्" इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणारम्भकत्वं युक्तमेव । चतुर्थसामान्य-

नियमात्। च-शब्देन न तस्य व्याघातः, निर्धारणार्थकत्वात् तस्य। अष्टावयवविशेषनियमात्। रा-श्री-श्रीप-भाष्येषु परसूत्रमपि अनेन सह पठितं दृश्यते। तज्जनित-दोषगुणविचारः प्रागेव कृतः, अत्र नाम पुनर्विचार्यते। परन्तु तत्र युक्तम्। चतुर्थविशेषनियमात्। श्रीकण्ठभाष्ये अधिकरणस्य अनारम्भात् तस्यैव दोषः इति कल्प्यते।

( २ ) "प्राणवता शब्दात्" २।४।१५ (२८४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। वल्लभभाष्ये तु अधिकरणस्य रचनायां तस्यैव दोषः। रा-श्री-श्रीप-भाष्येषु एतत्सूत्रस्य पूर्वसूत्राङ्गत्वं दृश्यते, तत्र सम्यक्। परसूत्रीय-च-कारस्य अध्याहर्तव्यत्वात् हेतोः पार्थक्यविधानात् च। चतुर्थविशेषनियमात्।

( ३ ) "तस्य च नित्यत्वात्" २।४।१६ (२८५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। च-कारस्य न बाधकत्वम्, षष्ठविशेषनियमात्। श्रीकण्ठभाष्ये अधिकरणस्य रचनायां दोषः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता। एवं च अत्र श्रीकण्ठभाष्यस्य दोषद्वयम्, वल्लभभाष्यस्य तु एक एव।

## अष्टमम् इन्द्रियाधिकरणम्

अत्र "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" २।४।१७ (२८६) इति सूत्रस्य "इन्द्रियाणि"-पदात् अस्य "इन्द्रियाधिकरणं" नाम। तत्र शांकर-भास्कर-माध्व-वल्लभ-भाष्येषु त्रीणि सूत्राणि गृहीतानि। रामानुज-श्रीकण्ठ-श्रीपति-भाष्येषु सूत्रद्वयं गृहीतम्, द्वितीयतृतीयसूत्रद्वयस्य एकीकरणात्। निम्बार्कभाष्ये अत्र अधिकरणं न आरब्धम्। तन्मते तदीयपञ्चमाधिकरणस्य पञ्चसु सूत्रेषु एतद्धि चतुर्थं सूत्रम्। रामानुज-श्रीकण्ठ-भाष्ययोः सप्तमाधिकरणस्य सूत्रद्वयमध्ये एतच्च प्रथमं सूत्रम्। माध्वभाष्ये एकादशाधिकरणस्य सूत्रत्रयमध्ये एतद्धि प्रथमं सूत्रम्। श्रीपतिभाष्ये तदीयषष्ठाधिकरणस्य सूत्रद्वयमध्ये एतच्च प्रथमं सूत्रम्। वल्लभभाष्ये अष्टमाधिकरणस्य सूत्रत्रयमध्ये एतच्च प्रथमं सूत्रम्। तानि च त्रीणि सूत्राणि—

| | |
|---|---|
| १। "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" २।४।१७ (२८६) | २। "भेदश्रुतेः" २।४।१८ (२८७)<br>३। "वैलक्षण्याच्च" २।४।१९ (२८८) |

तत्र ( १ ) "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" २।४।१७ (२८६) इति सूत्रस्य "ते इन्द्रियाणि" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं संगतमेव। चतुर्थसामान्यनियमात्। निम्बार्कभाष्ये अत्र अधिकरणस्य अनारम्भात् तस्य दोषः।

( २ ) "भेदश्रुतेः" २।४।१८ (२८७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। रा-नि-श्री-श्रीप-भाष्येषु परसूत्रमपि एतस्य शेषत्वेन दृश्यते। तत्र युक्तम्। परसूत्रे च-कारात् पृथग्घेतुत्वस्य सूचनात्। चतुर्थविशेषनियमात्।

( ३ ) "वैलक्षण्याच्च २।४।१९ (२८८) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। च-कारोऽपि न साधकः, षष्ठविशेषनियमात्। रा नि-श्री-श्रीप-मतेषु एतत्सूत्रम् पूर्वसूत्रस्य शेषतया पठितम्। तत्र युक्तम्। तत्र हेतुश्च उक्तः एव। चतुर्थविशेषनियमात्। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगता एव।

## नवमं संज्ञामूर्तिक्लृप्त्यधिकरणम्

अत्र "संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" २।४।२० (२८९) इति सूत्रस्य "संज्ञामूर्तिक्लृप्तिः" इति पदात् अस्य "संज्ञामूर्तिक्लृप्त्यधिकरणं" नाम। अत्र मध्व वल्लभ-मिन्नेषु भाष्येषु सर्वत्र सूत्रत्रयम् गृहीतम्। शंकर-भास्कर-भाष्ययोः नवमाधिकरणस्य एतत् प्रथमं सूत्रम्। रामानुजभाष्ये तदीयाष्टमाधिकरणस्य प्रथमं सूत्रम्, निम्बार्कभाष्ये तदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्। माध्वभाष्ये तदीयद्वादशाधिकरणस्य प्रथमं सूत्रम्। श्रीकण्ठभाष्ये तदीयाष्टमाधिकरणस्य प्रथमं सूत्रम्। श्रीपतिभाष्ये तदीयसप्तमाधिकरणस्य प्रथमं सूत्रम्। वल्लभभाष्ये तदीयनवमाधिकरणस्य प्रथमं सूत्रम् इति विशेषः। तानि च त्रीणि सूत्राणि—

१। "संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" २।४।२० (२८९)

२। "मांसादि भौमं यथाशब्दमितरयोश्च" २।४।२१ (२९०)

३। "वैशेष्यात् तु तद्वादस्तद्वादः" २।४।२२ (२९१)

अत्र ( १ ) "संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" २।४।२० (२८९) इति सूत्रस्य "संज्ञामूर्तिक्लृप्तिः" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगतः एव। चतुर्थसामान्यनियमात्। तु-शब्दोऽपि न बाधकः, उक्तपूर्वपक्षत्वात्। अष्टादशविशेषनियमात्। सर्वैश्च तथैव कृतम्।

( २ ) "मांसादि भौमं यथाशब्दमितरयोश्च" २।४।२१ (२९०) इत्यत्र "मांसादि भौमं" इति प्रथमान्तपदद्वयसत्त्वात् यद्यपि अधिकरणारम्भः सङ्गतः एव, चतुर्थसामान्यनियमात्, तथापि चकारयोगात् तस्य न तथात्वम्। षष्ठविशेषनियमात्। मध्व-वल्लभ-भाष्यद्वयमध्ये अनेन पृथगधिकरणस्य रचनायां तयोरेव दोषः।

( ३ ) "वैशेष्यात् तु तद्वादस्तद्वादः" २।३।२२ (२९२) इत्यत्र "तद्वादः" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः यद्यपि संगच्छते, चतुर्थसामान्यनियमात्, तथापि तु-शब्देन तस्य व्याघातः सञ्जातः इति बोद्धव्यम्। नवमविशेषनियमात्। अत्र तद्वादः इति पदस्य द्विरुक्तत्वात् अत्रैव अध्यायसमाप्तिः, सुतरां पादसमाप्तिरपि इति।

### अष्टमपादोपसंहारः।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

( १ ) कति कौरस्थान नियमा अत्र संकलिताः

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृताः

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

( ४ ) उपजीव्यश्रुतिविरुद्धत्वेन कीदृशी च पाठसंगतिः समुचिता इति ।

एते च चत्वारः विषया अधस्तात् क्रमेण प्रदर्श्यन्ते । तत्र प्रथमस्तावत्—

( १ ) कति कौरस्थान नियमा अत्र संकलिताः ।

अत्र न एकोऽपि नूतनः नियमः सङ्कलितः । अतः न एतत् अत्र आलोचनीयम् ।

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृताः ।

तत्र २।४।१ अधिकरणे माध्वभाष्ये "तत् प्राक्श्रुतेश्च" इति २।४।२ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "तत्पूर्वकत्वाद् वाचः" इति २।४।४ सूत्रे अधिकरणस्य रचनायां दोषः ।

२।४।२ अधिकरणे वल्लभभाष्ये "सप्त गतेर्विशेषितत्वाच्च" इति २।४।५ सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव वल्लभभाष्ये "हस्तादयस्तु स्थितेऽतो नैवम्" इति २।४।६ सूत्रे अधिकरणस्य रचनायां दोषः ।

२।४।४ अधिकरणे रा-श्रीप-भाष्यद्वये "श्रेष्ठश्च" इति २।४।८ सूत्रे अधिकरणस्य अरचनायां दोषः ।

२।४।५ अधिकरणे म-नि-श्री-व-भाष्येषु "न वायुक्रिये पृथगुपदेशात्" इति २।४।९ सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव म-व-भाष्यद्वये "चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः" इति २।४।१० सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "पञ्चवृत्तिर्मनोवद्व्यपदिश्यते" इति २।४।१२ सूत्रे अधिकरणस्य रचनायां दोषः ।

२।४।६ अधिकरणे नि-श्रीप-व-भाष्येषु "अणुश्च" इति २।४।१३ सूत्रे अधिकरणस्य अरचनायां दोषः ।

२।४।७ अधिकरणे श्रीकण्ठभाष्ये "ज्योतिराद्यधिष्ठानं तु तदामननात्" इति २।४।१४ सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव वल्लभभाष्ये "प्राणवता शब्दात्" इति २।४।१५ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव श्रीकण्ठभाष्ये "तस्य च नित्यत्वात्" इति २।४।१६ सूत्रे अधिकरणस्य रचनायां दोषः ।

२।४।८ अधिकरणे निम्बार्कभाष्ये "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" इति २।४।१७ सूत्रे अधिकरणस्य अरचनायां दोषः ।

२।४।९ अधिकरणे मध्व-बल्लभ-भाष्ययोः "मांसादि भौमं यथाशब्दमितरयोश्च" इति १।४।११ सूत्रे अधिकरणस्य रचनायां दोष. ।

एवं च पादे अस्मिन् भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | १ दोषः | ५ दोषाः |
| बल्लभभाष्ये | ३ दोषाः | ४ " |
| रामानुजभाष्ये | १ दोषः | ० " |
| श्रीपतिभाष्ये | २ दोषौ | ० " |
| निम्बार्कभाष्ये | ३ दोषाः | ० " |
| श्रीकण्ठभाष्ये | २ दोषौ | १ दोषः |

इति वक्तुं शक्यते । तथा च पादे अस्मिन् शङ्कर-भास्कर-भाष्ययोः दोषाभावः दृश्यते ।

इदानीं द्रष्टव्यम्—

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

प्रथमाधिकरणे—

"तथा प्राणाः" २।४।१ इति सूत्रे 'एतस्माज्जायते प्राणो मनः" ( मुः २।१।३ )

"ऋषयो वाव तेऽग्रे असदासीत्" ( ? )

"तत् प्राक् श्रुतेश्च" २।४।३ इति सूत्रे "एतस्माज्जायते प्राणो मनः" ( मुः २।१।३ )

"तत्पूर्वकत्वाद् वाचः" २।४।४ इति सूत्रे "तत् तेजोऽसृजत" (छाः ६।२।३) "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजमयी वाक्" ( छाः ६।४।५ )

द्वितीयाधिकरणे—

"सप्त गतेर्विशेषितत्वाच्च" २।४।५ इति सूत्रे "सप्त प्राणाः प्रभवन्ति तस्मात्" (मुः २।१।८)

"सप्त वै शीर्षण्याः प्राणाः" (?)

"हस्तादयस्तु स्थितेऽतो नैवम्" १।४।६ इति सूत्रे "हस्तौ वै ग्रहः" ( बृः ३।२।८ ), "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनुत्क्रामन्ति" (बृः ४।४।२), "स यदायं चाक्षुषः पुरुषः" (बृः ४।४।१), "दशमे पुरुषे प्राणा आत्मैकादशस्ते यदा अस्मात् शरीरात् मर्त्याद् उत्क्रामन्ति अथ रोदयन्ति" (बृः ३।९।४) ।

तृतीयाधिकरणे—

"अणवश्च" २।४।७ इति सूत्रे "प्राणाः सर्वेऽनन्ताः" (?)

चतुर्थाधिकरणे—

"श्रेष्ठश्च" २।४।८ इति सूत्रे "एतस्माज्जायते प्राणः" ( मुः २।१।३ ) "आनीदवातम्" ( ऋक् ८।७।१७ )

पञ्चमाधिकरणे—

"न वायुक्रिये पृथगुपदेशात्" २।४।९ इति सूत्रे "यः प्राणः स वायुः" (?), "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" ( मुः २।१।३ ) "सवायुना ज्योतिषा" ( छाः ३।१८।४ )

"अकरणत्वाच्च न दोषस्तथाहि दर्शयति" २।४।११ इति सूत्रे "तान् वरिष्ठः प्राण उवाच मा मोहम् आपद्यथ अहमेव एतत् पञ्चधा आत्मानं प्रविभज्य एतद्बाणम् अवष्टभ्य विधारयामि ।" (प्रश्नः २।३)

षष्ठाधिकरणे—

"अणुश्च" २।४।१३ इति सूत्रे "सम एभिः त्रिभिः लोकैः" ( बृ १।३।२२ )

सप्तमाधिकरणे—

"ज्योतिराद्यधिष्ठानं तु तदामननात्" २।४।१४ इति सूत्रे "आदित्यश्चक्षुर्भूत्वा" (ऐः २।४) "चक्षुषा हि रूपाणि पश्यति" ( बृः ३।२।५ )

प्राणवता शब्दात्" २।४।१५ इति सूत्रे "स चाक्षुषः पुरुषो दर्शनाय चक्षुः" (छाः ८।१२।४)

अष्टमाधिकरणे—

"त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" २।४।१७ इति सूत्रे "एतस्माज्जायते प्राणो मनः" (मुः २।१।३), "त एतस्यैव सर्वे रूपम् अभवन्" (बृः १।५।२१)

"भेदश्रुतेः" २।४।१८ इति सूत्रे "अथ हेममासन्यं प्राणमूचुः" (बृः १।३।२)

नवमाधिकरणे—

"संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" २।४।२० इति सूत्रे "अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि" (छाः ६।३।२), "आकाशो ह वै नाम नामरूपयोर्निर्वहिता" (छाः ८।१४।१) "तासां त्रिवृतं त्रिवृतम् एकैकां करवाणि" (छाः ६।३।२)

"मांसादि भौमं यथाशब्दमितरयोश्च" २।४।२१ इति सूत्रे "अन्नम् अशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, यो मध्यमः तन्मांसं योऽणिष्ठः तन्मनः (छाः ६।५।१) ।

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

### ( ४ ) कीदृशी अस्य पादसंगतिः

अध्यायस्य अस्य तृतीयचतुर्थपादौ भूतभौतिकोत्पत्त्यादिविषये श्रुतीनां परस्परविरोध-परिहाराय—इति प्रागेव उक्तम् । तेन पूर्वपादे भूतभोक्तृश्रुतिविरोधं विधूय अस्मिन् पादे भौतिकेन्द्रियादि-विषयक-श्रुतिविरोधः निराकृतः इत्येव दृश्यते । एवं च भाष्यकृतां मध्ये अत्र नः विशेषेण मतभेदः सञ्जातः । तथापि तेषां पादप्रतिपाद्यानि अधस्तात् प्रदर्श्यन्ते—

शांकरमते—लिंगशरीरश्रुतीनां विरोधपरिहारः

भास्करमते—प्रायेण तथैव

रामानुजमते—इन्द्रियादेः कार्य्यत्वनिरूपणम्

निम्बार्कमते—जीवकरणश्रुतीनाम् अविरोधप्रदर्शनम्

मध्वमते—सयुक्तिकश्रुत्यविरोधः

श्रीकण्ठमते—भौतिकोत्पत्तिश्रुतिविरोधपरिहारः

श्रीकरमते—जीवस्य ब्रह्मकार्य्यत्वेऽपि चेतनत्वात् अजन्यत्व-स्वाभाविकभिन्नत्व-तत्-स्वरूपत्वानां प्रदर्शनेन तस्य तल्लिंगशरीरत्व-प्रतिपादनम् । इति ।

अत्र यो विशेषतः भेदः प्रदृश्यते स तु मध्वमते तथा श्रीकरमते एव । तत्रापि मध्वमते आपाततः भेदसत्त्वेऽपि फलतः न अनैक्यम् इति तदीयभाष्यादितः प्रतीयते । श्रीकरभाष्यस्य गतिस्तु चिन्तनीया । तत्र जीवविषयकप्रसंगादिकं बाहुल्येन सन्निविष्टम्—इति सूत्र-मात्रपाठतः अवगम्यते । एवं च योऽयम् अत्र मतभेदः, स तु उपेक्षणीयः एव प्रतिभाति । मतविशेषे उपलभ्यमाने, तस्य अन्यथाकरणेन कथञ्चिद् अपूर्वत्वसाधनं न दुष्करं, सम्प्रदाय-रक्षणार्थं स्वमत-स्वातन्त्र्यप्रदर्शनं यत्र प्रयोजनं भवेत् । अतः भाष्याणां व्यासमतसन्निकृष्टत्व-विचारे प्राचीनत्वं प्राचीनमूलकत्वम् एतदुभयं स्मरणीयम् इति दिक् । इति अष्टमपादसमालोचनम् ।

## द्वितीयाध्यायसमालोचनम् ।

एवं च एतदध्यायस्य चतुर्षु पादेषु यत् प्रतिपादितं तथा यच्च प्रथमाध्याये आलोचितं तस्य पर्य्यालोचने कृते विभिन्नश्रुतिवाक्योत्थसंशयमीमांसा एव एतद्ग्रन्थस्य प्रयोजनमिति अतिस्पष्टतया प्रतिभाति । नात्र सूत्रकारस्य स्वकीयमतप्रदर्शनस्पृहा काचिदपि दृश्यते । श्रुतीनाम् अभ्रान्तत्वं तथा व्यक्तिविशेषोद्भावितमतानां अप्रामाणिकत्वं ग्रन्थकारस्य हृदयं मूलमन्त्रं वा । अतः प्रथमाध्याये श्रुतीनां समन्वये साधिते, तत्र सम्भावितविरोधपरिहारार्थं अयं द्वितीयः अध्यायः । स्वमतवर्णनान्तरं परमतखण्डनं विना स्वमतदार्ढ्यं न संभवति । यथा इतरभेदानुमापकं लक्षणं वस्तुनिर्णये सम्यक् कौशलं, तद्भिन्नानां तत्त्ववारणाय, यथा रजत-ज्ञानार्थिने रजतखण्डं प्रदर्श्य सीसकवंगादिधातुभेदोऽपि तस्मै शिक्षणीयः, सीसकवंगादिषु

स्वतन्त्रमवतारणाय, तथा स्वपक्षस्थापनानन्तरं परपक्षनिरसनमपि प्रयोजनं स्वपक्षदार्ढ्याय, सम्भावितआशङ्कितभ्रान्तिनिवारणाय च । अतः अस्मिन् द्वितीये अध्याये परपक्षखण्डनद्वारा अविरोधप्रदर्शनं अतीव युक्तियुक्तम् आकांक्षानुरूपं च । तेन अस्य प्रथमे पादे स्वमतोपरि आपतिताक्षेपस्य युक्तिबलेनैव निरसनं कृतं, द्वितीये पादे 'विषस्य विषमौषधम्' इतिवत् युक्तिमाश्रित्य परेषां मते युक्तिविरोधस्यैव प्रदर्शनं कृतं, तृतीये चतुर्थे च पादद्वये परोद्भावित-श्रुतिविरोधस्यापि निराकरणं कृतम् । स्वमतसमर्थनासमर्थस्य परमतेनापि परमतपराभवचेष्टा-निरसनवत् । अतः युक्तमेतत् विरोधपरिहारप्रदर्शनम् एतद् द्वितीयाध्यायस्य ।

एवं च यदि एतदध्यायान्तर्गतपादचतुष्टयस्य समालोचनफलम् अत्र समाह्रियते तदा तद् इत्थमेव भवति—

| भाष्यकाराः | प्रथमपादे अधिकरण- रचनायां दोषः | प्रथमपादे अधिकरण- अरचनायां दोषः | द्वितीयपादे अधिकरण- रचनायां दोषः | द्वितीयपादे अधिकरण- अरचनायां दोषः | तृतीयपादे अधिकरण- रचनायां दोषः | तृतीयपादे अधिकरण- अरचनायां दोषः | चतुर्थपादे अधिकरण- रचनायां दोषः | चतुर्थपादे अधिकरण- अरचनायां दोषः | |
|---|---|---|---|---|---|---|---|---|---|
| शङ्करः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| भास्करः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| रामानुजः | ० | ३ | १ | १ | १० | ० | ० | १ | १६ |
| निम्बार्कः | ० | ३ | ० | २ | १० | २ | ० | ३ | २० |
| मध्वः | ३ | ५ | ६ | २ | ४ | ६ | ५ | १ | ३२ |
| श्रीकण्ठः | १ | ३ | २ | १ | ५ | ० | १ | २ | १५ |
| श्रीपतिः | ० | २ | ० | १ | २ | ० | ० | २ | ७ |
| वल्लभः | ३ | ४ | १ | १ | २ | १ | ४ | ३ | १९ |
| समष्टिः | ७ | २० | १० | ८ | ३३ | ९ | १० | १२ | १०९ |

एवं च—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| रामानुजभाष्ये | | १६ | दोषाः | तत्र रचनायां | ११ | अरचनायां | ५ दोषाः |
| निम्बार्क | ,, | २० | ,, | ,, | १० | ,, | १० ,, |
| मध्व | ,, | ३२ | ,, | ,, | १८ | ,, | १४ ,, |
| श्रीकण्ठ | ,, | १५ | ,, | ,, | ९ | ,, | ६ ,, |
| श्रीपति | ,, | ७ | ,, | ,, | २ | ,, | ५ ,, |
| वल्लभ | ,, | १९ | ,, | ,, | १० | ,, | ९ |

एतेन केवलं शङ्करभास्करभाष्ययोः दोषाभावः ।

ततश्च ये च अतिरिक्तनियमा अत्र द्वितीयाध्याये संकलिताः ते पञ्चसंख्यकाः यथा—

चतुर्दशनियमः—"चेत्"-"इति चेन्न"-प्रभृति-शब्दसत्त्वेऽपि यत्र शङ्काभावे पञ्चम्यन्त-प्रथमान्त-पद-द्वय-सत्त्वं तत्र अधिकरणारम्भः युक्तः"। यथा "भोक्त्रापत्तेः अविभागश्चेत् स्याल्लोकवत्" इति २।१।१३ सूत्रे अधिकरणारम्भः।

पञ्चदशनियमः—"यत्र पूर्वसूत्रे "व्याख्यातम्" "तदुक्तम्" एवंजातीयकं प्रसंगसमाप्ति-सूचकं पदं, तत्र निरपेक्षत्वबोधकत्वे सति अधिकरणारम्भः करणीयः।" यथा—"विकरणत्वान्नेति चेत् तदुक्तम्" २।१।३१ इति सूत्रे, ततः "न प्रयोजनवत्त्वात्" २।१।३२ इति सूत्रे अधिकरणस्य आरम्भः।

षोडशनियमः—"यत्र हेतुत्रयं चकारादिपदेन समाहियते तत्र अधिकरणसमाप्ति-कल्पनम् उचितम्, तेन तदनन्तरं यत् सूत्रं तेन अधिकरणारम्भः संगच्छते"। यथा "उपपद्यते चाप्युपलभ्यते च" २।१।३६ इति सूत्रे "ततः सर्वधर्म्मोपपत्तेश्च" २।१।३७ इति सूत्रे अधिकरणस्य आरम्भः।

सप्तदशनियमः—"यत्र पूर्वापरसूत्रयोर्मध्ये चकारयोगो भवेत् तत्र मध्यपतितसूत्रस्य प्रथमान्तपदस्य साकांक्षत्वम् अनुमाय अंगसूत्रत्वं कल्पनीयम्" यथा—"वैधर्म्याच्च न स्वप्नादिवत्" २।२।२९ इति सूत्रे, ततः "न भावोऽनुपलब्धेः" २।२।३० इति सूत्रे, ततः "क्षणिकत्वाच्च" २।२।३१ इति सूत्रे न अधिकरणस्य आरम्भः।

अष्टादशनियमः—"उक्तपूर्वपक्षे प्रथमान्तपदेन सह निषेधार्थक-तु-शब्दस्य नाधि-करणारम्भकत्वम्"। यथा—"तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत्" २।३।२९ इति सूत्रे न अधिकरणारम्भः। विस्तरस्तु यथास्थानं द्रष्टव्यः। एते एव नियमाः द्वितीयाध्याये संकलिताः।

इदानीं द्रष्टव्यम्—केषु सूत्रेषु कस्य भाष्यस्य कियत्संख्यकः दोषः इति—

"इतरेषां चानुपलब्धेः" २।१।२ सूत्रे वल्लभस्य अधिकरणरचनायां दोषः। १

"एतेन योगः प्रत्युक्तः" २।१।३ सूत्रे मध्वस्य अधिकरणस्य अरचनायां दोषः १

"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" २।१।५ सूत्रे मध्वस्य अधिकरणरचनायां दोषः १

"असदिति चेन्न प्रतिषेधमात्रत्वात्" २।१।७ सूत्रे मध्ववल्लभयोः अधिकरणरचनायां दोषः २

"अपीतौ तद्वत् प्रसंगादसमञ्जसम्" २।१।८ सूत्रे श्रीकण्ठस्य अधिकरणरचनायां दोषः १

"एतेन शिष्टापरिग्रहा अपि व्याख्याताः" २।१।१२ सूत्रे मध्वस्य अधिकरणस्य अरचनायां दोषः १

"असद्व्यपदेशादिति चेन्न धर्म्मान्तरेण वाक्यशेषात्" २।१।१७ सूत्रे वल्लभभाष्ये अधिकरणस्य रचनायां दोषः १

"इतरव्यपदेशाद् हिताकरणादिदोषप्रसक्तिः" २।१।२१ सूत्रे श्रीकण्ठभाष्ये अधिकरणस्य अरचनायां दोषः १

"उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" २।१।२४ सूत्रे मध्वस्य अधिकरणानारम्भात् दोषः १

"कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" २।१।२६ सूत्रे मध्ववल्लभयोः अधिकरणस्य अरचनायां दोषः २

"श्रुतेस्तु शब्दमूलत्वात्" २।१।२७ सूत्रे मध्वस्य अधिकरणारम्भात् दोषः १

"सर्वोपेता च तद्दर्शनात्" २।१।३० सूत्रे रा-नि-म-श्री-श्रीप-भाष्येषु अधिकरस्य अनारम्भात् दोषः ५

"न प्रयोजनवत्त्वात्" २।१।३२ सूत्रे श्रीपति-वल्लभभाष्ययोः अधिकरणस्य अरचनायां २

"वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति" २।१।३४ सूत्रे रा-नि-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"सर्वधर्म्मोपपत्तेश्च" २।१।३७ सूत्रे रा-नि-श्रीं-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ४

"अन्यत्राभावाच्च न तृणादिवत्" २।२।५ इति सूत्रे मध्वभाष्ये अधिकरणरचनायां दोषः १

"अभ्युपगमेऽप्यर्थाभावात्" २।२।६ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"पुरुषाश्मवत् इति चेत् तथापि" २।२।७ सूत्रे मध्ववल्लभभाष्ययोः अधिकरणारम्भात् दोषः २

"अन्यथानुमितौ च ज्ञशक्तिवियोगात्" २।२।९ सूत्रे मध्वभाष्यस्य अधिकरणरचनायां दोषः १

"उभयथापि न कर्म्मातस्तदभावः" २।२।१२ सूत्रे रा-म-नि-श्री-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ५

"नासतोऽदृष्टत्वात्" २।२।२६ सूत्रे म-श्री-भाष्ययोः अधिकरणस्य रचनायां दोषः २

"नाभाव उपलब्धेः" २।२।२८ सूत्रे मध्वनिम्बार्कभाष्यद्वये अधिकरणस्य अरचनायां दोषः २

"न भावोऽनुपलब्धेः" २।२।३० सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"सर्वथानुपपत्तेश्च" २।२।३२ सूत्रे रा-श्री-श्रीप-भाष्येषु अधिकरणस्य रचनायां दोषः ३

"एतेन मातरिश्वा व्याख्यातः" २।३।८ सूत्रे रा-नि-भाष्ययोः अधिकरणस्य अरचनायां दोषः २

"असम्भवस्तु सतोऽनुपपत्तेः २।३।९ सूत्रे रा-नि-श्रीप-भाष्येषु अधिकरणस्यअरचनायां दोषः ३

"तेजोऽतस्तथाह्याह" २।३।१० सूत्रे निम्बार्कभाष्यस्य अधिकरणस्य अरचनायां दोषः १

"आपः" २।३।११ सूत्रे रा-नि-श्री-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"पृथिव्यधिकाररूपशब्दान्तरेभ्यः" २।३।१२ सूत्रे रा-नि-श्री-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"पृथिवी" इति २।३।११ सूत्रे निम्वार्कस्य अधिकरणस्य अरचनायां दोषः १

"तदभिध्यानादेव तु तल्लिङ्गात् सः" इति २।३।१३ सूत्रे रा-नि-श्री-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"विपर्य्ययेण तु क्रमोऽत उपपद्यते च" इति २।३।१४ सूत्रे रा-नि-भाष्ययोः अधिकरणस्य अरचनायां दोषः २

"अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्" इति २।३।१५ सूत्रे रा-नि-श्री-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" इति २।३।१६ सूत्रे रा-म-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ३

"नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः" २।३।१७ सूत्रे निम्बार्कभाष्यस्य अधिकरणस्य अरचनायां दोषः १

"युक्तेश्च" इति मध्वभाष्यानुसारेण २।३।१९ सूत्रे मध्वभाष्ये अधिकरणरचनायां दोषः १

"उत्क्रान्तिगत्यागतीनाम्" इति २।३।१९ सूत्रे रा-म-भाष्ययोः अधिकरणस्य अरचनायां दोषः २

"व्यतिरेको गन्धवत्" इति २।३।२६ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"पृथगुपदेशात्" इति २।३।२८ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत्" इति २।३।२९ सूत्रे वल्लभभाष्ये अधिकरणरचनायां दोषः १

"यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" २।३।३० सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात्" २।३।३१ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"यथा च तक्षोभयथा" २।३।४० सूत्रे रा-नि-म-श्री-श्रीप-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ६

"परात् तु तच्छ्रुतेः" २।३।४१ सूत्रे मध्वभाष्ये अधिकरणस्य अरचनायां दोषः १

"कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" इति २।३।४२ सूत्रे निम्बार्कभाष्ये अधिकरणस्य रचनायां दोषः १

"अदृष्टानियमात्" इति २।३।५१ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"तत् प्राक्श्रुतेश्च" इति २।४।३ इति २।४।३ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"तत् पूर्वकत्वाद् वाचः" २।४।४ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १

"सप्त गतेर्विशेषितत्वाच्च" इति २।४।५ सूत्रे वल्लभभाष्ये अधिकरणस्य अरचनायां दोषः १

"हस्तादयस्तु स्थितेऽतो नैवम्" २।४।६ सूत्रे वल्लभभाष्ये अधिकरणस्य रचनायां दोषः १
"श्रेष्ठश्च" इति २।४।८ सूत्रे रा-श्री-भाष्ययोः अधिकरणस्य अरचनायां दोषः २
"न वायुक्रिये पृथगुपदेशात्" इति २।४।९ सूत्रे नि-म-श्री-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ४
"चक्षुरादिवत् तु तत्सहशिष्टादिभ्यः" इति २।४।१० सूत्रे म-व-भाष्ययोः अधिकरणस्य रचनायां दोषः २
"पञ्चवृत्तिर्मनोवद् व्यपदिश्यते" २।४।११ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः १
"अणुश्च" इति २।४।१३ सूत्रे नि-श्रीप-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ३
"ज्योतिराद्यधिष्ठानं तु तदामननात्" इति २।४।१४ सूत्रे श्रीकण्ठभाष्ये अधिकरणस्य अरचनायां दोषः १
"प्राणवता शब्दात्" इति २।४।१५ सूत्रे वल्लभभाष्ये अधिकरणस्य रचनायां दोषः १
"तस्य च नित्यत्वात्" इति २।४।१६ सूत्रे श्रीकण्ठभाष्ये अधिकरणस्य रचनायां दोषः १
"त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" २।४।१७ सूत्रे निम्बार्कभाष्ये अधिकरणस्य अरचनायां दोषः १
"मांसादि भौमं यथाशब्दमितरयोश्च" इति २।४।२१ सूत्रे म-व-भाष्ययोः अधिकरणस्य रचनायां दोषः। २

समष्टिः १०९

एवं च येषु सूत्रेषु प्रत्येकं भाष्यस्य दोषाः ते तावद्, यथा—

वल्लभस्य दोषाय—इतरेषां चानुपलब्धेः २।१।२
असदिति चेन्न प्रतिषेधमात्रत्वात् २।१।७
असद्व्यपदेशादिति चेन्न धर्म्मान्तरेण वाक्यशेषात् २।१।१७
कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २।१।२६
न प्रयोजनवत्त्वात् २।१।३२
वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति २।१।३४
सर्वधर्म्मोपपत्तेश्च २।१।३७
पुरुषाश्मवदिति चेत् तथापि २।२।७
उभयथापि न कर्म्मातस्तदभावः २।२।१२
चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावित्वात् २।३।१६
तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् २।३।२९
यथा च तक्षोभयथा २।३।४०
सप्त गतेर्विशेषितत्वाच्च २।४।५
हस्तादयस्तु स्थितेऽतो नैवम् २।४।६
न वायुक्रिये पृथगुपदेशात् २।४।९
चक्षुरादिवत् तु तत्सहशिष्टादिभ्यः २।४।१०
अणुश्च २।४।१३
प्राणवता शब्दात् २।४।१५

वल्लभस्य दोषाय—

मांसादिभौमं यथाशब्दमितरयोश्च २।४।२१
१९

मध्वस्य दोषाय—एतेन योगः प्रत्युक्तः २।१।३

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् २।१।५

असदिति चेन्न प्रतिषेधमात्रत्वात् २।१।७

एतेनशिष्टापरिग्रहाअपिव्याख्याताः २।१।१२

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि २।१।२४

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २।१।२६

श्रुतेस्तु शब्दमूलत्वात् २।१।२७

सर्वोपेता च तद्दर्शनात् २।१।३०

अन्यत्राभावाच्च न तृणादिवत् २।२।५

अभ्युपगमेऽप्यर्थाभावात् ३।२।६

पुरुषाश्मवदिति चेत् तथापि २।२।७

अन्यथानुमितौ चज्ञशक्ति वियोगात् २।२।९

उभयथापि न कर्म्मातस्तदभावः २।२।१२

नासतोऽदृष्टत्वात् २।२।२६

नाभाव उपलब्धेः २।२।२८

न भावोऽनुपलब्धेः २।२।३०

चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २।३।१६

युक्तेश्च २।३।१९ (तदीयस्य)

उत्क्रान्तिगत्यागतीनाम् २।३।१९

व्यतिरेको गन्धवत् २।३।२६

पृथगुपदेशात् २।३।२८

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् २।३।३०

मध्वस्य दोषाय—पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् २।३।३१

यथा च तक्षोभयथा २।३।४०

परात् तु तच्छ्रुतेः २।३।४१

अदृष्टानियमात् २।३।५१

तत्प्राक्श्रुतेश्च २।४।३

तत्पूर्वकत्वाद् वाचः २।४।४

न वायुक्रिये पृथगुपदेशात् २।४।९

चक्षुरादिवत् तु तत्सहशिष्टादिभ्यः २।४।१०

पञ्चवृत्तिर्मनोवत् व्यपदिश्यते २।४।१२

मांसादि भौमं यथाशब्दमितरयोश्च २।४।२१
३२

श्रीकण्ठस्य दोषाय—

अपीतौतद्वत् प्रसंगादसमञ्जसम् २।१।८

इतरव्यपदेशाद् हिताकरणादिदोषप्रसक्तिः २।१।२१

सर्वोपेता च तद्दर्शनात् २।१।३०

सर्वधर्म्मोपपत्तेश्च २।१।३७

उभयथापि न कर्म्मातस्तदभावः २।१।१२

नासतोऽदृष्टत्वात् २।२।२६

सर्वथानुपपत्तेश्च २।२।३२

आपः २।३।११

पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२

तदभिध्यानादेव तु तल्लिंगात् सः २।३।१३

अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् २।३।१५

यथा च तक्षोभयथा २।३।४०

न वायुक्रिये पृथगुपदेशात् २।४।९

श्रीकण्ठस्य दोषाय—

ज्योतिराद्यधिष्ठानं तु तदामननात् २।४।१४
तस्य च नित्यत्वात् २।४।१६

१५

रामानुजस्य दोषाय—

सर्वोपेता च तद्दर्शनात् २।१।३०
वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति २।१।३४
सर्वधर्म्मोपपत्तेश्च २।१।३७
उभयथापि न कर्म्मातस्तदभावः २।२।१२
सर्वथानुपपत्तेश्च २।२।३२
एतेन मातरिश्वा व्याख्याताः २।३।८
असम्भवस्तु सतोऽनुपपत्तेः २।३।९
आपः २।३।११
पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२
तदभिध्यानादेव तु तल्लिंगात् सः २।३।१३
विपर्य्ययेण तु क्रमोऽत- उपपद्यते च २।३।१४
अन्तरा विज्ञानमनसी क्रमेण तल्लिंगात् इति चेन्नाविशेषात् २।३।१५
चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २।३।१६
उत्क्रान्तिगत्यागतीनाम् २।३।१९
यथा च तक्षोभयथा २।३।४०
श्रेष्ठश्च २।४।८

१६

निम्बार्कस्य दोषाय—

सर्वोपेता च तद्दर्शनात् २।१।३०
वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति २।१।२४
सर्वधर्म्मोपपत्तेश्च २।१।३७
उभयथापि न कर्म्मातस्तदभावः २।२।१२
नाभाव उपलब्धेः २।२।२८
एतेन मातरिश्वा व्याख्यातः २।३।८
असम्भवस्तु सतोऽनुपपत्तेः २।३।९
तेजोऽतस्तथा ह्याह २।३।१०
आपः २।३।११
पृथिव्यधिकाररूपशब्दान्तरेभ्यः २।३।१२
पृथिवी (२।३।११) तदीयम्
तदभिध्यानादेव तु तल्लिंगात् सः २।३।१३
विपर्य्ययेण तु क्रमोऽत २।३।१४
उपपद्यते च २।३।१४
अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् २।३।१५
नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः २।३।१७
यथा च तक्षोभयथा २।३।४०
कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः २।३।४२
न वायुक्रिये पृथगुपदेशात् २।४।९
अणुश्च २।४।१३
त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् २।४।१७

२०

श्रीपतेः दोषाय—

सर्वोपेता च तद्दर्शनात् २।१।३०
न प्रयोजनवत्त्वात् २।१।३२
सर्वथानुपपत्तेश्च २।२।३२
असम्भवस्तु सतोऽनुपपत्तेः २।३।९
यथा च तक्षोभयथा २।३।४०
श्रेष्ठश्च २।४।८
अणुश्च २।४।१३

१९+२२+१५+१६+२०+७=१०९

एवं च अधिकरणरचनानियमानुसारेण विभिन्नभाष्याणां पर्य्यालोचने कृते शंकर-भास्कर-भाष्यद्वयस्यैव व्याससमतसन्निकृष्टत्वम् एव उपलभ्यते।

अथ अत्र अधिकरणांगविषये किञ्चित् अवधातव्यम् अस्ति। तद् यथा—प्रथमाध्याये चतुर्षु पादेष्वेव श्रुतिवाक्यानि विषयत्वेन उद्धृतानि एवेति दृश्यते। अत्र तु द्वितीयाध्याये तत्प्रथायाः अन्यथा परिलक्ष्यते। यथा प्रथमतृतीयचतुर्थपादेषु विषयत्वेन न किञ्चिदपि श्रुतिवाक्यं प्रदर्शितम्। तत्र केवलं श्रुतिस्मृती अवलम्ब्य समन्वयविरोधः एव शङ्कितः, ततः संशयपूर्वपक्षसिद्धान्तपक्षमात्रं उक्तं, परन्तु द्वितीये पादे सांख्यादिमतवादानां विषयत्वेन वर्णनं कृतम् इति। एतेन समन्वयाविरोधमध्ये कीदृशः भेदः कल्पनीयः तद् बोद्धुं शक्यते। इति द्वितीयाध्यायसमालोचनम्।

इति श्रीचिद्घनानन्दपुरीविरचिते व्याससम्मतब्रह्मसूत्रभाष्यनिर्णये द्वितीयः अध्यायः।

---

## अथ साधननामतृतीयाध्याये प्रथमपादे
## प्रथमं तदन्तरप्रतिपत्त्यधिकरणम्।

अत्र "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" ३।१।१ (२९२) इति सूत्रस्य "तदन्तरप्रतिपत्ति"-पदात् अस्य "तदन्तरप्रतिपत्त्यधिकरणं" नाम। तत्र मध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु सप्त सूत्राणि गृहीतानि। माध्वभाष्ये अनेन एकेनैव सूत्रेण तस्य प्रथमाधिकरणं रचितम्। वस्तुतस्तु एतैः सप्तभिः सूत्रैः माध्वभाष्ये सप्त अधिकरणानि भवन्ति। अस्तु तावत् तानि च सप्त सूत्राणि—

१। "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" ३।१।१ (२९२)
२। "त्र्यात्मकत्वात् तु भूयस्त्वात्" ३।१।२ (२९३)
३। "प्राणगतेश्च" ३।१।३ (२९४)
४। "अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्" ३।१।४ (२९५)
५। "प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः" ३।१।५ (२९६)
६। "अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः" ३।१।६ (२९७)
७। "भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति" ३।१।७ (२९८)

अत्र (१) "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" ३।१।१ (२९२) इति सूत्रे अध्यायारम्भात् तथा च "सम्परिष्वक्तः" इति प्रथमान्तपदाच्च अत्र अधिकरणारम्भः संगतः एव। चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमात् च।

(२) "त्र्यात्मकत्वात् तु भूयस्त्वात्" ३।१।२ (२९३) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्; चतुर्थसामान्यनियमात्, नवमविशेषनियमात् च। माध्वभाष्ये अस्य द्वितीयाधिकरणस्य रचनायां दोषः।

(३) "प्राणगतेश्च" ३।१।३ (२९४) इति सूत्रे प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्; चतुर्थसामान्यनियमात्। चकाराच्च निषेधः, षष्ठविशेषनियमात्। माध्वभाष्ये तदीयतृतीयाधिकरणस्य रचनायां दोषः।

(४) "अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्" ३।१।४ (२९५) इति सूत्रे प्रथमान्तपदाभावात्, तथैव "इति चेन्न" इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् पञ्चमविशेषनियमाच्च। माध्वभाष्ये तदीयचतुर्थाधिकरणस्य रचनायां दोषः।

(५) "प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः" ३।१।५ (२९६) इति सूत्रे "ता" इति प्रथमान्तपदसत्त्वेऽपि "इति चेन्न" पदस्य सत्त्वात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च। माध्वभाष्ये तदीयपञ्चमाधिकरणस्य रचनायां दोषः।

(६) "अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः" ३।१।६ (२९७) इति सूत्रेऽपि तथैव। माध्वभाष्ये तदीयषष्ठाधिकरणस्य रचनायां दोषः; चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च।

(७) "भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति" ३।१।७ (२९८) इति सूत्रे "भाक्तम्" इति प्रथमान्तपदसत्त्वेऽपि प्रसंगान्तरत्वाबोधक-"वा"-शब्दवत्त्वात् तस्य निषेधः, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। माध्वभाष्ये तदीयसप्तमाधिकरणस्य रचनायां दोषः। परसूत्रे सर्वसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगता। एवं च अस्मिन् अधिकरणे माध्वभाष्ये अधिकरणस्य रचनायां सप्त दोषाः भवन्ति।

## द्वितीयं कृतात्ययाधिकरणम्।

अत्र "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" ३।१।८ (२९९) इति सूत्रस्य "कृतात्यय"-शब्दात् अस्य "कृतात्ययाधिकरणं" नाम। तत्र माध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु अस्मिन् अधिकरणे चत्वारि सूत्राणि गृहीतानि। माध्वभाष्ये अस्य प्रथमसूत्रस्य पूर्वार्द्धेन अष्टमम् अधिकरणं उत्तरार्द्धेन नवमम् अधिकरणं रचितम् इति दृश्यते। तानि च चत्वारि सूत्राणि—

१। "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" ३।१।८ (२९९)

२। "चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" ३।१।९ (३००)

३। "आनर्थक्यमिति चेन्न तदपेक्षत्वात्" ३।१।१० (३०१)

४। "सुकृतदुष्कृते एवेति तु बादरिः" ३।१।११ (३०२)

अत्र (१) "कृतात्यये अनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" ३।१।८ (२९९) इति सूत्रे "अनुशयवान्" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वम् उचितम्, चतुर्थसामान्यनियमात्। चकारात् न विधेयान्तरत्वे बाधा, त्रयोदशविशेषनियमात्। तथैव सर्वैः कृतं च। मध्वबलदेव-भाष्यद्वये "यथेतमनेवं च" इति अपरं सूत्रम्। तत्र सूत्रे आरोहावरोहरूपगतिसामान्यस्य वर्णनेन विधेयाभेदात्। चतुर्थविशेषनियमात्।

(२) "चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः"। ३।१।९ (३००) इत्यत्र "उपलक्षणार्थां" तथा "कार्ष्णाजिनिः" इति प्रथमान्तपदद्वयसत्त्वेऽपि (चतुर्थसामान्यनियमात्), "इति चेन्न" इति पदात् पञ्चमविशेषनियमात्, तथा तेन सिद्धान्तानुकूल-मतान्तरप्रदर्शनात्, दशमविशेषनियमात् नात्र अधिकरणारम्भः संगतः। माध्वभाष्ये अधिकरणरचनायां तेन च तदीयदशमाधिकरणस्य सूत्रत्रयमध्ये अस्य प्राथम्यात् दोषः।

(३) "आनर्थक्यमिति चेन्न तदपेक्षत्वात्" ३।१।१० (३०१) इत्यत्र "आनर्थक्यम्" इति प्रथमान्तपदसत्त्वेऽपि (चतुर्थसामान्यनियमात्) "इति चेन्न" इति पदात् पञ्चमविशेषनियमात् नास्य अधिकरणारम्भकत्वम्।

(४) "सुकृतदुष्कृते एवेति तु बादरिः" ३।१।११ (३०२) इत्यत्र "सुकृतदुष्कृते" इति प्रथमान्तपदसत्त्वेऽपि "बादरिः" इति अनेन स्वसिद्धान्तानुकूलमतान्तरनिर्देशात् विषयान्तराभेदाच्च, तथा तु-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, तथा नवमदशमविशेषनियमाभ्याम्। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात्, अत्रैव अधिकरणसमाप्तिः संगता।

## तृतीयम् अनिष्टादिकार्य्यधिकरणम्

अत्र "अनिष्टादिकारिणामपि च श्रुतम्" ३।१।१२ (३०३) इति सूत्रस्य "अनिष्टादिकारिणाम्" इति पदात् अस्य "अनिष्टादिकार्य्यधिकरण" नाम। तत्र मध्व-वल्लभ-भिन्नेषु सर्वेषु भाष्येषु दश सूत्राणि गृहीतानि। माध्वभाष्ये तदीयैकादशाधिकरणे सूत्रत्रयं बल्लभ-भाष्ये तु सूत्रपञ्चकम् इति भेदः। तानि च दश सूत्राणि—

१। "अनिष्टादिकारिणामपि च श्रुतम्" ३।१।१२ (३०३)

२। "संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्" ३।१।१३ (३०४)

३। "स्मरन्ति च" ३।१।१४ (३०५)

४। "अपि च सप्त" ३।१।१५ (३०६)

५। "तत्रापि च तद्व्यापारादविरोधः" ३।१।१६ (३०७)

६। "विद्याकर्म्मणोरिति तु प्रकृतत्वात्" ३।१।१७ (३०८)

७। 'न तृतीये तथोपलब्धेः' ३।१।१८ (३०९)

८। "स्मर्य्यतेऽपि च लोके" ३।१।१९ (३१०)

९। "दर्शनाच्च" ३।१।२० (३११)

१०। "तृतीयशब्दावरोधः संशोकजस्य" ३।१।२१ (३१२)

तत्र (१) अनिष्टादिकारिणामपि च श्रुतम्" ३।१।१२ (३०३) इत्यत्र "श्रुतम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। चतुर्थसामान्यनियमात्। तथैव सूत्रे सर्वेषां "अपि च" पदाभ्यां विधेयान्तरस्य बोधनात्, अष्टमविशेषनियमाच्च।

(२) "संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्" ३।१।१३ (३०४) इत्यत्र "आरोहावरोहौ" इति प्रथमान्तपदसत्त्वात् चतुर्थसामान्यनियमात् अधिकरणम् आरम्भणीयम्।

परन्तु तु-शब्दयोगात् तस्य निषेधः। तु-शब्दस्य पूर्वपक्षनिषेधार्थत्वेऽपि उक्तपूर्वपक्षत्वात्। अष्टादशविशेषनियमात्।

( ३ ) “स्मरन्ति च” ३।१।१४ (३०५) इत्यत्र प्रथमान्तपदाभावात् चकारसत्त्वाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च।

( ४ ) “अपि च सप्त” ३।१।१५ (३०६) इत्यत्र “सप्त” इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भकत्वं स्यात्, किन्तु अपि-पदात् चकारसत्त्वाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठत्रयोदशविशेषनियमाभ्याम्। माध्वभाष्ये तदीयद्वादशाधिकरणस्य आरम्भात् दोषः।

( ५ ) “तत्रापि च तद्व्यापारादविरोधः” ३।१।१६ (३०७) इत्यत्र “अविरोधः” इति प्रथमान्तपदसत्त्वात् अधिकरणारम्भकत्वं युक्तम्, परन्तु चकारस्य सत्त्वात् तस्य निषेधः; चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च। माध्वभाष्ये तदीयत्रयोदशाधिकरणस्य आरम्भात् दोषः। अविरोधपदात् अपि निषेधः। सप्तमविशेषनियमात्।

( ६ ) “विद्याकर्म्मणोरिति तु प्रकृतत्वात्” ३।१।१७ (३०७) इत्यत्र प्रथमान्तपदाभावात् तथा तु-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, नवमविशेषनियमाच्च। माध्वभाष्ये तदीयचतुर्द्दशाधिकरणस्य आरम्भात् तथा वल्लभभाष्ये तदीयचतुर्थाधिकरणस्य आरम्भात् तयोरेव दोषः।

( ७ ) “न तृतीये तथोपलब्धेः” ३।१।१८ (३०९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात्। माध्वभाष्ये तदीयपञ्चदशाधिकरणस्य आरम्भात् दोषः।

( ८ ) “स्मर्य्यतेऽपि च लोके” ३।१।१९ (३१०) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। अत्र ऐकमत्यं च सर्वेषाम्।

( ९ ) “दर्शनाच्च” ३।१।२० (३११) इत्यत्रापि तथैव। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

( १० ) “तृतीयशब्दावरोधः संशोकजस्य” ३।१।२१ (३१२) इत्यत्र “तृतीयशब्दावरोधः” इति प्रथमान्तपदात् अधिकरणारम्भकत्वम् अस्य युक्तं, किन्तु सप्तमसूत्रे “न तृतीये तथोपलब्धेः” इति तृतीयशब्दस्य उक्तत्वात् अस्य साकांक्षत्वं सिद्ध्यति। अतः अधिकरणारम्भकत्वम् अस्य न युज्यते, चतुर्थसामान्यनियमात्। वल्लभभाष्ये तदीयपञ्चमाधिकरणस्य आरम्भात् तस्य दोषः। परन्तु प्रायेण सर्वैः अधिकरणस्य रचणात् अत्रैव अधिकरणसमाप्तिः संगच्छते। एवं च अस्मिन् अधिकरणे अधिकरणरचनायां मध्वस्य चत्वारः दोषाः, वल्लभस्य दोषद्वयम्।

## चतुर्थं स्वाभाव्यापत्त्यधिकरणम्

अत्र “तत्स्वाभाव्यापत्तिरुपपत्तेः” ३।१।२२ (३१३) इति सूत्रस्य “स्वाभाव्यापत्तिः” इति पदात्

अस्य "स्वाभाव्यापत्त्यधिकरणं" नाम । तत्र निम्बार्क-वल्लभभिन्नेषु सर्वेषु एतेषु। भाष्येषु एकेनैव सूत्रेण एतदधिकरणं रचितम् । निम्बार्कभाष्ये षट्सूत्राणि गृहीतानि । वल्लभभाष्ये तु तदीय-पञ्चमाधिकरणस्य सूत्रत्रयमध्ये एतद्धि द्वितीयं सूत्रम् ।

अत्र "तत्साभाव्यापत्तिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तं, चतुर्थ-सामान्यनियमात् । वल्लभभाष्ये तु अधिकरणस्य अनारम्भात् तस्य दोषः । परसूत्रे अधिकैः भाष्यकारैः अधिकरणस्य रचनायाम् अत्र अधिकरणसमाप्तिः संगच्छते ।

## पञ्चमं नातिचिराधिकरणम्

अत्र "नातिचिरेण विशेषात्" ३।१।२३ (३१४) इति सूत्रस्य-"नातिचिरेण" पदेन अस्य "नातिचिराधिकरणं" नाम । तत्र निम्बार्क-वल्लभ-भाष्यभिन्नेषु सर्वत्र एतम् एकमेव सूत्रम् अत्र गृहीतम् । निम्बार्कभाष्ये एतद्धि तदीयचतुर्थाधिकरणस्य षट्सु सूत्रेषु द्वितीयं सूत्रम् । वल्लभभाष्ये एतच्च तदीयपञ्चमाधिकरणस्य सूत्रत्रयमध्ये तृतीयं सूत्रम् । तेन निम्बार्क-वल्लभ-भाष्यद्वय-मध्ये अनेन अधिकरणस्य अनारम्भात् तयोरेव दोषः ।

अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात्; परन्तु अष्टानां भाष्याणां मध्ये षट्सु भाष्येषु तथाकृतत्वात् पूर्वसूत्रात् तत्साभाव्यापत्तिः इति प्रथमान्तपदम् ऊहित्वा समर्थनीयम् इति उचितम् । पञ्चमसामान्यनियमात् । तथा सति विधेयभेदात् अनेन अधिकरणारम्भः संगच्छते, एकादशविशेषनियमात् । परसूत्रे सर्वैः अधिकरणस्य आरब्धत्वात् अत्रैव तस्य समाप्तिः कल्प्यते ।

## षष्ठम् अन्याधिष्ठिताधिकरणम्

अत्र "अन्याधिष्ठितेषु पूर्ववदभिलापात्" ३।१।२४ (३१५) इति सूत्रस्य "अन्याधिष्ठित"-पदात् अस्य "अन्याधिष्ठिताधिकरणं" नाम । तत्र शंकर-रामानुज-श्रीकण्ठ-श्रीपति-भाष्येषु चत्वारि सूत्राणि गृहीतानि, भास्करभाष्ये सूत्रत्रयम्, "योनेः शरीरम्" इति सूत्रस्य वर्जनात्, निम्बार्क-भाष्ये एतत् सूत्रं तदीयचतुर्थाधिकरणस्य षट्सु सूत्रेषु तृतीयं सूत्रम् । माध्वभाष्ये तदीयाष्टादशाधि-करणस्य सूत्रद्वयमध्ये एतद्धि प्रथमं सूत्रम् । वल्लभभाष्ये तदीयषष्ठाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम् । तानि च चत्वारि सूत्राणि—

| | |
|---|---|
| १ । "अन्याधिष्ठितेषु पूर्ववदभिलापात्" ३।१।२४ (३१५) | ३। "रेतःसिग्योगोऽथ" ३।१।२६ (३१७) |
| २ । "अशुद्धमिति चेन्न शब्दात्" ३।१।२५ (३१६) | ४ । "योनेः शरीरम्" ३।१।२७ (३१८) |

अत्र (१) "अन्याधिष्ठितेषु पूर्ववदभिलापात्" ३।१।२४ (३१५) इत्यत्र प्रथमान्तपदा-भावात् नास्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात्, तथापि अधिकैः तथा कृतम्,

अतः "तत्साभाव्यापत्तिः" इत्येकस्य पदस्य अनुषंगं कृत्वा अनेन अधिकरणारम्भः करणीयः । पञ्चमसामान्यनियमात् एकादशविशेषनियमाच्च । निम्बार्कभाष्ये तस्य अकरणात् दोषः ।

( २ ) "अशुद्धमिति चेन्न शब्दात्" ३।१।२५ (३१६) इत्यत्र "अशुद्धम्" इति प्रथमान्त-पदसत्त्वेऽपि "इति चेन्न" पदसत्त्वात् नास्य अधिकरणारम्भकत्वं युक्तं पञ्चमविशेषनियमात् ।

( ३ ) "रेतःसिग्योगोऽथ" ३।१।२६ (३१७) इत्यत्र "रेतःसिग्योगः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । तथापि अधिकैः तथा न कृतम् । अतः "अथ"-शब्दस्य आनन्तर्य्यार्थत्वात् अस्य साकांक्षत्वं कल्पयित्वा तन्न युक्तमिति मन्तव्यम्; सप्तमविशेषनियमात् । मध्व-वल्लभ-भाष्यद्वयमध्ये अधिकरणस्य रचनायां तयोरेव दोषः ।

( ४ ) "योनेः शरीरम्" ३।१।२७ (३१८) इत्यत्र "शरीरम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं कल्पनीयम्, तथापि मध्वभिन्नेन केनापि तथा न कृतम्, अतः योने-शब्दात् पूर्वसूत्रस्थरेतः-शब्दात् च साकांक्षत्वं कल्पयित्वा अधिकरणस्य अनारम्भः युक्तः, चतुर्थसामान्यनियमात् इति एव समुचितम् । अतः माध्वभाष्ये दोषः । भास्करभाष्ये युक्तिमात्रस्य बलेन एतत् सूत्रं परित्यक्तं, प्राचीनप्रमाणप्रदर्शनं विनैव ।

## नवमपाद-समालोचनम्

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

१ । कति कीदृशाश्च नियमाः अत्र सङ्कलिताः

२ । कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः

३ । काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

४ । उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिर्भवितुम् उचिता इति ।

एते च चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमः तावत्—

### ( १ ) कति कीदृशाश्च नियमा अत्र संकलिताः ।

परंतु अत्र न कोऽपि नूतनो नियमः सङ्कलितः । अतः विषयान्तरम् आलोच्यम् ।

### ( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

तत्र ३।१।१ अधिकरणे माध्वभाष्ये "त्र्यात्मकत्वात् तु भूयस्त्वात्" इति ३।१।२ सूत्रे अधिकरणरचनायां दोषः ।

तत्रैव माध्वभाष्ये "प्राणगतेश्च" इति ३।१।३ सूत्रे अधिकरणरचनायां दोषः ।

तत्रैव माध्वभाष्ये "अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्" इति ३।१।४ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः" इति ३।१।५ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः" इति ३।१।६ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति" इति ३।१।७ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।१।२ अधिकरणे माध्वभाष्ये "चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" इति ३।१।९ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।१।३ अधिकरणे माध्वभाष्ये "अपि च सप्त" इति ३।१।१५ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "तत्रापि च तद्व्यापारादविरोधः" इति ३।१।१६ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव मध्व-वल्लभ-भाष्ययोः "विद्याकर्म्मणोरिति तु प्रकृतत्वात्" इति ३।१।१७ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "न तृतीये तथोपलभ्यते" इति ३।१।१८ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव वल्लभभाष्ये "तृतीयशब्दावरोधः संशोकजस्य" इति ३।१।२१ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।१।४ अधिकरणे वल्लभभाष्ये "तत्साभाव्यापत्तिरुपपत्तेः" इति ३।१।२२ सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।१।५ अधिकरणे मध्व-वल्लभ-भाष्ययोः "नातिचिरेण विशेषात्" इति ३।१।२३ सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।१।६ अधिकरणे निम्बार्कभाष्ये "अन्याधिष्ठितेषु पूर्ववदभिलापात्" इति ३।१।२४ सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।१।६ अधिकरणे मध्व-वल्लभ-भाष्ययोः "रेतःसिग्योगोऽथ" इति ३।१।२६ सूत्रे अधिकरणयस्य रचनायां दोषः ।

तत्रैव "योनेः शरीरम्" इति ३।१।२७ सूत्रे मध्वभाष्ये अधिकरणस्य रचनायां दोषः ।

एवं च पादेऽस्मिन् भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | १ दोषः | १३ दोषाः |
| निम्बार्कभाष्ये | १ ” | ० ” |
| वल्लभभाष्ये | २ दोषौ | ३ ” |

इति वक्तुं शक्यते । तथा च पादेऽस्मिन् शङ्कर-भास्कर-रामानुज-श्रीकण्ठ-श्रीकरभाष्येषु दोषाभावः दृश्यते ।

इदानीं द्रष्टव्यम्—

( १ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

प्रथमाधिकरणे—

"तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" ३।१।१ इति सूत्रे "वेत्थ यथा पञ्चम्याम् आहुतौ आपः पुरुषवचसो भवन्ति" (छाः ५।३।३) "इति तु पञ्चम्याम् आहुतौ आपः पुरुषवचसो भवन्ति" (छाः ५।९।१)

"प्राणगतेश्च" ३।१।३ इति सूत्रे "तमुत्क्रामन्तम्" (बृः ४।४।२)

"अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्" ३।१।४ इति सूत्रे "मृतस्य अग्निं वागप्येति वातं प्राणः" (बृः ३।२।१३) "ओषधीर्लोमानि" (बृः ३।२।१३)

"प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः" ३।१।५ इति सूत्रे "तस्मिन् एतस्मिन् अग्नौ देवाः श्रद्धां जुह्वति" (छाः ५।४।२) "आपो हास्मै श्रद्धां संनमन्ते" (?)

"अश्रुतत्वात् इति चेन्नेष्टादिकारिणां प्रतीतेः" ३।१।६ इति सूत्रे "अथ य इमे ग्राम इष्टापूर्ते दत्तम् इति उपासते ते धूमम् अभिसंभवन्ति" (छाः ५।१०।३)

"भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति" ३।१।७ इति सूत्रे "तद्देवानाम् अन्नं तं देवा भक्षयन्ति" (छाः ५।१०।४) "स्वर्गकामो यजेत" (?), "अथ योऽन्यां देवताम् उपास्ते"। (बृः १।४।१०)

द्वितीयाधिकरणे—

"कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" ३।१।८ इति सूत्रे "तस्मिन् यावत् संपातम् उषित्वा अथ एतमेव अध्वानं पुनर्निवर्तन्ते" (छाः ५।१०।५) "तद् य इह रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिम् आपद्येरन्" (छाः ५।१०।७) "प्रेत्य कर्मफलम् अनुभूय ततः शेषेण विशिष्टदेशकालकुलरूपायुः-श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते" (स्मृतिः ?)

"चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः" ३।१।९ इति सूत्रे "रमणीयचरणाः" (छाः ५।१०।७)

"सुकृतदुष्कृते एवेति तु बादरिः" ३।१।११ इति सूत्रे "कर्म चरति"। (?)

तृतीयाधिकरणे—

"अनिष्टादिकारिणामपि च श्रुतम्" ३।१।१२ इति सूत्रे "ये वै के च अस्मात् लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौः १।२)

"संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्" ३।१।१३ इति सूत्रे "अयं लोको नास्ति पर इति मानी पुनः पुनः वशमापद्यते मे" । (कठः २।६)

"विद्याकर्म्मणोरिति तु प्रकृतत्वात्" ३।१।१७ इति सूत्रे "अथ एतयोः पथोर्न कतरेणचन तानि इमानि क्षुद्राणि असकृत् आवर्त्तीनि भूतानि भवन्ति" (छाः ५।१०।८) "चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौः १।२)

"न तृतीये तथोपलब्धेः" ३।१।१८ इति सूत्रे "पञ्चम्याम् आहुतौ आपः पुरुषवचसो भवन्ति" (छाः ५।३।३) "जायस्व म्रियस्व इति एतत् तृतीयं स्थानम्" (छाः ५।१०।८)

"तृतीयशब्दावरोधः संशोकजस्य" ३।१।२१ इति सूत्रे "त्रीण्येव बीजानि भवन्ति आण्डजं जीवजम् उद्भिज्जम्" (छाः ६।३।१)

चतुर्थाधिकरणे—

"तत्स्वाभाव्यापत्तिरुपपत्तेः" ३।१।२२ इति सूत्रे "अथ एतमेव अध्वानं पुनः निवर्त्तन्ते यथेतम् आकाशम् आकाशाद् वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति" (छाः ५।१०।५)

पञ्चमाधिकरणे—

"नातिचिरेण विशेषात्" ३।१।२३ इति सूत्रे "अतो वै खलु दुर्निष्प्रपतरम्" (छाः ५।१०।६)

षष्ठाधिकरणे—

"अन्याधिष्ठितेषु पूर्ववदभिलापात्" ३।१।२४ इति सूत्रे "त इह व्रीहियवा ओषधिवनस्पतयः तिलमाषा इति जायन्ते" (छाः ५।१०।६) "रमणीयचरणाः" (छाः ५।१०।७)

"रेतःसिग्योगोऽथ" ३।१।२६ इति सूत्रे "यो रेतः सिञ्चति तद्भूय एव भवति" (छाः ५।१०।६)

"योनेः शरीरम्" ३।१।२७ इति सूत्रे "रमणीयचरणाः" (छाः ५।१०।७) इति ।

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

## (४) कीदृशी अस्य पादसंगतिः भवितुम् उचिता ।

उदाहृतश्रुतिसन्दर्भेण जीवानां परलोकगमनप्रकारः, संसारे पुनरागमनक्रमः, तथा तदनुयायिकर्म्मणां स्वरूपादिकं च अवगम्यते । एवं च जीवानां गत्यागतिपर्य्यालोचनस्य देहात्मनोः भेदज्ञानं कर्म्मफलभोगे अनित्यताबोधः ततश्च वैराग्योदयः, तेन नित्यात्मज्ञानाभिलाषश्च स्वाभाविकं फलम् । अतः एतदेव एतत्प्रकरणतात्पर्य्यमूलीभूत[illegible]

सोपानम् । अतएव एतदध्यायस्य साधनाध्यायः नाम भवितुम् अर्हति । परलोकगमनागमनादिप्रकारवर्णनस्य आपातदृष्ट्या फलाध्यायविषयत्वेऽपि नात्र अप्रासंगिकत्वम् अप्रामाणिकत्वं वा कल्पनीयम् ।

इदानीं द्रष्टव्यम् विभिन्नभाष्यमध्येषु कथमेतत् उपस्थापितं भाष्यकृद्भिः इति । तत्र—
शांकरमते—जीवस्य परलोकगमनागमनविचारपूर्वकवैराग्यनिरूपणरूपसाधननिर्देशः ।
भास्करमते—प्रायेण तथैव ।
रामानुजमते—जाग्रदाद्यवस्थावस्थितस्य जीवस्य दोषादिनिरूपणम् ।
निम्बार्कमते—संसारस्य दोषनिरूपणेन ततो विरक्तिप्रदर्शनम् ।
माध्वमते—वैराग्यार्थं गत्यादिनिरूपणम् ।
श्रीकण्ठमते—उपासकस्य नित्यत्वादियुक्तस्य जीवस्य गत्यागतिनिरूपणम् ।
श्रीकरमते—जीवस्य लोकान्तरगमनागमनविचारः ।

एतेषां तात्पर्य्यपर्य्यालोचने कृते भाष्याणां मतभेदः नाममात्रे पर्य्यवस्यति । अतः एतत्पादप्रतिपाद्यं तथा च अस्य पादसंगतिः वैराग्यनिरूपणरूपा एव वक्तुं शक्यते । एतदनुसारेण च एतत्पादीयाधिकरणानि सूत्राणि व्याख्येयानि । इति नवमपादसमालोचनम् ।

इति तृतीयाध्याये प्रथमपादोपसंहारः ।

---

# अथ तृतीयाध्याये द्वितीयपादः ।

## प्रथमं सन्ध्याधिकरणम्

अत्र "सन्ध्ये सृष्टिराह हि" ३।२।१ इति सूत्रस्य "सन्ध्ये" इति पदात् अस्य "सन्ध्याधिकरणं" नाम । तत्र केवलं मध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु षट् सूत्राणि गृहीतानि । माध्वभाष्ये तु सूत्रचतुष्टयमेव । तानि च षट् सूत्राणि—

१ । "सन्ध्ये सृष्टिराह हि" ३।२।१ (३१९)
२ । "निर्म्मातारं चैके पुत्रादयश्च" ३।२।२ (३२०)
३ । "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" ३।२।३ (३२१)
४ । "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" ३।२।४ (३२२)
५ । "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्य्ययौ" ३।२।५ (३२३)
६ । "देहयोगाद्वा सोऽपि" ३।२।६ (३२४)

तत्र (१) "सन्ध्ये सृष्टिराह हि" ३।२।१ (३१९) इति सूत्रे स्वप्नारम्भात् तथा "सृष्टिः" इति प्रथमोन्तपदात् च पूर्वेण अधिकरणेन अस्य संगतिः एव । द्वितीय-चतुर्थसामान्यमानित्याभ्याम्

( २ ) "निर्मातारं चैके पुत्रादयश्च" ३।२।२ (३२०) इत्यत्र "पुत्रादयः" इति प्रथमान्तपद-सत्त्वेऽपि चकारयोगात् तन्निषेधः। चतुर्थसामान्य-षष्ठविशेषनियमाभ्याम्।

( ३ ) "मायामात्रं तु कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वात्" ३।२।३ (३२१) इत्यत्र "मायामात्रम्" इति प्रथमान्तपदसत्त्वेऽपि निषेधार्थक-तु-शब्दयोगात् अधिकरणारम्भनिषेधः, उक्त-पूर्वपक्षत्वात्। चतुर्थसामान्यनियमात् तथा अष्टादशविशेषनियमात्।

( ४ ) "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" ३।२।४ (३२२) इत्यत्र "सूचकः" तथा "तद्विदः" इति प्रथमान्तपदसत्त्वेऽपि चकारयोगात् अधिकरणारम्भनिषेधः। चतुर्थसामान्य-नियमात्, षष्ठविशेषनियमाच्च।

( ५ ) "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्य्ययौ" ३।२।५ (३२३) इत्यत्र "तिरोहितं" तथा "बन्धविपर्य्ययौ" इति प्रथमान्तपदसत्त्वेऽपि संकोचार्थक-तु-शब्दयोगात् अधिकरणारम्भनिषेधः। चतुर्थसामान्यनियमात्, नवमविशेषनियमाच्च। माध्वभाष्ये इति एकेन सूत्रेण तदीयद्वितीयाधिकरणरचनायां दोषः।

( ६ ) "देहयोगाद् वा सोऽपि" ३।२।६ (३२४) इत्यत्र "सः" इति प्रथमान्तपदसत्त्वेऽपि "अपि"-शब्दयोगेन साकांक्षत्वसिद्धेः अधिकरणारम्भनिषेधः। चतुर्थसामान्यनियमात्, तथा षष्ठविशेषनियमात्। माध्वभाष्ये इति एकेन सूत्रेण तदीयतृतीयाधिकरणस्य रचनात् तस्य दोषः। परसूत्रे सर्वेषु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः।

## द्वितीयं तदभावाधिकरणम्

अत्र "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" ३।२।७ (३२५) इति सूत्रस्य "तदभावः" इति पदात् अस्य "तदभावाधिकरणं" नाम। तत्र शंकर-भास्कर-रामानुज-श्रीकण्ठ-श्रीपति-भाष्येषु सूत्रद्वयं, निम्बार्कभाष्ये सूत्रत्रयं, मध्व-वल्लभ-भाष्ययोः इदम् एकमेव सूत्रम्, तत्रापि माध्वमतेन अत्र चतुर्थाधिकरणम् आरभ्यते इति। तच्च सूत्रद्वयं यथा—

१। "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" ३।२।६ (३२५)

२। "अतः प्रबोधोऽस्मात्" ३।२।८ (३२६)

तत्र (१) "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" ३।२।७ (३२५) इत्यत्र "तदभावः" इति प्रथमान्तपदात् अनेन अधिकरणारम्भः युज्यते एव। तथैव सर्वैः कृतम्। चकारेण विधेयभेदसूचनात् हेतोः समुच्चयाद् वा न तेन व्याघातः। चतुर्थसामान्यनियमात् तथा प्रथमोद्दशविशेषनियमात्।

(२) "अतः प्रबोधोऽस्मात्" ३।२।८ (३२६) इत्यत्र "प्रबोधः" इति प्रथमान्तपदस्य सत्त्वात् यद्यपि पृथगधिकरणारम्भः युक्त एव, तथापि "अतः" इति पदेन साकांक्षत्वस्य सूचनात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्; तथा "अतः"—"अस्मात्" इति पदद्वय-साकांक्षत्व-

नियमात्, सप्तविशेषनियमात् च। माध्वभाष्ये तदीयपञ्चमाधिकरणस्य आरम्भात्, तथा वल्लभभाष्ये तदीयतृतीयाधिकरणस्य सूचनात् तयोरेव दोषः। परसूत्रेण षट्सु सूत्रेषु पृथगधिकरणस्य रचितत्वात् अत्रैव अधिकरणसमाप्तिः संगता एव।

## तृतीयं कर्म्मानुस्मृतिशब्दविध्यधिकरणम्

अत्र "स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः' ३।२।९ (३२७) इति सूत्रस्य "कर्म्मानुस्मृतिशब्दविधि:" इति पदात् अस्य "कर्म्मानुस्मृतिशब्दविध्यधिकरणं" नाम। तत्र शंकर-भास्कर-रामानुज-मध्व-श्रीकण्ठ-श्री-पति-भाष्येषु अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम्। तत्र माध्वभाष्ये एतद्धि षष्ठम् अधिकरणम्, निम्बार्कभाष्ये एतद्धि तदीय-द्वितीयाधिकरणरस्य सूत्रत्रयमध्ये तृतीयं सूत्रम्, तथा वल्लभभाष्ये एतद्धि तदीयतृती-याधिकरणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् इति भेदः।

अत्र "सः" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्। तु-शब्दः नात्र बाधकः अनिषेधार्थकत्वात् तस्य, अष्टादशविशेषनियमात्।

निम्बार्क-वल्लभभाष्यद्वये तु पृथगधिकरणं न रचितम्। तेन तयोः अधिकरणस्य अर-चनायां दोषः।

## चतुर्थं मुग्धाधिकरणम्

अत्र "मुग्धेऽर्धसम्पत्तिः परिशेषात्" ३।२।१० (३२८) इति सूत्रे मुग्ध-पदात् अस्य 'मुग्धाधिकरणं" नाम। तत्र वल्लभभिन्नेषु सर्वेषु भाष्येषु अत्र एकमेव सूत्रं गृहीतम्। तत्र निम्बार्कमते एतत् तु तृतीयम् अधिकरणम्; माध्वमते सप्तमम् अधिकरणम्। वल्लभमते एतत् सूत्रं तदीयतृतीयाधिकरणस्य सूत्रत्रयमध्ये तृतीयं सूत्रं भवति इति विशेषः।

"अर्धसम्पत्तिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्। वल्लभभाष्ये एतेन अधिकरणस्य अरचनायां दोषः। परसूत्रे सर्वत्र अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगता।

## पञ्चमम् उभयलिंगाधिकरणम्

अत्र "न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि" ३।२।११ (३२९) इति सूत्रस्य 'उभयलिंग'-पदात् अस्य "उभयलिंगाधिकरणं" नाम। तत्र शंकरभाष्ये एकादश सूत्राणि, भास्करभाष्ये द्वादश सूत्राणि "अरूपवत्" इत्याद्यतिरिक्तैकस्य सूत्रस्य गृहीतत्वात्, रामानुजभाष्ये पञ्चदश सूत्राणि, निम्बार्कभाष्ये तदीयचतुर्थाधिकरणे विंशति सूत्राणि, मध्ववल्लभभाष्ययोः त्रीणि सूत्राणि। तत्र माध्वमते अष्टममधिकरणं, वल्लभमते चतुर्थाधिकरणं, श्रीकण्ठ-श्रीपति-भाष्ययोः दशसूत्राणि गृहीतानि। तयोः मते पञ्चमाधिकरणं च।

तानि च एकादश सूत्राणि—

१। "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" ३।२।११ (३२९)
२। "न भेदादिति चेन्न प्रत्येकमतद्वचनात्" ३।२।१२ (३३०)
३। "अपि चैवमेके" ३।२।१३ (३३१)
४। "अरूपवदेव हि तत्प्रधानत्वात्" ३।२।१४" (३३२)
५। "प्रकाशवच्चावैयर्थ्यम्" ३।२।१५ (३३३)
६। "आह च तन्मात्रम्" ३।२।१६ (३३४)
७। "दर्शयति चाथो अपि स्मर्यते" ३।२।१७ (३३५)
८। "अतएव चोपमा सूर्य्यकादिवत्" ३।२।१८ (३३६)
९। "अम्बुवदग्रहणात् तु न तथात्वम्" ३।२।१९ (३३७)
१०। "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" ३।२।२० (३३८)
११। "दर्शनाच्च" ३।२।२१ (३३९)

अत्र (१) "न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि" ३।२।११ (३२९) इत्यत्र "उभय- लिंगम्" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः युक्तः एव। चतुर्थसामान्यनियमात् अपि-पदेन विज्ञेयभेदस्य सूचकत्वात्। द्वादशविशेषनियमात्।

(२) "न भेदादिति चेन्न प्रत्येकमतदूक्वचनात्" ३।२।१२(३३०)इत्यत्र प्रथमान्तपदाभावात् चतुर्थसामान्यनियमात्, तथा "इति चेन्न" पदात्, पञ्चमविशेषनियमात् नास्य अधिकरणारम्भकत्वम्।

(३) "अपि चैवमेके" ३।२।१३ (३३१) इत्यत्र "एके" इति प्रथमान्तपदसत्त्वेऽपि "अपि च एवम्" इति पदसत्त्वात् अस्य साकांक्षत्वं स्पष्टम्, अतः अस्य नाधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात्।

(४) "अरूपवदेव हि तत्प्रधानत्वात्" ३।२।१४ (३३२) इत्यत्र "अरूपवत्" इति पदात् कस्यचित् प्रथमान्तपदस्य अध्याहर्त्तव्यत्वेऽपि "हि"-शब्देन तथा "तत्" शब्देन साकांक्षत्वस्य प्रसंगात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च। माध्वभाष्ये अधिकरणारम्भात् तथा च तदीयनवमाधिकरणस्य चतुर्षु सूत्रेषु अस्य प्राथम्यात् तस्यैव दोषः। तथैव वल्लभभाष्ये अधिकरणारम्भात् तथाच तदीयपञ्चमाधिकरणस्य पञ्चसु सूत्रेषु अस्य प्राथम्यात् तस्यापि दोषः। अत्र भास्करभाष्ये "अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययम्" इति एकम् अतिरिक्तम् सूत्रं पठितम्, तेन तन्मते अस्मिन् अधिकरणे द्वादश सूत्राणि भवन्ति, तथैव तत्र प्रथमान्तपदसत्त्वात् अधिकरणारम्भश्च संगच्छते, परन्तु तत्र तत्र कृत- मिति दृश्यते। अतः तन्मते अत्र अधिकरणस्य अरचनायां तस्य अयमेकः अतिरिक्तः दोषः संजातः। तथापि सूत्रमेतत् तस्य भाष्यांशः एव इति अनुमीयते, लिपिकरप्रमादात् सूत्रत्वेन गृहीतः इत्येव सम्भवति।

(५) "प्रकाशवच्चावैयर्थ्यम्" ३।२।१५ (३३३) इत्यत्र "अवैयर्थ्यम्" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगच्छते, चतुर्थसामान्यनियमात्, परन्तु "च"-कार-पाठात् तस्य निषेधः

कल्प्यते, षष्ठविशेषनियमात् । भ-रा-नि-श्री-श्रीप-वि-पाठे एतस्य अधिकरणारम्भकत्वमपि नोदेति । अत्र "वैधर्म्यात्" इत्यपि पाठः शङ्करभाष्ये पाठान्तररूपेण दृश्यते ।

( ६ ) "आह च तन्मात्रम्" ३।२।१६ (३३४) इत्यत्र "तन्मात्रम्" इति प्रथमान्तपद-सत्त्वेऽपि चकार-योगात् अधिकरणारम्भनिषेधः । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ७ ) "दर्शयति चाथो अपि स्मर्य्यते" ३।२।१७ (३३५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ८ ) "अतएव चोपमा सूर्य्यकादिवत्" ३।२।१८ (३३६) इत्यत्र "उपमा" इति प्रथमान्तपदस्य सत्त्वात् यद्यपि अधिकरणारम्भः संगतः, चतुर्थसामान्यनियमात्, तथापि चकार-योगात् तन्निषेधः कल्पनीयः, षष्ठविशेषनियमात् । माध्वभाष्ये अनेन अधिकरणारम्भात् दोषः । तत्र एतत् तदीयदशमाधिकरणस्य एकमेव सूत्रं च ।

( ९ ) "अम्बुवदग्रहणात् तु न तथात्वम्" ३।२।१९ (३३७) इत्यत्र "तथात्वम्" इति प्रथमान्तपदसत्त्वेऽपि अनिषेधार्थक-तु-शब्दात् अधिकरणारम्भनिषेधः । चतुर्थसामान्यनियमात्, नवमविशेषनियमाच्च । मध्ववल्लभभाष्ययोः अधिकरणारम्भात् तयोरेव दोषः । माध्वमते एतत् सूत्रं तदीयैकादशाधिकरणस्य एकमेव सूत्रम् । वल्लभमते तु तदीयषष्ठाधिकरणस्य चतुर्षु सूत्रेषु एतद्धि प्रथमं सूत्रम् ।

( १० ) "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" ३।२।२०(३३८)इत्यत्र "वृद्धि-ह्रासभाक्त्वम्" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् तथा "एवं" पदेन साकाङ्क्षत्व-प्रसंगात् नास्य अधिकरणारम्भकत्वं युक्तम्, सप्तमविशेषनियमात् । माध्वभाष्ये अधिकरणारम्भात् तस्य दोषप्रसंगः । तत्र एतत् सूत्रं तदीयद्वादशाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम् । रा-श्री-श्रीप-पाठे परसूत्रमपि एतस्य शेषत्वेन गृहीतम् । तन्न युक्तम्, परसूत्रे चकारेण हेतोः विजातीयवैलक्षण्यस्य सूचनात् । चतुर्थविशेषनियमात् ।

( ११ ) "दर्शनाच्च" ३।२।२१ (३३९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भ-कत्वम् । चतुर्थसामान्यनियमात्, चकारादपि निषेधः, षष्ठविशेषनियमात । रा-श्री-श्रीप-पाठे एतत् सूत्रं पूर्वसूत्रस्य शेषत्वेन गृहीतम् । तन्न युक्तम्, चतुर्थसामान्यनियमात् । चकारेण हेतोः विजातीयवैलक्षण्यस्य विधानात् । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः ।

### षष्ठं प्रकृतैतावत्त्वाधिकरणम्

अत्र "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" ३।२।२२(३४०)इति सूत्रस्य "प्रकृतैतावत्त्वम्" इति पदात् अस्य "प्रकृतैतावत्त्वाधिकरणं" नाम । तत्र शंकर-भास्कर-श्रीपति-भाष्येषु नव सूत्राणि गृहीतानि, माध्वभाष्ये तु एतदेव एकं सूत्रम् गृहीतम् । श्रीपति-भाष्ये

तथा पञ्च सूत्राणि गृहीतानि । रामानुज-निम्बार्क-वल्लभभाष्येषु अधिकरणं न रचितम् । तत्र रामानुजमते एतत् सूत्रं तदीयपञ्चमाधिकरणस्य पञ्चदशसु सूत्रेषु पञ्चदशसूत्रम्, निम्बार्कमते तदीयचतुर्थाधिकरणस्य विंशतिसंख्यकेषु सूत्रेषु द्वादशं सूत्रं, तथैव वल्लभभाष्ये तदीयषष्ठाधिकरणस्य चतुर्षु सूत्रेषु चतुर्थं सूत्रम् । तत्र रा-नि-व-भाष्येषु अधिकरणस्य अरचनायां दोषः । तानि च नव सूत्राणि—

१ । "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" ३।२।२२ (३४०)

२ । "तदव्यक्तमाह हि" ३।२।२३ (३४१)

३ । "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" ३।२।२४ (३४२)

४ । "प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म्मण्यभ्यासात्" ३।२।२५ (३४३)

५ । "अतोऽनन्तेन तथा हि लिङ्गम्" ३।२।२६ (३४४)

६ । उभयव्यपदेशात् त्वहिकुण्डलवत्" ३।२।२७ (३४५)

७ । "प्रकाशाश्रयवद् वा तेजस्त्वात्" ३।२।२८ (३४६)

८ । "पूर्ववद् वा" ३।२।२९ (३४७)

९ । "प्रतिषेधाच्च" ३।२।३० (३४८)

तत्र ( १ ) "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" ३।२।२२ (३४०) इत्यत्र "प्रकृतैतावत्त्वम्" इति प्रथमान्तपदात् अनेन अधिकरणरम्भः युज्यते, चतुर्थसामान्यनियमात् । हि-कारः च-कारश्च नात्र विधेयान्तरस्य बाधकौ; द्वादश-त्रयोदश-विशेष-नियमाभ्याम्, विषयश्रुति-भेदात् एकादश-विशेष-नियमाच्च । तेन रा-नि-व-भाष्येषु अधिकरणस्य अरचनायां दोषः । विधेया-न्तरत्वस्य अनङ्गीकारे तेषाम् अदोषत्वं स्यात्, शिष्टानां पञ्चानां भाष्यानामेव दोषः भवेत् । परन्तु विषयश्रुतिभेदः तत्तन्मतेऽपि स्वीकृतः । अतो न शिष्टाः दुष्टाः । अत्र चतुर्थ-सामान्य-नियमः तथा एकादश-द्वादश-त्रयोदश-विशेष-नियमाः द्रष्टव्याः ।

( २ ) "तदव्यक्तमाह हि" ३।२।२३ (३४१) इत्यत्र "तदव्यक्तम्" इति प्रथमान्तपदात् चतुर्थसामान्यनियमेन, अधिकरणम् आरम्भणीयं, परन्तु हि-कारेण एतदर्थस्य साकांक्षत्वेन षष्ठ-विशेषनियमात् नास्य अधिकरणारम्भकत्वम् । माध्वभाष्ये तथा वल्लभभाष्ये अधिकरणस्य आर-म्भात् तयोरेव दोषः । एतत् सूत्रम् माध्वभाष्ये तदीयचतुर्दशाधिकरणस्य पञ्चसु सूत्रेषु प्रथमं सूत्रम्; वल्लभभाष्ये तु तदीय-सप्तमाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् ।

( ३ ) "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" ३।२।२४ (३४२) इत्यत्र प्रथमा-न्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च ।

( ४ ) "प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म्मण्यभ्यासात्" ३।२।२५ (३४३) इत्यत्र "अवैशेष्यं" तथा "प्रकाशः" इति प्रथमान्तपदद्वयात् अत्र अधिकरणारम्भः संभाव्यते एव, चतुर्थ-सामान्यनियमात्, तथापि च च-कारेण तन्निषेधः, षष्ठविशेषनियमात् । वल्लभभाष्ये अधिकरणा-

रम्भात् तथा च तदीयाष्टमाधिकरणस्य सूत्रत्रयमध्ये प्रथमसूत्रत्वेन ग्रहणात् तस्यैव दोषः। माध्वभाष्ये तथा बलदेवभाष्ये एतत् सूत्रं द्विधा विभक्त दृश्यते । "प्रकाशादिवच्चावैशेष्यम्" इति एकं सूत्रम्, शिष्टम् अपरम्। तन्न युक्तम्। प्रकाशश्च इति च-कारेण हेतोः विजातीय-वैलक्षण्यापत्तेः । चतुर्थसामान्यनियमात् ।

( ५ ) "अतोऽनन्तेन तथाहि लिंगम्" ३।२।२६ (३४४) इत्यत्र "लिंगम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भः संगच्छते, चतुर्थसामान्यनियमात्, किन्तु "अतः" "हि" इति शब्दद्वयेन तस्य साकांक्षत्वविधानात् षष्ठ-सप्तम-विशेष-नियमाभ्यां न तथा कर्त्तव्यम्।

( ६ ) "उभयव्यपदेशात् त्वहिकुण्डलवत्" ३।२।२७ (३४५) इत्यत्र "अहिकुण्डल-वत्" इति पदात् कस्यचित् प्रथमान्तपदस्य अध्याहर्त्तव्यत्वेऽपि चतुर्थ-विशेष-नियमात् अनि-षेधार्थक-तु-शब्दात् तथा हि-शब्दात् अधिकरणारम्भस्य निषेधः। षष्ठ-नवम-विशेष-नियमाभ्याम्। रामानुज-मध्व-श्रीपति-भाष्येषु अधिकरणस्य आरम्भात् तेषामेव दोषः वाच्यः। तत्र रामानुजभाष्ये एतत् सूत्रं तदीय-षष्ठाधिकरणस्य चतुर्षु सूत्रेषु प्रथमं, माध्वभाष्ये तदीय-पञ्चदशाधिकरणस्य सूत्र-चतुष्टयमध्ये एतद्धि प्रथमं सूत्रं, तथैव श्रीपति-भाष्ये तदीय-सप्तमाधिकरणस्य चतुर्षु सूत्रेषु एतच्च प्रथमं सूत्रं भवति।

( ७ ) "प्रकाशाश्रयवद् वा तेजस्त्वात्" ३।२।२८ (३४६) इत्यत्र विकल्पार्थक-"वा"-शब्दयोगेन साकांक्षत्वविधानात् षष्ठविशेषनियमेन तथा "प्रकाशाश्रयवद्" इत्यनेन कस्यचित् प्रथमान्तपदस्य अध्याहर्त्तव्यत्वेऽपि चतुर्थसामान्यनियमात् अधिकरणारम्भनिषेधः। वल्लभभाष्ये अनेन अधिकरणारम्भात्, तथा च तदीयभाष्ये नवमाधिकरणस्य सूत्रत्रयमध्ये एतस्य प्राथ-म्यात् तस्य दोषः वक्तव्यः।

( ८ ) "पूर्ववद् वा" ३।२।२९ (३४७) इत्यत्र तथैव। चतुर्थसामान्य-षष्ठविशेष-नियमाभ्याम्।

( ९ ) "प्रतिषेधाच्च" ३।२।३० (३४८) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भ-कत्वं युक्तम्, चतुर्थसामान्यनियमात्, च-कारादपि निषेधः, षष्ठविशेषनियमात्। परसूत्रे अधिक-सम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरण-समाप्तिः संगच्छते।

## सप्तमं पराधिकरणम्

अत्र "परमतः सेतून्मानसंवन्धभेदव्यपदेशेभ्यः" ३।२।३१ (३४९) इति सूत्रस्य "परम्" इति शब्दात् अस्य "पराधिकरणं"-नाम। तत्र शङ्कर-रामानुज-वल्लभ-भाष्येषु सप्त सूत्राणि गृही-तानि, वल्लभस्य तु एतद्धि दशमम् अधिकरणम्। भास्करभाष्ये षट् सूत्राणि गृहीतानि, "स्थान-विशेषात् प्रकाशादिवत्" इति (३४) सूत्रस्य वर्जनात्। तथा निम्वार्कभाष्ये एकादश सूत्राणि, तस्य इदं पञ्चमम् अधिकरणम्। माध्वभाष्ये सूत्रत्रयं, तस्य एतत् षोडशम् अधिकरणम्, श्रीकण्ठभाष्ये

पञ्च सूत्राणि; तस्य च इदं सप्तमम् अधिकरणम्, तथा श्रीपतिभाष्ये पञ्च सूत्राणि, तस्य तु एतत् अष्टमम् अधिकरणम् । तानि च सप्त सूत्राणि—

१ । "परमतः सेतून्मानसम्वन्धभेदव्यपदेशेभ्यः" ३।२।३१ (३४९)
२ । "सामान्यात् तु" ३।२।३२ (३५०)
३ । "बुद्धयर्थः पादवत्" ३।२।३३ (३५१)
४ । "स्थानविशेषात् प्रकाशादिवत्" ३।२।३४ (३५२)
५ । "उपपत्तेश्च" ३।२।३५ (३५३)
६ । "तथान्यप्रतिषेधात्" ३।२।३६ (३५४)
७ । "अनेन सर्वगतत्व-मायाम-शब्दादिभ्यः" ३।२।३७ (३५५)

अत्र (१) "परमतः सेतून्मानसम्वन्धभेदव्यपदेशेभ्यः" ३।२।३१ (३४९) इत्यत्र "परम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव, चतुर्थ-सामान्य-नियमात्, सर्वेषाम् ऐकमत्यं च । "अतः" शब्दस्य अत्र हेतुवाचकत्वाभावात् न साकांक्षत्वं, सप्तम-विशेष-नियमात् ।

(२) "सामान्यात् तु" ३।२।३२ (३५०) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् चतुर्थसामान्यनियमात्, तु-शब्दस्य उक्तपूर्वपक्षव्यावर्त्तकत्वात् नाधिकरणारम्भकत्वम्, अष्टादश-विशेषनियमात् । माध्वभाष्ये एतत्स्थले "दर्शनात्" इति सूत्रं पठ्यते ।

(३) "बुद्धयर्थः पादवत्" ३।२।३३ (३५१) इत्यत्र "बुद्धयर्थः" इति प्रथमान्तपदसत्त्वेऽपि अर्थतः साकाक्षत्वविधानात् नास्य अधिकरणारम्भकत्वम् । चतुर्थ-सामान्य-षष्ठ-विशेष-नियमाभ्याम् ।

(४) "स्थानविशेषात् प्रकाशादिवत्" ३।२।३४ (३५२) इत्यत्र "प्रकाशादिवत्" इति पदात् प्रथमान्तपदस्य अध्याहर्त्तव्यत्वेऽपि अर्थतः साकांक्षत्वात् नास्य अधिकरणारम्भकत्वम्, चतुर्थ-सामान्य-षष्ठविशेष-नियमाभ्याम् । माध्वभाष्ये अधिकरणारम्भात् तस्य दोषः । तन्मते एतत् दशाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम् । भास्करभाष्ये नैतत् सूत्रं पठ्यते ।

(५) "उपपत्तेश्च" ३।२।३५ (३५३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् । च-करादपि निषेधः, षष्ठ-विशेषनियमात् ।

(६) "तथान्यप्रतिषेधात्" ३।२।३६ (३५४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात् । मध्व-श्रीकण्ठ-श्रीपति-भाष्येषु तत्करणात् दोषः । माध्वभाष्ये एतद्धि तदीयाष्टमाधिकरणस्य एकमेव सूत्रम् । श्रीकण्ठभाष्ये तदीयाष्टमाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम् तथा श्रीपतिभाष्ये तदीयनवमाधिकरणस्य सूत्रद्वयमध्ये एतत्तु प्रथमं सूत्रम् ।

(७) "अनेन सर्वगतत्वमायाम-शब्दादिभ्यः" ३।२।३७ (३५५) इत्यत्र "सर्वगतत्वम्" इति प्रथमान्तपदसत्त्वेऽपि "अनेन" इति पदेन साकांक्षत्वविधानात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् सप्तमविशेषनियमाच्च । परसूत्रे अधिकरणसमाप्त्या अधिकरणारम्भात्

अत्रैव अधिकरणसमाप्तिः। माध्वभाष्ये अधिकरणारम्भात् तस्य दोषः। तत्र एतद्धि तदधीन-विंशाधिकरणस्य एकमेव सूत्रम्।

## अष्टमं फलाधिकरणम्।

अत्र "फलमत उपपत्तेः" ३।२।३८ (३५६) इति सूत्रस्य "फल"-शब्दात् अस्य "फलाधिकरणं" नाम। तत्र केवलं निम्बार्कभाष्यं विहाय सर्वैः अत्र सूत्रचतुष्टयं गृहीतम्। शङ्कर-भास्कर-रामानुज-मतेषु एतद्धि अष्टमम् अधिकरणम्। निम्बार्कमते पञ्चमाधिकरणस्य एकादशसु सूत्रेषु अष्टमं सूत्रम्, माध्वमते विंशतितमम् अधिकरणं, श्रीकण्ठमते नवमम् अधिकरणं, श्रीपतिमते दशमं, तथा वल्लभमते एकादशाधिकरणम्। तानि च सूत्रचतुष्टयम्—

| | |
|---|---|
| १। "फलमत उपपत्तेः" ३।२।३८ (३५६) | ४। पूर्वं तु बादरायणो हेतुव्यपदेशात् ३।२।४१ (३५९) |
| २। "श्रुतत्वाच्च" ३।२।३९ (३५७) | |
| ३। "धर्मं जैमिनिरत एव" ३।२।४० (३५८) | |

अत्र (१) "फलमत उपपत्तेः" ३।२।३८ (३५६) इत्यत्र फलमिति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः संगतः एव। चतुर्थ-सामान्य-नियमात्। अतः-शब्दस्य अत्र ब्रह्मवाचकत्वात् सप्तम-विशेष-नियमात् न निषेधः। निम्बार्कभाष्ये अधिकरणस्य अनारम्भात् तस्य दोषः।

(२) "श्रुतत्वाच्च" ३।२।३९ (३५७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, च-योगाच्च षष्ठ-विशेष-नियमात्।

(३) "धर्मं जैमिनिरत एव" ३।२।४० (३५८) इत्यत्र "धर्म" तथा "जैमिनिः" इति प्रथमान्तपदद्वयस्य सत्त्वेऽपि जैमिनिः इति नाम्ना स्वमतप्रतिकूलपरमतस्य निर्देशात्, विषयभेदाभावाच्च, तथैव "अतएव" इति पदेन साकाङ्क्षत्वविधानात् नात्र अधिकरणारम्भः संगतः, विंशविशेष-नियमात्, सप्तमविशेषनियमाच्च।

(४) "पूर्वं तु बादरायणो हेतुव्यपदेशात्" ३।२।४१ (३५९) इत्यत्र "पूर्व" तथा "बादरायणः" इति प्रथमान्तपदद्वयसत्त्वेऽपि चतुर्थसामान्यनियमात्, उक्तपूर्वपक्षव्यावर्त्तक-तु-शब्द-योगात् नास्य अधिकरणारम्भकत्वम्, विभेदान्तराद्वते स्वमतज्ञापनात् च। नवमाष्टादश-विंश-विशेष-नियमैश्च। पादशेषात् अत्रैव अधिकरणसमाप्तिश्च संगता।

## द्वितीयपादसमालोचनम्।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायाम्—

(१) कति कीदृशाश्च नियमा अत्र सङ्कलिताः,

(२) कति च दोषाः कस्य भाष्यस्य कथं समुत्थिताः,

(३) कति भ्रान्तयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

(४) उपजीव्यानुवृत्तिश्चैषां कीदृशी च पादसंगतिर्भविष्यति इति।

एते च चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते. तत्र प्रथमं तावत्—

**( १ ) कति कीदृशाश्च नियमा अत्र सङ्कलिताः ।**

अत्रापि न कोऽपि नूतनः नियमः सङ्कलितः ।

**( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।**

तत्र ३।२।१ अधिकरणे माध्वभाष्ये "पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्ध-विपर्ययौ" ३।२।५ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव ३।२।१ अधिकरणे माध्वभाष्ये "देहयोगात् वा सोऽपि" ३।२।६ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।२।२ अधिकरणे मध्व-वल्लभ-भाष्ययोः "अतः" प्रबोधोऽस्मात्" ३।२।८ सूत्रे अधि-करणस्य रचनायां दोषः ।

३।२।३ अधिकरणे निम्बार्क-वल्लभ-भाष्ययोः "स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः" ३।२।९ सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।२।४ अधिकरणे वल्लभभाष्ये "मुग्धेऽर्धसम्पत्तिः परिशेषात्" ३।२।१० इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।२।५ अधिकरणे मध्ववल्लभभाष्ययोः "अरूपवदेव हि तत्प्रधानत्वात्" इति ३।२।१४ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव भास्करभाष्ये "अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययम्" इति ३।२।१४ (क) अतिरिक्तसूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव माध्वभाष्ये "अतएव चोपमा सूर्य्यकादिवत्" इति ३।२।१८ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये तथा वल्लभभाष्ये "अम्बुवदग्रहणात् तु न तथात्वम्" इति ३।२।१९ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" इति ३।२।२० सूत्रे अधिकरणस्य रचनायां दोषः ।

३।२।६ अधिकरणे रा-नि-व-भाष्येषु "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च "भूयः" इति ३।१।२२ सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव मध्व-वल्लभ-भाष्ययोः "तदव्यक्तम् आह हि" इति ३।२।२३ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव वल्लभभाष्ये "प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म्मण्यभ्यासात्" इति ३।२।२५ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव रा-म-श्रीप-भाष्येषु "उभयव्यपदेशात् त्वहिकुण्डलवत्" इति ३।२।२७ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव वल्लभभाष्ये "प्रकाशाश्रयवद् वा तेजस्त्वात्" इति ३।२।२८ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।२।७ अधिकरणे माध्वभाष्ये "स्थानविशेषात् प्रकाशादिवत्" इति ३।२।३४ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव म-श्री-श्रीप-भाष्येषु "तथान्यप्रतिषेधात्" इति ३।२।३६ सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "अनेन सर्वगतत्वमायामशब्दादिभ्यः" इति ३।२।३७ सूत्रे अधिकरणस्य रचनायां दोषः ।

३।२।८ अधिकरणे निम्बार्कभाष्ये "फलमत उपपत्तेः" इति ३।२।३८ सूत्रे अधिकरणस्य अरचनायां दोषः ।

एवं पादेऽस्मिन् भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | ० | १२ दोषाः |
| वल्लभभाष्ये | ३ दोषाः | ६ " |
| भास्करभाष्ये | १ दोषः | ० |
| रामानुजभाष्ये | १ " | १ दोषः |
| निम्बार्कभाष्ये | ३ दोषाः | ० " |
| श्रीपतिभाष्ये | ० " | २ दोषौ |
| श्रीकण्ठभाष्ये | ० " | १ दोषः |

इति वक्तुं शक्यते तथा च पादेऽस्मिन् शाङ्करभाष्यस्यैव दोषाभावः । इदानीं द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।**

प्रथमाधिकरणे—

"सन्ध्ये सृष्टिराह हि" ३।२।१ इति सूत्रे "अथ रथान् रथयोगान् पथः सृजते" (बृः ४।३।१०)

"निर्मातारं चैके पुत्रादयश्च" ३।२।२ इति सूत्रे "यः एषः सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः" (कः ३।५।८)

"मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" ३।२।३ इति सूत्रे "अथ रथान् रथयोगान् पथः सृजते" (बृः ४।३।१०) "न तत्र रथा न रथयोगा न पन्थानो भवन्ति"

(बृः ४।५।१०) "स्वयं विहृत्य स्वयं निर्म्माय" (बृः ४।३।९)

"सूचकश्च हि श्रुतेराचक्षते च तद्विदः" ३।२।४ सूत्रे "यदा कर्म्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" (छाः ५।२।९)

"पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्य्ययौ" ३।२।५ इति सूत्रे "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्य्यं केवल आप्तकामः (श्वे: १।११)

द्वितीयाधिकरणे—

"तदभावो नाडीषु तच्छ्रुतेरात्मनि च" ३।२।७ इति सूत्रे "आसु तदा नाडीषु सृप्तो भवति" (छाः ८।६।३) "ताभिः प्रत्यवसृप्य पुरीतति शेते" (बृः २।१।१९) "य एषः अन्तर्हृदये आकाशस्तस्मिन् शेते" (बृः २।१।१७)

"अतः प्रबोधोऽस्मात्" ३।२।८ इति सूत्रे "सत आगम्य न विदुः सत आगच्छामहे" (छः ६।१०।२)

तृतीयाधिकरणे—

"स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः" ३।२।९ सूत्रे "पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव" (बृः ४।३।१६)

पञ्चमाधिकरणे—

"न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि" ३।२।११ इति सूत्रे "सर्वकामः सर्वगन्धः सर्वरसः" (छाः ३।१४।२) "अस्थूलमनणु" (बृः ३।८।८) "अशब्दमस्पर्शमरूपम्" (कठः ३।१५)

"न भेददिति चेन्न प्रत्येकमतद्वचनात्" ३।२। २ इति सूत्रे "यश्चायमस्यां पृथिव्यां तेजोमयः अमृतमयः पुरुषः" (बृः २।५।१)

"अपि चैवमेके" ३।२।१३ इति सूत्रे "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (कठः ४।११) "नेह नानास्ति किञ्चन" (कठः ४।११)

"अरूपवदेव हि तत्प्रधानत्वात्" ३।२।१४ इति सूत्रे "अस्थूलम्" (बृः ३।८।८)

"आह च तन्मात्रम्" ३।२।१६ इति सूत्रे "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नः रसघन एव एवं वा अरे अयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" (बृः ४।५।१३)

"दर्शयति चाथो अपि स्मर्य्यते" ३।२।१७ इति सूत्रे "अथात आदेशो नेति नेति" (बृः२।३।६) "अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते" (गीः १३।१२)

"अतएव चोपमा सूर्य्यकादिवत्" ३।२।१८ इति सूत्रे "यथा ह्ययं ज्योतिरात्मा विवस्वानपो

भिन्ना बहुधैकोऽनुगच्छन् । "उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" (महाः शाः ?)

"दर्शनाच्च" ३।२।२१ सूत्रे "पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः" । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत ॥ (बृः२।५।१८)

षष्ठाधिकरणे—

"प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" ३।२।२२ इति सूत्रे "द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं च" (बृः २।३।१) "अथात आदेशो नेति नेति" (बृः २।३।६) "न हि एतस्मात् इति नेति अन्यत् परमस्ति" (बृः २।३।६) "अथ नामधेयम्" (बृः २।३।६)

"तदव्यक्तमाह हि" ३।२।२३ इति सूत्रे "न चक्षुषा गृह्यते नापि वाचा, नान्यैर्देवैस्तपसा कर्मणा वा" (मुः३।१।८)

"अपि च संराधने प्रत्यक्षानुमानाभ्याम्" ३।२।२४ इति सूत्रे "कश्चिद् धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन् ।" (कठः ४।१) "यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥" (महाः शाः ४८।५४)

"प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म्मण्यभ्यासात्" ३।२।२५ इति सूत्रे "तत्त्वमसि" (छाः ६।८।७)

"अतोऽनन्तेन तथाहि लिंगम्" ३।२।२६ इति सूत्रे "स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति" (मुः ३।२।९)

"प्रतिषेधाच्च" ३।२।३० इति सूत्रे "नान्योऽतोऽस्ति द्रष्टा" (बृः ३।७।२३) "नेति नेति" (बृः २।३।६)

सप्तमाधिकरणे—

"परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः" ३।२।३१ इति सूत्रे "अथ य आत्मा स सेतुः" (छाः ८।४।१) "ब्रह्म चतुष्पात्" (माः १२ छाः ३।१८।२) "प्राज्ञेनात्मना सम्परिष्वक्तः" (बृः४।३।२१) "शारीर आत्मा" (तैः २।३।१)

"बुद्ध्यर्थः पादवत्" ३।२।३३ इति सूत्रे "ब्रह्म चतुष्पात्" (छाः ३।१८।२)

"उपपत्तेश्च" ३।२।३५ इति सूत्रे "स्वमपीतो भवति" (छाः ६।८।१)

"तथान्यप्रतिषेधात्" ३।२।३६ इति सूत्रे "आत्मैव अधस्तात्" (छाः ७।२५।२)

"अनेन सर्वगतत्वमायामशब्दादिभ्यः" ३।२।३७ इति सूत्रे "आकाशवत् सर्वगतश्च नित्यः" (शतपथ ब्राः ?) "नित्यः सर्वगतः स्थाणुः" (गीः २।२४)

अष्टमाधिकरणे—

"श्रुतत्वाच्च" ३।२।३९ इति सूत्रे "स वा एष महानज आत्मा अन्नादो वसुदानः" (बृः ४।४।२४)

"धर्म्मं जैमिनिरत एव" ३।२।४० इति सूत्रे "स्वर्गकामो यजेत" (?)

"पूर्वं तु वादरायणो हेतुव्यपदेशात्" ३।२।४१ इति सूत्रे "एष ह्येव साधु कर्म्म कारयति" (कौः ३।८) "अन्नादो वसुदानः (बृ. ४।४।२४) "लभते च ततः कामान् मयैव विहितान् हि तान्" (गीः ७।२१)

इदानीं द्रष्टव्यं एतादृशसूत्रोपजीव्यश्रुतिबलेन—

## (४) कीदृशी अस्य पादसंगतिः ।

उदाहृतश्रुतयः शङ्करमतानुयायिन्यः । भाष्यान्तरे अत्र विषये महान् मतभेदः एव दृश्यते । बहुषु स्थलेषु ऐकमत्यसत्त्वेऽपि स्व-स्व-सिद्धान्तानुकूल्यार्थं श्रुत्यन्तरं गृहीतम् । पूर्वपूर्व-पादेषु यथा सर्वेषु भाष्येषु भाषाभेदसत्त्वेऽपि प्रायेण मतसाम्यं दृष्टम्, अत्र न तथा । अत्र मत-भेदस्तु तत्त्वतः एव अतीव प्रबलः प्रतीयते । यथा—

शङ्करमते अत्र ब्रह्मणः निर्विशेषत्व-बोधकश्रुतयः समुद्धृताः, रामानुजादीनां मते तु सवि-शेषत्व-ज्ञापकश्रुतयः समाश्रिताः । एवं च तत्त्वांशे एव अयं मतभेदः सञ्जातः, अतः कल्प्यते—एतन्मतभेदमीमांसा सूत्रार्थविचारं विना न सम्भवति । परन्तु सूत्रार्थविचारस्यापि स्व-स्व-सिद्धान्ताधीनत्वात् ततोऽपि मतभेदमीमांसा सुदूरपराहतैव प्रतिभाति । तर्कशक्तिबलेन असम्भावितमपि सम्भावितत्वेन, असंगतमपि संगतत्वेन प्रतिपादयितुं शक्यते । अतः अत्र सूत्रार्थविचारं विहाय अन्यः पन्थाः अवलम्बनीयः । स च पन्थाः अत्र संगतिशरणागतिः । सा तु इत्थम्—अध्यायसंगत्यनुरोधेन एतत्पादप्रतिपाद्यं साधनमेव । एतत् तु प्रागेव उक्तम् । तदेवात्र संगतित्वेन ज्ञेयम् । तच्च साधनत्वं सविशेषब्रह्मणि यथा सम्भवति, तथा निर्वि-शेषब्रह्मण्यपि । तेन साधनरूपाध्यायसंगत्या नायं मतभेदः निराकर्त्तुं शक्यते । अत अध्यायसंगतेः व्यापकीभूता या शास्त्रसंगतिः तया समाधातुं शक्यते नवेति अत्र चिन्तनी-यम् । वस्तुतस्तु शास्त्रसंगतिबलेन एतत्पादस्यापि निर्विशेषब्रह्मपरत्वं साधनीयम् इति भूमिकाग्रन्थे प्रागेव उक्तम् । तात्पर्य्यनिर्णायकलिंगबलेन एतच्छास्त्रस्य निर्विशेषब्रह्म-परत्वप्रतिपादनात् । तथा सति एतत्पाद-प्रतिपाद्यरूप-पादसंगतिः निर्विशेषब्रह्मवादिशङ्करमत-सम्मता इति कल्पयितुम् उचितम् । तथापि अत्र विभिन्नभाष्याणाम् अनुमोदितम् एतत्-पादप्रतिपाद्यरूप-पादसंगतिः अधस्तात् प्रदर्श्यते—

शंकरमते—पूर्वभागेन त्वं-पदार्थस्य, उत्तरभागेन तत्-पदार्थस्य शोधनरूप-साधननिर्देशः ।

भास्करमते—प्रायेण तथैव ।

रामानुजमते—पुरुषोत्तमस्य सर्वदा हेय-प्रत्यनीकत्व-कल्याणगुण-गणाकरत्व-रूपोभयलिंगत्व-प्रतिपादनम् ।

निम्बार्कमते—विवेकवैराग्यदार्ढ्याय स्वप्नावस्थाविचारः ।

माध्वमते—भक्तिनिरूपणम् ।

श्रीकण्ठमते—जीवावस्था-निरूपण-पूर्वकेश्वर-स्वरूप-लक्षणोक्तिः ।

श्रीपतिमते—परमशिव-ब्रह्मस्वरूप-लक्षणादीनि प्रपञ्चितानि ।

अत्र विषयान्तरमेकं विज्ञेयं दृश्यते । अत्र साधनाध्याये साधन-वर्णन-प्रसंगेन द्वितीयपादस्य पञ्चम-षष्ठ-सप्तमाधिकरणेषु ब्रह्मणः नीरूपभावस्य वेदान्तसम्मतत्वं, ब्रह्मणः निषेधातीतत्वेन सत्यत्वस्थापनं तथा ब्रह्मभिन्नस्य अवस्तुत्वव्यवस्थापनादिकं वर्णितम् । यद्यपि एतत् सर्वं तत्त्वनिर्णायक-प्रथम-द्वितीयाध्याययोः वक्तव्यं भवति, तथापि यथा एतदध्यायस्य प्रथमपादे वर्णितं यत् फलवर्णनाङ्गीभूत-परलोक-गमनागमन-प्रकारादिकं, तत् सर्वं वैराग्योत्पादनार्थं इति कृत्वा साधनत्वेन कल्पनीयं, तथा अत्रापि यत् तत्त्ववर्णनादिकं तत् सर्वं साधनांगत्वेन ग्रहणीयम् । तथा सत्यपि नास्य स्वार्थे तातपर्य्यशून्यत्वं शङ्कनीयम् । यतः स्वरूप-चिन्तनमेव साधनत्वेन अत्र अभिमन्यते । अतः अत्र नास्य अप्रासंगिकत्वं न वा अतात्त्विकत्वम् ।

---

# अथ तृतीयाध्याये तृतीयपादः ।

## प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम्

अत्र "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" ३।३।१ (३६०) इति सूत्रस्य "सर्ववेदान्तप्रत्ययम्" इति पदात् अस्य "सर्ववेदान्तप्रत्ययाधिकरणं" नाम । तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु चत्वारि सूत्राणि, रामानुज-मध्व-निम्बार्क-श्रीपति-भाष्येषु पञ्च सूत्राणि, तथा वल्लभभाष्ये पञ्चदश सूत्राणि गृहीतानि । तच्च च सूत्रचतुष्टयम्—

१ । "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" ३।३।१ (३६०)

२ । "भेदान्नेति चेन्नैकस्यामपि" ३।३।२ (३६१)

३ । "स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः" ३।३।३ (३६२)

४ । "दर्शयति च" ३।३।४ (३६३)

अत्र (१) "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" ३।३।१ (३६०) इत्यत्र "सर्ववेदान्तप्रत्ययम्" इति प्रथमान्तपदस्य सत्त्वात् तथा पादारम्भात् अत्र अधिकरणारम्भः संगतः एव । चतुर्थसामान्यनियमात्, द्वितीयविशेषनियमाच्च ।

(२) "भेदान्नेति चेन्नैकस्यामपि" ३।३।२ इत्यत्र प्रथमान्तपदाभावात् तथा "इति चेन्न" इति पदसत्त्वात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च भास्करमते अत्र "स्यात्" इति शब्दस्य पाठः दृश्यते। तथा सति ऊनविंशविशेषनियमात् न अधिकरणारम्भः।

(३) "स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः" ३।३।३ (३६२) इत्यत्र "तन्नियमः" इति प्रथमान्तपदसत्त्वेऽपि, च-कारयोगात् नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। अत्र मध्व-वलदेव-भाष्यद्वयमध्ये "सववच्च तन्नियमः" इत्यंशेन सूत्रद्वयं पठितम्। तन्न युक्तम्। "सववच्च तन्नियमः" इत्यत्र च-कारस्य सत्त्वात्, अत्यन्तं पृथग्विषयस्य सूचनाच्च। चतुर्थसामान्यनियमात्। चतुर्थषष्ठविशेषनियमाभ्यां च।

(४) "दर्शयति च" ३।३।४ (३६३) इत्यत्र प्रथमान्त-पदाभावात् च-काराच्च नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च। परसूत्रे चतुर्षु भाष्येषु अधिकरणारम्भात् नियमानुगतत्वाच्च अत्रैव अधिकरणसमाप्तिः संगता एव।

## द्वितीयम् उपसंहाराधिकरणम्

अत्र "उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च" ३।३।५ (३६४) इति सूत्रस्य "उपसंहारः" इति पदात् अस्य "उपसंहाराधिकरणं" नाम। तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु एतत् एकं सूत्रं गृहीतम्; माध्वभाष्ये तु सूत्रचतुष्टयमेव। तत्र रामानुज-निम्बार्क-श्रीपति-भाष्येषु एतत् सूत्रं तदीयप्रथमाधिकरणस्य पञ्चसु सूत्रेषु पञ्चमं सूत्रम्। बल्लभभाष्ये तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु एतद्धि पञ्चमं सूत्रम्। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः।

तत्र "उपसंहारः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तमेव। चकारस्य अत्र विधेयान्तरज्ञापकत्वात् अधिकरणारम्भे न बाधकत्वम्। चतुर्थसामान्यनियमात्, द्वादशविशेषनिमयाच्च। रामानुज-निम्बार्क-श्रीपति-बल्लभ-भाष्येषु नात्र अधिकरणं रचितम्। अतः रा-नि-श्रीप-व-भाष्येषु अधिकरणस्य अनारम्भात् तेषामेव दोषः।

## तृतीयम् अन्यथाधिकरणम्

अत्र "अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ (३६५) इति सूत्रस्य "अन्यथात्वम्" इति पदात् अस्य "अन्यथात्वाधिकरणं" नाम। तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु त्रीणि सूत्राणि, रामानुज-निम्बार्क-श्रीपति-भाष्येषु चत्वारि सूत्राणि द्वितीयाधिकरणं च, मध्व-बल्लभ-भाष्ययोः अधिकरणं न आरब्धम्। तत्र माध्वभाष्ये एतत् सूत्रं तदीयद्वितीयाधिकरणस्य चतुर्षु सूत्रेषु द्वितीयं सूत्रम्। तथा बल्लभभाष्ये एतत् सूत्रं तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु षष्ठं सूत्रम्। तानि च त्रीणि सूत्राणि—

१ । "अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ (३६५)

२ । "न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्" ३।३।७ (३६६)

३ । "संज्ञातश्चेत् तदुक्तमस्ति तु तदपि" ३।३।८ (३६७)

अत्र ( १ ) "अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ (३६५) इत्यत्र "अन्यथात्वम्" इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणारम्भः संगच्छते एव । चतुर्थसामान्यनियमात् । अत्र "इति चेन्न" इति पदात् अपि पञ्चमविशेषनियमात् न तत्त्वे वाधा, प्रथमान्तपदात् परं पञ्चम्यन्तपदं, ततः "इति चेन्न" इति पदस्य सत्त्वात् । चतुर्दशविशेषनियमात् । तेन मध्व-बल्लभ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्" ३।३।७ (३६६) इत्यत्र "परोवरीयस्त्वादिवत्" इति पदात् कस्यचित् प्रथमान्तपदस्य अध्याहर्त्तव्यत्वेऽपि "न वा" इति पदेन साकांक्षत्वविधानात् चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च नास्य अधिकरणारम्भकत्वम् ।

( ३ ) "संज्ञातश्चेत्' तदुक्तमस्ति तु तदपि" ३।३।८ इत्यत्र (३६७) "तदुक्त" मिति प्रथमान्त-पदद्वय-सत्त्वेऽपि चतुर्थसामान्यनियमात्, "चेत्" इति शब्दयोगात् पञ्चमविशेषनियमात्, तथैव "तदपि" इत्यत्र प्रथमान्तपदसत्त्वेऽपि "अपि" इति शब्दयोगात् साकांक्षत्वविधानात् षष्ठविशेषनियमात् नास्य अधिकरणारम्भकत्वम् । परसूत्रे चतुर्षु मतेषु अधिकरणारम्भात्, तथैव नियमानुमतत्वेन तादृशाधिकरणारम्भस्य सांगत्यात् अत्रैव अधिकरणसमाप्तिः संगता एव ।

## चतुर्थं व्याप्त्यधिकरणम्

अत्र "व्याप्तेश्च समञ्जसम्" ३।३।९ (३६८) इति सूत्रस्य "व्याप्ति"-पदात् अस्य "व्याप्त्यधिकरणं" नाम । तत्र शंकर-भास्कर-मध्व-श्रीकण्ठ-भाष्येषु एतेन एकेनैव सूत्रेण अधिकरणं रचितम् । माध्वभाष्ये तृतीयम् अधिकरणम्, शिष्टेषु चतुर्थम् । रामानुज-निम्बार्क-श्रीपति-बल्लभ-भाष्येषु अधिकरणं न आरब्धम् । तेषु भाष्येषु एतत् सूत्रं तदीयद्वितीयाधिकरणस्य चतुर्षु सूत्रेषु चतुर्थं सूत्रम् । बल्लभभाष्ये तु तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु एतद्धि नवमं सूत्रम् ।

अत्र "समञ्जसम्" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगच्छते, चतुर्थसामान्यनियमात् । न तु चकार-योगात् तस्य निषेधः । अर्थतः विधेयस्य वैलक्षण्यात् । द्वादशविशेषनियमात् । तेन रा-नि-श्रीप-ब-भाष्याणां अधिकरणस्य अरचवायां दोषः । सूत्राक्षरमात्रतः तु न दोषः । अर्थसाहाय्यस्य आवश्यकत्वात् दोषः । परसूत्रे सप्तसु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## पञ्चमं सर्वाभेदाधिकरणम्

अत्र "सर्वाभेदादन्यत्रेमे" ३।३।१० (३६९) इति सूत्रस्य "सर्वाभेदात्" इति पदात्

अस्य "सर्वाभेदाधिकरणं" नाम । तत्र केवलं वल्लभ-भाष्य-भिन्नेषु सर्वत्र अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । वल्लभभाष्ये तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु एतद्धि दशमं सूत्रम् ।

अत्र "इमे" इति प्रथमान्तपदसत्त्वात् अत्रो अधिकरणारम्भः संगतः । चतुर्थसामान्य-नियमात् । वल्लभभाष्ये अधिकरणस्य अरचनायां दोषः प्रसंगः । परसूत्रे सप्तसु भाष्येषु अधि-करणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः समुचिता एव ।

## षष्ठम् आनन्दाद्यधिकरणम्

अत्र "आनन्दादयः प्रधानस्य" ३।३।११ (३७०) इति सूत्रस्य "आनन्दादयः"-पदात् अस्य "आनन्दाद्यधिकरणं" नाम । तत्र शंकर-भास्कर-भाष्यद्वयमध्ये सूत्रत्रयं, रामानुज-निम्बार्क-श्रीपति-भाष्येषु सूत्रसप्तकं, मध्व-श्रीकण्ठ-भाष्यद्वये तु एकमेव सूत्रं गृहीतम् । तत्रापि रा-नि-श्रीप-भाष्येषु एतद्धि चतुर्थम् अधिकरणम्, माध्वभाष्ये पञ्चमाधिकरणम्, श्रीकण्ठभाष्ये शङ्कर-भास्कर-भाष्यवत् षष्ठाधिकरणं भवति । वल्लभ-भाष्ये तु अधिकरणं नारब्धम्, तेन अत्र तस्य दोषः । तत्र एतत् सूत्रं तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु एकादशं सूत्रम् । तानि च सूत्रत्रयम्—

| | | |
|---|---|---|
| १ । | "आनन्दादयः प्रधानस्य" | ३।३।११ (३७०) |
| २ । | "प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" | ३।३।१२ (३७१) |
| ३ । | "इतरे त्वर्थसामान्यात्" | ३।३।१३ (३७२) |

अत्र (१) "आनन्दादयः प्रधानस्य" ३।३।११ (३७०) इत्यत्र "आनन्दादयः" इति प्रथमान्तपदसत्वात् अस्य अधिकरणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात् । वल्लभभाष्ये अधिरणस्य अरयनायां दोषः ।

(२) "प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ३।३।१२ (३७१) इत्यत्र "प्रियशिर-स्त्वाद्यप्राप्तिः" इति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः उचितः, तथापि 'अप्राप्तिः" इति शब्दात् हि-शब्दाच्च अर्थतः साकांक्षत्वसिद्धेः नास्य अधिकरणारम्भः संगतः । चतुर्थसायान्य-नियमात्, षष्ठ-सप्तम-विशेषनियमाभ्याम् । मध्व-श्रीकण्ठ-भाष्ययोः षष्ट-सप्तमाधिकरणारम्भात् दोषः ।

(३) "इतरे त्वर्थसामान्यात्" ३।३।१३ (३७२) इत्यत्र "इतरे" इति प्रथमान्तपदस्य सत्त्वात् चतुर्थसामान्यनियमात् अस्य अधिकरणारम्भकत्वं युक्तं, तथापि तस्य स्वरूपतः साकांक्ष-त्वात् सप्तमविशेषनियमात्, ततः तु-शब्दः अत्र तस्य व्याघातकः, नवमविशेषनियमात् । अतः न अधिकरणारम्भः युक्तः । माध्वभाष्ये अधिकरणस्य रचनायां दोषः । परसूत्रे चतुर्षु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः कल्प्यते ।

## सप्तमम् आध्यानाधिकरणम्

अत्र "आध्यानाय प्रयोजनाभावात्" ३।३।१४ (३७३) इति सूत्रस्य "आध्यानाय"

इति पदात् अस्य "आध्यानाधिकरणं" नाम। तत्र शंकर-भास्कर-मध्व-भाष्येषु सूत्रद्वयं गृहीतम्। माध्वभाष्ये एतत् तु अष्टमम् अधिकरणम्। श्रीकण्ठभाष्ये चत्वारि सूत्राणि गृहीतानि, तथापि एतत् अष्टमम् अधिकरणम्। रा-नि-श्रीप-व-भाष्येषु अधिकरणं नारब्धम्। तत्र रामानुज-भाष्ये तथा निम्बार्क-भाष्ये श्रीपतिभाष्ये च एतत् सूत्रं तदीयचतुर्थाधिकरणस्य सप्तसु सूत्रेषु चतुर्थं सूत्रम्। वल्लभभाष्ये तु तदीयप्रथमाधिकरणस्य पञ्चदशसु सूत्रेषु चतुर्दशं सूत्रम्।

तच्च सूत्रद्वयम्—

१। "आध्यानाय प्रयोजनाभावात्" ३।३।१४ (३७३)

२। "आत्मशब्दाच्च" ३।३।१५ (३७४)

अत्र 'आध्यानाय प्रयोजनाभावात्" ३।३।१४ (३७३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम्। तथापि तस्य ऊहनीयत्वात् तथा पूर्वाधिकरणतः विषयश्रुतिभेदात् पञ्चमसामान्यनियमात्, एकादशविशेषनियमाच्च तत् युक्तमेव। तेन "पुरुषः" "अर्थादयः" इत्येवं प्रथमान्तपदमध्याहर्त्तव्यं भवति। यद्यपि अधिकरणस्य आरम्भे मतभेदस्य समसंख्यकत्वं, चत्वारि आरम्भानुकूलानि, चत्वारि च आरम्भप्रतिकूलानि, तथापि रा-नि-श्रीप-भाष्यैः सह वल्लभ-भाष्यस्य यादृशम् अनैक्यं, तादृशम् अनैक्यं नात्र दृश्यते। तेन आरम्भप्रतिकूलपक्षेऽपि मतानैक्यात् तत्-पक्षस्य दुर्बलत्वमेव भवति। ततश्च रामानुजादीनां भाष्येषु विषयश्रुतेः अभेदात्, शङ्करादीनां तु भाष्येषु तस्याः भेदात् यथा तत्र ज्ञातव्यबाहुल्यं, तथा न रामानुजादीनां भाष्येषु दृश्यते, अतः अत्र रा-नि-श्रीप-व-भाष्याणाम् अधिकरणस्य अरचनायां दुष्टत्वकल्पनं युक्तम्।

( २ ) "आत्मशब्दाच्च" ३।३।१५ (३७४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्। च-योगाच्च तथा षष्ठविशेषनियमात्। परसूत्रे चतुर्षु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## अष्टमम् आत्मगृहीत्यधिकरणम्

अत्र "आत्मगृहीतिरितरवदुत्तरात्" ३।३।१६ (३७५) इति सूत्रस्य "आत्मगृहीतिः"-पदात् अस्य "आत्मगृहीत्यधिकरणं" नाम। तत्र शङ्कर-भास्कर-मध्व-वल्लभ-भाष्येषु अधिकरणम् आरब्धम्। शङ्कर-भास्कर-वल्लभ-भाष्येषु सूत्रद्वयं गृहीतम्, माध्वभाष्ये तु एकमेव सूत्रम्। शङ्कर-भास्करयोः अष्टमम् अधिकरणम्, मध्वस्य नवमाधिकरणम्। वल्लभस्य तु द्वितीयम् अधिकरणम्। रामानुज-निम्बार्क-श्रीकण्ठ-श्रीपति-भाष्येषु अधिकरणं न आरब्धम्। तत्र रामानुज-निम्बार्क-श्रीपति-भाष्येषु एतत् सूत्रं तदीयचतुर्थाधिकरणस्य सप्तसु सूत्रेषु षष्ठं सूत्रम्, श्रीकण्ठ-भाष्ये तु तदीयाष्टमाधिकरणस्य चतुर्षु सूत्रेषु तृतीयं सूत्रम्। तत् च सूत्रद्वयम्।

१। "आत्मगृहीतिरितरवदुत्तरात्" ३।३।१६ (३७५)

२। "अन्वयादिति चेत् स्यादवधारणात्" ३।३।१७ (३७६)

अत्र (१) 'आत्मगृहीतिरितरवदुत्तरात्" ३।३।१६ (३७५) इत्यत्र "आत्मगृहीतिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। चतुर्थसामान्यनियमात्। रा-नि-श्री-श्रीप-भाष्येषु अधिकरणस्य अरचनायां दोषः। समसंख्यकत्वेऽपि नियमविरुद्धत्वात्।

(२) "अन्वयादिति चेत् स्यादवधारणात्" ३।३।१७ (३७६) इत्यत्र प्रथमान्तपदाभावात् "इति चेत्" इत्यादि पदसत्त्वाच्च नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, पञ्चमविशेषनियमाच्च। ऊनविंशनियमोऽपि अत्र अधिकरणारम्भबाधकः। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः। अत्र अनेनैव माध्वभाष्ये तदीयदशमाधिकरण-रचणात् दोषः।

## नवमं कार्य्याख्यानाधिकरणम्

अत्र "कार्य्याख्यानादपूर्वम्" ३।३।१८ (३७७) इति सूत्रस्य "कार्य्याख्यानात्" इति पदात् अस्य "कार्य्याख्यानाधिकरणं" नाम। अत्र बल्लभभिन्नैः सर्वैः भाष्यकारैः एतेन एकेन सूत्रेण एतद् अधिकरणं रचितम्। बल्लभभाष्ये तु अत्र षट् सूत्राणि गृहीतानि। तत्र भास्कर-श्रीकण्ठ-भाष्येषु नवमम् अधिकरणम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु पञ्चमम् अधिकरणम्। माध्वभाष्ये एकादशाधिकरणम्। बल्लभभाष्ये तृतीयाधिकरणम्।

अत्र "अपूर्वम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात्। परसूत्रे सर्वसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिरपि संगच्छते।

## दशमं समानाधिकरणम्

अत्र "समान एवं चाभेदात्" ३।३।१९ (३७८) इति सूत्रस्य "समानः" इति पदात् अस्य "समानाधिकरणं" नाम। तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु एतत् सूत्रं तदीयदशमाधिकरणस्य एकमेव सूत्रम्। रामानुज-निम्बार्क-श्रीपति-भाष्येषु तदीयषष्ठाधिकरणस्य एतच्च तथैव एकमेव सूत्रम्। माध्वभाष्यस्य द्वादशाधिकरणस्य सूत्रद्वयमध्ये प्रथमं सूत्रम्। तेन बल्लभ-भिन्नेषु सर्वेषु भाष्येषु अनेन अधिकरणं रचितम्; केवलं बल्लभभाष्ये तदीयतृतीयाधिकरणस्य षट्सु सूत्रेषु एतद्धि द्वितीयं सूत्रम्। तेनात्र अधिकरणस्य अरचनायां बल्लभभाष्यस्यैव दोषः।

अत्र "समानः" "एवम्" इति प्रथमान्तपदद्वयस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तमेव। चतुर्थसामान्यनियमात्। चकारस्य विधेयान्यत्वबोधनात् न बाधकत्वम्। द्वादशविशेषनियमात्।

## एकादशं सम्बन्धाधिकरणम्

अत्र "सम्बन्धादेवमन्यत्रापि" ३।३।२० (३७९) इति सूत्रस्य "सम्बन्धात्" इति पदात् अस्य "सम्बन्धाधिकरणं" नाम। अत्र मध्व-बल्लभ-भाष्य-भिन्नेषु सर्वत्र भाष्येषु अधिकरणं रचितम्। तत्र शङ्कर-भास्कर-रामानुज-निम्बार्क-श्रीपति-भाष्येषु सूत्रत्रयं गृहीतम्। श्रीकण्ठ-

भाष्ये सूत्रत्रयं गृहीतम् । शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु एकादशाधिकरणम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु सप्तमम् अधिकरणम् । बल्लभभाष्ये तदीयतृतीयाधिकरणस्य षट्सु सूत्रेषु तृतीयं सूत्रम् । तानि च त्रीणि सूत्राणि—

१ । "सम्बन्धादेवमन्यत्रापि" ३।३।२० (३७९)
२ । "न वा विशेषात्" ३।३।२१ (३८०)
३ । "दर्शयति च" ३।३।२२ (३८१)

अत्र ( १ ) "सम्बन्धादेवमन्यत्रापि" ३।३।२० (३७९) इत्यत्र "एवम्" इति प्रथमान्त-पदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । "अपि" पदम् अत्र न बाधकः, विधेयान्तरस्य ज्ञापनात्, द्वादशविशेषनियमात् । माध्वभाष्ये तथा बल्लभभाष्ये च अधिकरणस्य अकरणात् तयोरेव दोषः ।

( २ ) "न वा विशेषात्" ३।३।२१ (३८०) इत्यत्र प्रथमान्तपदाभावात् वा-शब्द-योगाच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । माध्व-भाष्ये अधिकरणस्य रचनायां दोषः ।

( ३ ) "दर्शयति च" ३।३।२२ (३८१) इत्यत्र प्रथमान्तपदाभावात् च-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । श्रीकण्ठभाष्ये अधिकरणस्य आरम्भात् दोषः । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः ।

## द्वादशं संभृत्यधिकरणम्

अत्र "संभृतिद्युव्याप्त्यपि चातः" ३।३।२३ (३८२) इति सूत्रस्य "संभृति" इति पदात् अस्य "संभृत्यधिकरणं" नाम । अत्र बल्लभ-भाष्यभिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । तत्र एतत् एकमेव सूत्रं च गृहीतम् । बल्लभ-भाष्ये एतत् सूत्रं तदीयतृतीयाधिकरणस्य षट्सु सूत्रेषु षष्ठं सूत्रम् । शंकर-भास्कर-भाष्ययोः एतद्धि द्वादशाधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु अष्टमम् अधिकरणम् । माध्वभाष्ये चतुर्दशाधिकरणम् । श्रीकण्ठ-भाष्ये त्रयोदशाधिकरणम् ।

अत्र "संभृतिद्युव्याप्ती" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः युक्तः । पृथक् विधेयत्वात् च-कारस्य तथा "अपि अतः" पदयोरपि तदबाधकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । बल्लभभाष्ये तदकरणात् दोषः वक्तव्यः । परसूत्रे सर्वेषु भाष्येषु अधि-करणस्य आरब्धत्वात् अत्रैव अधिकरणसमाप्तिः युक्ता ।

## त्रयोदशं पुरुषविद्याधिकरणम्

अत्र "पुरुषविद्यायामिव चेतरेषामनाम्नानात्" ३।३।२४ (३८३) इति सूत्रस्य "पुरुष-विद्यायाम्" इति पदात् अस्य "पुरुषविद्याधिकरणं" नाम । तत्र सर्वेषु भाष्येषु एतेन एकेन

सूत्रेण एतदधिकरणं रचितम् । तत्र शंकर-भास्करयोः षोडशम् अधिकरणं, रामानुज-निम्बार्क-श्रीपति-भाष्येषु नवमम् अधिकरणम्, माध्वभाष्ये पञ्चदशम् अधिकरणम्, श्रीकण्ठभाष्ये चतुर्दशम् अधिकरणम्, वल्लभभाष्ये तु चतुर्थम् अधिकरणम् इति विशेषः ।

तत्र अनुषंगणीय-प्रथमान्तपदात् अधिकरणारम्भः संगच्छते । इव-च-प्रभृतिपदाभावात् अत्र अबाधकत्वम्, विधेयान्तरज्ञापनात् । पञ्चमसामान्यनियमात् तथा षष्ठविशेषनियमात् च । परसूत्रे तथैव सर्वेषु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## चतुर्दशं वेधाद्यधिकरणम्

अत्र "वेधाद्यर्थभेदात्" ३।३।२५ (३८४) इति सूत्रस्य "वेधादि"-शब्दात् अस्य "वेधाद्यधिकरणं" नाम । तत्र सर्वेषु भाष्येषु अत्र अधिकरणम् आरब्धम् । वल्लभ-भाष्य-भिन्नेषु सर्वेषु भाष्येषु एतेन एकेनैव सूत्रेण एतद् अधिकरणं रचितम् । वल्लभभाष्ये तु सूत्रद्वयेन इति विशेषः ।

अत्र प्रथमान्त-पदाभावात् नास्य अधिकरणारम्भकत्वं युक्तं, तथापि सर्वैः भाष्यकारैः तथा कृतत्वात् प्रथमान्तं किमपि ऊहनीयम् । तद्बलेन च अधिकरणम् आरम्भणीयम् इत्येव समीचीनम् । पञ्चमसामान्यनियमात् । तथापि सर्वस्वीकृतः विषय-श्रुतिभेदः एव अत्र अधिकरणारम्भे कारणम् इत्येव मन्तव्यम् । एकादशविशेषनियमात् । परसूत्रे वल्लभभिन्नैः सर्वैः अधिकरणस्य आरब्धत्वात् अत्रैव अधिकरणसमाप्तिः ।

## पञ्चदशं हान्यधिकरणम्

अत्र "हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम्" ३।३।२६ (३८५) इति सूत्रस्य "हानौ" इति पदात् अस्य "हान्यधिकरणं" नाम । तत्र वल्लभभिन्नैः सर्वैः अधिकरणम् आरब्धम् । निम्बार्क-मध्व-भिन्नैः सर्वैः अत्र एकमेव सूत्रं गृहीतम् । अत्र निम्बार्क-भाष्ये षट् सूत्राणि गृहीतानि । माध्वभाष्ये तु सूत्रद्वयमेव गृहीतम् । शंकर-भास्करमते एतद्धि पञ्चदशम् अधिकरणम्, रामानुज-निम्बार्क-श्रीपति-मतेषु एतत् तु एकादशम् अधिकरणम् । माध्वमते तु सप्तदशम् अधिकरणम् ।

अत्र "तदुक्तम्" इति प्रथमान्तपदस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं संगतमेव । चतुर्थसामान्यनियमात् । तु-शब्दस्य विधेयान्तरबोधकत्वात् न बाधकत्वम् । नवमविशेष-नियमात् । वल्लभभाष्ये अधिकरणस्य अरचनायां तस्य दोषो वाच्यः । परसूत्रे षट्सु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते एव ।

## षोडशं साम्परायाधिकरणम्

अत्र "साम्पराये तर्तव्याभावात् तथा ह्यन्ये" ३।३।२७ (३८६) इति सूत्रस्य "साम्पराय"-शब्दात् अस्य "साम्परायाधिकरणं" नाम । अत्र निम्बार्क-माध्व-भाष्य-भिन्न-सर्वेषु भाष्येषु अधि-करणम् आरब्धम् । तत्र शंकर-भास्करयोः भाष्ययोः षोडशाधिकरणे सूत्रद्वयं गृहीतम् । रामानुज-

श्रीपति-भाष्ययोः द्वादशाधिकरणे सूत्रचतुष्टयं गृहीतम् । निम्बार्क-भाष्ये अधिकरणारम्भात् तस्य एकादशाधिकरणस्य सूत्रषट्क-मध्ये द्वितीयं सूत्रम् । माध्वभाष्ये अधिकरणस्य अनारम्भात् तदीय-सप्तदशाधिकरणस्य सूत्रद्वय-मध्ये द्वितीयं सूत्रम् । श्रीकण्ठ-भाष्ये अधिकरणस्य आरम्भात् तस्य एतत् सप्तदशाधिकरणे सूत्रचतुष्टयं गृहीतम्, बल्लभभाष्ये तु षष्ठाधिकरणे सूत्रद्वयं गृहीतम् ।

तच्च सूत्रद्वयम्—

१ । "साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये" ३।३।२७ (३८६)

२ । "छन्दत उभयाविरोधात्" ३।३।२८ (३८७)

अत्र ( १ ) "साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये" ३।३।२७ (३८६) इत्यत्र "अन्ये" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगतः एव । चतुर्थसामान्यनियमात् । हि-शब्दस्य विधेयान्तरज्ञापनात् अबाधकत्वम् । द्वादशविशेषनियमात् । निम्बार्क-मध्व-भाष्यद्वय-मध्ये अधिकरणस्य अरचनायां दोषः कल्पनीयः ।

( २ ) "छन्दत उभयाविरोधात्" ३।३।२८ (३८७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् । परसूत्रे नियमबलादेव अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च संगच्छते । माध्वभाष्ये अत्र अधिकरणस्य रचनात् दोषः ।

## सप्तदशं गतेरर्थवत्त्वाधिकरणम्

अत्र "गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः" ३।३।२९ (३८८) इति सूत्रस्य "गतेः अर्थवत्त्वम्" इति पदद्वयात् अस्य "गतेरर्थवत्त्वाधिकरणं" नाम । अत्र शङ्कर-भास्कर-बल्लभ-भाष्येषु अधिकरणं रचितम्, शिष्टेषु तु न । तत्र शङ्कर-भास्कर-भाष्ययोः सप्तदशाधिकरणं, बल्लभभाष्ये तु सप्तमाधिकरणम् । शङ्कर-भास्कर-भाष्ययोः सूत्रद्वयं गृहीतम्, बल्लभभाष्ये तु एतत् एकमेव सूत्रम् । रामानुजभाष्ये तथा श्रीपति-भाष्ये एतत् सूत्रं तदीय-द्वादशाधिकरणस्य चतुर्षु सूत्रेषु तृतीयं सूत्रम् । निम्बार्क-भाष्ये तदीयैकादशाधिकरणस्य षट्सु सूत्रेषु चतुर्थं सूत्रम्, माध्वभाष्ये तदीयाष्टादशाधिकरणस्य त्रिषु सूत्रेषु द्वितीयं सूत्रं, श्रीकण्ठ-भाष्ये तदीय-सप्तदशाधिकरणस्य चतुर्षु सूत्रेषु तृतीयं सूत्रम्, बल्लभभाष्ये तु तदीय-सप्तमाधिकरणस्य एकमेव सूत्रम् । तच्च सूत्रद्वयम्—

१ । "गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः" ३।३।२९ (३८८)

२ । "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" ३।३।३० (३८९)

अत्र ( १ ) "गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः" ३।३।२९ (३८८) इत्यत्र "अर्थवत्त्वम्" "विरोधः" इति प्रथमान्तपदद्वयात् अस्य अधिकरणारम्भकत्वं युक्तमेव, चतुर्थ-सामान्यनियमात् । हि-शब्दस्य विधेयान्तरज्ञापकत्वात् न-बाधकत्वम्, द्वादशविशेषनियमात् । रा-नि-म-श्री-श्रीप-भाष्येषु अधिकरणस्य अरचनायां दोषः । एतेषां संख्याबाहुल्यादपि नियम-विरुद्धत्वात् दोषः एव वाच्यः ।

( २ ) "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" ३।३।३० (३८९) इत्यत्र "उपपन्नः" इति प्रथमान्तपदस्य सत्त्वादपि नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात् । यतः "कः उपपन्नः" इति आकांक्षायाः बोधकत्वात् अस्य साकांक्षत्वं सिद्ध्यति । सप्तमविशेषनियमात् । बल्लभभाष्ये अधिकरणस्य आरम्भात् दोषः कल्प्यः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## अष्टादशम् अनियमाधिकरणम्

अत्र "अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्" ३।३।३१ (३९०) इति सूत्रस्य "अनियमः" इति पदात् अस्य "अनियमाधिकरणं" नाम । तत्र रामानुज-निम्बार्क-श्रीपति-भाष्य-भिन्नेषु सर्वेषु भाष्येषु एतेन एकेनैव सूत्रेण एतद् अधिकरणं रचितम् । तत्रापि रामानुज-भाष्ये सूत्रद्वयेन इति बोद्धव्यम् । शङ्कर-भास्कर-भाष्ययोः एतद्धि अष्टादशाधिकरणम् । रामानुज-भाष्ये त्रयोदशाधिकरणम् । निम्बार्क-भाष्ये एकादशाधिकरणस्य षट्सु सूत्रेषु षष्ठं सूत्रम् । माध्वभाष्ये तथा श्रीकण्ठभाष्ये ऊनविंशाधिकरणम् । श्रीपति-भाष्ये तदीय-त्रयोदशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् । बल्लभभाष्ये एतत्तु नवमाधिकरणम् ।

तत्र "अनियमः" "अविरोधः" इति प्रथमान्तपदद्वयसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात् । निम्बार्क-श्रीपति-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः कल्पनीयः । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च संगच्छते ।

## ऊनविंशं यावदधिकाराधिकरणम्

अत्र "यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ (३९१) इति सूत्रस्य "यावदधिकारम्" इति पदात् अस्य "यावदधिकाराधिकरणं" नाम । तत्र शंकर-भास्कर-निम्बार्क-मध्व-श्रीकण्ठ-श्रीपति-बल्लभ-भाष्येषु अधिकरणम् आरब्धम् । केवलं रामानुज-भाष्ये तत् न कृतम् । तत्र एतत् सूत्रं तदीय-त्रयोदशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् । शङ्कर-भास्कर-भाष्ययोः एतत् ऊनविंशाधिकरणम् । तत्र एतेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । निम्बार्क-भाष्यस्य एतत् द्वादशाधिकरणम् । अत्रापि एतेन एकेन सूत्रेण एतदधिकरणं समाप्तम् । माध्वभाष्यस्य विंशाधिकरणम् । तत्र च सूत्रद्वयेन एतदधिकरणं रचितम् । श्रीकण्ठभाष्यस्य अष्टादशाधिकरणम् । अत्रापि एतेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । श्रीपति-भाष्यस्य त्रयोदशाधिकरणम् । तत्र च सूत्रद्वयेन एतदधिकरणं रचितम् । बल्लभ-भाष्यस्य एतद्धि दशमाधिकरणम् । अत्रापि एतेन एकेनैव सूत्रेण एतदधिकरणं सङ्कलितम् ।

अत्र "अवस्थितिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव । चतुर्थसामान्यनियमात् । रामानुजभाष्ये अधिकरणस्य अरचनायां तस्य दोषः कल्प्यः । श्रीपति-भाष्ये अत्र सूत्र-क्रमः विपर्य्यस्तः इति दृश्यते ।

## विंशम् अक्षरध्यधिकरणम्

अत्र "अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्" ३।३।३३ (३९२) इति सूत्रस्य "अक्षरधियाम्" इति पदात् अस्य "अक्षरध्यधिकरणं" नाम। तत्र माध्वभाष्य-भिन्नेषु सर्वेषु भाष्येषु अत्र अधिकरणं रचितम्। माध्वमते एतत् सूत्रं तदीय-विंशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम्। येषु भाष्येषु अधिकरणं रचितं तत्र शंकर-भास्कर-भाष्ययोः एकं सूत्रं गृहीतम्, रामानुज-निम्बार्क-श्रीकण्ट-श्रीपति-वल्लभ-भाष्येषु सूत्रद्वयं गृहीतम्। एवं च शंकर-भास्करयोः भाष्ययोः विंशाधिकरणम्, रामानुज-श्रीपति-भाष्ययोः चतुर्दशाधिकरणम्, निम्बार्क-भाष्ये त्रयोदशाधिकरणम्, श्रीकण्ठ-भाष्ये विंशाधिकरणम्। वल्लभभाष्ये एकादशाधिकरणम्।

तत्र "अवरोधः" "तदुक्तम्" इति प्रथमान्तपदद्वयात् अस्य अधिकरणारम्भकत्वं युक्तमेव। चतुर्थसामान्यनियमात्। तु-शब्दस्य पूर्वपक्षीय-शंकानिरासकत्वात् न तत्र बाधकत्वम्; अष्टादशविशेषनियमात्। तथा सति माध्वभाष्ये अधिकरणस्य अनारम्भात् दोषः कल्पनीयः। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः कल्पयितुं शक्यते।

## एकविंशम् इयदधिकरणम्

अत्र "इयदामननात्" ३।३।३४ (३९३) इति सूत्रस्य "इयत्" इति पदात् अस्य "इयदधिकरणं" नाम। तत्र शंकर-भास्कर-भाष्यद्वये एकविंशाधिकरणे एतद्धि एकमेव सूत्रम्। माध्वभाष्ये एकविंशाधिकरणस्य सूत्रद्वयमध्ये एतच्च प्रथमं सूत्रम्। तेन शंकर-भास्कर-माध्व-भाष्येषु एतेन सूत्रेण अधिकरणम् आरब्धम्। अवशिष्टभाष्येषु तन्न कृतम्। तत्र रामानुज-श्रीपति-भाष्ययोः एतत् सूत्रं तदीय-चतुर्दशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम्। निम्बार्क-भाष्ये तदीय-त्रयोदशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम्। श्रीकण्ठभाष्ये तदीय-विंशाधिकरणस्य सूत्रद्वयमध्ये एतच्च द्वितीयं सूत्रम्। वल्लभभाष्ये तदीयैकादशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम्।

अत्र "इयत्" इति प्रथमान्तपदात् अधिकरणारम्भः संगतः, चतुर्थसामान्यनियमात्। रा-नि-श्री-श्रीप-व-भाष्येषु नियमम् एतम् अननुसृत्य अधिकरणस्य अरचनायां दोषः। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## द्वाविंशम् अन्तराधिकरणम्

अत्र "अन्तरा भूतग्रामवत् स्वात्मनः" ३।३।३५ (३९४) इति सूत्रस्य "अन्तरा" इति पदात् अस्य "अन्तराधिकरणं" नाम। शंकर-मध्व-वल्लभ-भाष्यभिन्नेषु सर्वत्र एतत् सूत्रं परवर्तिसूत्रेण सह एकीकृत्य पठितम्। एवं च शंकरभाष्ये सूत्रद्वयेण एतदधिकरणं रचितम्, भास्करभाष्ये तु तथामिलितेन एकेन सूत्रेण। रामानुज-भाष्ये तथामिलितसूत्रत्रयेण, निम्बार्क-भाष्ये तथैव सूत्रद्वयेन, माध्वभाष्ये अत्र अधिकरणं न रचितम् तत्र तदीयैकविंशाधि-

करणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् । श्रीकण्ठ-भाष्ये तथामिलितसूत्रद्वयेन, श्रीपति-भाष्ये पुनः तथैव सूत्रत्रयेण, वल्लभभाष्ये अमिलितसूत्रत्रयेण एतदधिकरणं रचितम् । शङ्कर-भास्कर-भाष्ये एतच्च द्वाविंशाधिकरणम्, रामानुज-मते पञ्चदशाधिकरणम्, निम्बार्क-मते चतुर्दशाधिकरणम्, श्रीकण्ठ-मते एकविंशाधिकरणम्, श्रीपति-मते पञ्चदशाधिकरणं, तथा वल्लभमते द्वादशाधिकरणं भवति ।

तत् च सूत्रद्वयम्—

१ । "अन्तरा भूतग्रामवत् स्वात्मनः" ३।३।३५ (३९४)

२ । "अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्" ३।३।३६ (३९५)

तत्र ( १ ) "अन्तरा भूतग्रामवत् स्वात्मनः" ३।३।३५ (३९४) इत्यत्र "अन्तरा" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्; चतुर्थसामान्यनियमात् । माध्व-भाष्य-भिन्नेषु सर्वत्र तथैव कृतम् । अतोऽत्र माध्वस्यैव दोषः । भा-रा-नि-श्री-श्रीप-भाष्येषु परसूत्रमपि एतच्छेषत्वेन पठ्यते । तन्न युक्तम् । विजातीयविषयान्तरस्य सूचनात् । चतुर्थ-विशेषनियमात् ।

( २ ) "अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्" ३।३।३६ (३९५) इत्यत्र भेदानुपपत्तिः इति प्रथमान्तपदस्य सत्त्वात् अपि "इति चेन्न" इति पदसत्त्वात् नास्य अधि-करणारम्भकत्वम् । पञ्चमविशेषनियमात् । भा-रा-नि-श्री-श्रीप-भाष्येषु एतत्सूत्रस्य पूर्वसूत्र-शेषत्वं दृश्यते । तन्न युक्तम् । विषयभेदात् चतुर्थविशेषनियमात् । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च संगता । अतः भास्कर-रामानुज-निम्बार्क-श्रीकण्ठ-श्रीपति-भाष्येषु "इति चेन्न"-पदघटितमिलितसूत्रेण अधिकरणस्य आरम्भात् दोषप्रसक्तिः भवत्येव । तेषु सूत्र-द्वयमेलनादेव अयं दोषः सञ्जातः ।

## त्रयोविंशं व्यतिहाराधिकरणम्

अत्र "व्यतिहारो विशिंषन्ति हीतरवत्" ३।३।३७ (३९६) इति सूत्रस्य "व्यतिहारः" इति पदात् अस्य "व्यतिहाराधिकरणं" नाम । तत्र शङ्कर-भास्कर-माध्व-भाष्येषु अत्र अधि-करणम् आरब्धम्, सूत्रं च तत्र एकमेव गृहीतम् । शङ्कर-भास्कर-भाष्ययोः एतद्धि त्रयो-विंशाधिकरणम्, माध्वमते तु द्वाविंशाधिकरणम् । रामानुज-श्रीपति-भाष्ययोः एतत् सूत्रं तदीय-पञ्चदशाधिकरणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् । निम्बार्क-भाष्ये तदीय-चतुर्दशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् । श्रीकण्ठ-भाष्ये एतत् च तदीयैकविंशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् । तथा वल्लभभाष्ये एतत् सूत्रं तदीय-द्वादशाधिकरणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् इति विशेषः ।

अत्र "व्यतिहारः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं संगच्छते ।

चतुर्थसमान्यनियमात्, हि-शब्दस्य विधेयान्तरज्ञापनाच, द्वादशविशेषनियमात् । रा-नि-श्री-श्रीप-व-भाष्येषु अधिकरणस्य अरचनायां दोषः, नियमविरुद्धत्वात् । परसूत्रे अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः ।

## चतुर्विंशं सत्याद्यधिकरणम्

अत्र "सैव हि सत्यादयः" ३।३।३८ (३९७) इति सूत्रस्य "सत्यादिः"-पदात् अस्य "सत्याद्यधिकरणं" नाम । तत्र शङ्कर-भास्कर-मतेन एतत् चतुर्विंशाधिकरणम्, रामानुज-निम्बार्क-श्रीपति-मतेषु पञ्चदशाधिकरणम्, माध्वमतेन त्रयोविंशाधिकरणम्, श्रीकण्ठमतेन द्वाविंशाधिकरणम् । वल्लभ-मतेन त्रयोदशाधिकरणम् । शंकर-भास्कर-निम्बार्क-मध्व-श्रीकण्ठ-मतेषु अत्र एकमेव सूत्रम् । वल्लभ-मतेन तु सूत्रद्वयम् । श-भा-नि-म-श्री-व-भाष्येषु अत्र अधिकरणम् आरब्धम् । रा-श्रीप-मतद्वये तु अधिकरणं न आरब्धम् । तत्र रामानुज-श्रीपति-भाष्यद्वये एतत् सूत्रं तदीय-पञ्चदशाधिकरणस्य सूत्रत्रयमध्ये तृतीयं सूत्रम् ।

अत्र "सत्यादयः" इति प्रथमान्तपदात् अधिकरणारम्भः युक्तः, चतुर्थसामान्यनियमात् । हि-शब्दस्य विधेयान्तरत्वज्ञापनाच्च । द्वादशविशेषनियमात् । तेन रामानुज-श्रीपति-भाष्ययोः अधिकरणस्य अरचनायां दोषः सञ्जातः ।

## पञ्चविंशं कामाद्यधिकरणम्

अत्र "कामादीतरत्र तत्र चायतनादिभ्यः" ३।३।३९ (३९८) इति सूत्रस्य "कामादि"-शब्दात् अस्य "कामाद्यधिकरणं" नाम । तत्र वल्लभ-भाष्य-भिन्नेषु सर्वेषु भाष्येषु अत्र अधिकरणं रचितम्. वल्लभभाष्ये एतत् सूत्रं तदीय-त्रयोदशाधिकरणस्य सूत्रद्वयमध्ये द्वितीयं सूत्रम् । शङ्कर-भास्कर-मतद्वये एतद्धि पञ्चविंशाधिकरणं, रामानुज-निम्बार्क-श्रीपति-भाष्येषु तु षोड़शाधिकरणम् । माध्वमते चतुर्विंशाधिकरणम् । तथैव श्रीकण्ठमते त्रयोविंशाधिकरणम् । शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु अत्र एकमेव सूत्रं गृहीतम् । रामानुज-निम्बार्क-मध्व-श्रीपति-भाष्येषु सूत्रत्रयम् इति विशेषः ।

अत्र "कामादि" इति प्रथमान्तपदसत्त्वात् अत्र अधिकरणारम्भः संगतः एव । चकारस्य न साकांक्षत्वसाधकत्वम् । चतुर्थसामान्यनियमात्, षष्टविशेषनियमाच्च । वल्लभभाष्ये अधिकरणस्य अरचनायां दोषः । परसूत्रे अधिकरणारम्भात् अत्र अधिकरणसमाप्तिः ।

## षड्‌विंशम् आदराधिकरणम्

अत्र "आदरादलोपः" ३।३।४० (३९९) इति सूत्रस्य "आदर"-शब्दात् अस्य "आदराधिकरणं" नाम । तत्र शंकर-भास्कर-श्रीकण्ठ-वल्लभ-भाष्येषु अधिकरणम् आरब्धम्, शिष्टेषु न । शंकर-भास्कर-वल्लभ-भाष्येषु अत्र सूत्रद्वयं गृहीतम् । श्रीकण्ठ-भाष्ये तु एतदेव एकं सूत्रम् । शङ्कर-भास्कर-भाष्ययोः षड्‌विंशाधिकरणम् । श्रीकण्ठभाष्ये चतुर्विंशाधिकरणम् । वल्लभभाष्ये तु

चतुर्दशाधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु तदीय-षोडशाधिकरणस्य सूत्रत्रयमध्ये एतद्धि द्वितीयं सूत्रम् । माध्वभाष्ये तदीय-चतुर्विंशाधिकरणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् ।

तच्च सूत्रद्वयम्—

१ । "आदरादलोपः"  ३।३।४० (३९९)

२ । "उपस्थितेऽतस्तद्वचनात्" ३।३।४१  ३।३।४१ (४००)

अत्र (१) "आदरादलोपः" ३।३।४० (३९९) इत्यत्र "अलोपः" इति प्रथमान्तपदस्य सत्त्वात् अधिकरणारम्भः युक्तः एव, चतुर्थसामान्यनियमात् । तेन रा-नि-म-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषः ।

(२) "उपस्थितेऽतस्तद्वचनात्" ३।३।४१ (४००) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् । "अतः" शब्दस्य साकांक्षत्वात् च । सप्तमविशेषनियमात् । श्रीकण्ठभाष्ये अत्र पञ्चविंशाधिकरणस्य रचनायां दोषः वक्तव्यः । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## सप्तविंशं तन्निर्धारणाधिकरणम्

अत्र "तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्" ३।३।४२ (४०१) इति सूत्रस्य "तन्निर्धारण"-शब्दात् अस्य "तन्निर्धारणाधिकरणं" नाम । तत्र सर्वेषु भाष्येषु अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम् । शङ्कर-भास्कर-भाष्यद्वये सप्तविंशाधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु सप्तदशाधिकरणम्, माध्वभाष्ये पञ्चविंशाधिकरणम् । श्रीकण्ठ-भाष्ये षड्विंशाधिकरणम्, तथा वल्लभभाष्ये पञ्चदशाधिकरणं भवति ।

अत्र "तन्निर्धारणानियमः" "पृथग्घ्यप्रतिबन्धः" "फलम्" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः संगतः एव, चतुर्थसामान्यनियमात् । तथैव च सर्वेषु भाष्येषु कृतम्, अतः अत्र न कस्यापि दोषः ।

## अष्टाविंशं प्रदानाधिकरणम्

अत्र "प्रदानवदेव तदुक्तम्" ३।३।४३ (४०२) इति सूत्रस्य "प्रदान" इति शब्दात् अस्य "प्रदानाधिकरणं" नाम । तत्र सर्वेषु भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् ।

अत्र "तदुक्तम्" इति प्रथमान्तपदस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । परसूत्रे सर्वसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च संगता । अत्रापि न कस्यापि दोषः ।

## ऊनत्रिंशं लिंगभूयस्त्वाधिकरणम्

अत्र "लिंगभूयस्त्वात् तद्धि बलीयस्तदपि" ३।३।४४ (४०३) इति सूत्रस्य "लिंगभूयस्त्व"-शब्दात् अस्य "लिंगभूयस्त्वाधिकरणं" नाम । तत्र सर्वेषु भाष्येषु अधिकरणम् आरब्धम् ।

तत्र शंकर-भास्कर-भाष्ययोः नव सूत्राणि गृहीतानि, वल्लभभाष्ये तु दश सूत्राणि। अवशिष्टभाष्येषु एतदेव एकं सूत्रं गृहीतम्। एवं च शंकर-भास्कर-भाष्ययोः ऊनत्रिंशाधिकरणम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु ऊनविंशाधिकरणम्, माध्वभाष्ये सप्तविंशाधिकरणम्, श्रीकण्ठ-भाष्ये अष्टाविंशाधिकरणम्। वल्लभभाष्ये तु सप्तदशाधिकरणम्।

तानि नव सूत्राणि यथा—

१। "लिंगभूयस्त्वात् तद्धि बलीयस्तदपि" ३।३।४४ (४०३)
२। "पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ (४०४)
३। "अतिदेशाच्च" ३।३।४६ (४०५)
४। "विद्यैव तु निर्धारणात्" ३।३।४७ (४०६)
५। "दर्शनाच्च" ३।३।४८ (४०७)
६। 'श्रुत्यादिबलीयस्त्वाच्च न बाधः" ३।३।४९ (४०८)
७। "अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्" ३।३।५० (४०९)
८। "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः" ३।३।५१ (४१०)
९। "परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः" ३।३।५२ (४११)

अत्र (१) "लिंगभूयस्त्वात् तद्धि बलीयस्तदपि" ३।३।४४ (४०३) इत्यत्र "बलीयः" तथा "तत्" इति प्रथमान्तपदद्वयसत्त्वात् अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्। हि-अपि-शब्दौ न बाधकौ, द्वादशविशेषनियमात्। तथैव कृतं सर्वैः भाष्यकारैः।

(२) "पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ (४०४) इत्यत्र "पूर्वविकल्पः" तथा "क्रिया" इति प्रथमान्तपदद्वयसत्त्वात् अत्रापि अधिकरणारम्भः संगतः। चतुर्थसामान्यनियमात्। तथैव कृतं रा-नि-म-श्री-श्रीप-भाष्येषु। तथापि "स्यात्"-शब्दयोगात् अर्थतः साकांक्षत्वम् अत्र भवत्येव। अतः नास्य अधिकरणारम्भकत्वम्। न च "चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" २।३।१६ इति सूत्रे श-भा-नि-श्री-श्रीप-भाष्येषु अधिकरणस्य आरम्भात् तस्य व्यभिचारः इति वाच्यम्। तत्र तु-शब्दस्य साकांक्षत्वबाधकत्वात्। नान्यत्र कुत्रापि अधिकरणारम्भतया "स्यात्"-शब्दघटितसूत्रस्य अधिकरणारम्भकत्वं दृष्टम्। अतः अत्र एकः नियमः कर्त्तव्यः, येन अस्य विधेयत्वं स्यात्। स च नियमः एवम् भवतु—

"तु-शब्दयुक्त-प्रथमान्तपदात् "स्यात्"-शब्दसत्त्वम् अधिकरणारम्भकम्" इति एकोनत्रिंशः नियमः।

अत्र "पूर्वविकल्पः" इति तु-वर्जित-प्रथमान्तपदात्, तत्र स्यात्-शब्दयोगात् नात्र अधिकरणम् आरब्धम्। तेन रा-नि-म-श्री-श्रीप-भाष्याणां दोषः। न वा "शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्" ३।४।२७ इति सूत्रे व्यभिचारशङ्का ? "तु-स्यात्"-शब्दयोः साक्षात् योगाभावात्।

( ३ ) "अतिदेशाच्च" ३।३।४६ (४०५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

( ४ ) "विद्यैव तु निर्द्धारणात्" ३।३।४७ (४०६) इत्यत्र "विद्या" इति प्रथमान्तपदसत्त्वेऽपि तु-शब्दयोगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, नवमविशेषनियमाच्च । माध्वभाष्ये अधिकरणारम्भात दोषः । अत्र तेन ऊनत्रिंशत् अधिकरणं कृतम् । रा-नि-श्री-श्रीप-भाष्येषु परसूत्रस्य एतत्सूत्रशेषत्वं दृश्यते । तन्न सम्यक् । परसूत्रे च-कारस्य सत्त्वात । चतुर्थविशेषनियमात् ।

( ५ ) "दर्शनाच्च" ३।३।४८ (४०७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । च-कारस्य न बाधकत्वम्, हेतोः समुच्चयात् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च । रा-नि-श्री-श्रीप-भाष्येषु एतत्सूत्रस्य पूर्वसूत्रांगत्वं दृश्यते । तन्न युक्तम्, च-कारात् हेतोः विजातीयवैलक्षण्यविधानात् । चतुर्थविशेषनियमात् ।

( ६ ) "श्रुत्यादिबलीयस्त्वाच्च न बाधः" ३।३।४९ (४०८) इत्यत्र "बाधः" इति प्रथमान्तपदसत्त्वेऽपि च-कारेण साकांक्षत्वविधानात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । माध्वभाष्ये अधिकरणारम्भात् दोषः । अत्र तन्मते त्रिंशत् अधिकरणम् ।

( ७ ) "अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्" ३।३।५० (४०९) इत्यत्र "दृष्टः" तथा "तदुक्तम्" इति प्रथमान्तपदद्वयसत्त्वेऽपि च-कारयोगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् तथा षष्ठविशेषनियमात् । मध्व-बलदेव-भाष्य-द्वयमध्ये "अनुबन्धादिभ्यः" इति एकं सूत्रम्, शिष्टम् अपरम् । तन्न युक्तम्, विषयसाजात्यात्. चतुर्थविशेषनियमो द्रष्टव्यः । तत्रापि ताभ्यामेव अधिकरणद्वयमपि रचितम् । ततः तस्य दोषः । तन्मते अत्र एकत्रिंशत् तथा द्वात्रिंशत् इति अधिकरणद्वयम् । "तदुक्तम्" इति पदात् "विकरणत्वान्नेति चेत् तदुक्तम्" २।१।३१ इतिवत् अत्र अधिकरणसमाप्तिः न कथम् इति चेत ? न, अर्थभेदात् परसूत्रे सापेक्षत्वस्य बोधनात् च ।

( ८ ) "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः" ३।३।५१ (४१०) इत्यत्र "लोकापत्तिः" इति प्रथमान्तपदसत्त्वेऽपि "अपि" इति पदसत्त्वात्, अर्थतः साकांक्षत्वस्य विधानाच्च नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च । माध्वभाष्ये त्रयस्त्रिंशदधिकरणारम्भात् दोषः ।

( ९ ) "परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः" ३।३।५२ (४११) इत्यत्र "ताद्विध्यं" तथा "अनुबन्धः" इति प्रथमान्त-पदद्वय-सत्त्वेऽपि च-कारस्य तथा तु-कारस्य योगात अस्य अधिकरणारम्भकत्वं बाधितम् । माध्वभाष्ये चतुस्त्रिंशदधिकरणस्य रचनायां दोषः ।

परसूत्र सप्तसु भाष्येषु अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता । एवं च अत्र माध्वभाष्यस्य षट् दोषाः, रा-नि-श्री-श्रीप-भाष्येषु प्रत्येकं एकैकः दोषः ।

## त्रिंशत् एकात्म्याधिकरणम्

अत्र "एक आत्मनः शरीरे भावात्" ३।३।५३ (४१२) इति सूत्रस्य "एक आत्मनः" इति पदद्वयात् अस्य "एकात्म्याधिकरणं" नाम । अत्र वल्लभभाष्य-भिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । सूत्रद्वयं च तत्र गृहीतम् । तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु त्रिंशत् अधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु एकविंशति अधिकरणम् । माध्वभाष्ये पञ्चत्रिंशत् अधिकरणम् तथा वल्लभभाष्ये सप्तदशाधिकरणम् । तत्र इदं सूत्रम् एतदधिकरणान्तर्गतेषु दशसु सूत्रेषु दशमं सूत्रम् । तच्च सूत्रद्वयम्—

१ । "एक आत्मनः शरीरे भावात्" ३।३।५३ (४१२)

२ । "व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्" ३।३।५४ (४१३)

अत्र (१) "एक आत्मनः शरीरे भावात्" ३।३।५३ (४१३) इत्यत्र "एके" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात् । वल्लभभाष्ये अधिकरणस्य अनारम्भात् दोषः ।

(२) "व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्" ३।३।५४ (४१३) इत्यत्र "व्यतिरेकः" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् तु-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम्. नञ्‌र्मविशेषनियमात् । वल्लभभाष्ये अधिकरणस्य रचनायां दोषः । तत्र एतत् सूत्रं तदीयाष्टादशाधिकरणस्य सूत्रत्रयमध्ये प्रथमं सूत्रम् । परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः युक्ता एव ।

## एकत्रिंशत् अंगावबद्धाधिकरणम्

अत्र "अंगावबद्धास्तु न शाखासु हि प्रतिवेदम्" ३।३।५५ (४१४) इति सूत्रस्य "अंगावबद्धाः" इति पदात् अस्य "अंगावबद्धाधिकरणं" नाम । तत्र वल्लभ-भाष्यभिन्नेषु सर्वेषु भाष्येषु सूत्रद्वयेन एतदधिकरणं रचितम् । वल्लभभाष्ये एतत् सूत्रं तदीयाष्टादशाधिकरणस्य सूत्रत्रयमध्ये द्वितीयं सूत्रम् । तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु एतद्धि एकत्रिंशद् अधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु द्वाविंशाधिकरणम् । माध्वभाष्ये तु षट्त्रिंशदधिकरणम् । तच्च सूत्रद्वयम्—

१ । "अंगावबद्धास्तु न शाखासु हि प्रतिवेदम्" ३।३।५५ (४१४)

२ । "मन्त्रादिवद् वाऽविरोधः" ३।३।५६ (४१५)

तत्र (१) अंगावबद्धास्तु न शाखासु हि प्रतिवेदम्" ३।३।५५ (४१४) इत्यत्र "अंगावबद्धाः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम् चतुर्थसामान्यनियमात्,

ः-शब्दस्तु नात्र तस्य बाधकः । अष्टादश-विशेषनियमात् । "तत् तु समन्वयात्" १।१।४ इति सूत्रवत् अनुक्त-पूर्वपक्ष-व्यावर्त्तकत्वार्थकत्वात् तु-शब्दस्य । वल्लभभाष्ये अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "मन्त्रादिवद् वाऽविरोधः" ३।३।५६ (४१५) इत्यत्र "अविरोधः" इति प्रथमान्तपदसत्त्वेऽपि (चतुर्थसामान्यनियमात्) "वा"-शब्देन साकांक्षत्वसिद्धेः नास्य अधिकरणारम्भकत्वं युक्तम् । षष्ठविशेषनियमात् । परसूत्रे सर्वत्र अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## द्वात्रिंशत् भूमज्यायस्त्वाधिकरणम्

अत्र "भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति" ३।३।५७ (४१६) इति सूत्रस्य "भूम्नः क्रतुवज्ज्यायस्त्वम्" इति पदात् अस्य "भूमज्यायस्त्वाधिकरणं" नाम । तत्र सर्वेषु भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणम् आरब्धम् । शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु द्वात्रिंशत् अधिकरणम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु त्रयोविंशाधिकरणम्, माध्वभाष्ये सप्तत्रिंशत् अधिकरणम्, वल्लभभाष्ये ऊनविंशाधिकरणम् ।

अत्र "क्रतुवज्ज्यायस्त्वम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव । चतुर्थसामान्यनियमात्, हि-शब्दस्य हेतुबोधकत्वाच्च, द्वादशविशेषनियमात् । परसूत्रेण सर्वैः अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च संगच्छते ।

## त्रयस्त्रिंशत् शब्दादिभेदाधिकरणम्

अत्र "नाना शब्दादिभेदात्" ३।३।५८ (४१७) इति सूत्रस्य "शब्दादिभेदात्" इति पदात् अस्य "शब्दादिभेदाधिकरणं" नाम । अत्रापि सर्वेषु भाष्येषु एतदेव एकं सूत्रं गृहीतम् । तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु त्रयस्त्रिंशदधिकरणम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु चतुर्विंशाधिकरणम् माध्वभाष्ये अष्टत्रिंशदधिकरणम्, वल्लभभाष्ये तु विंशाधिकरणम् ।

"नाना" इति प्रथमान्तपदात् अत्र अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । परसूत्रे अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः ।

## चतुस्त्रिंशद् विकल्पाधिकरणम्

अत्र ( १ ) "विकल्पोऽविशिष्टफलत्वात्" ३।३।५९ (४१८) इति सूत्रस्य "विकल्पः" इति पदात् अस्य "विकल्पाधिकरणं" नाम । तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु एतद्धि चतुस्त्रिंशदधिकरणम्, रामानुज-निम्बार्क-श्रीपति भाष्येषु तु पञ्चविंशाधिकरणम्, माध्वभाष्ये ऊनचत्वारिंशदधिकरणम्, तथैव वल्लभभाष्ये एकविंशाधिकरणम् । शंकर-भास्कर-माध्व श्रीकण्ठ-वल्लभभाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम्, रामानुज-निम्बार्क-श्रीपति-भाष्येषु सूत्रद्वयेन इति विशेषः ।

अत्र "विकल्पः" इति प्रथमान्तपदात् अधिकरणारम्भः संगच्छते । चतुर्थसामान्यनियमात् । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## पञ्चत्रिंशत् काम्याधिकरणम्

अत्र "काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात्" ३।३।६० (४१९) इति सूत्रस्य 'काम्याः" इति पदात् अस्य "काम्याधिकरणं" नाम । तत्र शंकर-भास्कर-मध्व-श्रीकण्ठ-वल्लभ-भाष्येषु अधिकरणम् आरब्धम् रामानुज-निम्बार्क-श्रीपति-भाष्येषु तु न । शंकर-भास्कर-श्रीकण्ठ-भाष्येषु एतद्धि पञ्चत्रिंशद् अधिकरणं, माध्वभाष्ये चत्वारिंशद् अधिकरणम् । वल्लभभाष्ये तु द्वाविंशाधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु तदीय-पञ्चविंशाधिकरणस्य सूत्रद्वयमध्ये एतद्धि द्वितीयं सूत्रमेव भवति । तेन रामानुज-निम्बार्क श्रीपति-भाष्येषु अधिकरणस्य अरचनायां दोषः कल्प्यते ।

अत्र 'काम्याः" इति प्रथमान्तपदात् अधिकरणारम्भः युक्तः, चतुर्थसामान्यनियमात् तु-वा-शब्दौ नात्र बाधकौ द्वादशविशेषनियमात्, तथा अष्टादशविशेषनियमात् । परसूत्रे सर्वसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः युक्ता ।

## षट्त्रिंशत् यथाश्रयभावाधिकरणम्

अत्र "अंगेषु यथाश्रयभावः" ३।३।६१ (४२०) इति सूत्रस्य "यथाश्रयभावः" इति पदात् अस्य "यथाश्रयभावाधिकरणं" नाम । अत्र सर्वेषु भाष्येषु अधिकरणारम्भः कृतः । शंकर-भास्कर-श्रीकण्ठ-भाष्येषु एतत् षट्त्रिंशद् अधिकरणम् । रामानुज-निम्बार्क-श्रीपति-भाष्येषु षड्विंशाधिकरणम्, माध्वभाष्ये एकचत्वारिंशद् अधिकरणम् वल्लभभाष्ये त्रयोविंशाधिकरणम् । तत्रापि शंकर-भास्कर-रामानुज-निम्बार्क-श्रीकण्ठ-भाष्येषु अत्र षट् सूत्राणि गृहीतानि । माध्वभाष्ये चत्वारि सूत्राणि, श्रीपति वल्लभ-भाष्यद्वये तु सूत्रद्वयम् । तानि च षट् सूत्राणि—

| | |
|---|---|
| १ । 'अंगेषु यथाश्रयभावः" ३।३।६१ (४२०) | ४ । गुणसाधारण्यश्रुतेश्च" ३।३।६४ (४२३) |
| २ । 'शिष्टेश्च" ३।३।६२ (४२१) | ५ । "न वा तत्सहभावाश्रुतेः" |
| ३ । 'समाहारात्" ३।३।६३ (४२२) | ६ । "दर्शनाच्च" ३।३।६६ (४२५) |

अत्र (१) "अंगेषु यथाश्रयभावः" ३।३।६१ (४२०) इत्यत्र "यथाश्रयभावः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतम् । चतुर्थसामान्यनियमात् ।

(२) "शिष्टेश्च" ३।३।६२ (४२१) इत्यत्र प्रथमान्तपदाभावात् च-कारात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् पञ्चविशेषनियमाच्च ।

(३) "समाहारात्" ३।३।६३ (४२२) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् । श्रीपति-वल्लभ-भाष्यद्वये अधिकरणस्य रचनायां दोषः । अत्र श्रीपतेः सप्तविंशाधिकरणम्, वल्लभस्य चतुर्विंशाधिकरणम् ।

(४) "गुणसाधारण्यश्रुतेश्च" ३।३।६४ (४२३) इत्यत्र प्रथमान्तपदाभावात् च-काराच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(५) "न वा तत्सहभावाश्रुतेः" ३।३।६५ (४२४) इत्यत्र प्रथमान्तपदाभावात् वा-शब्दयोगाच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । मध्व-श्रीपति-बल्लभ-भाष्येषु अधिकरणस्य रचनायां दोषः । माध्वस्य द्वाचत्वारिंशदधिकरणम्, श्रीपतेः अष्टाविंशाधिकरणम्, बल्लभस्य पञ्चविंशाधिकरणम् इति विशेषः ।

(६) 'दर्शनाच्च" ३।३।६६ (४२५) इत्यत्र प्रथमान्तपदाभावात् च-योगाच्च नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् षष्ठविशेषनियमाच्च । पादशेषात् अत्रैव अधिकरणसमाप्तिश्च ।

## एकादश-पादोपसंहारः

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणस्य रचनायां—

(१) कति कीदृशाश्च नियमा अत्र सङ्कलिताः ।

(२) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

(३) काश्च श्रुतयः कैश्च सूत्ररुपजीव्यत्वेन गृहीताः ।

(४) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः संगता इति ।

एते चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमः तावत्—

### (१) कति कीदृशाश्च नियमा अत्र सङ्कलिताः

अत्र एकः एव नियमः सङ्कलितः, यथा—

ऊनविंशः नियमः—"तु" शब्दवर्जित-प्रथमान्तपदात् "स्यात"-शब्दसत्त्वं न अधिकरणारम्भकम्" । एतदर्थं "पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ सूत्रं द्रष्टव्यम् ।

अधुना द्रष्टव्यम्—

### (२) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः

तत्र ३।३।२ अधिकरणे रा-नि-श्री-ब-भाष्येषु "उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च" ३।३।५ इति सूत्रे अधिकरणस्य अरचनायां दोष ।

३।३।३ अधिकरणे मध्व-बल्लभ-भाष्ययोः "अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।४ अधिकरणे रा-नि-श्रीप-ब-भाष्येषु "व्याप्तेश्च समञ्जसम्" ३।३।९ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।५ अधिकरणे बल्लभभाष्ये "सर्वाभेदादन्यत्रेमे" ३।३।१० इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।६ अधिकरणे वल्लभभाष्ये "आनन्दादयः प्रधानस्य" ३।३।११ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव मध्व-श्रीकण्ठ-भाष्ययोः "प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" ३।३।१२ इति सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव माध्वभाष्ये "इतरे त्वर्थसामान्यात ३।३।१३ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।३।७ अधिकरणे रा-नि-श्रीप-व-भाष्येषु "आध्यानाय प्रयोजनाभावात्" ३।३।१४ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।८ अधिकरणे रा-नि-श्री-श्रीप-भाष्येषु "आत्मगृहीतिरितरवदुत्तरात्" ३।३।१६ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव माध्वभाष्ये "अन्वयादिति चेत् स्यादवधारणात्" ३।३।१७ इति सूत्रे अधिकरणस्य रचनायां दोषः ।

३।३।१० अधिकरणे वल्लभभाष्ये "समान एवं चाभेदात्" ३।३।१९ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।११ अधिकरणे मध्व-वल्लभ-भाष्ययोः "सम्बन्धादेवमन्यत्रापि" ३।३।२० इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव माध्वभाष्ये "न वा विशेषात्" ३।३।२१ इति सूत्रे अधिकरणस्य रचनायां दोषः ।

तत्रैव श्रीकण्ठ-भाष्ये "दर्शयति च" ३।३।२२ इति सूत्रे अधिकरणस्य रचनायां दोषः ।

३।३।१२ अधिकरणे वल्लभ-भाष्ये "सम्भृतिद्युव्याप्त्यपि चातः" ३।३।२३ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।१५ अधिकरणे वल्लभ-भाष्ये "हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम्" ३।३।२६ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।१६ अधिकरणे निम्बार्क-मध्व-भाष्ययोः "साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये" ३।३।२७ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्र माध्वभाष्ये "छन्दतउभयाविरोधात्" ३।३।२८ इतिसूत्रे अधिकरणस्य रचनायां दोषः ।

३।३।१७ अधिकरणे रा-नि-म-श्री-श्रीप-भाष्येषु "गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः" ३।३।२९ सूत्रे अधिकरणस्य अरचनायां दोषः ।

तत्रैव वल्लभभाष्ये "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" ३।३।३० इति सूत्रे अधिकरणस्य रचनायां दोषः ।

३।३।१८ अधिकरणे निम्बार्क-श्रीपति-भाष्ययोः "अनियमः सर्वेषाम् अविरोधः शब्दानुमानाभ्याम्" ३।३।३१ इति सूत्रे अधिकरणस्य अरचनायां दोषः ।

३।३।१९ अधिकरणे रामानुजभाष्ये "यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२० अधिकरणे माध्वभाष्ये "अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्" ३।३।३३ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२१ अधिकरणे रा-नि-श्री-श्रीप-व-भाष्येषु "इयदामननात्" ३।३।३४ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२२ अधिकरणे माध्वभाष्ये "अन्तरा भूतग्रामवत् स्वात्मनः" ३।३।३५ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

अत्रैव भा-रा-नि-श्री-श्रीप-भाष्येषु "अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्" ३।३।३६ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।३।२३ अधिकरणे रा-नि-श्री-श्रीप-व-भाष्येषु "व्यतिहारो विशिंषन्ति हीतरवत्" ३।३।३७ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२४ अधिकरणे रा-श्रीप-भाष्ययोः "सैव हि सत्यादयः" ३।३।३८ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२५ अधिकरणे वल्लभभाष्ये "कामादीतरत्र तत्र चायतनादिभ्यः" ३।३।३९ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।२६ अधिकरणे रा-नि-म-श्रीप-भाष्येषु "आदरादलोपः" ३।३।४० इति सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव श्रीकण्ठभाष्ये "उपस्थितेऽतस्तद्वचनात्" ३।३।४१ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।३।२९ अधिकरणे रा-नि-म-श्री-श्रीप-भाष्येषु "पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "विद्यैव तु निर्धारणात्" ३।३।४७ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "श्रुत्यादिबलीयस्त्वाच्च न बाधः" ३।३।४९ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्" ३।३।५० इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः" ३।३।५१ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव मध्वभाष्ये "परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः" ३।३।५२ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।३।३० अधिकरणे वल्लभभाष्ये "एक आत्मनः शरीरे भावात्" ३:३।५३ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव वल्लभभाष्ये "व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्" ३।३।५४ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।३।३१ अधिकरणे वल्लभभाष्ये "अंगावबद्धास्तु न शाखासु हि प्रतिवेदम्" ३।३।५५ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।३५ अधिकरणे रा-नि-श्रीप-भाष्येषु "काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात्" ३।३।६० इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।३।३६ अधिकरणे श्रीप-व-भाष्ययोः "समाहारात्" ३।३।६३ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव म-श्रीप-व-भाष्येषु "न वा तत्सहभावाश्रुतेः" ३।३।६५ इति सूत्रे अधिकरणस्य रचनायां दोषः।

एवं पादेऽस्मिन् भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| भास्करभाष्ये | ० | १ दोषः |
| रामानुजभाष्ये | ११ दोषाः | २ दोषौ |
| निम्बार्कभाष्ये | ११ " | २ " |
| श्रीकण्ठभाष्ये | ५ " | ५ दोषाः |
| वल्लभभाष्ये | १५ " | ४ " |
| माध्वभाष्ये | ७ " | १२ " |
| श्रीपतिभाष्ये | १० " | ४ " |
| | ५९ | ३० |

इति वक्तुं शक्यते, तथा च पादे अस्मिन् शङ्करभाष्यस्यैव दोषाभावः प्रतीयते।

इदानीं द्रष्टव्यम्—

(१) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः

तत्र प्रथमाधिकरणे—

१४।६। "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" ३।३।१ इति सूत्रे "अग्निहोत्रं जुहुयात्" (!) "यो ह वै ज्येष्ठं च श्रेष्ठं च प्राणं वेद" "ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति" (छा: ६।१।१)

"भेदान्नेति चेन्नैकस्यामपि" ३।३।२ इति सूत्रे "तस्य अग्निरेव अग्निर्भवति" (बृ: ६।२।१४)
"पञ्चाग्नीन् वेद" (छा: ५।१०।१०)

"स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः" ३।३।३ इति सूत्रे
"नैतद् अचीर्णव्रतोऽधीते" (मु: ३।२।११)

"दर्शयति च" ३।३।४ इति सूत्रे "सर्वे वेदा यत् पदमामनन्ति" (कठ २०।१५)
"यस्तु एतमेवं प्रादेशमात्रम् अभिविमानम् आत्मानं वैश्वानरम् उपास्ते" (छा: ५।१८।१)

तृतीयाधिकरणे—

"अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ इति सूत्रे "अथ हेममासन्यं प्राणम् ऊचुः त्वं न उद्‌गाय इति तथेति तेभ्यः एष प्राणः उदगायत" (बृ: १।३।७), "अथ ह य एवायं मुख्यः प्राणस्तम् उद्‌गीथम् उपासां चक्रिरे" (छा: १।२।७)

"न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्" ३।३।७ इति सूत्रे "ओमिति एतदक्षरं उद्‌गीथम् उपासीत" (छा: १।१।१), "त्वं न उद्‌गाय" (बृ: १।३।२) "स एष परोवरीयान् उद्‌गीथः" (छा: १।९।२)

चतुर्थाधिकरणे—

"व्याप्तेश्च समञ्जसम्" ३।३।९ इति सूत्रे "ओमिति एतद् अक्षरम् उद्‌गीथम् उपासीत" (छा: १।१।१)

"सर्वाभेदादन्यत्रेमे" ३।३।१० इति सूत्रे "एवं विद्वान्" (छा: १।१।८)

सप्तमाधिकरणे—

"आध्यानाय प्रयोजनाभावात्" ३।३।१४ इति सूत्रे "इन्द्रियेभ्यः परा ह्यर्थाः" (कठः ३।१०)
"पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" (कठः ३।११)

"आत्मशब्दाच्च" ३।३।१५ इति सूत्रे "एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते"
"दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" (कठः ३।१२)

अष्टमाधिकरणे—

"आत्मगृहीतिरितरवदुत्तरात्" ३।३।१६ इति सूत्रे "प्रजापते रेतो देवाः" (ऐतरेयः आरः १)
"आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत्" (ऐत: १।१), "आत्मनः आकाशः सम्भूतः।" (तै: २।१।१) "स ईक्षत लोकान् नु सृजा इति" (ऐत: १।१)
"स इमान् लोकान् असृजत" (ऐत: १।२)

"अन्वयादिति चेत् स्यादवधारणात्" ३।३।१७ इति सूत्रे "आत्मा वा इदमेक एवाग्र आसीत्" (बृ: १।४।१) "कतम आत्मा" (बृ: ४।३।७) "स वा एष महानज

आत्मा" (बृः ४।४।२५) "सदेव सोम्येदमग्र आसीत्" (छाः ६।२।१) "स आत्मा तत्त्वमसि" (छाः ६।८।७)

नवमाधिकरणे—

"कार्याख्यानादपूर्वम्" ३।३।१८ इति सूत्रे "आचामन्ति" "आचामेत्" "एवंविदशिष्यन्ना-चामेदशित्वा च आचामेद् एतमेव तदनमनग्नं कुरुते" (बृः६।१।१४, छाः ५।२।२) "द्विजो नित्यम् उपस्पृशेत्" (?)

दशमाधिकरणे—

"समान एवं चाभेदात्" ३।३।१९ इति सूत्रे "स आत्मानम् उपासीत मनोमयं प्राणशरीरं भारूपम्" (बृः माध्यः ५।६।१) "मनोमयोऽयं पुरुषः भाः सत्यः" (बृः ५।६।१)

एकादशाधिकरणे—

"दर्शयति च" ३।३।२२ इति सूत्रे "तस्य एतस्य तदेव रूपं यद् अमुष्य रूपम्" (छाः १।७।५)

द्वादशाधिकरणम्—

"संभृतिद्युव्याप्त्यपि चातः" ३।३।२३ इति सूत्रे "ब्रह्मज्येष्ठा वीर्य्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान" (राणायनीयखिलः)।

त्रयोदशाधिकरणम्—

"पुरुषविद्यायामिव चेतरेषामनाम्नानात्" ३।३।२४ इति सूत्रे "पुरुषो वाव यज्ञः" (पैङ्गिरहस्ये) "तस्यैवं विदुषो यज्ञस्यात्मा" (नाराः ८०)

चतुर्दशाधिकरणम्—

"वेधाद्यर्थभेदात्" ३।३।२५ इति सूत्रे "सर्वं प्रविध्य हृदयं प्रविध्य" (आथर्वणिका-नाम् उपनिषदारम्भे) "देवा ह वै सत्रं निषेदुः" (काण्वानाम् उपनिषदि प्रवर्ग्यब्राह्मणम्)

पञ्चदशाधिकरणम्—

"हानौतूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम्" ३।३।२६ इति सूत्रे "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" (शाट्यायनिन.)। "अश्व इव रोमाणि विधूय पापम्" (छाः ८।१३।१) "तथा विद्वान् पुण्यपापे विधूय" (मुः ३।२।८) "तत् सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतम् उपयन्ति अप्रिया दुष्कृतम्" (कौः१।४)। "कुशा वानस्पत्याः" (भाल्लविनां श्रुतौ) "देवच्छन्दांसि पूर्वाणि" (पैङ्गिश्रुतौ) "समयाविषिते सूर्य्ये" (तैत्तिरीयकश्रुतौ) "ऋत्विज उपगायन्ति" (शाखान्तरे), "नाध्वर्युरुपगायति" (तत्रैव)

षोड्शाधिकरणम्—

"साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये" ३।२।२७ इति सूत्रे "विरजां नदीं तां मनसा एव अत्येति तत् सुकृतदुष्कृते विधूनते"(कौः १।४)"अश्व इव रोमाणि" (छाः८ १३।१)

सप्तदशाधिकरणम्—

"गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः" ३।३।२९ इति सूत्रे "विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" (मुः ३।१।३)

अष्टादशाधिकरणम्—

"अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्" ३।३।३१ इति सूत्रे "तद् य इत्थं विदुः ये च इमे श्रद्धा तप इति उपासते तेऽर्चिषम् अभिसंभवन्ति" (छाः ५।१०।१) "शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः" (गीः ८।२६)

ऊनविंशाधिकरणम्—

"यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ इति सूत्रे "अपान्तरतमा नाम कलिद्वापरयोः सन्धौ विष्णुनियोगात् कृष्णद्वैपायनः संबभूव ।" (महाः माः शाः ?)

विंशाधिकरणम्—

"अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम्" ३।३।३३ इति सूत्रे "एतद् वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनणु" (बृः ३।८।८) "यत् तदद्रेश्यमग्राह्यम्" (मुः १।१।५)

एकविंशाधिकरणम्—

"इयदामननात्" ३।३।३४ इति सूत्रे "द्वा सुपर्णा सयुजा सखायाः" (मुः ३।१।१) "ऋतं पिबन्तौ" (कठः ३।१)

द्वाविंशाधिकरणम्—

"अन्तरा भूतग्रामवत् स्वात्मनः" ३।३।३५ इति सूत्रे "समिधो यजति" (?) "यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः" (बृः ३।४।१) "एको देवः सर्वभूतेषु गूढः" (श्वेः ६।११)

"अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्" ३।३।३६ इति सूत्रे "तत्त्वमसि" (छाः ६।८।७) "अतोऽन्यदार्त्तम्" (बृः ३।४।२)

त्रयोविंशाधिकरणम्—

"व्यतिहारो विंशिषन्ति हीतरवत्" ३।३।३७ इति सूत्रे "तद् योऽहं सोऽसौ, योऽसौ सोऽहम्" (ऐतरेयारण्यकं ?) "त्वमहमस्मि अहं च त्वमसि" (तत्रैव ?)

**चतुर्विंशाधिकरणम्—**

"सैव हि सत्यादयः" ३।३।३८ इति सूत्रे 'लोकाञ्जयति" (बृः ५।४ १) "हन्ति पाप्मानम्" (बृः ५।३।४) "महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म" (बृः ५।४।१) "तद् यत् तत् सत्यम् असौ स आदित्यः" (बृः ५।४।२)

**पञ्चविंशाधिकरणम्—**

"कामादीतरत्र तत्र चायतनादिभ्यः" ३।३।३९ इति सूत्रे 'दहरोऽस्मिन् अन्तर आकाशः" (छाः ८।१।१) "य एषोऽन्तर्हृदय आकाशः" (बृः ४।४ २२)

**षड्विंशाधिकरणम्—**

"आदरादलोपः" ३।३।४० इति सूत्रे "स यां प्रथमाम् आहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहा" (छाः ५।१९।१) "पूर्वोऽतिथिभ्योऽश्नीयात्" (जावालश्रुतिः)

"उपस्थितेऽतस्तद्वचनाच्च" ३।३।४१ इति सूत्रे "तद् यद् भक्तं प्रथमम् आगच्छेत् तद् होमीयम्" (छाः ५।१९।१)

**सप्तविंशाधिकरणम्—**

"तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्" ३।३।४२ इति सूत्रे "तेनोभौ कुरुतो यश्चैतद् एवं वेद यश्च न वेद" (छाः १।१।१०) "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्य्यवत्तरं भवति" (छाः १।१।१०)

**अष्टाविंशाधिकरणम्—**

"प्रदानवदेव तदुक्तम्" ३।३।४३ इति सूत्रे "इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजाय इन्द्राय स्वराज्ञे"(?) "नाना वा देवता पृथग् ज्ञानात्" (देवताकाण्डे)

**ऊनत्रिंशदधिकरणम्—**

"लिंगभूयस्त्वात् तद्धि बलीयस्तदापि" ३।३।४४ इति सूत्रे "तत षट्त्रिंशत् सहस्राणि अपश्यद् आत्मनोऽग्नीन् अर्कान् मनोमयान् मनश्चितः" (वाजसनेयके अग्निरहस्ये) "प्राणचितः" (तत्रैव) "यत् किं च इमानि भूतानि मनसा संकल्पयन्ति" (तत्रैव)

'पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ३।३।४५ इति सूत्रे "इष्टकाभिः अग्निं चिनुते" (?) "मनोग्रहं गृह्णामि" (?)

"अतिदेशाच्च" ३।३।४६ इति सूत्रे "एकैक एव तावान् यावानसौ पूर्वः" (?)

"विद्यैव तु निर्धारणात्" ३।३।४७ इति सूत्रे "ते हैते विद्याचित एव" (?)

"श्रुत्यादिबलीयस्त्वाच्च न बाधः" ३।३।४९ इति सूत्रे "विद्यया हैवैत एवंविदश्चिता भवन्ति" (?)

"अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्" ३।३।५० इति सूत्रे "ते मनसैवा-धीयन्त मनसा चीयन्त मनसैव ग्रहा अगृह्यन्त" (?) इति।

"न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः" ३।३।५१ इति सूत्रे "स एष एव मृत्युः य एष एतस्मिन् मण्डले पुरुषः" (?) "अग्निर्वै मृत्युः (बृः ३।२।१०) "असौ वाव लोको गौतम अग्निस्तस्यादित्य एव समित्" (छाः ५।४।१)

एकत्रिंशदधिकरणम्—

"अंगवबद्धास्तु न शाखासु हि प्रतिवेदम्" ३।३।५५ इति सूत्रे "उद्गीथम् उपासीत" (छाः १।१।१)

"मन्त्रादिवद् वाऽविरोधः" ३।३।५६ इति सूत्रे "कुटरुरसि" (?)

द्वात्रिंशदधिकरणम्—

"भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति"३।३।५७ इति सूत्रे 'कं त्वम् आत्मानम् उपास्से" (छाः ५।१२।१)

त्रयस्त्रिंशदधिकरणम्—

"नाना शब्दादिभेदात्" ३।३।५८ इति सूत्रे "वेद" "उपासीत" "क्रतुं कुर्वीत" (बृः)

पञ्चत्रिंशदधिकरणम्—

"काम्यास्तु यथाकामं समुच्चीयेरन् वा पूर्वहेत्वभावात्" ३।३।६० इति सूत्रे "नाम ब्रह्मेत्युपासीत" (छाः ७।१।५)

षट्त्रिंशदधिकरणम्—

"समाहारात्" ३।३।६३ इति सूत्रे"होतृषदनाद्धैवापि दुरुद्गीथम् अनुसमाहरति"(छाः१।५।५)

"दर्शनाच्च" ३।३।६६ इति सूत्रे "एवं विद् ह वै ब्रह्मायज्ञं यजमानं सर्वांश्च ऋत्विजः अभिरक्षति" (छाः ४।१७।१०)

इत्यादीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

## (४) कीदृशी अस्य पादसंगतिः

प्रतिसूत्रम् उदाहृतश्रुतयः तावत् शंकरभाष्यानुयायिन्यः, यथा पूर्वपूर्वपादेषु प्रद-र्शिताः। भाष्यान्तरेषु अत्र मतभेदः दृश्यते एव। फलं चास्य शाङ्करमते सगुण-निर्गुणद्विविध-ब्रह्मोपासनायाः इतस्ततः विक्षिप्तायाः क्वचित् एकीकरणं क्वचित् पृथक्करणं यथायोग्यमिति। मतान्तरे तु निर्गुणब्रह्मासिद्धेः सगुणब्रह्मोपासनायाः एव तथा कृतम् इति विशेषः। तेन सर्वमतेषु पादेऽस्मिन् साधनमेव वर्णितं निर्णीतं च। अत्र शंकरमतानुसारेण निर्गुणब्रह्मोपास-एतन्मतस्य प्रतिपाद्यं न वा तत् तु शास्त्रसंगत्या निर्णेयमिति यथापूर्वस्मिन् पादे प्रद-र्शितम्। अतः अत्र प्रतिसूत्रं प्रत्यधिकरणं वा याश्च श्रुतयः समाश्रिताः विशिष्टपादेषु ताः

खलु सम्प्रदायानुरोधाधीनाः न तु सूत्रार्थानुसारिण्यः । तर्ककौशलेन सर्वं सर्वत्रैव व्याख्यातुं शक्यते विद्वद्भिः । अतः शास्त्रसंगत्याः एव अत्र शरणं गन्तव्यम् । तत्र निर्गुण-ब्रह्मप्रतिपादकत्वम् एतच्छास्त्रस्य युक्तिबलेनैव प्रतिष्ठापितम् इति दृष्टमेव । स्पष्टार्थतः श्रुतीनामपि एतदेव सिध्यति । अतोऽत्र निर्गुणोपासनानिर्णयः नोपेक्षणीयः इति प्रतिभाति । तथापि अधुना विभिन्नभाष्यकृतां मतेन यथा पादस्यास्य प्रतिपाद्यं तदत्र प्रदर्श्यते—

शाङ्करमते—सगुणविद्यासु गुणोपसंहारस्य निर्गुणे ब्रह्मणि अपुनरुक्तपदोपसंहारस्य च निरूपणद्वारा साधनवर्णनम् ।

भास्करमते—प्रायेण तथैव, निर्गुणोपासनं विना ।

रामानुजमते—साधनभेदनिरूपणम् ।

निम्बार्कमते—ब्रह्मोपासनासु गुणोपसंहारविकल्पनिर्णयाय विद्याभेदविचारः ।

माध्वमते—उपासनानिरूपणम् (सर्वपरिज्ञानं प्रथमतः उच्यते अन्ते निर्णयः)

श्रीकण्ठमते—उपासनाविशेषाणां गुणोपसंहारः ।

श्रीकरमते—परमशिवोपासनविशेषगुणोपलक्षणम् ।

एवं च सर्वमतेषु उपासनानिरूपणम् अस्य पादस्य प्रयोजनम् इत्यत्र न कोऽपि विरोधः ।

इति एकादशपादोपसंहारः ।

---

# अथ तृतीयाध्याये चतुर्थपादः ।

## प्रथमं पुरुषार्थाधिकरणम्

अत्र "पुरुषार्थोऽतः शब्दादिति बादरायणः" ३।४।१ (४२६) इति सूत्रस्य "पुरुषार्थ" पदात् अस्य "पुरुषार्थाधिकरणं" नाम । तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु सप्तदशभिः सूत्रैः, रामानुज-निम्बार्क-भाष्ययोः विंशति सूत्रैः, माध्वभाष्ये नवभिः सूत्रैः, श्रीपति-भाष्ये षोडशभिः सूत्रैः, तथा वल्लभभाष्ये चतुर्विंशति सूत्रैः एतदधिकरणं रचितम् । तानि च सप्तदश सूत्राणि—

| | |
|---|---|
| १ । "पुरुषार्थोऽतः शब्दादिति बादरायणः" ३।४।१ (४२६) | ६ । "तद्वतो विधानात्" ३।४।६ (४३१) |
| २ । "शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः" ३।४।२ (४२७) | ७ । "नियमाच्च" ३।४।७ (४३२) |
| ३ । "आचारदर्शनात्" ३।४।३ (४२८) | ८ । "अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात्" ३।४।८ (४३३) |
| ४ । "तच्छ्रुतेः" ३।४।४ (४२९) | ९ । "तुल्यं तु दर्शनम्" ३।४।९ (४३४) |
| ५ । "समन्वारम्भणात्" ३।४।५ (४३०) | १० । "असार्वत्रिकी" ३।४।१० (४३५) |
| | ११ । "विभागः शतवत्" ३।४।११ (४३६) |

१२ । "अध्ययनमात्रवतः" ३।४।१२ (४३७)
१३ । "नाविशेषात्" ३।४।१३ (४३८)
१४ । "स्तुतयेऽनुमतिर्वा" ३।४।१४ (४३९)
१५ । "कामकारेण चैके" ३।४।१५ (४४०)
१६ । "उपमर्दं च" ३।४।१६ (४४१)
१७ । च शब्दे हि" ३।४।१७ (४४२)

तत्र (१) "पुरुषार्थोऽतः शब्दादिति बादरायणः" ३।४।१ (४२६) इत्यत्र "पुरुषार्थः" इति प्रथमान्तपदात् पादारम्भाच्च संगतः एव अधिकरणारम्भः। चतुर्थसामान्यनियमात् द्वितीय-विशेषनियमाच्च। स्वमतेन विषयान्तरज्ञापनात् च, दशमविशेषनियमात्।

(२) "शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः" ३।३।२ (४२७) इत्यत्र "पुरुषार्थवादः" इति प्रथमान्तपदसत्त्वेऽपि "जैमिनिः" इति नाम्ना प्रतिकूलमतान्तरप्रदर्शनात् विंशनियमात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् तथा दशमविशेषनियमात्।

(३) "आचारदर्शनात्" ३।४।३ (४२८) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्।

(४) "तच्छ्रुतेः" ३।४।४ (४२९) इत्यत्रापि तथा। चतुर्थसामान्यनियमात्।

(५) "समन्वारम्भणात्" ३।४।५ (४३०) इत्यत्रापि तथा। चतुर्थसामान्यनियमात्।

(६) "तद्वतो विधानात्" ३।४।६ (४३१) इत्यत्रापि तथा। चतुर्थसामान्यनियमात्।

(७) "नियमाच्च" ३।४।७ (४३२) इत्यत्रापि तथा। चकारश्चात्र हेतुसमुच्चायकः। चतुर्थ-सामान्यनियमात् षष्ठविशेषनियमाच्च।

(८) "अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात्" ३।४।८ (४३३) इत्यत्र "एवं" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् उक्तपूर्वपक्ष-व्यावर्तक-तु-शब्दात् अधिकरणारम्भनिषेधः, नवमविशेषनियमात् अष्टादशविशेषनियमाच्च। विषयान्तराद्दते स्वमतवर्णनात् च, दशमविशेषनियमात्।

(९) "तुल्यं तु दर्शनम्" ३।४।९ (४३४) इत्यत्र 'तुल्यम्' 'दर्शनम्' इति प्रथमान्त-अनिषेधार्थक-तु-शब्दयोगात् च नास्य अधिकरणारम्भकत्वम्। नवमविशेषनियमात्।

(१०) "असार्वत्रिकी" ३।४।१० (४३५) इत्यत्र "असार्वत्रिकी" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् ततः तस्य स्वरूपतः साकांक्षत्वबोधकत्वात् नात्र अधिकरणारम्भः। सप्तमविशेष नियमात्। माध्वभाष्ये सूत्रत्रयात्मक-द्वितीयाधिकरणारम्भात् दोषः।

(११) "विभागः शतवत्" ३।४।११ (४३६) इत्यत्र प्रथमान्तपदसत्त्वेऽपि "कस्य-विभागः" इति विभागशब्दस्य स्वरूपतः साकांक्षत्वात नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्य-नियमात्, सप्तमविशेषनियमात् च।

(१२) "अध्ययनमात्रवतः" ३।४।१२ (४३७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् ।

(१३) "नाविशेषात" ३।४।१३ (४३८) इत्यत्रापि तथैव । चतुर्थसामान्यनियमात् । माध्वभाष्ये अनेन एकेनैव तदीयतृतीयाधिकरणस्य रचनात् दोषः ।

(१४) "स्तुतयेऽनुमतिर्वा" ४।१४ (४३९) इत्यत्र "अनुमतिः" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् तथा "वा" शब्देन साकांक्षत्वविधानात् नास्य अधिकरणारम्भकत्वम् । षष्ठविशेषनियमात् । माध्वभाष्ये तदीयचतुर्थाधिकरणस्य विंशतिसंख्यक-सूत्रात्मकाधिकरणस्य आरम्भात् दोषः ।

(१५) "कामकारेण चैके" ३।४।१५ (४४०) इत्यत्र "एके" इति प्रथमान्तपदसत्त्वेऽपि चकार-योगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(१६) "उपमर्दं च" ३।४।१३ (४४१) इत्यत्र "उपमर्दं" इति प्रथमान्तपदसत्त्वेपि च कारयोगात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च ।

(१७) "ऊर्ध्वरेतःसु च शब्दे हि" ३।४।१७ (४४२) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । चतुर्थसामान्यनियमात् । अध्याहृतेऽपि "च हि" शब्दौ बाधकौ, षष्ठविशेषमियमात् । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च युक्ता । श्रीपति-भाष्ये अत्र अधिकरणरचनात् दोषस्पर्शः कल्पनीयः । तन्मते एतद् हि तदीयद्वितीयाधिकरणस्य चतुर्षु सूत्रेषु प्रथमं सूत्रम् ।

## द्वितीयं परामर्शाधिकरणम्

अत्र 'परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ (४४३) इति सूत्रस्य "परामर्शम्" इति पदात् "परामर्शाधिकरणं" नाम । तत्र शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु अधिकरणम् आरब्धम् । रामानुज-निम्बार्क-मध्व-श्रीपति-वल्लभ-भाष्येषु नारब्धम् । शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु तदीयद्वितीयाधिकरणस्य त्रिषु सूत्रेषु एतत् सूत्रं प्रथमं भवति । रामानुज-निम्बार्क-भाष्ययोः प्रथमाधिकरणस्य विंशतिषु सूत्रेषु अष्टादश सूत्रम् । माध्वभाष्ये विंशति-सूत्रात्मक-चतुर्थाधिकरणस्य पञ्चमं सूत्रम् । श्रीपति-भाष्ये सूत्रचतुष्टयात्मक-द्वितीयाधिकरणस्य द्वितीयं सूत्रम् । वल्लभभाष्ये चतुर्विंशति-सूत्रात्मक-प्रथमाधिकरणस्य अष्टादश सूत्रम् इति । तच्च सूत्रत्रयम्—

१ । "परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ (४४३)

२ । "अनुष्ठेयं बादरायणः साम्यश्रुतेः" ३।४।१९ (४४४)

३ । "विधिर्वा धारणवत्" ३।४।२० (४४५)

अत्र (१) "परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ (४४३) इत्यत्र "परामर्शम्" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम् । चतुर्थसामान्यनियमात्

तथा "जैमिनिः" इति प्रथमान्तपदेन स्वमतविरुद्धविषयान्तरस्य ज्ञापनात् अस्य अधिकरणारम्भकत्वं संगच्छते, दशमविशेषनियमात् । चकारयोगस्य अन्वयाचयेन हेतुसमुच्चायकत्वम् न पूर्वाधिकरणस्य हेतोः; तेन पूर्वाधिकरणस्य अंगत्वकल्पनम् एतत्सूत्रस्य न युक्तम् । द्वादशविशेषनियमात् । रा-नि-म-श्रीप-व-भाष्येषु अधिकरणस्य अरचनायां तेन दोषप्रसंगः । तेषां पक्षे संख्याधिक्येऽपि नियमविरुद्धत्वात् दौर्बल्यम् ।

( २ ) "अनुष्ठेयं बादरायणः साम्यश्रुतेः" ३।४।१९ ( ४४४ ) इत्यत्र "अनुष्ठेयं" तथा "बादरायणः" इति प्रथमान्तपदद्वयसत्त्वेऽपि नास्य अधिकरणारम्भकत्वं युक्तं, पूर्वोक्त-जैमिनिमतस्य खण्डनार्थं बादरायणमतस्य सूचनात् साकांक्षत्वसिद्धेः दशमविशेषनियमात् ।

( ३ ) "विधिर्वा धारणात्" ३।३।२० (४४५) इत्यत्र "विधिः" इति प्रथमान्तपदसत्त्वे अपि चतुर्थसामान्यनियमात्, "वा"-शब्देन च साकांक्षत्वसिद्धेः नास्य अधिकरणारम्भकत्वं, षष्ठ-विशेषनियमात् । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## तृतीयं स्तुतिमात्राधिकरणम् ।

अत्र "स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्" ३।४।२१ ( ४४६ ) इति सूत्रस्य "स्तुति-मात्रम्" इति पदम् अवलम्ब्य अस्य "स्तुतिमात्राधिकरणं" नाम । तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु एतत् सूत्रं तदीयसूत्रद्वयात्मक-तृतीयाधिकरणस्य प्रथमं सूत्रम् । रामानुज-निम्बार्क-भाष्ययोः तदीयसूत्रद्वयात्मक-द्वितीयाधिकरणस्य प्रथमं सूत्रम् । माध्वभाष्ये तदीयचतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये अष्टमं सूत्रम् । वल्लभभाष्ये तदीय-प्रथमाधिकरणस्य चतुर्विंशतेः सूत्राणां मध्ये एकविंशसूत्रम् । तेन अत्र मध्व-वल्लभ-भाष्ययोः अधिकरणं नारब्धम् । तत् च सूत्रद्वयम्—

"१। स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्" ३।४।२१ (४४६)

२। "भावशब्दाच्च" ३।४।२२ (४४७)

तत्र ( १ ) "स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्" ३।४।२१ (४४६) इत्यत्र "स्तुति-मात्रम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं चतुर्थसामान्यनियमात् युक्तमपि, "इति चेत्" इति पदसन्दर्भात् तस्य बाधकत्वं स्यात्, पञ्चमविशेषनियमात्; तथापि प्रथमान्तपदानन्तरं पञ्चम्यन्तपदसत्त्वात् तस्यापि बाधकम्, चतुर्दशविशेषनियमात् । तेन मध्व-वल्लभ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "भावशब्दाच्च" ३।४।२२ (४४७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिक-रणारम्भकत्वम् । च-कारस्य हेतुसमुच्चायकत्वात् न बाधः, चतुर्थसामान्यनियमात् षष्ठविशेषनियमात् च । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## चतुर्थं पारिप्लवाधिकरणम् ।

अत्र "पारिप्लवार्था इति चेन्न विशेषितत्वात्" ३।४।२३ (४४८) इति सूत्रस्य "पारिप्ल-

वार्था" इति पदात् अस्य "पारिप्लवाधिकरणं" नाम । तत्र श-भा-रा-नि-श्री-श्रीप-भाष्येषु अधिकरणम् आरब्धम्, भास्कर-भिन्न-सर्वेषु भाष्येषु सूत्रद्वयं गृहीतम् । भास्करमते द्वितीयसूत्रस्य प्रथमसूत्रांशत्वेन पाठात् एतद् अधिकरणं एकेनैव सूत्रेण रचितम् । तेन एतद्धि श-भा-श्री-श्रीप-भाष्येषु चतुर्थाधिकरणं रा-नि-भाष्ययोः तृतीयाधिकरणम् । माध्वभाष्ये तदीयचतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये एतद्धि द्वाविंशं सूत्रम् । तत् च सूत्रद्वयम्—

१। "पारिप्लवार्था इति चेन्न विशेषितत्वात्" ३।४।२३ (४४८)

२। "तथा चैकवाक्यतोपबन्धात्" ३।४।२४ (४४९)

अत्र ( १ ) पारिप्लावार्था इति चेन्न विशेषितत्वात्" ३।४।२३ (४४८) इत्यत्र "पारिप्लवार्था" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम् , चतुर्थसामान्यनियमात् । तथापि "इति चेन्न" इति पदसत्त्वं तस्य बाधकम्, पञ्चमविशेषनियमात् । तथापि षण्णां भाष्यकृतां मते अधिकरणारम्भात् "पारिप्लवार्था" इति पदेन विषयश्रुतिभेदात् अधिकरणारम्भः कल्पयितुं शक्यते । तेन च एकादशविशेषनियमात् अधिकरणारम्भः संगच्छते एव । तेन मध्व-बल्लभ-भाष्ययोः अधिकरणस्य अरचनायां दोषः एव वाच्यः । भास्कर-भाष्ये परसूत्रम् अपि एतत् सूत्रशेषत्वेन पठ्यते । तन्न युक्तम् । यतः परसूत्रे चकारात् हेतोः विजातीयवैलक्षण्यं सूचितम् । चतुर्थविशेषनियमात् ।

( २ ) "तथा चैकवाक्यतोपबन्धात्" ३।४।२४ (४४९) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं, चतुर्थसामान्यनियमात् । चकारयोगाच्च तथा षष्ठविशेषनियमात् । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः । भास्कर-भास्ये एतत् सूत्रं अधिकरणारम्भक-पूर्वसूत्रस्य अङ्गत्वेन पठितम् इति दृश्यते । तन्न संगतम् । चकारात् हेतोः विजातीयवैलक्षण्यस्य सूचनात्. चतुर्थविशेषानयमात् ।

## पञ्चमम् अग्नीन्धनाद्यधिकरणम् ।

अत्र "अतएव चाग्नीन्धनाद्यनपेक्षा" ३।४।२५ (४५०) इति सूत्रस्य "अग्नीन्धनादि"-पदात् अस्य "अग्नीन्धनाद्यधिकरणं" नाम । तत्र एतत् सूत्रं शंकर-भास्कर-श्रीकण्ठ-श्रीपति-भाष्येषु पञ्चमाधिकरणस्य एकमेव सूत्रम् । रामानुज-भाष्ये तदीयचतुर्थाधिकरणस्य एकमेव सूत्रम् । निम्बार्क-भाष्ये तदीयसूत्रत्रयात्मक-चतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये द्वादशं सूत्रम् । बल्लभभाष्ये तु तदीयप्रथमाधिकरणस्य चतुर्विंशतेः सूत्रणां मध्ये अन्तिमं सूत्रम् । तेन अत्र मध्व-बल्लभ-भिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । अत्र "अपेक्षा" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् । "अतएव च" इति पदौ न बाधकौ, षष्ठसप्तमविशेषनियमाभ्याम् । विधेयभेदात् तु स एव युक्तः, त्रयोदशविशेषनियमात् । मध्व-बल्लभ-भाष्ययोः तदकरणात् दोषः कल्पनीयः । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## षष्ठं सर्वापेक्षाधिकरणम्

अत्र "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" ३।४।२६ (४५१) इति सूत्रस्य "सर्वापेक्षा" इति पदात् अस्य "सर्वापेक्षाधिकरणं" नाम। तत्र शङ्कर-भास्कर-रामानुज-श्रीकण्ठ-श्रीपति-वल्लभ-भाष्येषु अधिकरणम् आरब्धम्, निम्बार्क-मध्व भाष्ययोः तु न आरब्धम्। शङ्कर-भास्कर-भाष्ययोः एतत् सूत्रं तदीयसूत्रद्वयात्मक-षष्ठाधिकरणस्य प्रथमं सूत्रम्। रामानुजभाष्ये अनेनैव एकेन सूत्रेण तदीय-पञ्चमाधिकरणं रचितम्। निम्बार्कभाष्ये सूत्रत्रयात्मक-तदीयचतुर्थाधिकरणस्य एतद्धि द्वितीयं सूत्रम्। माध्वभाष्ये तदीयचतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये त्रयोदशं सूत्रम्। श्रीकण्ठ-श्रीपति-भाष्ययोः तु तदीयषष्ठाधिकरणस्य एतदेव एकं सूत्रम्। वल्लभभाष्ये तदीयद्वितीयाधि-करणस्य षट्सु सूत्रेषु एतद्धि प्रथमं सूत्रम्। तच्च सूत्रद्वयम्—

१। "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" ३।४।२६—(४५१)

२। "शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया
तेषामवश्यानुष्ठेयत्वात्" ३।४।२७ (४५२)

तत्र (१) "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" ३।४।२६ (४५१) इत्यत्र "सर्वापेक्षा" इति प्रथमान्तपदात अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात्। चकारस्य विधेयभेद-द्योतकत्वात् न बाधकत्वम्, द्वादशविशेषनियमात। निम्बार्क-मध्व-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः एव वाच्यः।

(२) "शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्" ३।४।२७ (४५२) इत्यत्र "शमदमाद्युपेतः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तं, चतुर्थसामान्यनियमात्। तथापि संकोचार्थक-तु-शब्दात् तस्य निषेधः, नवमविशेषनियमात्। ऊनविंशनियमोऽपि न प्रयोक्तव्यः, तु-स्यात्-शब्दयोः साक्षाद् योगाभावात्। रा-श्री-श्रीप-भाष्येषु अधिकरणस्य आरम्भात् तेषामेव दोषः। रामानुजभाष्ये एतत् सूत्रं तदीयषष्ठाधिकरणस्य एकमेव सूत्रम्, तथा श्री-श्रीप-भाष्ययोः तदीयसप्तमाधिकरणस्य एकमेव सूत्रम् इति बोद्धव्यम्।

## सप्तमं सर्वान्नानुमत्याधिकरणम्

अत्र "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" ३।४।२८ (४५३) इति सूत्रस्य "सर्वान्नानुमतिः" इति पदात् अस्य "सर्वान्नानुमत्यधिकरणं" नाम। तत्र शङ्कर-भास्कर-रामानुज-निम्बार्क-श्रीकण्ठ-श्रीपति-भाष्येषु अत्र अधिकरणम् आरब्धम्, मध्व-वल्लभ-भाष्ययोस्तु न तथा कृतम्। श-भा-रा-भाष्येषु तदीयसूत्रचतुष्टयात्मक-सप्तमाधिकरणस्य एतद्धि प्रथमं सूत्रम्; निम्बार्कभाष्ये तथैव सूत्रचतु-ष्टयात्मक-तदीयपञ्चमाधिकरणस्य प्रथमं सूत्रम्; श्रीकण्ठ-श्रीपति-भाष्ययोस्तु तथैव तदीयाष्टमाधि-करणस्य तत् इति ज्ञेयम्। माध्वभाष्ये च तदीयचतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये पञ्चदशं सूत्रम्। तथा वल्लभभाष्ये तदीयद्वितीयाधिकरणस्य षट्सु सूत्रेषु तृतीयं सूत्रम् इति।

तत्र सूत्रचतुष्टयम्—

१। "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" ३।४।२८ (४५३)

२। "अबाधाच्च" ३।४।२९ (४५४)

३। "अपि च स्मर्य्यते" ३।४।३० (४५५)

४। "शब्दश्चातोऽकामकारे" ३।४।३१ (४५६)

अत्र (१) सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" ३।४।२८ (४५३) इत्यत्र "सर्वान्नानुमतिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्; चतुर्थसामान्यनियमात् । चकारेण विधेय-भेदात् न बाधकत्वम् । द्वादशविशेषनियमात् । मध्व-बल्लभ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "अबाधाच्च" ३।४।२९ (४५४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वम् । चकारस्य हेतुसमुच्चयार्थकत्वात् न बाधकत्वम्, चतुर्थसामान्यनियमात्, तथा षष्ठविशेषनियमाच्च ।

( ३ ) 'अपि च स्मर्य्यते" ३।४।३० (४५५) इत्यत्र तथैव । चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च ।

( ४ ) "शब्दश्चातोऽकामकारे" ३।४।३१ (४५६) इत्यत्र "शब्दः" इति प्रथमान्त-पदादपि चतुर्थसामान्यनियमात्, चकारात् अतः-शब्दाच्च नास्य अधिकरणारम्भकत्वम् । षष्ठ-सप्तमविशेषनियमाभ्याम् । चकारस्य हेतुसमुच्चयार्थकत्वात् । परसूत्रे अधिकसम्मत्या अधि-करणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः युक्ता एव ।

## अष्टमम् आश्रमकर्माधिकरणम्

अत्र "विहितत्वाच्चाश्रमकर्म्मापि" ३।४।३२ (४५७) इति सूत्रस्य "आश्रमकर्म्म" इति पदात् अस्य "आश्रमकर्म्माधिकरणं" नाम । तत्र मध्वभिन्नैः सप्तभिः आचार्यैः अनेन अधिकरणारम्भणं कृतम् । माध्वभाष्ये एतत् सूत्रं तदीयचतुर्थाधिकरणस्य विंशतेः सूत्राणां मध्ये ऊनविंशसूत्रम् । शङ्कर-भास्कर-रामानुज-भाष्येषु तदीयाष्टमाधिकरणस्य चतुर्षु सूत्रेषु प्रथमं सूत्रम् । निम्बार्क-भाष्ये तदीयषष्ठाधिकरणस्य चतुर्षु सूत्रेषु प्रथमं सूत्रम् । श्रीकण्ठ-श्रीपति-भाष्ययोः तदीय-नवमाधिकरणस्य तथैव । बल्लभभाष्ये तु तदीयतृतीयाधिकरणस्य अष्टसु सूत्रेषु प्रथमं सूत्रम् । तेन शंकरादिषु पञ्चसु भाष्येषु अत्र चत्वारि सूत्राणि, केवलं बल्लभभाष्ये अष्ट सूत्राणि इति विशेषः । तत्र सूत्रचतुष्टयम् ।

१। "विहितत्वाच्चाश्रमकर्म्मापि" ३।४।३२ (४५७)

२। "सहकारित्वेन च" ३।४।३३ (४५८)

३। "सर्वथापि त एवोभयलिङ्गात्" ३।४।३४ (४५९)

४। "अनभिभवं च दर्शयति" ३।४।३५ (४६०)

अत्र ( १ ) "विहितत्वाच्चाश्रमकर्म्मापि" ३।४।३२ (४५७) इत्यत्र "आश्रमकर्म्म" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, अपि-शब्देन न साकांक्षत्वशंका, प्रसंगभेदसूचनात्, द्वादशविशेषनियमात्, अधिकरणानारम्भात् माध्वभाष्ये दोषः।

( २ ) "सहकारित्वेन च" ३।४।३३ (४५८) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात्, षष्ठविशेषनियमाच्च।

( ३ ) "सर्वथापि त एवोभयलिंगात्" ३।४।३४ (४५९) इत्यत्र "ते" इति प्रथमान्तपदात् अधिकरणारम्भणीयत्वेऽपि चतुर्थसामान्यनियमात्, "अपि"- 'च"-पदाभ्यां नास्य अधिकरणारम्भकत्वम्, षष्ठविशेषनियमात्। माध्वभाष्ये ५।७।१ अधिकरणारम्भात् दोषः।

( ४ ) "अनभिभवं च दर्शयति" ३।४।३५ (४६०) इत्यत्र "अनभिभवं" इत्यस्य द्वितीयान्तत्वात् प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्यनियमात्, षष्ठविशेषनियमात् च। परसूत्रे षड्भिः आचार्य्यैः अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च।

## नवमं विधुराधिकरणम्

अत्र "अन्तरा चापि तु तद्दृष्टेः" ३।४।३६ (४६१) इति सूत्रस्थस्य 'अन्तरा" इति शब्दस्य अर्थम् अवलम्ब्य एतस्य "विधुराधिकरणं" नाम। तत्र शङ्कर-भास्कर-रामानुज-निम्बार्क-श्रीकण्ठ-श्रीपति-भाष्येषु चतुर्भिः सूत्रैः एतदधिकरणं रचितम्। मध्व-वल्लभ-भाष्ययोः तु अधिकरणं नारब्धम्। तत्र शङ्कर-भास्कर-रामानुज-भाष्येषु एतद्धि नवमम् अधिकरणं, निम्बार्कभाष्ये सप्तमम् अधिकरणं, श्रीकण्ठ-श्रीपति-भाष्ययोस्तु दशमम् अधिकरणम्। माध्व-भाष्ये एतत् सूत्रं तदीयैः सप्तभिः सूत्रैः आरब्धस्य पञ्चमाधिकरणस्य तृतीयं सूत्रम्, वल्लभ-भाष्ये तु तदीयैः अष्टभिः सूत्रैः आरब्धस्य तृतीयाधिकरणस्य पञ्चमं सूत्रम्। तच्च सूत्रचतुष्टयम्—

१। "अन्तरा चापि तु तद्दृष्टेः" ३।४।३६ (४६१)

२। "अपि च स्मर्य्यते" ३।४।३७ (४६२)

३। "विशेषानुग्रहश्च" ३।४।३८ (४६३)

४। "अतस्त्वितरज्ज्यायो लिंगाच्च" ३।४।३९ (४६४)

अत्र ( १ ) "अन्तरा चापि तु तद्दृष्टेः" ३।४।३६ (४६१) इत्यत्र "अन्तरा" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात्। 'च अपि"-पदाभ्यां पूर्वेण सह साकांक्षत्वबोधनेऽपि तु-शब्देन तद्व्याघातात्; द्वादशाष्टादशविशेष-नियमाभ्याम्। मध्व-वल्लभ-भाष्ययोः अधिकरणस्य अनारम्भाच्च दोषः।

( २ ) "अपि च स्मर्य्यते" ३।४।३७ (४६२) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। चतुर्थसामान्यनियमात् षष्ठविशेषनियमात् च।

( ३ ) "विशेषानुग्रहश्च" ३।४।३८ (४६३) इत्यत्र "विशेषानुग्रहः" इति प्रथमान्तपदसत्त्वेऽपि चकार-योगेन तस्य हेत्वर्थबोधकत्वात् प्रसंगान्तरत्वाभावात् न अधिकरणारम्भकत्वम्

संगच्छते । एतदर्थं चतुर्थसामान्यनियमः तथा षष्ठविशेषनियमश्च अत्र अनुसन्धेयौ ।

(४) "अतस्त्वितरज्ज्यायो लिंगाच्च" ३।४।३९ (४६४) इत्यत्र "इतरत्" तथा "ज्यायः" इति प्रथमान्तपदद्वयसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम् । "अतः" 'चकारः" तथा "इतरत्" इति शब्दत्रयेण साकांक्षत्वविधानात्, षष्ठसप्तमविशेषनियमाभ्याम् । परसूत्रेण मध्व-भिन्नैः सर्वैः अधिकरणस्य आरम्भात् अत्रैव समाप्तिः सङ्गच्छते ।

## दशमं तद्भूताधिकरणम्

अत्र "तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः" ३।४।४० (४६५) इति सूत्रस्य "तद्भूतस्य" इति पदात् अस्य "तद्भूताधिकरणं" नाम । अत्र माध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । तन्मते एतत् सूत्रं तदीयपञ्चमाधिकरणस्य सप्तसु सूत्रेषु अन्तिमम् । शङ्कर-भास्कर-भाष्ययोः एतेन एकेन सूत्रेण दशमम् अधिकरणं रचितम् । रामानुजमते दशमाधिकरणस्य चतुर्षु सूत्रेषु प्रथमं सूत्रम्, निम्बार्कमते अष्टमाधिकरणस्य तथैव । श्रीकण्ठ-श्रीपति-भाष्ययोः एकादशाधिकरणस्य तथैव । वल्लभभाष्ये चतुर्थाधिकरणस्य च तथैव । तेन माध्वभाष्ये अधिकरणस्य अरचनायां दोषः । अत्र "अतद्भावः" इति प्रथमान्तपदात् चतुर्थसामान्यनियमात् अस्य अधिकरणारम्भकत्वं युक्तम् । विषयान्तरज्ञापनेन तस्य स्वमतानुकूलजैमिनीयमतत्वात् न दोषः, दशमविशेषनियमात् । अन्यप्रथमान्तपदेन अधिकरणस्य विधानात्, तथा तु-अपि-पदयोः अबाधकत्वात् । द्वादशाष्टादशविशेषनियमाभ्याम् ।

## एकादशम् आधिकारिकाधिकरणम्

अत्र "न चाधिकारिकमपि पतनानुमानात् तदयोगात्" ३।४।४१ (४६६) इति सूत्रस्य "आधिकारिक"-पदात् अस्य "आधिकारिकाधिकरणं" नाम । तत्र शंकर-भास्कर-मध्व-वल्लभ-भाष्येषु अधिकरणम् आरब्धम् । न तु शिष्टेषु तथा । एतदारभ्य सूत्रद्वयेन एतदधिकरणम् आरब्धम् । शंकर-भास्कर-भाष्ययोः मध्ये माध्वभाष्ये च एतत् सूत्रं सूत्रत्रयात्मक-षष्ठाधिकरणस्य प्रथमं सूत्रम् । वल्लभभाष्ये तथैव सूत्रद्वयात्मक-पञ्चमाधिकरणस्य प्रथमं सूत्रम् । रामानुजभाष्ये सूत्र-चतुष्टयात्मक-दशमाधिकरणस्य द्वितीयं सूत्रम् । निम्बार्कभाष्ये सूत्रचतुष्टयात्मकाष्टमाधि-करणस्य द्वितीयं सूत्रम् । श्रीकण्ठ-श्रीपति-भाष्ययोः सूत्रचतुष्टयात्मकैकादशाधिकरणस्य द्वितीयं सूत्रम् । तच्च सूत्रद्वयम्—

१। "न चाधिकारिकमपि पतनानुमानात् तदयोगात्" ३।४।४१ (४६६)

२। "उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम्" ३।४।४१ (४६७)

तत्र ( १ ) "न चाधिकारिकमपि पतनानुमानात् तदयोगात्" ३।४।४१ (४६६) इत्यत्र "आधिकारिकम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्, चतुर्थसामान्यनियमात् ।

"न" "च" "अपि" इति पदानां तस्य न बाधकत्वम्, प्रसंगभेदस्य सूचनात्, द्वादशविशेष-नियमात्। तेन रा-नि-श्री-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषः।

( २ ) "उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम्" ३।४।४२ (४६७) इत्यत्र "एके" तथा "भावम्" इति प्रथमान्तपदसत्त्वेऽपि चतुर्थसामान्यनियमात् नास्य अधिकरणारम्भकत्वम्। "अपि-तु"-पदाभ्यां साकांक्षत्वविधानात्, षष्ठविशेषनियमात् तथा नवमविशेषनियमात्। भास्कर-भाष्ये एतत् सूत्रं न पठितम् इति दृश्यते। अत्र 'तदुक्तम्" इति पदात् अत्र अधिकरण-समाप्तिरपि कल्पनीया पञ्चदशविशेषनियमात्। "विकरणत्वान्नेति चेत् नदुक्तम्" २।१।३१ इति सूत्रवत्। नात्र "अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्" ३।३।५० इतिवत् तद्बाधकत्वं कल्पनीयम्। परसूत्रस्य निराकांक्षत्वात्।

## द्वादशं वहिरधिकरणम्

अत्र "बहिस्तूभयथापि स्मृतेराचाराच्च" ३।४।४३(४६८) इति सूत्रस्य-"वहिः" पदात् अस्य "वहिरधिकरणं" नाम। तत्र शङ्कर-भास्कर-बल्लभ-भाष्येषु अधिकरणं रचितम्, न तु अन्येषु भाष्येषु इति। अत्र शंकर-भास्कर-भाष्ययोः एतेन एकेन सूत्रेण द्वादशाधिकरणं रचितम्। बल्लभ-भाष्ये तु सूत्रचतुष्टयात्मक-षष्ठाधिकरणस्य प्रथमं सूत्रम्। रामानुजभाष्ये सूत्रचतुष्टयात्मक-दशमाधि-करणस्य चतुर्थं सूत्रम्, निम्बार्कभाष्ये सूत्रचतुष्टयात्मकाष्टमाधिकरणस्य चतुर्थं सूत्रम्। माध्वभाष्ये सूत्रत्रयात्मक-षष्ठाधिकरणस्य तृतीयं सूत्रम्। श्रीकण्ठ-श्रीपति-भाष्ययोः सूत्रचतुष्टया-त्मकैकादशाधिकरणस्य चतुर्थं सूत्रम्। अत्र "वहिः" इति प्रथमान्तपदस्य सत्वात अधिकरणारम्भः युक्तः एव, चतुर्थसामान्यनियमात्। तु-शब्दः तु न तस्य बाधकः, अनुक्तपूर्वपक्षस्य निषेधात्। अष्टादश-विशेषनियमात्। प्रसंगभेदात् 'च" "अपि" पदयोरपि न बाधकत्वं द्वादशविशेषनियमात्। रा-नि-म-श्री-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषः। तेषाम् अधिकसंख्यकत्वेऽपि नियमाननुगतत्वात्।

## त्रयोदशं स्वाम्यधिकरणम्

अत्र "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ (४४९) इति सूत्रस्य "स्वामिनः" इति पदात् अस्य "स्वाम्यधिकरणं" नाम। तत्र बल्लभ-भाष्य-भिन्नेषु सर्वेषु भाष्येषु अत्र अधिकरणं रचितम्। बल्लभभाष्ये एतत् सूत्रं सूत्रचतुष्टयात्मक-षष्ठाधिकरणस्य द्वितीयं सूत्रम्। शांकर-भाष्ये सूत्रत्रयात्म-कस्य त्रयोदशाधिकरणस्य, भास्करभाष्ये सूत्रद्वयात्मकस्य त्रयोदशाधिकरणस्य, रामानुजभाष्ये सूत्रद्वयात्मकस्य एकादशाधिकरणस्य, निम्बार्कभाष्ये सूत्रद्वयात्मकस्य नवमाधिकरणस्य, माध्व-भाष्ये सूत्रत्रयात्मकस्य सप्तमाधिकरणस्य, श्रीकण्ठ-भाष्ये सूत्रद्वयात्मकस्य द्वादशाधिकरणस्य, श्रीपतिभाष्ये सूत्रत्रयात्मकस्य द्वादशाधिकरणस्य, एतत् सूत्रं प्रथमम्। तच्च सूत्रत्रयम्—

१। "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ (४६९)

२। "आर्त्विज्यमित्यौडुलोमिस्तस्मै हि

३। "श्रुतेश्च" ३।४।४६ (४७१)

तत्र ( १ ) "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ (४६९) इत्यत्र "आत्रेयः" इति प्रथमान्तपदात् अधिकरणारम्भः संगतः, चतुर्थसमान्यनियमात् । नाम्ना स्वमतप्रतिकूलपरमतनिर्देशेन विषयान्तरज्ञापनेन च स च युक्तः एव, विंशविशेषनियमात् । समग्रसूत्रस्य पूर्वपक्षरूपत्वात् । अतोऽयम् अत्र एको नियमः सङ्कलनीयः—

"पूर्वपक्षसूत्रीय-प्रथमान्तनामपदेन परमतनिर्देशे कृते तथा विषयान्तरे सूचिते पृथग् अधिकरणारम्भः करणीयः" इति ।

अत्र "आत्रेयः" इति पदेन विषयान्तरसूचितपूर्वपक्षसूत्ररचनायां अधिकरणारम्भः संगच्छते । तेन वल्लभ-भाष्ये अधिकरणस्य अरचनायां दोषः ।

( २ ) "आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते" ३।४।४५ (४७०) इत्यत्र "आर्त्विज्यम्" तथा "औडुलोमिः" इति प्रथमान्तपदद्वयात् अत्र अधिकरणारम्भः युज्यते एव, चतुर्थसामान्यनियमात् स्वमतानुकूलपरमतेन विषयान्तरस्य अज्ञापनात् च, दशमविशेषनियमात् ।

( ३ ) "श्रुतेश्च" ३।४।४६ (४७१) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् चतुर्थसामान्यनिययात् । चकारस्य हेतुसमुच्चायकार्थत्वात्, षष्ठविशेषनियमात् । भा-रा-श्री-नि-भाष्येषु अस्य अग्रहणं दृश्यते । तेन भा-रा-नि-म-श्री-मतेषु सूत्रद्वयेन एतदधिकरणं, माध्वमते तु एतस्यापि परवर्त्तिसूत्रेण अधिकरणकरणात् तन्मते सूत्रत्रयात्मकम् * एतदधिकरणम् । परसूत्रे सप्तानां सम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## चतुर्दशं सहकार्य्यन्तरविध्यधिकरणम्

अत्र "सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ३।४।४७ (४७२) इति सूत्रस्य "सहकार्य्यन्तर"-पदात् अस्य "सहकार्य्यन्तरविध्यधिकरणं" नाम । तत्र मध्वभाष्यभिन्नेषु सर्वेषु भाष्येषु अत्र अधिकरणम् आरब्धम् । माध्वमते एतत् सूत्रं सूत्रत्रयात्मक-सप्तमाधिकरणस्य तृतीयं सूत्रम् । ततश्च शंकर-भास्कर-भाष्ययोः सूत्रत्रयात्मक-चतुर्दशाधिकरणस्य, रामानुजभाष्ये सूत्रत्रयात्मक-द्वादशाधिकरणस्य, निम्बार्कभाष्ये सूत्रत्रयात्मक-दशमाधिकरणस्य, श्रीकण्ठभाष्ये सूत्रैकात्मक-त्रयोदशाधिकरणस्य, श्रीपतिभाष्ये सूत्रद्वयात्मक-त्रयोदशाधिकरणस्य, वल्लभभाष्ये च सूत्रैकात्मक-सप्तमाधिकरणस्य प्रथमं सूत्रम् । तच्च सूत्रत्रयम्—

१। "सहकार्य्यन्तरविधिः पक्षेण तृतीया तद्वतो विध्यादिवत्" ३।४।४७ ( ४७२ )

२। "कृत्स्नभावात् तु गृहिणोपसंहारः" ३।४।४८ ( ४७३ )

३। "मौनवदितरेषामप्युपदेशात्" ३।४।४९ ( ४७४ )

अत्र ( १ ) "सहकार्य्यन्तरविधिः पक्षेण तृतीया तद्वतो विध्यादिवत्" ३।४।४७ (४७२) इत्यत्र "सहकार्य्यन्तरविधिः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भः संगतः एव । चतुर्थसामान्यनियमात् । माध्वभाष्ये अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "कृत्स्नभावात् तु गृहिणोपसंहारः" ३।४।४८ (४७३) इत्यत्र "उपसंहारः" इति प्रथमान्तपदसत्त्वेऽपि तु-शब्दयोगात् साकांक्षत्वसिद्धेः अधिकरणारम्भस्य व्याघातः। चतुर्थसामान्य-षष्ठ-विशेषनियमाभ्याम्। मध्व-श्रीकण्ठ-वल्लभ-भाष्येषु अधिकरणारम्भात् दोषः।

( ३ ) 'मौनवदितरेषामप्युपदेशात्" ३।४।४९ ( ४७४ ) इत्यत्र तस्य अध्याहारेऽपि अपि-शब्देन साकांक्षत्वविधानात् नास्य अधिकरणारम्भकत्वम्, चतुर्थसामान्य-षष्ठविशेषनियमाभ्याम्। श्रीकण्ठ-श्रीपति-भाष्ययोः अधिकरणस्य आरम्भात् दोषः। परसूत्रे षट्सु भाष्येषु अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः।

## पञ्चदशम् अनाविष्काराधिकरणम्।

अत्र "अनाविष्कुर्वन्नन्वयात्" ३।४।५० (४७५) इति सूत्रस्य "अनाविष्कुर्वन्" इति पदात् अस्य "अनाविष्काराधिकरणं" नाम। तत्र श्रीकण्ठ-वल्लभ-भिन्नेषु सर्वेषु भाष्येषु अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम्। श्रीकण्ठभाष्ये एतत् सूत्रं तदीयसूत्रद्वयात्मक-पञ्चदशाधिकरणस्य द्वितीयं सूत्रम्। वल्लभभाष्ये तु तदीयसूत्रचतुष्टयात्मकाष्टमाधिकरणस्य तृतीयं सूत्रम्। शङ्कर-भास्कर-भाष्ययोः पञ्चदशाधिकरणं, रामानुजभाष्ये त्रयोदशाधिकरणं, निम्बार्कभाष्ये एकादशाधिकरणम्, माध्वभाष्ये नवमाधिकरणं, श्रीपतिभाष्ये पञ्चदशाधिकरणं रचितम्।

अत्र "अनाविष्कुर्वन्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तमेव। चतुर्थसामान्यनियमात्। श्रीकण्ठ-वल्लभ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषो वाच्यः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगता एव।

## षोड़शम् ऐहिकाधिकरणम्।

अत्र "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" ३।४।५१ ( ४७६ ) इति सूत्रस्य "ऐहिकम्" इति पदात् अस्य "ऐहिकाधिकरणं" नाम। अत्र वल्लभ-भाष्यभिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम्। वल्लभभाष्ये तु एतत् सूत्रं तदीयसूत्रचतुष्टयात्मकाष्टमाधिकरणस्य चतुर्थं सूत्रम्। शंकर-भास्कर-भाष्ययोः एतेनैव षोड़शाधिकरणम्, रामानुजभाष्ये तथैव चतुर्दशाधिकरणम्, निम्बार्कभाष्ये तु तदीयसूत्रद्वयात्मकद्वादशाधिकरणस्य प्रथमं सूत्रम्, माध्वभाष्ये अनेनैव एकेन सूत्रेण दशमाधिकरणम्, श्रीकण्ठभाष्ये सूत्रद्वयात्मकषोड़शाधिकरणस्य प्रथमं सूत्रम्, श्रीपतिभाष्ये अनेन एकेनैव सूत्रेण षोड़शाधिकरणं रचितम्।

अत्र "ऐहिकम्" इति प्रथमान्तपदात् अधिकरणारम्भः संगच्छते, चतुर्थसामान्यनियमात्। "अपि"-पदेन प्रसंगभेदात् तत् न बाधकम्। षष्ठविशेषनियमात्। वल्लभभाष्ये अधिकरणस्य अनारम्भात् दोषः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः युक्ता।

## सप्तदशं मुक्तिफलानियमाधिकरणम्।

अत्र "एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः" ३।४।५२ ( ४७७ ) इति

सूत्रस्य "मुक्तिफलानियमः" इति पदात् अस्य "मुक्तिफलानियमाधिकरणं" नाम। तत्र निम्बार्क-श्रीकण्ठ-मित्रेषु सर्वेषु भाष्येषु सर्वत्र अनेन एकेनैव सूत्रेण एतदधिकरणं रचितम्। निम्बार्कभाष्ये तदीयसूत्रद्वयात्मक-द्वादशाधिकरणस्य द्वितीयं सूत्रम्, श्रीकण्ठभाष्ये तदीयसूत्रद्वयात्मक-षोडशाधिकरणस्य द्वितीयं सूत्रम्। तेन निम्बार्क-श्रीकण्ठ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

अत्र "मुक्तिफलानियमः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तमेव। चतुर्थ-सामान्यनियमात्। अत्रैव अध्यायपादसमाप्तेः अधिकरणसमाप्तिश्च।

## द्वादशपादोपसंहारः।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

( १ ) कति कीदृशाश्च नियमा अत्र संकलिताः

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः

( ३ ) काश्च श्रुतयः कैश्च सूत्रैरुपजीव्यत्वेन गृहीताः

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः समुचिता इति। एते चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्शनीयाः। तत्र प्रथमस्तावत्—

### ( १ ) "कति कीदृशाश्च नियमा अत्र सङ्कलिताः।"

अत्रापि द्वौ नियमौ संकलितौ, यथा—

२१शः नियमः—"पूर्वपक्षसूत्रे प्रथमान्तनामपदेन परमतनिर्देशे अधिकरणारम्भः करणीयः।" एतदर्थं "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ सूत्रं द्रष्टव्यम्।

२२शः नियमः—"परमतेन स्वसिद्धान्तकथने प्रथमान्तपदस्य साकांक्षत्वसिद्धेः अधिकरणं नारम्भणीयम्।" एतदर्थम् "आर्त्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते" ३।४।४५ सूत्रं द्रष्टव्यम् इति।

अधुना द्रष्टव्यम्—

### ( २ ) "कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः"।

तत्र ३।४।१ अधिकरणे माध्वभाष्ये "असार्वत्रिकी" ३।४।१० इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "नाविशेषात्" ३।४।१३ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव माध्वभाष्ये "स्तुतयेऽनुमतिर्वा" ३।४।१४ इति सूत्रे अधिकरणस्य रचनायां दोषः।

तत्रैव श्रीपतिभाष्ये "ऊर्ध्वरेतःसु च शब्दे हि" ३।४।१७ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।४।२ अधिकरणे रा नि म श्रीप व-भाष्येषु "परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।४।३ अधिकरणे मध्व-वल्लभभाष्ययोः "स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्" ३।४।२१ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।४ अधिकरणे मध्ववल्लभभाष्ययोः "पारिप्लवार्था इति चेन्न विशेषितत्वात्" ३।४।२३ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।४।५ अधिकरणे मध्व-वल्लभ-भाष्ययोः "अतएव चाग्नीन्धनाद्यनपेक्षा" ३।४।२५ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।६ अधिकरणे निम्बार्कमध्वभाष्ययोः "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" ३।४।२६ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

तत्रैव रा श्री श्रीप-भाष्येषु "शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्" ३।४।२७ इति सूत्रे अधिकरणस्य आरम्भात् दोषः।

३।४।७ अधिकरणे मध्व-वल्लभ-भाष्ययोः "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" ३।४।२८ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।८ अधिकरणे माध्वभाष्ये "विहितत्वाच्चाश्रमकर्म्मापि" ३।४।३२ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

तत्रैव माध्वभाष्ये "सर्वथापि त एवोभयलिंगात्" ३।४।३४ इति सूत्रे अधिकरणस्य आरम्भात् दोषः।

३।४।९ अधिकरणे मध्व-वल्लभ-भाष्ययोः "अन्तरा चापि तु तद्दृष्टेः" ३।४।३६ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।१० अधिकरणे माध्वभाष्ये "तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः" ३।४।४० इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।११ अधिकरणे रा नि श्री श्रीप-भाष्येषु "न चाधिकारिकमपि पतनानुमानात् तदयोगात्" ३।४।४१ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।१२ अधिकरणे रा नि म श्री श्रीप-भाष्येषु "बहिस्तूभयथापि स्मृतेराचाराच्च" ३।४।४३ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।४।१३ अधिकरणे वल्लभभाष्ये "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

३।४।१४ अधिकरणे माध्वभाष्ये "सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्" ३।४।४७ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

तत्रैव म श्री व-भाष्येषु "कृत्स्नभावात् तु गृहिणोपसंहारः" ३।४।४८ इति सूत्रे अधिकरणस्य आरम्भात् दोषः।

तत्रैव श्री श्रीपति-भाष्ययोः "मौनवदितरेषामप्युपदेशात्" ३।४।४९ इति सूत्रे अधिकरणस्य रचनायां दोषः।

३।४।१५ अधिकरणे श्रीकण्ठ-वल्लभ-भाष्ययोः "अनाविष्कुर्वन्नन्वयात्" ३।४।५० इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।१६ अधिकरणे वल्लभभाष्ये "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" ३।४।५१ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

३।४।१७ अधिकरणे निम्बार्कश्रीकण्ठभाष्ययोः "एवं मुक्तिफलानियमस्तदवस्थावधृतेस्त-दवस्थावधृतेः" ३।४।५२ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

एवं च अस्मिन् पादे भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | ११ दोषाः | ५ दोषाः |
| श्रीपति ,, | २ ,, | ३ ,, |
| रामानुज ,, | ३ ,, | १ दोषः |
| निम्बार्क ,, | ५ ,, | ० ,, |
| वल्लभ ,, | ९ ,, | १ ,, |
| श्रीकण्ठ ,, | ४ ,, | ३ दोषाः |

इति वक्तुं शक्यते। तथाच अस्मिन् पादे शङ्कर-भास्कर-भाष्ययोः दोषाभावः परिलक्ष्यते। इदानीं द्रष्टव्यम्—

**( ३ ) "काश्च श्रुतयः कैश्च सूत्रैरुपजीव्यत्वेन गृहीताः।"**

तत्र प्रथमाधिकरणे—

"पुरुषार्थोऽतः शब्दादिति बादरायणः" ३।४।१ इति सूत्रे "तरति शोकम् आत्मवित्" ( छाः ७।१।३ ) "ब्रह्म वेद ब्रह्मैव भवति" ( मुः ३।२।९ )

"शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः" ३।४।२ इति सूत्रे "तरति शोकम् आत्मवित्" ( छाः ७।१।३ )

"आचारदर्शनात्" ३।४।३ इति सूत्रे "जनको ह वैदेहो बहुदक्षिणेन यज्ञेन ईजे" ( बृः ३।१।१ )

"तच्छ्रुतेः" ३।४।४ इति सूत्रे "यदेव विद्यया करोति........तदेव वीर्य्यवत्तरं भवति" ( छाः १।१।१० )

"समन्वारम्भणात्" ३।४।५ इति सूत्रे "तं विद्याकर्म्मणी समन्वारभेते" ( बृः ४।४।२ )

"तद्वतो विधानात्" ३।४।६ इति सूत्रे "आचार्य्यकुलाद् वेदमधीत्य" (छाः ८।१५।१)

"नियमाच्च" ३।४।७ इति सूत्रे "कुर्वन्नेवेह कर्म्माणि जिजीविषेच्छतं समाः" (ईश: २)

"अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात्" ३।४।८ इति सूत्रे "यः सर्वज्ञः सर्ववित्" ( मु: १।१।९ )

"तुल्यं तु दर्शनम्" ३।४।९ इति सूत्रे "एतद् ह स्म वै तत् पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे" ( बृ: ३।५।१ )

"असार्वत्रिकी" ३।४।१० इति सूत्रे "यदेव विद्यया करोति" ( छा: १।१।१० )

"विभागः शतवत्" ३।४।११ इति सूत्रे "तं विद्याकर्म्मणी समन्वारमेते" (बृ: ४।४।२)

"अध्ययनमात्रवतः" ३।४।१२ इति सूत्रे "आचार्य्यकुलाद् वेदमधीत्य" ( छा: ८।१५।१ )

"नाविशेषात्" ३।४।१३ इति सूत्रे "कुर्वन्नेवेह कर्म्माणि" ( ईश: २ )

"कामकारेण चैके" ३।४।१५ इति सूत्रे "एतद् ह स्म वै तत् पूर्वे विद्वांसः प्रजां न कामयन्ते" ( बृ: ४।४।२२ )

"उपमर्द्द च" ३।४।१६ इति सूत्रे "यत्र तु अस्य सर्वम् आत्मा एव अभूत् तत् केन कं पश्येत्" ( बृ: २।४।१४ )

"ऊर्द्ध्वरेतःसु च शब्दे हि" ३।४।१७ इति सूत्रे "त्रयो धर्म्मस्कन्धाः" ( छा: २।२३।१ ) "ब्रह्म संस्थोऽमृतत्वमेति" ( छा: २।२३।१ )

द्वितीयाधिकरणे—

"परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ इति सूत्रे "त्रयो धर्म्मस्कन्धाः" ( छा: २।२३।१ ) "वीरहा वा एष देवानां योऽग्नीम् उद्वासयते" ( तै: १।१।१।१ )

"अनुष्ठेयं बादरायणः साम्यश्रुतेः" ३।४।१९ इति सूत्रे "त्रयो धर्म्मस्कन्धाः" ( छा: २।२३।१ )

"विधिर्वा धारणवत्" ३।४।२० इति सूत्रे "अधस्तात् समिधं धारयन् अनुद्रवेत् उपरि हि देवेभ्यो धारयति" (!)

तृतीयाधिकरणे—

"स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्" ३।४।२१ इति सूत्रे "इयमेव जुहुरादित्यः" (!) "स एष रसानां रसतमः परमः" ( छा: १।१।३ )

"भावशब्दाच्च" ३।४।२२ इति सूत्रे "उद्गीथमुपासीत" ( छा: १।१।१ ) "सामोपासीत" ( छा: २।२।१ )

चतुर्थाधिकरणे—

"पारिप्लवार्था इति चेन्न विशेषितत्वात्" ३।४।२३ इति सूत्रे "अथ ह याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः" (बृ: ४।५।१) "पारिप्लवम् आचक्षीत" "मनुर्वैवस्वतो राजा" (!)

"तथा चैकवाक्यतोपबन्धात्" ३।४।२४ इति सूत्रे "आत्मा वा अरे द्रष्टव्यः" ( बृ: ४।५।६ ) "वायुर्वाव संवर्गः" ( छा: ४।३।१ )

पञ्चमाधिकरणे—

"अतएव चाग्नीन्धनाद्यनपेक्षा" ३।४।२५ इति सूत्रे "तरति शोकम् आत्मवित्" ( छा: ७।१।३ )

षष्ठाधिकरणे—

"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" ३।४।२६ इति सूत्रे "विविदिषन्ति यज्ञेन दानेन" ( बृ: ४।४।२२ )

"शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ३।४।२७ इति सूत्रे "तस्मादेवंविच्छान्तो दान्त उपरतः" ( बृ: ४।४।२३ )

सप्तमाधिकरणे—

"सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" ३।४।२८ इति सूत्रे "न ह वा अस्यानन्नं जग्धं भवति" ( बृ: ६।१।१४ ) "प्राणमात्रस्य अन्नमिदं सर्वम्" (?)

"अपि च स्मर्य्यते" ३।४।३० इति सूत्रे "जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। "लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥" (?) "मद्यं नित्यं ब्राह्मणो वर्जयेत्" (?)

"शब्दश्चातोऽकामकारे" ३।४।३१ इति सूत्रे "तस्माद् ब्राह्मणः सुरां न पिबेत्" (?)

अष्टमाधिकरणे—

"विहितत्वाच्चाश्रमकर्म्मापि" ३।४।३२ इति सूत्रे "यावज्जीवमग्निहोत्रं जुहुयात्" (?)

"सहकारित्वेन च" ३।४।३३ इति सूत्रे "तमेतं वेदानुवचनेन ब्राह्मणाः" (बृ: ४।४।२२)

"सर्वथापि त एवोभयलिंगात्" ३।४।३४ इति सूत्रे "यज्ञेन विविदिषन्ति" (बृ: ४।४।२२) "अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः" ( गीः ६।१ )

"अनभिभवं च दर्शयति" ३।४।३५ इति सूत्रे "एष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दते" ( छा: ८।५।३ )

नवमाधिकरणे—

"विशेषानुग्रहश्च" ३।४।३८ इति सूत्रे "जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः" (?)

"अतस्त्वितरज्ज्यायो लिंगात् च" ३।४।३९ इति सूत्रे "तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च" ( बृ: ४।४।९ )

दशमाधिकरणे—

"तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः" ३।४।४० इति सूत्रे "अत्यन्तमात्मानम् आचार्यकुले अवसादयन्" ( छा: २।२३।१ ) "आरण्य-

मियात् इति एवं ततो न पुनरेयात्" (?) "ब्रह्मचर्यं समाप्य गृही भवेत्" ( जाबाल ४ ) "ब्रह्मचर्यादेव प्रव्रजेत्" ( जाबालः ४ )

एकादशाधिकरणे—

"न चाधिकारिकमपि पतनानुमानात् तदयोगात्" ३।४।४१ इति सूत्रे

"आरूढो नैष्ठिकं धर्म्मं यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ॥ (?)

जैमिनि-सूत्रञ्च १।३।७ संख्यकम्।

द्वादशाधिकरणे—

"बहिस्तूभयथापि स्मृतेराचाराच्च" ३।४।४३ इति सूत्रे

"प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" (?)

"आरूढपतितं विप्रं....स्पृष्ट्वा चान्द्रायणं चरेत्" (?)

त्रयोदशाधिकरणे—

"स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ इति सूत्रे "वर्षति हास्मै" ( छाः २।३।२ ) "आत्मने वा यजमानाय वा" ( बृः १।३।२८ )

"आर्त्विज्यमित्यौडुलोमिस्तस्यै हि परिक्रीयते" ३।४।४५ इति सूत्रे "तं ह बको दाल्भ्यो" ( छाः १।२।१३ )

"श्रुतेश्च" ३।४।४६ इति सूत्रे "यां वै कांचन यज्ञे ऋत्विज आशिषम् आशासते इति यजमानायैव तामाशिषमाशासते इति होवाच" (?) "अथ मुनिः" "अथ ब्राह्मणः" ( बृः ३।५।१ )

चतुर्दशाधिकरणे—

"सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ३।४।४७ इति सूत्रे "बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" ( बृः ३।५।१ ) "गार्हस्थ्यमाचार्य्य-कुलं मौनं वानप्रस्थम्" (?) "आत्मानं विदित्वा....भिक्षाचर्यं चरन्ति" ( बृः ३।५।१ )

"कृत्स्नभावात्तु गृहिणोपसंहारः" ३।४।४८ इति सूत्रे "अभिसमावृत्य कुटुम्बे" ( छाः ८।१५।१ )

"मौनवदितरेषामप्युपदेशात्" ३।४।४९ इति सूत्रे "तप एव द्वितीयः ब्रह्मचारी आचार्य्य-कुलवासी तृतीयः" ( छाः २।२३।१ )

पञ्चदशाधिकरणे—

"अनाविष्कुर्वन्नन्वयात्" ३।४।५० इति सूत्रे "तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य"

( बृः ३।५।१ ) "अव्यक्तलिंगा अव्यक्ताचारा" ( जाबाल ६ ), "यं न सन्तं न चासन्तं....स ब्राह्मणः" (!)

षोडशाधिकरणे—

"ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" ३।४।५१ इति सूत्रे "गर्भ एव एतच्छयानो वामदेव एवमुवाच" (ऐतः ४।५) "श्रवणयापि बहुभिर्यो न लभ्यः" (कठः २।७)

सप्तदशाधिकरणे—

"एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः" ३।४।५२ इति सूत्रे "ब्रह्म वेद ब्रह्मैव भवति" ( मुः ३।२।९ ) "अस्थूलमनणु" ( बृः ३।८।८ ), "स एष नेति" ( बृः ३।९।२६ ) "यत्र नान्यत् पश्यति" ( छाः ७।२४।१ ), "ब्रह्मैवेदममृतं पुरस्तात्" ( मुः २।२।११ ), "इदं सर्वं यदयमात्मा" ( बृः २।४।६ ), "स वा एष महानजः" ( बृः ४।४।२५ ) "यत्र त्वस्य सर्वमात्मैवाभूत्" ( बृः ४।५।१५ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्य-श्रुतिबलेन—

**( ४ ) "कीदृशी अस्य पादसंगतिर्भविष्यति ।"**

यद्यपि उदाहृतश्रुतयः सर्वाः शाङ्करभाष्यानुसारेण, तथापि अत्र मतभेदो न महान् वर्त्तते । तेन पादसंगतिरुपपाद्यप्रतिपाद्यमपि प्रायेण अभिन्नमेव । यस्तु प्रभेदः अत्र दृश्यते, स तु प्रायेण वाक्यभेदमात्रम् । तात्पर्य्यांशे प्रायेण ऐक्यमेव अत्र सर्वेषाम् इत्येव प्रतिभाति । तथा च प्रतिभाष्यम् प्रतिपाद्यरूपेण अत्र यथा निर्देशः क्रियते स इत्थम्—

शङ्करभाष्ये—निर्गुण-ब्रह्मविद्यायाः बहिरंगसाधनान्याश्रमधर्मयज्ञदानादीनि अन्तरंग-साधन-शमदमनिदिध्यासनादीनि निरूपितानि ।

भास्करभाष्ये—प्रायेण तथैव ।

रामानुजभाष्ये—साधनाङ्गनिरूपणम् ।

निम्बार्कभाष्ये—विद्यातः तदङ्गात् कर्म्मणो वा पुरुषार्थविचारः ।

माध्वभाष्ये—ज्ञानसामर्थ्यनिरूपणम् ।

श्रीकण्ठभाष्ये—विद्यासहकार्य्याश्रमधर्म्मनिरूपणम् ।

श्रीकरभाष्ये—ब्रह्मचर्य्याश्रमचतुष्टयनिरूपणम् ।

अत्रापि शांकरभाष्येण सह यो मतभेदः, स तु प्राधान्येनैव ब्रह्मणः सगुणत्व-निर्गुणत्व-विषयकः । एतस्य यद् रहस्यं तत्तु उक्तमेव । तथापि मध्वभाष्ये यज्ज्ञानसामर्थ्यनिरूपणम् अस्य पादस्य विषयत्वेन तत्तु चिन्तनीयं दृष्टिभेदरूपं, न तु विषयभेदात्मकम् इत्येव अस्माकं प्रतिभाति । उपासनाजन्यं ज्ञानं, ज्ञानफलं च दुःखध्वंसरूपा मुक्तिः इत्यादिकं स्वीकृत्य ज्ञान-

सामर्थ्यनिरूपणम् इति उक्तम् इति कल्पयितुं शक्यते। एवं च यावन्तः विषयाः अत्र पादे सन्निबद्धाः सर्वे साधनानुकूलत्वेन योजनीयाः। यत्र तु अधिकरण-विषय-रूपाः श्रुतयः, विभिन्नभाष्येषु पृथग्रूपेण प्रदर्शिताः, तत्र मीमांसा न सुकरा। व्याख्यातॄणां संस्कारस्तत्र भेदकः। अतः एतादृश-निर्णये वैयासक-सम्प्रदायानुगत-शिक्षैव नियामिका इति अनन्य-शरणानामस्माकं कल्पनम्। सापि कस्य कीदृशप्रमाणमूला इति एतद्ग्रन्थोपसंहार-प्रस्तावे प्रदर्शयिष्यामः। इदानीं एतत्तृतीयाध्यायोपसंहारः वक्तव्यः।

## इति द्वादशपादोपसंहारः।

---

## अथ तृतीयाध्यायसमालोचनम्।

एवं च एतदध्यायस्य चतुर्षु पादेषु यद् आलोचितं, तत् सर्वम् इदानीं समाहारेण चिन्तनीयम्। अभ्रान्तानवद्यश्रौतसिद्धान्तप्रदर्शनाय अध्यायद्वयेन श्रुतिसमन्वयं कृत्वा तथा श्रुति-युक्तिभ्याम् अविरोधं साधयित्वा तत्त्वं यत् निर्व्यूढं निरूपितं तल्लाभाय श्रुतिशरणानां सर्वेषाम् अभिलाषः स्वाभाविकः इत्ययं लोकव्यवहारः। लभ्यस्य लाभाय साधनमेव सर्वत्रैव अपेक्ष्यते। तेनात्र तृतीये अध्याये तत्साधनं तत्संक्रान्तश्रुतिमीमांसामुखेन प्रदर्श्यते। अतो नैसर्गिकोऽयं पन्थाः अनुसृतोऽत्र सूत्रकृद्भिः।

तत्र प्रथमे पादे जीवस्य इह-परलोकगमनागमनप्रकारादिकं वर्णितं, भोगस्य अनित्यत्व-बोधनद्वारा तत्र वैराग्यप्रदर्शनाय। द्वितीये तु पादे स्वप्नसुषुप्तिमूर्च्छाद्यवस्थावर्णनेन जीवस्य तदतिरिक्तस्वरूपत्वं व्यवस्थाप्य ब्रह्मणः अन्यस्य अवस्तुत्वरूपमिथ्यात्वप्रतिपादनेन जीव-ब्रह्मणोः अभेदानुसन्धानं साधनत्वेन सूचितम्। तृतीये च पादे तादृशसाधनस्य प्रतिबन्धकनिवृत्तये श्रुत्युपदिष्टविविधोपासनानां इतस्ततः विक्षिप्तानां यथायोगं क्वचित् एकत्रीकरणं क्वचित् पृथक्करणम् इत्यादिकं सर्वं निरूपितम्। चतुर्थे च पादे ज्ञानकर्म्मोपासनानां सम्बन्धवर्णनं, साधकानाम् आचारादिनिरूपणं, पथभ्रष्टानाम् उद्धारोपायादीनां कथनं दृश्यते। इत्थं च "अथातो ब्रह्मजिज्ञासा" इति उपक्रमरूपप्रथमसूत्रेण सूचितम् यद् ब्रह्मज्ञानं, तत्साधनाय श्रौतोपायादीनां तन्मूलकसाधनानां जपादिरूपाणां च यथा यथा उपयोगित्वं तत् सर्वं अत्र आलोचितमिति। इयमेवात्र एतदध्यायस्य सङ्गतिः बोध्या।

एवं च यदि एतदध्यायान्तर्गतपादचतुष्टयस्य समालोचनम् अत्र समाह्रियते तर्हि तत् इत्थमेव भवति-

| भाष्यकाराः | प्रथमपादे | | द्वितीयपादे | | तृतीयपादे | | चतुर्थपादे | | समष्टिः |
|---|---|---|---|---|---|---|---|---|---|
| | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | अधिकरणरचनायां दोषाः | अधिकरणारचनायां दोषाः | |
| शङ्करः | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| भास्करः | ० | ० | ० | १ | १ | ० | ० | ० | २ |
| रामानुजः | ० | ० | १ | १ | २ | ११ | १ | ३ | १९ |
| निम्बार्कः | ० | १ | ० | ३ | २ | ११ | ० | ५ | २२ |
| मध्वः | १३ | १ | १२ | ० | १२ | ७ | ५ | ११ | ६१ |
| श्रीकण्ठः | ० | ० | १ | ० | ५ | ५ | ३ | ४ | १८ |
| श्रीपतिः | ० | ० | २ | ० | ४ | १० | ३ | ३ | २२ |
| वल्लभः | ३ | २ | ६ | ३ | ४ | १५ | १ | ९ | ४३ |
| समष्टिः | १६ | ४ | २२ | ८ | ३० | ५९ | १३ | ३५ | १८७ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| एवं च | भास्करभाष्ये | २ | दोषौ | तत्र रचनायां | १ | अरचनायां | १ |
| | रामानुज ,, | १९ | दोषाः | ,, | ४ | ,, | १५ |
| | निम्बार्क ,, | २२ | ,, | ,, | २ | ,, | २० |
| | मध्व ,, | ६१ | ,, | ,, | ४२ | ,, | १९ |
| | श्रीकण्ठ ,, | १८ | ,, | ,, | ९ | ,, | ९ |
| | श्रीपति ,, | २२ | ,, | ,, | ९ | ,, | १३ |
| | वल्लभ ,, | ४३ | ,, | ,, | १४ | ,, | २९ |

एतेन केवलं शंकरभाष्ये दोषाभावः परिलक्ष्यते ।

अथ अधिकरणरचनाविषये ये च अतिरिक्तनियमाः अत्र अध्याये सङ्कलिताः ते अधुना समालोच्याः । तत्र पूर्वाध्यायद्वयपर्य्यन्तम् अष्टादश नियमाः आविष्कृताः, अत्र तु ततोऽपि चत्वारः अधिकाः दृश्यन्ते । तेन—

१९ शः नियमः—"तु-शब्दवर्जितप्रथमान्तपदात् स्यात्-शब्दसत्त्वं न अधिकरण-

रम्भकम्" । यथा—"पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ इत्यत्र नाधिकरणारम्भः ।

२०शः नियमः—"न हि" इति पदेन प्रथमान्तपदस्य साकांक्षत्वं विधीयते इति कल्पनीयम्, तेन तत्र न अधिकरणम् आरम्भणीयम्" यथा "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः" ३।३।५१ इत्यत्र न अधिकरणारम्भः ।

२१शः नियमः—"पूर्वपक्षसूत्रे प्रथमान्त-नाम-पदेन परमतनिर्देशे अधिकरणारम्भः करणीयः" । यथा "स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ इत्यत्र अधिकरणारम्भः कृतः ।

२२शः नियमः—"परमतेन स्वसिद्धान्तकथने प्रथमान्तपदस्य साकांक्षत्वसिद्धेः अधिकरणं नारम्भणीयम्" । यथा "आर्त्विज्यम् इत्यौडुलोमिस्तस्मै हि परिक्रीयते" ३।४।४५ इत्यत्र अधिकरणारम्भः न कृतः ।

एते एव नियमाः तृतीयाध्याये सङ्कलिताः । विस्तरस्तु ततत्तत्-स्थाने द्रष्टव्यः । अग्रेऽपि ग्रन्थोपसंहारे वक्ष्यते ।

---

इदानीं द्रष्टव्यं समग्राध्यायस्य कतमत् सूत्रे कस्य कीदृशः दोषः सञ्जातः ।

| | | | | | |
|---|---|---|---|---|---|
| त्र्यात्मकत्वात् तु भूयस्त्वात् | ३।१।२ | सूत्रे | मध्वस्य | अधिकरणरचनायां दोषः | १ |
| प्राणगतेश्च | ३।१।३ | " | " | " " | १ |
| अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् | ३।१।४ | " | " | " " | १ |
| प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः | ३।१।५ | " | " | " " | १ |
| अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः | ३।१।६ | " | " | " " | १ |
| भाक्तं वाऽनात्मवित्त्वात् तथा हि दर्शयति | ३।१।७ | " | " | " " | १ |
| चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः | ३।१।९ | " | " | " " | १ |
| अपि च सप्त | ३।१।१५ | " | " | " " | १ |
| तत्रापि च तद्व्यापारादविरोधः | ३।१।१६ | " | " | " " | १ |
| विद्याकर्म्मणोरिति तु प्रकृतत्वात् | ३।१।१७ | " | म व | " " | २ |
| न तृतीये तथोपलभ्यते | ३।१।१८ | " | मध्वस्य | " " | १ |
| तृतीयशब्दावरोधः संशोकजस्य | ३।१।२१ | " | वल्लभस्य | " " | १ |
| तत्साभाव्यापत्तिरुपपत्तेः | ३।१।२२ | " | वल्लभस्य | अरचनायां " | १ |
| नातिचिरेण विशेषात् | ३।१।२३ | " | म व | " " | २ |

समष्टिः १६

| | | | | | | |
|---|---|---|---|---|---|---|
| अन्याधिष्ठितेषु पूर्ववदभिलापात् | ३।१।२४ | सूत्रे | निम्बार्कस्य | अरचनायां | दोषः | १ |
| रेतःसिग्योगोऽथ | ३।१।२६ | ,, | म व | ,, | ,, | २ |
| योनेः शरीरम् | ३।१।२७ | ,, | मध्वस्य | रचनायां | ,, | १ |
| पराभिध्यानात् तु तिरोहितं ततो ह्यस्य<br>बन्धविपर्ययौ | ३।२।५ | ,, | मध्वस्य | ,, | ,, | १ |
| देहयोगाद् वा सोऽपि | ३।२।६ | ,, | ,, | ,, | ,, | १ |
| अतः प्रबोधोऽस्मात् | ३।२।८ | ,, | म व | ,, | ,, | २ |
| स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः | ३।२।९ | ,, | नि व | अरचनायां | ,, | २ |
| मुग्धेऽर्धसम्पत्तिः परिशेषात् | ३।२।१० | ,, | वल्लभस्य | ,, | ,, | १ |
| अरूपवदेव हि तत्प्रधानत्वात् | ३।२।१४ | ,, | म व | रचनायां | ,, | २ |
| अस्थूलमनणु....मरूपमव्ययम् | ३।२।१४क | ,, | भास्करस्य | अरचनायां | ,, | १ |
| अतएव चोपमा सूर्य्यकादिवत् | ३।२।२८ | ,, | मध्वस्य | रचनायां | ,, | १ |
| अम्बुवदग्रहणं तु न तथात्वम् | ३।२।१९ | ,, | म व | ,, | ,, | २ |
| वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसाम-<br>ञ्जस्यादेवम् | ३।२।२० | ,, | मध्वस्य | ,, | ,, | १ |
| प्रकृतैतावत्त्वं हि प्रतिषेधति ततो<br>ब्रवीति च भूयः | ३।२।२२ | ,, | रा नि व | अरचनायां | ,, | ३ |
| तदव्यक्तमाह हि | ३।२।२३ | ,, | म व | रचनायां | ,, | २ |
| प्रकाशादिवच्चावैशेष्यं प्रकाशश्च<br>कर्म्मण्यभ्यासात् | ३।२।२५ | ,, | वल्लभस्य | ,, | ,, | १ |
| उभयव्यपदेशात् त्वहिकुण्डलवत् | ३।२।२७ | ,, | रा म श्रीप | ,, | ,, | ३ |
| प्रकाशाश्रयवद् वा तेजस्त्वात् | ३।२।२८ | ,, | वल्लभस्य | ,, | ,, | १ |
| स्थानविशेषात् प्रकाशादिवत् | ३।२।३४ | ,, | मध्वस्य | ,, | ,, | १ |
| तथान्यप्रतिषेधात् | ३।२।३६ | ,, | म श्री श्रीप | ,, | ,, | ३ |
| अनेन सर्वगतत्वमायामशब्दादिभ्यः | ३।२।३७ | ,, | मध्वस्य | ,, | ,, | १ |
| फलमत उपपत्तेः | ३।२।३८ | ,, | निम्बार्कस्य | अरचनायां | ,, | १ |
| उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च | ३।३।५ | ,, | रा नि श्री व | ,, | ,, | ४ |
| अन्यथात्वं शब्दादिति चेन्नाविशेषात् | ३।३।६ | ,, | म व | ,, | ,, | २ |
| | | | | | समष्टिः | ४० |

| | | | | | | |
|---|---|---|---|---|---|---|
| व्याप्तेश्च समञ्जसम् | ३।३।९ | सूत्रे | रा नि श्रीप व | अरचनायां | [illegible] | [illegible] |
| सर्वाभेदादन्यत्रेमे | ३।३।१० | „ | वल्लभस्य | „ | „ | [illegible] |
| आनन्दादयः प्रधानस्य | ३।३।११ | „ | „ | „ | „ | [illegible] |
| प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे | ३।३।१२ | „ | म श्री | रचनायां | „ | [illegible] |
| इतरे त्वर्थसामान्यात् | ३।३।१३ | „ | मध्वस्य | „ | „ | [illegible] |
| आध्यानाय प्रयोजनाभावात् | ३।३।१४ | „ | रा नि श्रीप व | अरचनायां | „ | ४ |
| आत्मगृहीतिरितरवदुत्तरात् | ३।३।१६ | „ | रा नि श्री श्रीप | „ | „ | [illegible] |
| अन्वयादिति चेत् स्यादवधारणात् | ३।३।१७ | „ | मध्वस्य | रचनायां | „ | १ |
| समान एवं चाभेदात् | ३।३।१९ | „ | वल्लभस्य | अरचनायां | „ | १ |
| सम्बन्धादेवमन्यत्रापि | ३।३।२० | „ | म व | „ | „ | २ |
| न वा विशेषात् | ३।३।२१ | „ | मध्वस्य | रचनायां | „ | १ |
| दर्शयति च | ३।३।२२ | „ | श्रीकण्ठस्य | रचनायां | „ | १ |
| सम्भृतिद्युव्याप्त्यपि चातः | ३।३।२३ | „ | वल्लभस्य | अरचनायां | „ | १ |
| हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् | ३।३।२६ | „ | „ | „ | „ | १ |
| साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये | ३।३।२७ | „ | नि म | „ | „ | २ |
| छन्दत उभयाविरोधात् | ३।३।२८ | „ | मध्वस्य | रचनायां | „ | १ |
| गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः | ३।३।२९ | „ | रा नि म श्री श्रीप | अरचनायां | „ | ५ |
| उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् | ३।३।३० | „ | वल्लभस्य | रचनायां | „ | १ |
| अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् | ३।३।३१ | „ | नि श्रीप | अरचनायां | „ | २ |
| यावदधिकारमवस्थितिराधिकारिकाणाम् | ३।३।३२ | „ | रामानुजस्य | „ | „ | १ |
| अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् | ३।३।३३ | „ | मध्वस्य | „ | „ | १ |
| इयदामननात् | ३।३।३४ | „ | रा नि श्री श्रीप व | „ | „ | [illegible] |
| अन्तरा भूतग्रामवत् स्वात्मनः | ३।३।३५ | „ | मध्वस्य | „ | „ | १ |
| अन्यथा भेदानुपपत्तेरिति चेन्नोपदेशान्तरवत् | ३।३।३६ | „ | भा रा नि श्री श्रीप | रचनायां | „ | [illegible] |
| व्यतिहारो विंशिषन्ति हीतरवत् | ३।३।३७ | „ | रा नि श्री श्रीप व | अरचनायां | „ | [illegible] |

समष्टिः ५४

| | | | | | | |
|---|---|---|---|---|---|---|
| सैव हि सत्यादयः | ३।३।३८ | सूत्रे | रा श्रीप | अरचनायां | [illegible] | २ |
| कामादीतरत्र तत्र चायतनादिभ्यः | ३।३।३९ | ,, | वल्लभस्य | ,, | ,, | १ |
| आदरादलोपः | ३।३।४० | ,, | रा नि म श्रीप | ,, | ,, | ४ |
| उपस्थितेऽतस्तद्वचनात् | ३।३।४१ | ,, | श्रीकण्ठस्य | रचनायां | ,, | १ |
| पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् | ३।३।४५ | ,, | रा नि म श्री श्रीप | ,, | ,, | ५ |
| विद्यैव तु निर्धारणात् | ३।३।४७ | ,, | मध्वस्य | रचनायां | ,, | १ |
| श्रुत्यादिबलीयस्त्वाच्च न बाधः | ३।३।४९ | ,, | ,, | ,, | ,, | १ |
| अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् | ३।३।५० | ,, | ,, | ,, | ,, | १ |
| न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः | ३।३।५१ | ,, | ,, | ,, | ,, | १ |
| परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः | ३।३।५२ | ,, | ,, | ,, | ,, | १ |
| एक आत्मनः शरीरे भावात् | ३।३।५३ | ,, | वल्लभस्य | अरचनायां | ,, | १ |
| व्यतिरेकस्तद्भावाभावित्वात् न तूपलब्धिवत् | ३।३५४ | ,, | ,, | रचनायां | ,, | १ |
| अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् | ३।३।५५ | ,, | ,, | अरचनायां | ,, | १ |
| काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् | ३।३।६० | ,, | रा नि श्रीप | ,, | ,, | ३ |
| समाहारात् | ३।३।६३ | ,, | श्रीप व | रचनायां | ,, | २ |
| न वा तत्सहभावाश्रुतेः | ३।३।६५ | ,, | म श्रीप व | ,, | ,, | ३ |
| असार्वत्रिकी | ३।४।१० | ,, | मध्वस्य | ,, | ,, | १ |
| नाविशेषात् | ३।४।१३ | ,, | मध्वस्य | ,, | ,, | १ |
| स्तुतयेऽनुमतिर्वा | ३।४।१४ | ,, | मध्वस्य | ,, | ,, | १ |
| ऊर्ध्वरेतःसु च शब्दे हि | ३।४।१७ | ,, | श्रीप | ,, | ,, | १ |
| परामर्शं जैमिनिरचोदना चापवदति हि | ३।४।१८ | ,, | रा नि म श्रीप व | अरचनायां | ,, | ५ |
| स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् | ३।४।२१ | ,, | म व | ,, | ,, | २ |
| पारिप्लवार्था इति चेन्न विशेषितत्वात् | ३।४।२३ | ,, | म व | ,, | ,, | २ |
| अतएव चाग्नीन्धनाद्यनपेक्षा | ३।४।२५ | ,, | म व | ,, | ,, | २ |
| सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् | ३।४।२६ | ,, | नि म | ,, | ,, | २ |
| | | | | | समष्टिः | ४६ |

| | | | | |
|---|---|---|---|---|
| [illegible] तथापि तु बहिश्चो[illegible] दूतया तेषामवस्थानुष्ठेकत्वात् | ३।४।२७ सूत्रे रा श्री श्रीप | रचनायां | दोषः | १ |
| सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् | ३।४।२८ „ म व | अरचनायां | „ | १ |
| [illegible]त्वाश्रमकर्म्मापि | ३।४।३२ „ मध्वस्य | „ | „ | १ |
| सर्वथापि च त एवोभयलिंगात् | ३।४।३४ „ मध्वस्य | रचनायां | „ | १ |
| अन्तरा चापि तु तद्दृष्टेः | ३।४।३६ „ म व | अरचनायां | „ | २ |
| तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमा-तद्रूपाभावेभ्यः | ३।४।४० „ मध्वस्य | „ | „ | १ |
| न चाधिकारिकमपि पतनानुमानात् तदयोगात् | ३।४।४१ „ रा नि श्री श्रीप | „ | „ | ४ |
| बहिस्तूभयथापि स्मृतेराचाराच्च | ३।४।४३ „ रा नि म श्री श्रीप | „ | „ | ५ |
| स्वामिनः फलश्रुतेरितिरात्रेयः | ३।४।४४ „ वल्लभस्य | „ | „ | १ |
| सहकार्य्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् | ३।४।४७ „ मध्वस्य | „ | „ | १ |
| कृत्स्नाभावात् तु गृहिणोपसंहारः | ३।४।४८ „ म श्री व | रचनायां | „ | ३ |
| मौनवदितरेषामप्युपदेशात् | ३।४।४९ „ श्री श्रीप | „ | „ | २ |
| अनाविष्कुर्वन्नन्वयात् | ३।४।५० „ श्री व | अरचनायां | „ | २ |
| ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् | ३।४।५१ „ वल्लभस्य | „ | „ | १ |
| एवं मुक्तिफलानियमस्तदवस्थावधृते-स्तदवस्थावधृतेः | ३।४।५२ „ नि श्री | „ | „ | २ |

समष्टिः (१६+४०+५४+४६+३१) =१८७

## एवं च येषु सूत्रेषु प्रत्येकं भाष्यस्य ये दोषाः ते तावत्—

माध्वभाष्यस्य दोषाश्च—

| | | | |
|---|---|---|---|
| त्र्यात्मकत्वात् तु भूयस्त्वात् | ३।१।२ | अश्रुतत्वादिति चेन्नेष्टादिकारिणां | |
| प्राणगतेश्च | ३।१।३ | प्रतीतेः | ३।१।६ |
| अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् | ३।१।४ | भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति | ३।१।७ |
| प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः | ३।१।५ | चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः | ३।१।९ |

सर्वान्नानुमतिश्च प्राणात्यये तद्-
दर्शनात् ३।४।२८
विहितत्वाच्चाश्रमकर्म्मापि ३।४।३२
सर्वथापि त एवोभयलिंगात् ३।४।३४
अन्तरा चापि तु तद्दृष्टेः ३।४।३६
तद्भूतस्य तु नातद्भावो जैमिनेरपि
नियमातद्रूपाभावेभ्यः ३।४।४०
वहिस्तूभयथापि स्मृतेराचाराच्च ३।४।४३
सहकार्य्यन्तरविधिः पक्षेण
तृतीयं तद्वतो विध्यादिवत् ३।४।४७
कृत्स्नभावात् तु गृहिणोपसंहारः ३।४।४८
वल्लभभाष्यस्य दोषाय—
विद्याकर्म्मणोरिति तु प्रकृतत्वात् ३।१।१७
तृतीयशब्दावरोधः संशोकजस्य ३।१।२१
तत्साभाव्यापत्तिरूपपत्तेः ३।१।२२
नातिचिरेण विशेषात् ३।१।२३
रेतःसिग्योगोऽथ ३।१।२६
अतः प्रबोधोऽस्मात् ३।२।८
स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः ३।२।९
मुग्धेऽर्धसम्पत्तिः परिशेषात् ३।२।१०
अरूपवदेव हि तत् प्रधानत्वात् ३।२।१४
अम्बुवद्ग्रहणात् तु न तथात्वम् ३।२।१९
प्रकृतैतावत्त्वं हि प्रतिषेधति ततो
ब्रवीति च भूयः ३।२।२२
तदव्यक्तमाह हि ३।२।२३
प्रकाशादिवच्चावैशेष्यं प्रकाशश्च
कर्म्मण्यभ्यासात् ३।२।२५
प्रकाशाश्रयवद् वा तेजस्त्वात् ३।२।२८
उपसंहारोऽर्थाभेदात
विधिशेषवत् समाने च ३।३।५
अन्यथात्वं शब्दादिति चेन्नाविशेषात् ३।३।६
व्यासेश्च समञ्जसम् ३।३।९
सर्वाभेदादन्यत्रेमे ३।३।१०
आनन्दादयः प्रधानस्य ३।३।११
आध्यानाय प्रयोजनाभावात् ३।३।१४
समान एवं चाभेदात् ३।३।१९
सम्बन्धादेवमन्यत्रापि ३।३।२०
सम्भृतिद्युव्याप्त्यपि चातः ३।३।२३
हानो तूपायनशब्दशेषत्वात् कुशा-
च्छन्दवत् स्तुत्युपगानवत् तदुक्तम् ३।३।२६
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३।३।३०
इयदामननात् ३।३।३४
व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७
कामादीतरत्र तत्र चायतनादिभ्यः ३।३।३९
एक आत्मनः शरीरे भावात् ३।३।५३
व्यतिरेकस्तद्भावाभावित्वान्न
तूपलब्धिवत ३।३।५४
अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ३।३।५५
समाहारात् ३।३।६३
न वा तत्सहभावाश्रुतेः ३।३।६५
परामर्शं जैमिनिरचोदना चापवदति हि ३।४।१८
स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ३।४।२१
पारिप्लवार्था इति चेन्न विशेषितत्वात् ३।४।२३
अतएव चाग्नीन्धनाद्यनपेक्षा ३।४।२५
सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ३।४।२८
अन्तरा चापि तु तद्दृष्टेः ३।४।३६
स्वामिनः फलश्रुतेरित्यात्रेयः ३।४।४४,
कृत्स्नभावात् तु गृहिणोपसंहारः ३।४।४८.

अनाविष्कुर्वन्नन्वयात् ३।४।५०
ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ३।४।५१

निम्बार्कभाष्यस्य दोषाय—

अन्याधिष्ठितेषु पूर्ववदभिलापात् ३।१।२४
स एव तु कर्म्मानुस्मृतिशब्दविधिभ्यः ३।२।९
प्रकृतितैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३।२।२२
फलमत उपपत्तेः ३।२।३८
उपसंहारोऽर्थाभेदाद् विधिशेषवत समाने च ३।३।५
व्याप्तेश्च समञ्जसम् ३।३।९
आध्यानाय प्रयोजनाभावात् ३।३।१४
आत्मगृहीतिरितरवदुत्तरात् ३।३।१६
साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये ३।३।२७
गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ३।३।२९
अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ३।३।३१
इयदामननात् ३।४।३४
अन्यथा भेदानुपपत्तेरिति चेन्नोपदेशान्तरवत् ३।३।३६
व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७
आदरादलोपः ३।३।४०
पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ३।३।४५
काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् ३।३।६०
परामर्शं जैमिनिरचोदना चापवदति हि ३।४।१८
सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ३।४।२६
न चाधिकारिकमपि पतनानुमानात् तदयोगात् ३।४।४१
बहिस्तूभयथापि स्मृतेराचाराच्च ३।४।४३
एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ३।४।५२

भास्करभाष्यस्य दोषाय—

अस्थूलमनणु:....अरूपमव्ययम् ३।२।१४ क
अन्यथा भेदानुपपत्तेरिति चेन्नोपदेशान्तरवत् ३।३।३६

रामानुजभाष्यस्य दोषाय—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३।२।२२
उभयव्यपदेशात् त्वहिकुण्डलवत् ३।२।२७
उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च ३।३।५
व्याप्तेश्च समञ्जसम् ३।३।९
आध्यानाय प्रयोजनाभावात् ३।३।१४
आत्मगृहीतिरितरवदुत्तरात् ३।३।१६
गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ३।३।२९
यावदधिकारमवस्थितिराधिकारिकाणाम् ३।३।३२
इयदामननात् ३।३।३४
अन्यथा भेदानुपपत्तेरिति चेन्नोपदेशान्तरवत् ३।३।३६
व्यतिहारो विशिंषन्ति हीतरवत् ३।३।३७
सैव हि सत्यादयः ३।३।३८
आदरादलोपः ३।३।४०
पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ३।३।४५
काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् ३।३।६०

एवं च अधिकरणरचनानियमानुसारेण विभिन्नभाष्याणां पर्य्यालोचने कृते शङ्कर-भाष्यस्यैव निर्दोषत्वात् व्याससमतसन्निकृष्टत्वम् उपलभ्यते ।

अत्र इदं बोध्यम् । ब्रह्मज्ञानसाधनत्वेन कर्म्मोपासना चैतत् उभयमपि अत्र उक्तम्, तयोः कर्म्मोपासनयोः ज्ञानेन सह स्वरूपसमुच्चयः उत क्रमसमुच्चयः इति नात्र स्पष्टम् उक्तं च । अतः मतभेदबीजम् अत्र अस्त्येव इति विज्ञेयम् । तथैव यस्य श्रवणमननादि-साधनं ब्रह्मज्ञानाय, तद् ब्रह्म किं सगुणं निर्गुणं वेति, तदपि अत्र विवादास्पदीभूतम् एव दृश्यते । तेन विभिन्नभाष्येषु अत्र मतभेदो दृश्यते एव । साधनार्थम् उपदिष्टं तत्त्वं, न तत्त्वनिर्णयाय उपदिष्टेन तत्त्वेन सह समबलमिति अपि अत्र चिन्तनीयम् । एतदर्थं ३।२।५-७ अधि-करणानि द्रष्टव्यानि । अत्र विभिन्नभाष्याणि न ऐकमत्यं भजन्ते । तथापि यदि शास्त्रसंगतिरत्र चिन्त्यते तदा मीमांसा न सुदूरपराहता । निर्गुणब्रह्मज्ञानं एतच्छास्त्रस्य प्रतिपाद्यम् इति प्रागेव दृष्टम्, तेन तेषु अधिकरणेषु ब्रह्मणः निर्गुणत्वप्रतिषेधः तथा सगुणत्वव्यवस्थापनं शास्त्रसंगतेः नानुकूलम् इत्येव कल्पनीयम् ।

इति चिद्घनानन्द पुरी विरचिते व्याससम्मतब्रह्मसूत्रभाष्यनिर्णये
तृतीयाध्यायः ।

---

## अथ फलनामचतुर्थाध्यायस्य प्रथमे पादे

### प्रथमम् आवृत्त्यधिकरणम् ।

अत्र "आवृत्तिरसकृदुपदेशात्" ४।१।१ (४७८) इति सूत्रस्य "आवृत्ति"-पदात् अस्य "आवृत्त्यधिकरणं" नाम । तत्र सर्वैरेव भाष्यकारैः अत्र सूत्रद्वयं गृहीतम् । तच्च सूत्रद्वयम्—

१ । आवृत्तिरसकृदुपदेशात् ४।१।१ ( ४७८ )
२ । लिंगाच्च ४।१।२ ( ४७९ )

अत्र ( १ ) "आवृत्तिरसकृदुपदेशात्" ४।१।१ ( ४७८ ) इत्यत्र "आवृत्तिः"-इति प्रथमान्तपदात् तथा अत्र अध्यायस्य आरम्भात् अस्य अधिकरणारम्भकत्वं युक्तमेव । ४र्थ सामान्य-नियमात्, तथा २य विशेषनियमात् ।

( २ ) "लिंगाच्च" ४।१।२ ( ४७९ ) इत्यत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम्, च-कारस्य हेतुबोधकत्वाच्च । ४र्थ सामान्यनियमात् तथा ६ष्ठ विशेष-नियमात् । परसूत्रे सर्वसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च संगच्छते ।

### द्वितीयम् आत्मत्वोपासनाधिकरणम् ।

अत्र "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४।१।३ ( ४८० ) इत्यत्र "आत्मा"

इति पदात् "आत्मत्वोपासनाधिकरणं" नाम। तात्पर्य्यबलेन उपासना-पदस्य ग्रहणम्। वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु अत्र एतत् एकमेव सूत्रं गृहीतम्। वल्लभभाष्ये तु सूत्रत्रयं गृहीतम्।

अत्र आत्मा-इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। तु-शब्दः च-शब्दश्च विषयान्तरज्ञापकौ। ४र्थ सामान्यनियमात्, १२श, १८श विशेषनियमाभ्याम्।

## तृतीयं प्रतीकाधिकरणम्।

अत्र "न प्रतीके न हि सः ४।१।४ ( ४८१ ) इति सूत्रस्य "प्रतीके" इति पदात् अस्य "प्रतीकाधिकरणं" नाम। अत्र श-भा-म-श्री-भाष्येषु एकं सूत्रम्, रा-नि-श्रीप-भाष्येषु सूत्र-द्वयं गृहीतम्। वल्लभभाष्ये तु सूत्रद्वयात्मक-तदीयद्वितीयाधिकरणस्य इदं द्वितीयं सूत्रम्। तेन अत्र अधिकरणस्य अनारम्भात् तस्य दोषः वक्तव्यः।

अत्र "सः" इति प्रथमान्तपदेन अस्य अधिकरणारम्भकत्वं संगतमेव। हि-शब्दस्य हेतुवोधकत्वाच्च। ४र्थ सामान्यनियमात, तथा ६ष्ठ विशेषनियमात। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः समुचितैव।

## चतुर्थं ब्रह्मदृष्ट्यधिकरणम्।

अत्र "ब्रह्मदृष्टिरुत्कर्षात्" ४।१।५ ( ४८२ ) इति सूत्रस्य "ब्रह्मदृष्टिः" इति पदात् अस्य "ब्रह्मदृष्ट्यधिकरणं" नाम। तत्र श-भा-म-श्री-भाष्येषु अनेन एकेन सूत्रेण एतदधिकरणं रचितम्। रा-नि-श्रीप-भाष्येषु सूत्रद्वयात्मक-तदीयतृतीयाधिकरणस्य इदं द्वितीयं सूत्रम्, वल्लभ-भाष्ये तु सूत्रत्रयात्मक-तदीयद्वितीयाधिकरणस्य तृतीयं सूत्रम्।

अत्र "ब्रह्मदृष्टिः" इति प्रथमान्तपदात् अत्र अधिकरणारम्भः युक्त एव। ४र्थ सामान्य-नियमात्। रा-नि-श्रीप-व-भाष्येषु अधिकरणस्य अनारम्भात् दोषः। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च संगतैव।

## पञ्चमम् आदित्यादिमत्यधिकरणम्।

अत्र "आदित्यादिमतयश्चाङ्ग उपपत्तेः" ४।१।६( ४८३ ) इति सूत्रस्य "आदित्या-दिमतयः" इति पदात् अस्य "आदित्यादिमत्यधिकरणं" नाम। तत्र वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु अनेन एकेन सूत्रेण एतदधिकरणं रचितम्। वल्लभभाष्ये तु सूत्रपञ्चकात्मक-तदीयतृतीया-धिकरणस्य प्रथमं सूत्रम्।

अत्र "आदित्यादिमतयः" तथा "अंगः" इति प्रथमान्तपदद्वयेन अस्य अधिकरणा-रम्भकत्वं युक्तमेव। ४र्थ सामान्यनियमात्, च-शब्दस्य विधेयान्तरबोधकत्वात् न बाधकत्वम् १२श विशेषनियमाच्च।

## षष्ठम् आसीनाधिकरणम् ।

अत्र "आसीनः सम्भवात्" ४।१।७ ( ४८४ ) इति सूत्रस्य "आसीनः" इति पदात् "आसीनाधिकरणं" नाम। तत्र वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु अधिकरणारम्भः कृतः। शङ्कर-भास्कर-श्रीकण्ठ-भाष्येषु एतत् सूत्रं सूत्रचतुष्टयात्मक-तदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्। रामानुज-भाष्ये तु एतत् सूत्रं सूत्रपञ्चकात्मक-तदीयपञ्चमाधिकरणस्य प्रथमं सूत्रम्। निम्बार्क-श्रीपति-भाष्ययोः सूत्र-षट्कात्मक-तदीयपञ्चमाधिकरणस्य प्रथमं सूत्रम्। माध्वभाष्ये सूत्रपञ्चकात्मकतदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्। वल्लभभाष्ये तु तदीयतृतीयाधिकरणस्य पञ्चसु सूत्रेषु एतद्धि द्वितीयं सूत्रम्। तानि चत्वारि सूत्राणि—

| | | | |
|---|---|---|---|
| १। आसीनः सम्भवात् | ४।१।७ (४८४) | ३। अचलत्वं चापेक्ष्य | ४।१।९ (४८६) |
| २। ध्यानाच्च | ४।१।८ (४८५) | ४। स्मरन्ति च | ४।१।१० (४८७) |

अत्र (१) आसीनः सम्भवात् ४।१।७ (४७८) इत्यत्र "आसीनः" इति प्रथमान्तपदस्य सत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तमेव। ४र्थ सामान्यनियमात्। वल्लभभाष्ये अधिकरणस्य अरचनायां दोषः।

( २ ) ध्यानाच्च ४।१।८ (४८५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भ-कत्वम्। ४र्थ सामान्यनियमात्, च-कारस्य विधेयान्तरज्ञापकत्वात्, ६ष्ठ विशेषनियमाच्च।

( ३ ) अचलत्वं चापेक्ष्य ४।१।९ (४८६) इत्यत्र अचलत्वम् इति द्वितीयान्तपदात् च-कारयोगात् च नास्य अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात् ६ष्ठ विशेषनियमाच्च।

( ४ ) स्मरन्ति च ४।१।१० (४८७) इत्यत्रापि प्रथमान्तपदाभावात् तथैव। ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च।

परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगतैव।

## सप्तमम् एकाग्रताधिकरणम्

अत्र "यत्रैकाग्रता तत्राविशेषात्" ४।१।११ (४८८) इति सूत्रस्य "एकाग्रता"-पदात् अस्य "एकाग्रताधिकरणं" नाम। तत्र श-भा-श्री-व-भाष्येषु एतेन एकेनैव सूत्रेण एतदधिकरणं रचितम्। श-भा-श्री-भाष्येषु सप्तमम् अधिकरणम्। वल्लभभाष्ये तु चतुर्थाधिकरणम्। रामानुज-भाष्ये सूत्रपञ्चकात्मक-तदीयपञ्चमाधिकरणस्य पञ्चमं सूत्रम्। निम्बार्कभाष्ये तथा श्रीपतिभाष्ये सूत्रषट्कात्मक-तदीयपञ्चमाधिकरणस्य पञ्चमं सूत्रम्। माध्वभाष्ये सूत्र-पञ्चकात्मक-तदीय-षष्ठाधिकरणस्य पञ्चमं सूत्रम्। तेन रा-नि-म-श्रीप-भाष्येषु अधिकरणं न आरब्धम्।

अत्र "एकाग्रता" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामा-न्यनियमात्। रा-नि-म-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषेण भवितव्यम्। परसूत्रे अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## अष्टमम् आप्रायणाधिकरणम् ।

अत्र "आप्रायणात् तत्रापि हि दृष्टम्" ४।१।१२ (४८९) इति सूत्रस्य "आप्रायणात्" इति पदात् अस्य "आप्रायणाधिकरणं" नाम । तत्र श-भा-रा-म-श्रीव-भाष्येषु अनेन एकेन सूत्रेण एतदधिकरणं रचितम् । नि-श्रीप-भाष्ययोः अधिकरणं न रचितम् । तत्र शंकर-भास्कर-श्रीकण्ठ-भाष्येषु अष्टमम् अधिकरणम् । रामानुजभाष्ये षष्ठम्, माध्वभाष्ये सप्तमम्, वल्लभभाष्ये पञ्चमम् अधिकरणम् । निम्बार्कभाष्ये तदीयपञ्चमाधिकरणस्य षट्सु सूत्रेषु अन्तिमं सूत्रम्, तथैव श्रीपतिभाष्ये बोद्धव्यम् ।

अत्र "दृष्टम्" इति प्रथमान्त-पदात् अस्य अधिकरणारम्भकत्वं युक्तम् । अपि-पदस्य विषयान्तरीय-हेतुसमुच्चायकत्वात न बाधकत्वम् । ४र्थ सामान्यनियमात्, ६ष्ठ विशेष-नियमाच्च । निम्बार्क-श्रीपतिभाष्ययोः अधिकरणस्य अनारम्भात् दोषो वाच्यः । परसूत्रे अधि-करणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिरिति ।

## नवम तदधिगमाधिकरणम् ।

अत्र "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" ४।१।१३ (४९०) इति सूत्रस्य "तदधिगमः" इति पदात् अस्य "तदधिगमाधिकरणं" नाम । अत्र सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । तत्र श-भा-रा-श्री-श्रीप-भाष्येषु एतेन एकेन सूत्रेण, निम्बार्कभाष्ये एतदारभ्य सूत्र-त्रयेण, माध्वभाष्ये तथा सूत्रसप्तकेन, वल्लभभाष्ये सूत्रचतुष्टयेन इति । पुनस्तत्र श-भा-श्री-भाष्येषु नवमम् अधिकरणम् । रामानुजभाष्ये सप्तमम्, निम्बार्क-श्रीपति-वल्लभ-भाष्येषु षष्ठम्, माध्वभाष्ये अष्टमम् अधिकरणम् ।

अत्र "अश्लेषविनाशौ" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम् एव । ४र्थ सामान्यनियमात् । परसूत्रे अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## दशमम् इतरासंश्लेषाधिकरणम् ।

अत्र "इतरस्याप्येवमसंश्लेषः पाते तु" ४।१।१४ (४९१) इति सूत्रस्य "इतरस्य" "असंश्लेषः" इति पदद्वयात् अस्य "इतरासंश्लेषाधिकरणं" नाम । तत्र श-भा-रा-श्री-श्रीप-भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । तत्रापि श-भा-श्री-भाष्येषु दशमम् अधि-करणम्, रामानुजभाष्ये अष्टमम्, श्रीपतिभाष्ये तु सप्तमाधिकरणम् । नि-म-व-भाष्येषु अधिकरणं नारब्धम् । तत्र निम्बार्कभाष्ये सूत्रत्रयात्मक-तदीयषष्ठाधिकरणस्य द्वितीयं सूत्रम् । माध्वभाष्ये सूत्रसप्तात्मक-तदीयाष्टमाधिकरणस्य द्वितीयं सूत्रम्, वल्लभभाष्ये सूत्रचतुष्टयात्मक-तदीयषष्ठाधि-करणस्य द्वितीयं सूत्रम् इति विशेषः ।

अत्र "असंश्लेष" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तमेव । ४र्थ सामान्यनियमात् । अपि-एवं-तु-पदानां प्रसंगान्तरत्वबोधकत्वात् । १२श विशेषनियमात्

१८श विशेषनियमाच्च न बाधकत्वम्। तेन नि-म-व-भाष्येषु अधिकरणस्य अनारम्भात् दोषः। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च संगतैव।

## एकादशम् अनारब्धाधिकरणम्।

अत्र "अनारब्धकार्य्ये एव तु पूर्वे तदवधेः" ४।१।१५ (४९२) इति सूत्रस्य "अनारब्ध"-पदात् अस्य "अनारब्धाधिकरणं" नाम। तत्र श-भा-रा-श्री-श्रीप-भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम्। नि-म-व-भाष्येषु अधिकरणं न आरब्धम्। तत्र श-भा-श्री-भाष्येषु एकादशम् अधिकरणम्, रामानुजभाष्ये नवमम्, श्रीपतिभाष्ये अष्टमम् अधिकरणम्। निम्बार्क-भाष्ये सूत्रत्रयात्मक-तदीयषष्ठाधिकरणस्य तृतीयसूत्रम्। माध्वभाष्ये सूत्रसप्तकात्मक-तदीयाष्टमाधि-करणस्य तृतीयं सूत्रम्, वल्लभभाष्ये तु सूत्रचतुष्टयात्मकतदीयषष्ठाधिकरणस्य तृतीयं सूत्रम्। अत्र "अनारब्ध-कार्य्ये" इति प्रथमान्तपदात् ४र्थ सामान्यनियमात्। अत्र अधिकरणारम्भः युज्यते एव। "तु"-शब्दः अनुक्तपूर्वपक्षे तन्निवृत्त्यर्थम्, अतः न बाधकम्, १८श विशेष-नियमात्। नि-म-व-भाष्येषु अधिकरणस्य अरचनायां दोषः वक्तव्यः। परसूत्रे अधिकसंगत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च समुचितैव।

## द्वादशम् अग्निहोत्राद्यधिकरणम्।

अत्र "अग्निहोत्रादि तु कार्य्यायैव तद्दर्शनात्" ४।१।१६ (४९३) इति सूत्रस्य "अग्नि-होत्रादि"-पदात् अस्य "अग्निहोत्राद्यधिकरणं" नाम। तत्र श-भा-रा-नि-श्री-श्रीप-भाष्येषु अधिकरणम् आरब्धम्, म-व-भाष्ययोः न आरब्धम्। तत्र श-भा-भाष्ययोः सूत्रद्वयं गृहीतम्, रामानुज-श्रीकण्ठ-श्रीपति-भाष्येषु सूत्रत्रयं, निम्बार्कभाष्ये एतदेव एकं सूत्रं गृहीतम्। माध्व-भाष्ये सूत्रसप्तकात्मक-तदीयाष्टमाधिकरणस्य चतुर्थं सूत्रम्। वल्लभ-भाष्ये तु सूत्रचतुष्टयात्मक-तदीयषष्ठाधिकरणस्य चतुर्थं सूत्रम्। तच्च सूत्रद्वयम्—

१। "अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात्" ४।१।१६ (४९३)

२। "अतोऽन्यापि ह्येकेषामुभयोः" ४।१।१७ (४९४)

तत्र ( १ )'अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात्' ४।१।१६७ (४९३) इत्यत्र 'अग्निहोत्रादि' इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामान्यनियमात्। 'तु' शब्दः न बाधकम्; अनुक्तपूर्वपक्षव्याकर्त्तकत्वात् तस्य, १८श विशेषनियमात्। म-व-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

( २ ) 'अतोऽन्यापि ह्येकेषामुभयोः' ४।१।१७ (४९४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं संगतम्। ४र्थ सामान्यनियमात्; अपि-हि-अतः-पदानां साकांक्षत्वात्, ६ष्ठ विशेषनियमात् ७म विशेषनियमात् च, नि-व-भाष्ययोः अधिकरणस्य रचनायां दोषः। परसूत्रे अधिकरणारम्भात् अत्रैव समाप्तिः कल्पनीया।

## त्रयोदशं—विद्याज्ञानसाधनत्वाधिकरणम्

अत्र "यदेव विद्ययेति हि" ४।१।१८(४९५) इति सूत्रस्य 'विद्यया' इति पदात् तथा तात्पर्य्याच्च अस्य "विद्याज्ञानसाधनत्वाधिकरणं" नाम। तत्र शंकर-निम्बार्क-भाष्ययोः एतेन एकेन सूत्रेण अधिकरणं रचितम्। भास्करभाष्ये एतत् सूत्रं न पठितम्। रा-म-श्री-श्रीप-व-भाष्येषु अधिकरणं न आरब्धम्। शंकर-भाष्ये एतत् त्रयोदशाधिकरणं, निम्बार्कभाष्ये तु नवमाधिकरणम्। रामानुजभाष्ये तदीयदशमाधिकरणस्य त्रिषु सूत्रेषु तृतीयं सूत्रम्, माध्वभाष्ये तदीयाष्टमाधिकरणस्य सप्तसु सूत्रेषु षष्ठं सूत्रम्, श्रीकण्ठभाष्ये तदीय-द्वादशाधिकरणस्य त्रिषु सूत्रेषु तृतीयं सूत्रम्, श्रीप-भाष्ये तदीय-नवमाधिकरणस्य त्रिषु सूत्रेषु तृतीयं सूत्रम्, वल्लभभाष्ये तु तदीय-सप्तमाधिकरणस्य त्रिषु सूत्रेषु द्वितीयं सूत्रम्।

अत्र 'यत्' इति प्रथमान्तपदात् अथवा इति-शब्द-लक्षितं यत् 'यदेव' इत्यादि श्रुतिवाक्यं तत्र यत्पदस्य प्रथमान्तत्वात् ४र्थ सामान्यनियमात्, ११श विशेषनियमात्, ततश्च हि-शब्दात्, ६ष्ठ विशेषनियमाच्च तस्य अधिकरणारम्भकत्वं संगच्छते। एवं च रा-म-श्री-श्रीप-व-इति पञ्चसु भाष्येषु अधिकरणस्य अनारम्भादपि अस्य नियमसमर्थनयोग्यत्वात् न बाधाशङ्का, अतः तेषामेव दोषः वाच्यः, अन्यथा शंकरादीनां चतुर्णां भाष्याणां दोषः। परसूत्रे अधिकरणस्य आरम्भदर्शनात् अत्रैव अधिकरणसमाप्तिः कल्पयितुं शक्यते।

## चतुर्दशम् इतरक्षपणाधिकरणम्

अत्र "भोगेन त्वितरे क्षपयित्वा संपद्यते" ४।१।१९ ४९६)) इति सूत्रस्य "इतरे क्षपयित्वा" इति पदात् अस्य "इतरक्षपणाधिकरणं" नाम। तत्र मध्व-वल्लभ-भाष्यद्वयभिन्नेषु सर्वेषु भाष्येषु अनेन एकेन सूत्रेण एतदधिकरणं रचितम्। शङ्करभाष्ये चतुर्दशाधिकरणं, भास्कर-श्रीकण्ठभाष्ययोः त्रयोदशाधिकरणं, रामानुजभाष्ये एकादशाधिकरणं, निम्बार्क-श्रीपतिभाष्ययोः दशमम् अधिकरणम्, माध्वभाष्ये सूत्रसप्तकात्मक-तदीयाष्टमाधिकरणस्य सप्तमं सूत्रम्। वल्लभ-भाष्ये तु सूत्रत्रयात्मक-तदीयसप्तमाधिकरणस्य तृतीयं सूत्रम् इति विशेषः।

अत्र 'इतरे' इति द्वितीयान्त-पदसत्त्वेऽपि तु-शब्देन अनुक्तपूर्वपक्षस्य व्यावर्तकत्वात् ऊहनीयप्रथमान्तपदबलात् च अधिकरणारम्भः युक्तः, १८श विशेषनियमात्, ५म सामान्य-नियमात्। पादशेषत्वात् अत्रैव अधिकरणसमाप्तिश्च। अत्र मध्व-वल्लभ-भाष्ययोः अधिकरणस्य अनारम्भात् दोषेण भवितव्यम् इति।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

(१) कति कीदृशा नियमा अत्र सङ्कलिताः।

(२) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

(३) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिर्भविष्यति इति ।

एते चत्वारः विषया अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमस्तावत्—

( १ ) कति कीदृशा नियमा अत्र सङ्कलिताः ।

अत्र कोऽपि नूतनः नियमः न संकलितः । अतो द्रष्टव्यम्—

( २ ) कति च दोषाः कस्य भाष्यस्य कथं सङ्गता इति ।

तत्र ४।१।३ अधिकरणे वल्लभभाष्ये 'न प्रतीके न हि सः' ४।१।४ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।४ अधिकरणे रा-नि-श्रीप-व-भाष्येषु 'ब्रह्मदृष्टिरुत्कर्षात्' ४।१।५ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।६ अधिकरणे वल्लभभाष्ये 'आसीनः सम्भवात्' ४।१।७ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।७ अधिकरणे रा-म-नि-श्रीप-भाष्येषु "यत्रैकाग्रता तत्राविशेषात्' ४।१।११ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।८ अधिकरणे नि-श्रीप-भाष्ययोः 'आप्रायणात् तत्रापि हि दृष्टम्' ४।१।१२ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।१० अधिकरणे म-नि-व-भाष्येषु 'इतरस्याप्येवमसंश्लेषः पाते तु' ४।१।१४ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।११ अधिकरणे नि-म-व-भाष्येषु 'अनारब्धकार्य्ये एव तु पूर्वे तदवधेः' ४।१।१५ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।१२ अधिकरणे म-व-भाष्ययोः 'अग्निहोत्रादि तु तत् कार्य्यायैव तद्दर्शनात्' ४।१।१६ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

तत्रैव नि-व-भाष्ययोः 'अतोऽन्यापि ह्येकेषामुभयोः' ४।१।१७ इति सूत्रे अधिकरणस्य आरम्भात् दोषः ।

४।१।१३ अधिकरणे रा-म-श्री-श्रीप-व-भाष्येषु 'यदेव विद्ययेति हि' ४।१।१८ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।१।१४ अधिकरणे म-व-भाष्ययोः 'भोगेन त्वितरे क्षपयित्वा सम्पद्यते' ४।१।१९ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

एवं च अस्मिन् पादे भाष्याणां दोषसमाहारे कृते एवं दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| वल्लभभाष्ये | ८ दोषाः | १ दोषः |

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| रामानुजभाष्ये | ३ दोषाः | ० |
| निम्बार्कभाष्ये | ५ ,, | १ दोषः |
| श्रीपतिभाष्ये | ४ ,, | ० |
| मध्वभाष्ये | ६ ,, | ० |
| श्रीकण्ठभाष्ये | १ दोषः | ० |

इति वक्तुं शक्यते। तथा च अस्मिन् पादे शङ्कर-भास्कर-भाष्ययोः दोषाभावः, अथवा एक एव दोषः कल्पनीयः।

इदानीं द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।**

तत्र प्रथमाधिकरणे—

"आवृत्तिरसकृदुपदेशात्" ४।१।१ इति सूत्रे

"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" ( बृ० ४।५।६ )

'वेद' ( छा० १।१।१० ) 'उपासीत' ( बृ० १।४।७,८ )

"लिंगाच्च" ४।१।२ इति सूत्रे

"रश्मीस्त्वं पर्य्यावर्त्तयात्" ( छा० १।५।२ )

द्वितीयाधिकरणे—

"आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४।१।३ इति सूत्रे

"त्वं वाऽहमस्मि भगवो देवते अहं वै त्वमसि"( जाबाले )

'तत्त्वमसि' ( छा० ६।८।७ ) 'नामब्रह्म' ( छा० ७।१।५ )

तृतीयाधिकरणे—

"न प्रतीके न हि सः" ४।१।४ इति सूत्रे

'मनो ब्रह्म' ( छा० ३।१८।१ )

चतुर्थाधिकरणे—

"ब्रह्मदृष्टिरुत्कर्षात्" ४।१।५ इति सूत्रे

पञ्चमाधिकरणे—

"आदित्यादिमतयश्चांग उपपत्तेः" ४।१।६ इति सूत्रे

'य एवासौ तपति', तमुद्गीथमुपासीत' ( छा० १।३।१ )

षष्ठाधिकरणे—

"आसीनः सम्भवात" ४।१।७ इति सूत्रे

"ध्यानाच्च" ४।१।८ इति सूत्रे

"अचलत्वं चापेक्ष्य" ४।१।९ इति सूत्रे

'ध्यायतीव पृथिवी' ( छा० ७।६।१ )

"स्मरन्ति च" ४।१।१० इति सूत्रे

'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' ( भः गीः ६।११ )

सप्तमाधिकरणे—

"यत्रैकाग्रता तत्राविशेषात्" ४।१।११ इति सूत्रे

'प्राचीनप्रवणे वैश्वदेवेन यजेत' ( ? )

'समे शुचौ' ( श्वे० २।१० )

अष्टमाधिकरणे—

"आप्रायणात् तत्रापि हि दृष्टम्" ४।१।१२ इति सूत्रे

'स यावत क्रतुरयम् अस्मात् लोकात् प्रैति' ( ? )

नवमाधिकरणे—

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" ४।१।१३ इति सूत्रे

'नाभुक्तं क्षीयते कर्म्म' ( ? )

'तद् यथा पुष्करपलाश आपो न श्लिष्यन्ते एवम् एवंविदि पापं कर्म्म न श्लिष्यते इति।' ( छा० ४।१४।३ )

'तद् यथा इषीकातुलम् अग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' ( छा० ५।१४।३ )

'क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे' ( मु० २।२।८ )

दशमाधिकरणे—

"इतरस्याप्येवमसंश्लेषः पाते तु" ४।१।१४ इति सूत्रे

'उभे उ ह एव एष एते तरति' ( बृ० ४।४।२२ )

एकादशाधिकरणे—

"अनारब्धकार्य्ये एव तु पूर्वे तदवधेः" ४।१।१५ इति सूत्रे

'क्षीयन्ते चास्य कर्म्माणि' ( मु० २।२।८ )

'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छा० ६।१४।२)

द्वादशाधिकरणे—

"अग्निहोत्रादि तु तत् कार्य्यायैव तद्दर्शनात्" ४।१।१६ इति सूत्रे

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽना-शकेन' ( बृ० ४।४।२२ )

"अतोऽन्यापि ह्येकेषामुभयोः" ४।१।१७ इति सूत्रे

'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' ( शाट्यायनी ? )

त्रयोदशाधिकरणे—

"यदेव विद्ययेति हि" ४।१।१८ इति सूत्रे

'यदेव विद्यया करोति श्रद्धया उपनिषदा तदेव वीर्य्यवत्तरं भवति' ( छा० १।१।१० )

चतुर्दशाधिकरणे—

"भोगेन त्वितरे क्षपयित्वा संपद्यते" ४।१।१९ इति सूत्रे

'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये ( छा० ६।१४।२ )

'ब्रह्मैव सन् ब्रह्माप्येति' ( बृ ४।४।६ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

**( ४ ) कीदृशी अस्य पादसंगतिः ।**

यद्यपि एतदध्यायस्य फलाध्यायत्वेन प्रसिद्धिः, तथापि अस्मिन् प्रथमे पादे अष्टमाधिकरणपर्य्यन्तं साधनमेव आलोचितम् इत्येव दृश्यते । भाष्यान्तरेऽपि तथैव व्याख्यातम् । नवमाधिकरणात् अन्तिमाधिकरणपर्य्यन्तं साधकानां पापपुण्यनाशादि-विषयकं साधन-फलं विवृतम् इति सूत्राक्षरतः स्पष्टमेव प्रतिभाति । अथ एवं चेत्, तत् कथं पादस्यास्य साधन-फलविषयकत्वम् इति शङ्का अतीव स्वाभाविकी । तथैव तृतीयाध्याये प्रथमे पादे जीवस्य परलोकगमनप्रकारादिप्रसंग एव दृश्यते । तस्य तु कर्म्मादिसाधनानां फलरूपत्वेन प्रसिद्धिः लोके । नूनम् एतस्य वैराग्योत्पादनाय साधनत्वम् इत्येवंरीत्या यद्यपि व्याख्यानं सम्भवति, तथापि एतच्चतुर्थाध्यायान्तर्गतप्रथमपादस्य अष्टानाम् अधिकरणानां फलविषयत्वं कथं सम्भवेत् ? तथापि सर्वज्ञेन सूत्रकृद्भगवता यदा अत्र एतस्य सन्निवेशः कृतः, तदा किमपि रहस्यम् एतस्य अस्त्येव येन इयम् असंगतिः निवारयितुं शक्यते । तच्च एवमेव भवितुम् अर्हति । श्रुत्युक्तनित्यनैमित्तिकादिकर्म्मणां फलं चित्तशुद्धिः, शुद्धचित्तस्यैव ध्यानादिरूपायाम् उपास-नायाम् अधिकारः, तेन तादृशकर्म्मणां फलत्वेन उपासनादिकं निर्वक्तुं शक्यते । अतः अत्र ध्यानादिसाधनप्रकारवर्णनं न तस्य फलविषयकत्वात् अतिरिच्यते, एवं च प्रथमाष्टानाम् अधि-करणानां फलविषयकत्वं सिध्यति । तथापि विभिन्नभाष्यकारैः एतत्पादप्रतिपाद्यत्वेन यो निर्देशः कृतः, स इत्थम्—

शंकरभाष्ये—श्रवणाद्यावृत्त्या निर्गुणम् उपासनया सगुणं वा ब्रह्म साक्षात्कृतवतः जीवतः पुण्य-पापलेपविनाशलक्षणायाः मुक्तेः अभिधानम् ।

भास्करभाष्ये—निर्गुणब्रह्म विहाय एतदेव बोद्धव्यम् ।

रामानुजभाष्ये—उपासनारोहमाहात्म्यम्, उत्तरपूर्वाघाश्लेषविनाशरूपम् ।

निम्बार्कभाष्ये—साधनावृत्तिः आप्रायणात् कर्त्तव्या इति निरूपणम् ।

माध्वभाष्ये—कर्म्मनाशाख्यं फलम् ।

श्रीकण्ठभाष्ये—उपासनाप्रकारनिरूपणम् ।

श्रीकरभाष्ये—सर्वासां विद्यानां फलम् ।

एवं चेत् अत्र अकिञ्चित्कर एव मतभेदः इत्यत्र नास्ति सन्देहः ।

इति चतुर्थाध्याये प्रथमपादः ।

---

## चतुर्थाध्याये द्वितीयः पादः

### प्रथमं वागधिकरणम् ।

अत्र "वाङ्मनसि दर्शनाच्छब्दाच्च" ४।२।१ (४९७) इति सूत्रस्य 'वाक्' पदात् अस्य "वागधिकरणं" नाम । अत्र श-भा-रा-म-श्री-श्रीप-भाष्येषु सूत्रद्वयं गृहीतम् । निम्बार्कभाष्ये सूत्रषट्कं, तथा वल्लभभाष्ये सूत्रचतुष्टयम् इति । तच्च सूत्रद्वयम्—

१। 'वाङ्मनसि दर्शनाच्छब्दाच्च' ४।२।१ ( ४९७ )

२। 'अतएव च सर्वाण्यनु' ४।२।२ ( ४९८ )

अत्र ( १ ) 'वाङ्मनसि दर्शनात् शब्दाच्च' ४।२।१ (४९७) इत्यत्र "वाक्" इति प्रथमान्तपदात् तथा अत्र पादारम्भात् अधिकरणारम्भः समुचितः एव । ४र्थ सामान्यनियमात्, २य विशेषनियमाच्च । च-कारस्तु अत्रोक्तहेतोः समुच्चायकः, अतः तस्य न बाधकत्वम् । ६ष्ठ विशेषनियमात् ।

( २ ) 'अतएव च सर्वाण्यनु' ४।२।२ (४९८) इत्यत्र 'सर्वाणि' इति प्रथमान्तपद-सत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्, च-कारस्य हेतुसमुच्चायकत्वात् साकांक्षत्वविधानाच्च, ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च । परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

### द्वितीयं मनोधिकरणम् ।

अत्र 'तन्मनः प्राण उत्तरात्' ४।२।३ (४९९) इति सूत्रस्य "मनः"-पदात् अस्य "मनोधिकरणं" नाम । तत्र श-भा-रा-म-श्री-श्रीप-भाष्येषु एतेन एकेन सूत्रेण एतद् द्वितीयाधि-करणं रचितम् । निम्बार्कभाष्ये एतत् सूत्रं तदीयप्रथमाधिकरणस्य षट्सु सूत्रेषु तृतीयं सूत्रम्, वल्लभ-भाष्ये तु तदीयं प्रथमाधिकरणस्य चतुर्षु सूत्रेषु तृतीयं सूत्रम् ।

अत्र 'मनः' इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामान्य-नियमात्। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च। नि-व-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

## तृतीयम् अध्यक्षाधिकरणम्।

अत्र "सोऽध्यक्षे तदुपगमादिभ्यः" ४।२।४ (५००) इति सूत्रस्य 'अध्यक्ष'-पदात् अस्य "अध्यक्षाधिकरणं" नाम। अत्र श-भा-श्री-भाष्येषु तदीयतृतीयाधिकरणार्थं सूत्रत्रयं गृहीतम्। रा-म-श्रीप-भाष्येषु तदर्थम् एतदेव एकं सूत्रं गृहीतम्। निम्बार्क-वल्लभ-भाष्ययोः अत्र अधिकरणं न रचितम्। निम्बार्कभाष्ये एतत् सूत्रं तदीयप्रथमाधिकरणस्य षट्सु सूत्रेषु चतुर्थं सूत्रम्, वल्लभभाष्ये तु तदीयप्रथमाधिकरणस्य चतुर्षु सूत्रेषु चतुर्थं सूत्रं भवति इति विशेषः।

तच्च सूत्रत्रयम्—

१। 'सोऽध्यक्षे तदुपगमादिभ्यः' ४।२।४ ( ५०० )

२। 'भूतेषु तच्छ्रुतेः' ४।२।५ ( ५०१ )

३। 'नैकस्मिन् दर्शयतो हि' ४।२।६ ( ५०२ )

अत्र ( १ ) 'सोऽध्यक्षे तदुपगमादिभ्यः ४।२।४ (५००) इत्यत्र 'सः' इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव। सः इति पदस्य पूर्वप्रकृतापेक्षत्वेऽपि विधेय-भेदात् अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात्, ४र्थ विशेषनियमाच्च। नि-व-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

( २ ) 'भूतेषु तच्छ्रुतेः' ४।२।५ (५०१) इत्यत्र प्रथमान्तपदाभावात् नास्य अधि-करणारम्भकत्वम्। ४र्थ सामान्यनियमात्। रा-म-श्रीप-व-भाष्येषु अधिकरणस्य आरम्भात् दोषः।

( ३ ) 'नैकस्मिन् दर्शयतो हि' ४।२।६ (५०२) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्; ४र्थ सामान्यनियमात्। माध्वभाष्ये तदीयपञ्चमाधिकरणस्य आरम्भात् दोषः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव समाप्तिरपि संगच्छते।

## चतुर्थम् आसृत्युपक्रमाधिकरणम्।

अत्र "समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य" ४।२।७ ( ५०३ ) इति सूत्रस्य 'आसृत्युपक्रमात्' इति पदात् अस्य "आसृत्युपक्रमाधिकरणं" नाम। तत्र श-भा-श्री-भाष्येषु एतेन एकेन सूत्रेण तदीयचतुर्थाधिकरणं, रामानुज-श्रीपति-भाष्ययोः सप्तभिः सूत्रैः तदीय-पञ्चमाधिकरणं, निम्बार्कभाष्ये तथैव सप्तभिः सूत्रैः तदीयद्वितीयाधिकरणं, माध्वभाष्ये अष्टभिः सूत्रैः तदीयषष्ठाधिकरणं, तथा वल्लभभाष्ये नवभिः सूत्रैः तदीयतृतीयाधिकरणं रचितम्।

अत्र 'समाना' इति प्रथमान्तपदात्, तथा 'अमृतत्वम्' इति प्रथमान्तपदात् अत्र अधिकरणारम्भः युज्यते एव। च-कारस्य विषयान्तरसूचकत्वात् न बाधकत्वम् ४र्थ सामान्य-

नियमात्, १२श विशेषनियमाच्च । परसूत्रे मतत्रयानुसारेण अधिकरणारम्भात् अत्र अधिकरण-समाप्तिरपि कल्पयितुं शक्यते ।

## पञ्चमं संसारव्यपदेशाधिकरणम्

अत्र "तदापीतेः संसारव्यपदेशात्" ४।२।८ (५०४) इति सूत्रस्य 'संसारव्यपदेशात्' इति पदात् अस्य "संसारव्यपदेशाधिकरणं" नाम । तत्र अनेन सूत्रेण श-भा-श्री-भाष्येषु अधिकरणम् आरब्धं, शिष्टेषु तु न । तत्रापि श-भा-भाष्ययोः चत्वारि सूत्राणि गृहीतानि, श्रीकण्ठभाष्ये तु षट् सूत्राणि । पुनः श-भा-रा-श्री-श्रीप-भाष्येषु एतद्धि पञ्चमम् अधिकरणं, निम्बार्क-भाष्ये द्वितीयाधिकरणं, माध्वभाष्ये षष्ठाधिकरणं, तथा वल्लभभाष्ये तृतीयाधिकरणम् । रामानुज-श्रीपतिभाष्ययोः एतत् सूत्रं सूत्रसप्तकात्मकतदीयपञ्चमाधिकरणस्य द्वितीयम् सूत्रं, निम्बार्कभाष्ये सूत्रसप्तकात्मकतदीयद्वितीयाधिकरणस्य द्वितीयं सूत्रम्, माध्वभाष्ये सूत्राष्टकात्मक-तदीय-षष्ठाधिकरणस्य द्वितीयं सूत्रं, श्रीकण्ठभाष्ये सूत्रषट्कात्मकतदीयपञ्चमाधिकरणस्य प्रथमं सूत्रं, वल्लभभाष्ये तदीयतृतीयाधिकरणस्य नवसु सूत्रेषु द्वितीयं सूत्रम् । तच्च सूत्रचतुष्टयम्—

१। 'तदापीतेः संसारव्यपदेशात्' ४।२।८ ( ५०४ )

२। 'सूक्ष्मं प्रमाणतश्च तथोपलब्धेः' ४।२।९ ( ५०५ )

३। 'नोपमर्देनातः' ४।२।१० ( ५०६ )

४। 'अस्यैव चोपपत्तेरेष ऊष्मा' ४।२।११ ( ५०७ )

अत्र ( १ ) 'तदापीतेः संसारव्यपदेशात्' ४।२।८ (५०४) इत्यत्र 'तत्' इति प्रथमान्त-पदात् अस्य अधिकरणारम्भकत्वं संगतम्; ४र्थ सामान्यनियमात् । 'तत् आ अपीतेः' इति पद-च्छेदात् । विषयश्रुतिभेदात् तत्-शब्दस्य पूर्वप्रकृतापेक्षत्वं न बाधकम् । ४र्थ सामान्यनियमात् । रा-म-नि-श्रीप-व-भाष्येषु अधिकरणस्य अरचनायां दोषः ।

( २ ) 'सूक्ष्मं प्रमाणतश्च तथोपलब्धेः' ४।२।९ (५०५) इत्यत्र 'सूक्ष्मम्' इति प्रथमान्तपदसत्त्वेऽपि च-कारात् नास्य अधिकरणारम्भकत्वम् । अत्र ऐकमत्यं सर्वेषाम् । ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च ।

( ३ ) 'नोपमर्देनातः' ४।२।१० (५०६) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वम् । ४र्थ सामान्यनियमात् । 'अतः'-पदादपि बाधः ; ७म विशेषनियमात् ।

( ४ ) 'अस्यैव चोपपत्तेरेष ऊष्मा' ४।२।११ (५०७) इत्यत्र 'ऊष्मा' इति प्रथमान्तपद-सत्त्वेऽपि 'अस्य'-पदात् तथा 'च'-पदाच्च अस्य साकांक्षत्वात् न अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, च-काराच्च बाधः ; ६ष्ठ विशेषनियमात् ।

परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते ।

## षष्ठं प्रतिषेधाधिकरणम् ।

अत्र "प्रतिषेधादिति चेन्न शारीरात्" ४।२।१२ (५०८) इति सूत्रस्य "प्रतिषेधात्" इति पदात् अस्य "प्रतिषेधाधिकरणं" नाम। तत्र शंकर-भास्कर-भाष्ययोः अनेन अधिकरणम् आरब्धम्, रा-नि-म-श्री-श्रीप-व-भाष्येषु तु न तथा। शंकर-भाष्ये एतत् सूत्रं सूत्रत्रयात्मक-तदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्, भास्करभाष्ये सूत्र-द्वयात्मकतदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्, परसूत्रस्य एतत्-शेषत्वेन पठनात्। रा-श्रीप-भाष्ययोस्तु एतत् सूत्रं तदीय-पञ्चमाधिकरणस्य सप्तसु सूत्रेषु षष्ठं सूत्रम्, निम्बार्कभाष्ये तदीयद्वितीयाधिकरणस्य सप्तसु सूत्रेषु षष्ठं सूत्रम्, मध्वभाष्ये तदीयषष्ठाधिकरणस्य अष्टसु सूत्रेषु षष्ठं सूत्रम्। श्रीकण्ठभाष्ये तदीय-पञ्चमाधिकरणस्य षट्सु सूत्रेषु पञ्चमं सूत्रम्, वल्लभभाष्ये तु तदीय-तृतीयाधिकरणस्य नवसु सूत्रेषु षष्ठं सूत्रम्। तच्च सूत्रत्रयम्—

१। "प्रतिषेधादिति चेन्न शारीरात्" ४।२।१२ (५०८)

२। "स्पष्टो ह्येकेषाम्" ४।२।१३ (५०९)

३। "स्मर्य्यते च" ४।२।१४ (५१०)

अत्र (१) "प्रतिषेधादिति चेन्न शारीरात्" ४।२।१२ (५०८) इत्यत्र प्रथमान्तपदा-भावात् नास्य अधिकरणारम्भकत्वं, ४र्थ सामान्यनियमात्। तथैव "इति चेत्" इति पदात् च ५म विशेषनियमात्। तथापि यदि "प्रतिषेधात्" इति पञ्चम्यन्तपदेन सह "न उत्क्रान्तिः" इत्येवं कश्चित् प्रथमान्तपदः अनुषज्यते कस्य प्रतिषेधः इति आकांक्षानुरोधात् तदा १४श विशेषनियमानु-सारेणैव अत्र अधिकरणारम्भः कर्त्तुं शक्यते। एवं च "इति चेत्" इति पद-घटितस्य एतस्य सूत्रस्यापि अधिकरणारम्भकत्वं युज्यते एव। भा-रा-नि-श्री-श्रीप-भाष्येषु "प्रतिषेधा-दिति चेन्न शरीरात् स्पष्टो ह्येकेषाम्" इति एकं सूत्रं पठितम्। श-म-व-भाष्येषु तु "स्पष्टो ह्येकेषाम्" इति अपरं सूत्रम्। तत्र सूत्रद्वयं न एकीकृत्य पठ्यते। तेषां मध्ये शंकरभाष्ये एव अधिकरणं रचितम्, मध्ववल्लभभाष्ययोस्तु न—इत्यपि दृश्यते। अथ यदि रा-नि-म-श्री श्रीप-भाष्यानुसारेण सूत्रद्वयम् एकमेव स्यात्, तदा तेषु भाष्येषु अधिकरणस्य अनारम्भात् तेषामेव दोषेण भवितव्यम्। १४श विशेषनियमानुसारेण अधिकरणस्य रचनीयत्वात्, वल्लभभाष्यस्यापि तथैव। तन्मते पृथक्सूत्रत्वेऽपि नाधिकरणं रचितम्। भास्करस्य न दोषः। एकीकृतसूत्रद्वयेन तन्मते अधिकरणं रचितमेव यतः तन्मते "प्रतिषेधात्" इति पञ्चम्यन्तपदेन सह उहनीयप्रथमान्तपदस्य सत्त्वाच्च। ततश्च चतुर्थाधिकरणेन सह सम्बन्धात् पञ्चमाधिकरणतः विषयभेदात् "प्रतिषेधात् इति चेन्न शारीरात्" इति सूत्रस्य पृथगधिकरणारम्भकत्वं समुचितमेव ; ६ष्ठ विशेषनियमात्। अतः शङ्करपक्षे व्यक्तिद्वयं तथा रामानुजपक्षे व्यक्तिषट्कमपि नियमानुगृहीतत्वात् शङ्करपक्षस्यैव न्याय्यत्वम् इत्येव सिध्यति। ततश्च रामानुजादिपक्षे पञ्चमाधिकरणस्य अस्वीकारात् अधिकरणनियमलङ्घन-

अन्यः अन्यः दोषः जातः। न तथा शंकरपक्षे। न वा "इति चेत्" इति-पदघटितसूत्रस्य पूर्वपक्षसिद्धान्तपक्षात्मकत्वेन समग्रस्य न पूर्वपक्षत्वं युक्तं, किन्तु सिद्धान्तपक्षत्वमेव संगतम्। परन्तु शंकरभाष्ये "प्रतिषेधादिति चेन्न शारीरात्" ( ४।२।१२ ) इति समग्रसूत्रं पूर्वपक्षत्वेन व्याख्यातम्, अतः असंगतम् इति वाच्यम्? तन्न "अन्यथात्वं शब्दादिति चेन्नाविशेषात्" ३।३।६ सूत्रस्य अधिकसम्मत्या पूर्वपक्षत्वमेव दृश्यते। ततश्च एतत्सूत्रार्थेऽपि शङ्कररामानुजमतयोः मध्ये महान् प्रभेदो दृश्यते। शंकरमतेन सद्योमुक्तिः उरीक्रियते, रामानुजमतेन तु तत् न अंगीक्रियते। सद्योमुक्तिप्रविलापनं तु श्रुतिविरुद्धम्। "न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" ( बृ ४।४।६ ) "न तस्य प्राणाः उत्क्रामन्ति अत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति" ( नृः ता ५।८ ) इत्यादिश्रुतिभ्यः अतिस्पष्टतया ज्ञानिनः प्राणोत्क्रमणं प्रतिसिद्धमेव। नृसिंहतापनीये तु तस्य "इहैव"-पदेन अस्मिन् एव शरीरे अवस्थिते सति प्राणोत्क्रमणनिषेधः तथा ब्रह्मणि विलयः इति उभयमेव उक्तम्। अतः सद्योमुक्तिः ज्ञानिनः अनंगीकर्त्तुं न शक्यते। ततश्च सूत्राक्षरतः यज् ज्ञायते, तेन प्राणोत्क्रमणं शरीरात् इति निषिध्य शारीराज्जीवादेव भवति इत्येव—प्रस्तूयते इति व्यासाभिप्रायत्वेन यत् कल्पनं तदपि न संगतम्। यतः उत्क्रान्तिकथा, मृत्युकालमेव विषयीकरोति, मृत्युश्च शरीरात् प्राणनिर्गमनम् इत्येव प्रसिद्धम्, न तु शारीरात् जीवात् इति कचित्। यदि शारीरात् जीवात् प्राणोत्क्रमणं कदाचिदपि भवेत्, तदा सदैव जीवः शरीरे तिष्ठतु, तस्य प्राणा एव केवलं उत्क्रमेत्—देहाद् बहिर्गच्छेत् इत्येव सिद्ध्येत्। तदैव शारीरात् प्राणोत्क्रमणस्य निषेधोऽपि कथञ्चित् संगच्छेत। न तु जीवः सदैव शरीरे तिष्ठति। स्थूल-शरीरस्य अनित्यत्वात्, अत एतादृशकल्पनं नितराम् अस्वाभाविकम् बहुश्रुतिविरुद्धं च। अतः शारीरात् जीवात् प्राणोत्क्रमणकल्पनं न संगतम्। अतः तादृशासंगतकल्पनमेव अत्र सूत्रकारैः पूर्वपक्षत्वेन गृहीतम्, खण्डितं च परसूत्रे इत्येव समीचीनं मतम्। अथ यदि कल्प्येत, प्राणोत्क्रमणनिषेधस्य तात्पर्य्यं प्राणादिभिः सह जीवानां ब्रह्मप्राप्त्यर्थत्वम्। न तु अत्रैव प्राणस्य लयः जीवस्य ब्रह्मत्वप्राप्तौ इति, तदापि न संगतं कल्पनं भवति। न वा ब्रह्मलोकादिगमनरूपः जीवस्य उत्क्रान्तिपक्षः तेन प्रतिष्ठापितो भवति। "ब्रह्मैव सन् ब्रह्माप्येति" ( ८।८।६ ) इति वचनात्। अत्र "ब्रह्मैव सन्" इति पदात् जीवब्रह्मणोः प्राप्यप्रापकत्वरूपसम्बन्धस्य निषेधः उच्यते। "ब्रह्म वेद ब्रह्मैव भवति" ( मु ३।२।९ ) इति श्रुतेश्च। अतः एवमपि ब्रह्मज्ञस्य ब्रह्मलोकगमनरूपोत्क्रान्तिं साधयितुं न शक्यते। ब्रह्मैव भूत्वा ब्रह्मप्राप्तौ गमनस्य असम्भवात्। एव-कारेण ब्रह्माभिन्न-त्वमेव उद्घोष्यते, भेदलेशोऽपि निवार्य्यते। भिन्नयोरेव प्राप्यप्रापकसम्बन्धः ग्रामप्राप्तौ इव सम्भवति। जलान्तर्गतजलस्य न जलप्राप्तिः, घटाकाशस्य न आकाशप्राप्तिः क्वचिद् भवति। अतः अत्र लोकान्तरगमनरूपायाः उत्क्रान्तेः विधानं ज्ञानिनः असंगतमेव। नृसिंहतापनीये उत्क्रान्तिनिषेधानन्तरं प्राणानां प्रविलयः एव उक्तः, "इहैव समवलीयन्ते" इत्यनेन। अतः ब्रह्मविदः प्राणानां जीवेन सह

उत्क्रमणम् असम्भूतमेव। "ब्रह्मैव सन् ब्रह्माप्येति" (बृ ४।४।६) इत्यत्र यत् अर्थतः उक्तम्, तदेव अत्र शब्देनैव उपदिष्टम्। अतः "प्रतिषेधादिति चेत् न शारीरात्" इति समग्रसूत्रं पूर्वपक्षत्वेन व्याख्येयम्। तदेव शंकरभाष्ये कृतम्। तेन श्रुत्यनुरोधात् अत्र अधिकरणारम्भः संगत एव। ११श विशेषनियमात्। एवं च श्रुतिविरुद्धव्याख्याने कृते श्रुतिसंगतिः व्याहन्येत, व्यासस्यापि श्रुत्यनभिज्ञत्वं च प्रसज्यते। अतोऽत्र अधिकरणारम्भः संगच्छते एव। सूत्रद्वयस्य एकीकरणं प्राचीनतरपाठप्रदर्शनं विना न ग्रहणीयम्। ४र्थ विशेषनियमात्। शंकरमतेन एतत् तु पूर्वपक्षसूत्रम्। तत्र हेतुः तु उक्त एव। रामानुजादीनां मते अतः सिद्धान्तसूत्रत्वेन ग्रहणात् दोषः एव वाच्यः।

(२) "स्पष्टो ह्येकेषाम्" ४।२।१३ (५०९) इत्यत्र "स्पष्टः" इति पदसत्त्वे अपि "हि एकेषाम्" इति पदद्वयात् साकांक्षत्वं सिध्यत्येव, अतो नास्य अधिकरणारम्भकत्वं युक्तम्, ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च। भास्करादीनां मतेन एतत् सूत्रं पूर्वसूत्रशेषत्वेन पठितम्। शंकरमतेन एतद्धि पृथक् सूत्रम् तथा सिद्धान्तसूचकम्, श्रौतसिद्धान्तानुरोधात्।

अत्र केचित् प्रत्यवतिष्ठन्ते शंकरमतेन एतत्सूत्रस्य सिद्धान्तसूत्रत्वेन ग्रहणम् असंगतमिति। "न तु"-प्रभृतिपूर्वपक्षनिरासकलिंगाभावादिति च। तन्न, "स्पष्टो ह्येकेषाम्" इत्यत्र हि-शब्दस्य तथात्वेन व्याख्यानार्हत्वात्। किञ्च पूर्वसूत्रे शरीरात् प्राणोत्क्रान्तिरूपसिद्धान्तस्य पूर्वपक्षत्वेन ग्रहणात, तथा शारीरात् प्राणोत्क्रान्तिरूपापसिद्धान्तस्य सिद्धान्तत्वेन वर्णनात्, बुद्धिस्थप्रकृतसिद्धान्तस्यैव प्राबल्यं कल्पयितुं शक्यते। स एव सिद्धान्तः अत्र "स्पष्टः" इति शब्देन स्मारितः एव। अतो न निषेधार्थकपृथक्शब्दग्रहणावकाशः। अन्यथाकल्पने श्रौतसिद्धान्तविरोधः दुष्परिहरणीयः एवेति प्रतिभाति।

(३) "स्मर्य्यते च" ४।२।१४ (५१०) इत्यत्र प्रथमान्तपदाभावात् तथैव। ४र्थ सामान्यनियमात्, चकारात् हेतुसमुच्चायकत्वमपि कल्प्यते। ६ष्ठ विशेषनियमात्। परसूत्रे अधिकरणारम्भात् अधिकरणसमाप्तिश्च अत्र बोद्धव्या।

## सप्तमं वागादिलयाधिकरणम्।

अत्र "तानि परे तथा ह्याह" ४।२।१५ (५११) इति सूत्रस्य तात्पर्य्यम् अवलम्ब्य अस्य "वागादिलयाधिकरणं" नाम। तत्र वल्लभभाष्यं विहाय सर्वेषु भाष्येषु अधिकरणम् आरब्धमिति दृश्यते। तत्र श-भा-म-भाष्येषु अनेन एकेन सूत्रेण एतत् सप्तमाधिकरणं रचितम्। रा-श्रीप-भाष्ययोः तथैव षष्ठाधिकरणं कल्पितम्। निम्बार्कभाष्ये तु सूत्रद्वयात्मकतदीयतृतीयाधिकरणस्य प्रथमं सूत्रम्। श्रीकण्ठभाष्ये सूत्रद्वयात्मकतदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्। वल्लभभाष्ये तदीयतृतीयाधिकरणस्य नवसु सूत्रेषु एतद्धि नवमं सूत्रम्।

अत्र "तानि" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतम्। ४र्थ सामान्य-

नियमात् । तत्-शब्दस्य पूर्वप्रकृतापेक्षत्वं तु न अत्र बाधकम्, तथापि हि-शब्देन विधेयभेदात् १२श विशेषनियमात् अधिकरणारम्भः संगतः। वल्लभभाष्येअधिकरणस्य अनारम्भात् दोषो वाच्यः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः ।

## अष्टमम् अविभागाधिकरणम् ।

अत्र "अविभागो वचनात्" ४।२।१६ (५१२) इति सूत्रस्य "अविभागः" इति पदात् अस्य "अविभागाधिरकणं" नाम । अत्र निम्बार्क-श्रीकण्ठभाष्यद्वयभिन्नेषु सर्वेषु भाष्येषु अनेन एकेन सूत्रेण अधिकरणं रचितम्। तत्र श-भा-म-भाष्येषु एतत् सूत्रं तदीयाष्टमाधिकरणस्य एकमेव सूत्रम्, रामानुज-श्रीपतिभाष्ययोः तथैव तदीयसप्तमाधिकरणस्य । वल्लभस्य तु पुनः तदीय-चतुर्थाधिकरणस्य । निम्बार्कभाष्ये एतत् सूत्रं तदीयसूत्रद्वयात्मकतृतीयाधिकरणस्य द्वितीयं सूत्रम्, श्रीकण्ठभाष्ये तु सूत्रद्वयात्मकतदीयषष्ठाधिकरणस्य द्वितीयं सूत्रम् । तेन नि-श्री-भाष्ययोः अधिकरणस्य अरचनात् दोषः ।

अत्र "अविभागः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तमेव । ४र्थ सामान्यनियमात् । परसूत्रे सर्वसम्मत्या अधिकरणारम्भांत् अत्रैव अधिकरणसमाप्तिरिति ।

## नवमं तदोकोधिकरणम् ।

अत्र "तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया" ४।२।१७ (५१३) इति सूत्रस्य "तदोकाग्र" इति पदात् अस्य "तदोकोधिकरणं" नाम । अत्र सर्वैः अधिकरणम् आरब्धम् । तत्र श-भा-रा-श्री-श्रीप-व-भाष्येषु अत्र एतदेव एकं सूत्रं गृहीतम् । निम्बार्कभाष्ये सूत्रद्वयं, मध्वभाष्ये च सूत्रपञ्चकम् इति विशेषः । श-भा-म-भाष्येषु नवमाधिकरणम्, रा-श्रीप-भाष्ययोः अष्टमाधिकरणम्, निम्बार्कभाष्ये चतुर्थाधि-करणं, माध्वभाष्ये नवमाधिकरणं, श्रीकण्ठभाष्ये सप्तमाधिकरणं, वल्लभभाष्ये पञ्चमाधिकरणम् इति प्रभेदः ।

अत्र "तदोकोग्रज्वलनम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव, ४र्थ सामान्यनियमात् । च-कारस्य न बाधकत्वं विधेयभेदस्य ज्ञापनात् १२श विशेषनियमात् परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## दशमं रश्म्यधिकरणम् ।

अत्र "रश्म्यनुसारी" ४।२।१८ (५१४) इति सूत्रस्य "रश्मि" इति पदात् अस्य "रश्म्यधि-करणं" नाम । अत्र श-भा-रा-श्रीप-श्रो-व-भाष्येषु अधिकरणं रचितम्, नि-म-भाष्ययोः तु न रचितम् । श-भा-श्री-भाष्येषु सूत्रद्वयं गृहीतम्, रा-श्रीप-व-भाष्येषु तु एतदेव एकं सूत्रं गृहीतम् । श-भा-भाष्ययोः दशमाधिकरणं, रामानुज-श्रीपतिभाष्ययोः नवमाधिकरणं, निम्बार्कभाष्ये तु सूत्रद्वयात्मकतदीयचतुर्थाधिकरणस्य द्वितीयं सूत्रम्, माध्वभाष्ये तथैव सूत्रपञ्चात्मकतदीय-

नवमाधिकरणस्य द्वितीयं सूत्रम्, श्रीकण्ठभाष्ये अष्टमम् अधिकरणम्। वल्लभभाष्ये षष्ठाधिकरणम्। तच्च सूत्रद्वयम्—

१। "रश्म्यनुसारी" ४।२।१८ (५१४)

२। "निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च" ४।२।१९ (५१५)

अत्र (१) "रश्म्यनुसारी" ४।२।१८ (५१४) इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामान्यनियमात्। नि-म-भाष्यद्वये अधिकरणस्य अनारम्भात् दोषः।

(२) "निशि नेति चेन्न सम्बन्धस्य यावद् देहभावित्वात् दर्शयति च" ४।२।१९ (५१५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात्, ५म विशेषनियमात्। रा-नि-श्रीप-व-भाष्येषु अधिकरणस्य आरम्भात् दोषः। माध्वभाष्ये एतत् सूत्रं च द्विधा विभक्तम्। परसूत्रे अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## एकादशं दक्षिणायनाधिकरणम्।

अत्र "अतश्चायनेऽपि दक्षिणे" ४।२।२० (५१६) इति सूत्रस्य "अयने दक्षिणे" इति पदद्वयात् अस्य "दक्षिणायनाधिकरणं" नाम। तत्र श-भा-रा-श्री-श्रीप-भाष्येषु एतदारभ्य सूत्रद्वयेन एतदधिकरणं रचितम्। नि-म-व-भाष्येषु तु न तथा कृतम्। श-भा-रा-श्री-प-भाष्येषु एतद् एकादशाधिकरणम्। श्रीकण्ठभाष्ये तु नवमाधिकरणम्। निम्बार्कभाष्ये सूत्रत्रयात्मकतदीयपञ्चमाधिकरणस्य द्वितीयं सूत्रम्, माध्वभाष्ये तु सूत्रपञ्चात्मक तदीयनवमाधिकरणस्य पञ्चमं सूत्रम्। वल्लभभाष्ये सूत्रत्रयात्मकतदीयसप्तमाधिकरणस्य द्वितीयं सूत्रम्। तच्च सूत्रद्वयम्—

१। "अतश्चायनेऽपिदक्षिणे" ४।२।२० (५१६)

२। "योगिनः प्रति च स्मर्यते स्मार्त्ते चैते" ४।२।२१ (५१७)

अत्र (१) अतश्चायनेऽपि दक्षिणे" ४।२।२० (५१६) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं सङ्गतम्, तथापि "अतश्च" इति पदात् "विद्याफलम्" इत्येवं कस्यचित् प्रथमान्तपदस्य अध्याहारः कर्त्तव्यः इति प्रतिभाति। ५म सामान्यनियमात् ततश्च विधेयभेदादपि अत्र अधिकरणारम्भः संगच्छते। च-अपि-हि-शब्दानां न बाधकत्वं विधेयभेदात् १२श विशेषनियमात्। नि-म-व-भाष्येषु अधिकरणस्य अनारम्भात्-तेषां दोषः एव वक्तव्यः।

(२) "योगिनः प्रति च स्मर्यते स्मार्ते चैते" ४।२।२१ (५१७) इत्यत्र "एते" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तं, तथापि चकारस्य प्रकृतविषयत्वप्रसंगात् तस्य निषेधः। ४र्थ सामान्यनियमात ६ष्ठ विशेषनियमाच्च। अतः नास्य अधिकरणारम्भकत्वं संगच्छते। माध्वभाष्ये तदीयदशमाधिकरणस्य आरम्भात् तस्यैव दोषः वाच्यः। पादशेषात् अत्रैव अधिकरणसमाप्तिश्च बोद्धव्या।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायाम्—

( १ ) कति कीदृशा नियमा अत्र सङ्कलिताः ।

( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

( ४ ) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिर्भविष्यति इति ।

एते च चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमस्तावत्—

**( १ ) कति च कीदृशा नियमा अत्र संकलिताः ।**

अत्र न कोऽपि नियमः संकलितः, अतो द्रष्टव्यम्—

**( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।** इति ।

तत्र ४।२।२ अधिकरणे नि-व-भाष्ययोः "तन्मनः प्राणः उत्तरात् ४।२।३ सूत्र अधिकरणस्य अनारम्भात् दोषः ।

४।२।३ अधिकरणे नि-व-भाष्ययोः "सोऽध्यक्षे तदुपगमादिभ्यः" ४।२।४ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

तत्रैव रा-म-श्रीप-व-भाष्येषु "भूतेषु तच्छ्रुतेः" ४।२।५ सूत्रे अधिकरणस्य आरम्भात् दोषः ।

तत्रैव माध्वभाष्ये "नैकस्मिन् दर्शयतो हि" ४।२।६ सूत्रे अधिकरणस्य आरम्भात् दोषः।

४।२।५ अधिकरणे रा-नि-म-श्रीप-व-भाष्येषु "तदपीतेः संसारव्यपदेशात्" ४।२।८ सूत्रे अधिकरणस्य अरचनायां दोषः ।

४।२।६ अधिकरणे रा-नि-म-श्री-श्रीप-व-भाष्येषु "प्रतिषेधात् इति चेन्न शारीरात्" ४।२।१२ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।२।७ अधिकरणे वल्लभभाष्ये "तानि परे तथा ह्याह" ४।२।१५ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।२।८ अधिकरणे नि-श्री-भाष्ययोः "अविभागो वचनात्" ४।२।१६ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।२।१० अधिकरणे म-नि-भाष्ययोः "रश्म्यनुसारी" ४।२।१८ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

तत्रैव रा-नि-श्रीप-व-भाष्येषु "निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च" ४।२।१९ सूत्रे अधिकरणस्य आरम्भात् दोषः ।

४।२।११ अधिकरणे नि-म-व-भाष्येषु "अतश्चायनेऽपि दक्षिणे" ४।२।२० सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

तत्रैव माध्वभाष्ये "योगिनः प्रति च स्मर्य्यते स्मार्ते चैते" ४।२।२१ सूत्रे अधिकरणस्य आरम्भात् दोषः।

एवं च अस्मिन् पादे भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| निम्बार्कभाष्ये | ७ दोषाः | १ दोषः |
| वल्लभभाष्ये | ६ " | २ दोषौ |
| रामानुजभाष्ये | २ दोषौ | २ " |
| माध्वभाष्ये | ४ दोषाः | ३ दोषाः |
| श्रीपतिभाष्ये | २ दोषौ | २ दोषौ |
| श्रीकण्ठभाष्ये | २ " | ० |

इति वक्तुं शक्यते। तथा च अस्मिन् पादे शङ्कर-भास्करभाष्ययोः दोषाभावः।

इदानीं द्रष्टव्यम्—

**( १ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।**

तत्र प्रथमाधिकरणे—

"वाङ्मनसि दर्शनाच्छब्दाच्च" ४।२।१ इति सूत्रे

"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते
मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम्" ( छा० ६।८।६ )

द्वितीयाधिकरणे—

"तन्मनः प्राण उत्तरात्" ४।२।३ इति सूत्रे

"अन्नमयं हि सोम्य मन आपोमयः प्राणः" ( छा० ६।५।४ )

"मनः प्राणे" ( छा० ६।८।६ )

तृतीयाधिकरणे—

"सोऽध्यक्षे तदुपगमादिभ्यः" ४।२।४ इति सूत्रे

"एवमेव इमम् आत्मानम् अन्तकाले सर्वे प्राणा अभिसमायन्ति" (बृ० ४।३।३८)

"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" (बृ० ४।४।२)

"स विज्ञानो भवति"( बृ० ४।४।२ )

"भूतेषु तच्छ्रुतेः" ४।२।५ इति सूत्रे

"प्राणस्तेजसि" ( छा० ६।८।६ )

चतुर्थाधिकरणे—

"समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य" ४।२।७ इति सूत्रे

"तयोर्ध्वमायन्नमृतत्वमेति" ( छा० ६।८।६ )

पञ्चमाधिकरणे—

"तदापीतेः संसारव्यपदेशात्" ४।२।८ इति सूत्रे

"तेजः परस्यां देवतायाम्" ( छा० ६।८।६ )

"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः" ( कठ० ५।७ )

षष्ठाधिकरणे—

"प्रतिषेधादिति चेन्न शारीरात्" ४।२।१२ इति सूत्रे

"न तस्य प्राणा उत्क्रामन्ति" ( बृ० ४।४।६ )

"न तस्मात् प्राणा उत्क्रामन्ति" ( बृ० माध्य० ४।४८ )

"स्पष्टो ह्येकेषाम्" ४।२।१३

"स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते" ( बृ० ३।२।११ )

"स्मर्य्यते च" ४।२।१४

"देवापि मार्गे मुह्यन्ति ह्यपदस्य पदैषिणः" ( महा० १२।२७२।२२ )

सप्तमाधिकरणे—

"तानि परे तथा ह्याह" ४।२।१५ इति सूत्रे

"गताः कलाः पञ्चदश प्रतिष्ठाः" ( मु० ३।२।७ )

"एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्य अस्तं गच्छन्ति ।" ( प्र० ६।५ )

अष्टमाधिकरणे—

"अविभागो वचनात्" ४।२।१६ इति सूत्रे

"भिद्यते चासां नाम रूपे" ( प्र० ६।५ )

"स एषोऽकलोऽमृतो भवति" ( प्र० ६।५ )

नवमाधिकरणे—

"तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥" ४।२।१७ इति सूत्रे

"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥" (छा० ८।६।७)

दशमाधिकरणे—

"रश्म्यनुसारी" ४।२।१८ इति सूत्रे

"अथ तैरेव रश्मिभिरूर्ध्वम् आक्रमते" ( छा० ८।६।५ )

"निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद् दर्शयति च" ४।२।१९ इति सूत्रे

"अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ताः

आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन् आदित्ये सृप्ताः" (छा० ८।६।२)

एकादशाधिकरणे—

"योगिनः प्रति च स्मर्यते स्मार्त्ते चैते" ४।२।२१ इति सूत्रे

"अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः" ( गी० ६।१ )

"इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन् ।" ( गी० ५।१ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

( ४ ) **कीदृशी अस्य पादसंगतिः भविष्यति ।**

अत्र प्रायेण सर्वैः सूत्रैः परलोकगमनप्रकारः एव वर्णितः, तथा कतिपयैः सूत्रैः मुक्तौ देहेन्द्रियाणां लयक्रमोऽपि दर्शितः । "अविभागो वचनात्" ( ४।२।१६ ) इति एकस्मिन् सूत्रे विदेहकैवल्यस्वरूपमपि विवृतमेव । अत्र रामानुजादिभाष्ये व्याख्याकौशलेन जीवब्रह्मणोः मुक्तौ विभागः एव वर्त्तते—इत्येव प्रतिपादितम् । हेतुश्चात्र स्वमतानुरागमात्रमित्येव कल्प्यते । तथा च तेषां यन्निरूपणं, तत् प्रदर्श्यते—

शांकरमते—म्रियमाणस्य उत्क्रान्तिप्रकारदर्शनम् ।

भास्करमते—प्रायेण तथैव ।

रामानुजमते—उत्क्रान्तिप्रकारः ।

निम्बार्कमते—विद्वदविद्वत्साधारणोत्क्रान्तिनिरूपणम् ।

माध्वमते—देवानां मोक्षोत्क्रान्तिनिरूपणम् ।

श्रीकण्ठमते—उपासकस्य विदुषः शरीरात् उत्क्रान्तिनिरूपणम् ।

श्रीपतिमते—त्वं-पदार्थभूतजीवोत्क्रान्त्यादिदशाविशेषफलम् इति ।

वस्तुतः अत्र मतभेदः नाममात्रेण पर्यवसितः ।

---

## चतुर्थाध्याये तृतीयपादे
## प्रथमम् अर्चिराद्यधिकरणम् ।

अत्र "अर्चिरादिना तत्प्रथितेः" ४।३।१ ( ५१८ ) इति सूत्रस्य "अर्चिरादिना" इति पदात् अस्य "अर्चिराद्यधिकरणं" नाम । तत्र एकं वल्लभभाष्यं विहाय सर्वेषु भाष्येषु एतेन एकेन सूत्रेण एतदधिकरणं रचितम् । वल्लभभाष्ये एतदधिकरणे सूत्रचतुष्टयं गृहीतम् ।

अत्र प्रथमान्तपदस्य उहनीयत्वात् पादारम्भाच्च अधिकरणारम्भः संगच्छते । २य सामान्य-नियमात् । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च समुचिता ।

## द्वितीयं वाय्वधिकरणम् ।

अत्र "वायुमब्दादविशेषविशेषाभ्याम्" ४।३।२ (५१९) इति सूत्रस्य "वायु"-शब्दात् अस्य "वाय्वधिकरणं" नाम। तत्र वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु एतेन एकेनैव सूत्रेण एतद् द्वितीयम् अधिकरणं रचितम्। वल्लभभाष्ये एतत् सूत्रं सूत्रचतुष्टयात्मक-तदीयप्रथमाधिकरणस्य द्वितीयं सूत्रम्। तेन अत्र अधिकरणस्य अनारम्भात् तस्य दोषः।

अत्र अस्य विषयश्रुतिवाक्यात् "वायुः" इति प्रथमान्तपदस्य उह्नीयत्वात प्रथमान्त-पदाभावेऽपि विधेयभेदात् अधिकरणारम्भः संगच्छते। ५म सामान्यनियमात्। ११श विशेष-नियमाच्च। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणस्य समाप्तिरपि बोद्धव्या।

## तृतीयं तड़िदधिकरणम् ।

अत्र "तड़ितोऽधि वरुणः सम्बन्धात्" ४।३।३ ( ५२० ) इति सूत्रस्य "तड़ितः" इति पदात् अस्य "तड़िदधिकरणं" नाम। तत्र वल्लभभाष्यभिन्नेषु सर्वेषु भाष्येषु अनेन एकेन सूत्रेण एतदधिकरणं रचितम्। वल्लभभाष्ये तु एतत् सूत्रं तदीयप्रथमाधिकरणस्य चतुर्षु सूत्रेषु तृतीयं सूत्रम्।

अत्र "वरुणः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामान्य-नियमात्। वल्लभभाष्ये अधिकरणस्य अकरणात् दोषः। तत्र पुनः एकम् अधिकं सूत्रं पठितम्। तच्च सूत्रम्—"वरुणाच्चाधीन्द्रः प्रजापतिः" इति। परसूत्रे अधिकसम्मत्या अधि-करणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च सङ्गच्छते एव।

## चतुर्थम् आतिवाहिकाधिकरणम् ।

अत्र "आतिवाहिकास्तल्लिङ्गात्" ४।३।४ ( ५२१ ) इति सूत्रस्य "आतिवाहिकः" इति पदात् अस्य "आतिवाहिकाधिकरणं" नाम। अत्र सर्वेषु भाष्येषु चतुर्थम् अधिकरणम् आरब्धम्। वल्लभभाष्ये तु द्वितीयम् अधिकरणम्। तत्र शंकर-श्रीपति-वल्लभभाष्येषु अत्र सूत्रत्रयं गृहीतम्, भा-रा-नि-श्री-भाष्येषु तु सूत्रद्वयम्, "उभयव्यामोहात् तत्सिद्धेः" (४।३।५) इति सूत्रस्य वर्जनात्। माध्वभाष्ये पुनः सूत्रद्वयं गृहीतम्। तत्र "उभयव्यामोहात् तत्सिद्धेः" (४।३।५) इति सूत्रं न वर्जितम्। तच्च सूत्रत्रयम्—

१। "आतिवाहिकास्तल्लिङ्गात" ४।३।४ ( ५२१ )

२। "उभयव्यामोहात् तत्सिद्धेः" ४।३।५ ( ५२२ )

३। "वैद्युतेनैव ततस्तच्छ्रुतेः" ४।३।६ ( ५२३ )

अत्र ( १ ) "आतिवाहिकास्तल्लिङ्गात्" ४।३।४ (५२१) इत्यत्र "आतिवाहिकाः" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव। ४र्थ सामान्यनियमात्।

( २ ) "उभयव्यामोहात् तत्सिद्धेः" ४।३।५ (५२२) इत्यत्र प्रथमान्तपदाभावात्

नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात् । "तत्"-पदस्य साकांक्षत्वविधानात् ७म विशेषनियमाच्च । भा-रा-नि-श्री-भाष्येषु एतत् सूत्रं न पठितम् ।

( ३ ) "वैद्युतेनैव ततस्तच्छ्रुतेः" ४।३।६ (५२३) इत्यत्र प्रथमान्तपदाभावात् तथैव नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, ७म विशेषनियमाच्च। परसूत्रे अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः सङ्गच्छते एव । अत्र माध्वभाष्ये अधिकरणस्य आरम्भात् दोषः ।

## पञ्चमं कार्य्याधिकरणम् ।

अत्र "कार्य्यं वादरिरस्य गत्युपपत्तेः" ४।३।७ (५२४) इति सूत्रस्य "कार्य्यं" पदात् अस्य "कार्य्याधिकरणं" नाम । अत्र सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । तत्र श-भा-रा-नि-श्री-श्रीप-भाष्येषु पञ्चमाधिकरणं, माध्वभाष्ये षष्ठाधिकरणं, वल्लभभाष्ये तु तृतीयाधिकरणम्, शंकर-वल्लभभाष्ययोः सूत्राष्टकं गृहीतम् । भा-रा-नि-म-श्री-श्रीप-भाष्येषु सूत्रदशकं गृहीतम् । तच्च सूत्राष्टकं—

| | |
|---|---|
| १। "कार्य्यं वादरिरस्य गत्युपपत्तेः" ४।३।७ (५२४) | ५। "स्मृतेश्च" ४।३।११ (५२८) |
| २। "विशेषितत्वाच्च" ४।३।८ (५२५) | ६। "परं जैमिनिर्मुख्यत्वात्" ४।३।१२ (५२९) |
| ३। "सामीप्यात् तु तद्व्यपदेशः" ४।३।९ (५२६) | ७। "दर्शनाच्च" ४।३।१३ (५३०) |
| ४। "कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात्" ४।३।१० (५२७) | ८। "न च कार्य्ये प्रतिपत्त्यभिसन्धिः" ४।३।१४ (५३१) |

अत्र ( १ ) "कार्य्यं वादरिरस्य गत्युपपत्तेः" ४।३।७ (५२४) इत्यत्र "कार्य्यम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात् । स्वमतानुकूलविषयान्तर-ज्ञापक-वादरिमतात् अधिकरणारम्भः युक्त एव । १०म विशेषनियमात् ।

( २ ) "विशेषितत्वाच्च" ४।३।८ (५२५) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, च-कारात् साकांक्षत्वमपि, ६ष्ठ विशेषनियमात् । इति सूत्रद्वयं तु पूर्वपक्षसूत्रम् ।

( ३ ) "सामीप्यात् तु तद्व्यपदेशः" ४।३।९ (५२६) इत्यत्र "तद्व्यपदेशः" इति प्रथमान्तपदसत्त्वेऽपि तु-शब्दयोगात् नास्य अधिकरणारम्भकत्वम् । तु-शब्देन सिद्धान्तपक्षारम्भः । उक्तपूर्वपक्षव्यावृत्तत्वात् नात्र अधिकरणारम्भः । ४र्थ सामान्यनियमात्, ९म १८श विशेषनियमाभ्याम् ।

( ४ ) "कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात्" ४।३।१० (५२७) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । अतः-शब्देन साकांक्षत्वविधानात् ७म विशेषनियमाच्च । ४र्थ सामान्यनियमात् ।

( ५ ) "स्मृतेश्च" ४।३।११ (५२८) इति अत्रापि तथा। इति एतत्त्रयं सिद्धान्त-सूत्रम्। प्रथमान्तपदाभावात् हेतुसमुच्चायक-च-कारात् न अधिकरणारम्भः, ४र्थ सामान्यनियमात् ६ष्ठ विशेषनियमाच्च। अतः परं सूत्रत्रयं पूर्वपक्षज्ञापकम्।

( ६ ) "परं जैमिनिर्मुख्यत्वात्" ४।३।१२ (५२९) इत्यत्र "परं" "जैमिनिः" इति प्रथमान्तपदद्वयसत्त्वेऽपि नाम्ना परमतकीर्त्तनात्, तथा च "कस्मात् परं" इति आकांक्षायां साकांक्षत्वात् नास्य अधिकरणारम्भकत्वम्। एतत् जैमिनेर्मतम् विषयान्तरस्य अज्ञापक-प्रतिकूलार्थक-पूर्वपक्षसूत्रम्। ४र्थ सामान्यनियमात्, १०म विशेषनियमाच्च।

( ७ ) "दर्शनाच्च" ४।३।१३ (५३०) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणा-रम्भकत्वम्। च-कारस्य हेतुसमुच्चयार्थकत्वाच्च। ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च।

( ८ ) "न च कार्य्ये प्रतिपत्त्यभिसन्धिः" ४।३।१४ (५३१) इत्यत्र "प्रतिपत्त्यभिसन्धिः" इति प्रथमान्तपदसत्त्वेऽपि "न च"-पदसमभिव्याहारात् नास्य अधिकरणारम्भकत्वम्। च-कारस्य हेतुसमुच्चायकार्थकत्वात्। ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च। परसूत्रे अधिकरणा-रम्भात् अत्र अधिकरणसमाप्तिः कल्पयितुं शक्यते। इति एतत्त्रयं पुनः पूर्वपक्षसूत्रम्। पूर्वपक्षेण अधिकरणसमाप्तिसाङ्गत्यम् उत्तराधिकरणे विचारयिष्यते।

### षष्ठम् अप्रतीकालम्बनाधिकरणम्।

अत्र "अप्रतीकालम्बनान् नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" ४।३।१५ (५३२) इति सूत्रस्य "अप्रतीकालम्बनान्"-पदात् अस्य "अप्रतीकालम्बनाधिकरणं" नाम। तत्र शंकर-वल्लभ-भाष्ययोः अधिकरणारम्भः दृश्यते, अन्येषु तु न तथा। तेन शांकरभाष्ये सूत्रद्वयात्मक-तदीयषष्ठाधिकरणस्य प्रथमं सूत्रम्, वल्लभभाष्ये सूत्रद्वयात्मकतदीयचतुर्थाधिकरणस्य प्रथमं सूत्रम्। भा-रा-नि-श्री-श्रीप-भाष्येषु सूत्रदशकात्मकतदीयपञ्चमाधिकरणस्य नवमं सूत्रम्। माध्वभाष्ये तु सूत्रदशकात्मकतदीय-षष्ठाधिकरणस्य नवमं सूत्रम्। तच्च सूत्रद्वयम्—

१। "अप्रतीकालम्बनान् नयतीति बादरायण
उभयथाऽदोषात् तत्क्रतुश्च" ४।३।१५ (५३२)

२। "विशेषं च दर्शयति" ४।३।१६ (५३३)

अत्र (१) अप्रतीकालम्बनान् नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" ४।३।१५ (५३२) इत्यत्र "बादरायणः" "तत्क्रतुः" इति प्रथमान्तपदाभ्याम् अस्य अधिकरणारम्भ-कत्वं संगच्छते। स्वमतस्थापनाय विषयान्तरज्ञापनाय च बादरायणः इति प्रथमान्त-"नाम"-पदेन सूत्रस्य रचितत्वात् न दोषः। ततश्च "अमानवः पुरुषः" इति प्रथमान्तपदस्य अत्र उहनीय-त्वात्। अतः अत्र अधिकरणारम्भः युज्यते। ४र्थ सामान्यनियमात् १०म विशेषनियमात् १२श विशेषनियमाच्च। भा-रा-नि-म-श्री-श्रीप-भाष्येषु अत्र अधिकरणं न रचितम्। तत्र एतदधि-

करणम् आरब्धाधिकरणस्य अङ्गत्वेन गृहीतम्। तत् तु आपातदृष्ट्या संगतमेव प्रतिभाति। यतः पूर्ववर्तिकार्य्याधिकरणे "कार्य्यं बादरिरस्य गत्युपपत्तेः" तथा "विशेषितत्वाच्च" इति प्रथमसूत्रद्वयेन बादरिमतं विवृत्य पूर्वपक्षव्यावर्त्तक-तु-शब्दघटितं यत् "सामीप्यात् तु तद्-व्यपदेशः" इति सूत्रं, तद् आरभ्य सूत्रत्रयेण तन्मतं निरस्य "परं जैमिनिर्मुख्यत्वात्" इत्यादि-सूत्रत्रयेण पुनः मतान्तरं विवृतम् इति। ततः "अप्रतीकालम्बनान् नयति इति बादरायणः उभयथाऽदोषात् तत्क्रतुश्च" इति परवर्त्तिसूत्रेण यत् स्वमतवर्णनं तत् जैमिनिमतस्य अस्वारस्यपरम् इत्येव सङ्गतम्। तथापि पूर्वपक्षमतेन अधिकरणसमापनं न संगतम्। अतः आपातदृष्ट्या एतदधिकरणस्य पूर्वाधिकरणाङ्गत्वमेव संगतम् इत्येव अनुमीयते। अन्यथा दोषापत्तेः। सत्यम् एतत्। परन्तु "अप्रतीकालम्बनान् नयति" इति विशिष्य निर्देशात् उपासकसामान्येन अनिर्देशात् विधेयभेदस्य अवश्यम्भावित्वात्, विधेयभेदात् च अस्य पृथगधिकरणत्वं युक्ततरमेव भवति। यदि अत्र एतादृशविशेषनिर्देशः न कृतः स्यात्, तदा एतदधिकरणस्य पूर्वाधिकरणाङ्गत्वं संगतमेव आसीत्, नात्र सन्देहः। परन्तु तथा न कृतम् अत्र। अतः विधेयभेदात् अस्य पृथगधिकरणत्वं संगतमेव। परन्तु तथा सत्यपि पूर्ववर्त्ति-"कार्य्याधिकरणस्य" पूर्वपक्षसूत्रैः समाप्तिकल्पनं न संगतम्; ग्रन्थे अस्मिन् कुत्रापि इयं शैली न अनुसृता। एतदपि सत्यम्; तथापि सूत्राक्षरलब्धस्य अर्थस्य प्राधान्यात्, एतदेव अगत्या स्वीकर-णीयम् इति। अतः अत्र अधिकरणारम्भः समुचितः एव। तथा च भा-रा-नि-म-श्री-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषः एव कल्पनीयः इति।

अत्र इदमपि बोद्धव्यम्—जैमिनिमतेन अधिकरणसमापनं न तावत् सम्पूर्णतया व्याससूत्ररचनाशैलीविरुद्धम्। जैमिनेः अन्यत्र तथाकरणं वैयासिकरीतिविरुद्धम्—इति सत्यम्। जैमिनिमतस्य अंशतः ग्रहणदर्शनात्। यथा—"तद्भूताधिकरणम्" ३।४।१०। अत्र यत् अधिकरणारम्भकसूत्रम् "तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमा-तद्रूपाभावेभ्यः" ३।४।४० इति, तत्र "अपि"-शब्देन भगवतो बादरायणस्य अपि तत्र सम्मति-दर्शनात्"—इति वृत्तौ स्पष्टतयैव उक्तम्। अतः व्यासीयसूत्ररचनाशैलीविरोधः न कल्पनीयः। ततश्च जैमिनीयपूर्वमीमांसाप्रतिपादितशास्त्रतात्पर्य्यनिर्णयकौशलमपि अत्र उत्तरमीमांसाया-मपि सर्वत्र गृहीतमेव। तत्र पूर्वमीमांसायाः या न्यूनता तस्याः परिहारायैव व्यासस्य उत्तरमीमांसा-रम्भः इत्यपि विदितमेव विदुषाम्। अतः जैमिनीयमतं न सर्वतोभावेन व्यासदेवेन वर्जितं निराकृतं वा, कपिलकणादादीनां मतनिराकरणमिव। तेन अत्र जैमिनीयमतेन एतत्-कार्य्याधिकरणस्य समापनं न असंगतम्, न वा वैयासिकसूत्ररचनापद्धतिविरुद्धम्। यद्यपि अत्र जैमिनिमतं वृत्तौ पूर्वपक्षत्वेन उपन्यस्तं दृश्यते, तथापि अत्र कथञ्चित् व्याससम्मतिकल्पनं न भृशं दोषाय भवितुम् उचितम् इत्येव अनुमीयते। अतः प्रथमान्तपदबलेन विधेयभेदात् अत्र

पृथगधिकरणरचनं न असंगतम् इति प्रतिभाति। सिद्धान्तम् अनुक्त्वा पूर्वपक्षेण अधिकरण-समापनमेव दोषावहं तथा व्यासशैलीविरुद्धम्। अत्र न तथा दृश्यते। अतः नात्र दोषः।

( २ ) "विशेषं च दर्शयति" ४।३।१६ (५३३) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। च-कारस्य हेतुसमुच्चयार्थकत्वात्। ४र्थ सामान्यनियमात् ६ष्ठ विशेषनियमाच्च, पादशेषात् तत्रैव अधिकरणसमाप्तिः संगच्छते।

## चतुर्थाध्याये तृतीयपादसमालोचनम्।

इदानीं द्रष्टव्यम् अनेन निवन्धेन अस्मिन् पादे अधिकरणरचनायां—

(१) कति कीदृशाः नियमाः अत्र सङ्कलिताः।

(२) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

(३) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।

(४) उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिर्भविष्यति इति।

एते च चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमः तावत्—

### ( १ ) कति कीदृशाः च नियमाः सङ्कलिताः।

अत्र न कोऽपि नियमः संकलितः।

### ( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः।

अत्र ४।३।२ अधिकरणे वल्लभभाष्ये "वायुमब्दादविशेषविशेषाभ्याम्" ४।३।२ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

४।३।३ अधिकरणे वल्लभभाष्ये "तड़ितोऽधि वरुणः सम्बन्धात्" ४।३।३ इति सूत्रे अधिकरणस्य अनारम्भात् दोषः।

४।३।४ अधिकरणे माध्वभाष्ये "वैद्युतेनैव ततस्तच्छ्रुतेः" ४।३।६ इति सूत्रे अधि-करणस्य आरम्भात् दोषः।

४।३।६ अधिकरणे भा-रा-नि-म-श्री-श्रीप-भाष्येषु "अप्रतीकालम्बनान् नयति इति वादरायण उभयथाऽदोषात् तत्क्रतुश्च" ४।३।१५ इति सूत्रे अधिकरणस्य अरचनायां दोषः।

एवं च अस्मिन् पादे भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| भास्करभाष्ये | १ दोषः | ० |
| रामानुजभाष्ये | १ „ | ० |
| निम्बार्कभाष्ये | १ „ | ० |
| माध्वभाष्ये | १ „ | १ दोषः |
| श्रीकण्ठभाष्ये | १ „ | ० |

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| श्रीपतिभाष्ये | १ दोषः | ० |
| वल्लभभाष्ये | २ दोषौ | ० |

इति वक्तुं शक्यते। तथा च अस्मिन् पादे केवलं शङ्करभाष्यस्यैव दोषाभावः।

इदानीं द्रष्टव्यम्—

**( १ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।**

तत्र प्रथमाधिकरणे—

"अर्चिरादिना तत्प्रथितेः" ४।३।१ इति सूत्रे

"अथ एतैरेव रश्मिभिः ऊर्ध्वम् आक्रमते" ( छा० ८।३।५ )

"ते अर्चिषम् अभिसम्भवन्ति" ( बृ० ६।२।१५ )

"ये च इमे अरण्ये श्रद्धा तप इत्युपासते।" ( बृ० ६।२।१५ )

द्वितीयाधिकरणे—

"वायुमब्दादविशेषविशेषाभ्याम्" ४।३।२ इति सूत्रे

"स एतं देवयानं पन्थानम् आसाद्य अग्निलोकम् आगच्छति, स वायुलोकं, स आदित्यलोकं, स वरुणलोकं, स इन्द्रलोकं, स प्रजापतिलोकं, स ब्रह्मलोकम्।"(कौ० १।३)

"ते अर्चिषम् अभिसम्भवन्ति अर्चिषोऽहः, अह्नः आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षाद् यान् षडुदङ्ङेति मासान् तान्। ( छा० ५।१०।१ )

"मासेभ्यः संवत्सरं, संवत्सरात् आदित्यम्, आदित्यात् चन्द्रमसं चन्द्रमसो विद्युतं तत् पुरुषः अमानवः स एनां ब्रह्म गमयति।" (छा० ५।१०।२)

"यदा वै पुरुषोऽस्मात् लोकात् प्रैति स वायुम् आगच्छति, तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं, तेन स ऊर्ध्वम् आक्रमते, स आदित्यम् आगच्छति।" ( बृ० ५।१०।१ )

तृतीयाधिकरणे—

"तडितोऽधि वरुणः सम्बन्धात्" ४।३।३ इति सूत्र

चतुर्थाधिकरणे—

"आतिवाहिकास्तल्लिङ्गात्" ४।३।४ इति सूत्रे

"अग्निलोकं वायुलोकम्।" ( कौ० १।३ )

"तत् पुरुषोऽमानवः स एनान् ब्रह्म गमयति।" (छा० ४।१५।५)

"वैद्युतेनैव ततस्तच्छ्रुतेः" ४।३।६ इति सूत्रे

"अमानवः स एत्य ब्रह्मलोकं गमयति।" ( ? )

पञ्चमाधिकरणे—

"कार्य्यं वादरिरस्य गत्युपपत्तेः" ४।३।७ इति सूत्रे

"स एतान् ब्रह्म गमयति।" ( छा० ४।१५।५ )

"विशेषितत्वाच्च" ४।३।८ इति सूत्रे

"ब्रह्मलोकान् गमयति।" ( बृ० ६।२।१५ )

"स्मृतेश्च" ४।३।११ इति सूत्रे

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।

परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥" ( महाः ? )

"दर्शनाच्च" ४।३।१३ इति सूत्रे

"तयोर्ध्वम् आयन् अमृतत्वमेति।" ( छा० ८।६।६ )

"न च कार्य्ये प्रतिपत्त्यभिसन्धिः।" ४।३।१४ इति सूत्रे

"प्रजापतेः सभां वेश्म प्रपद्ये।" ( छा० ८।१८।१ )

"ये यदन्तरा तद् ब्रह्म।" ( छा० ८।१४।१ )

षष्ठाधिकरणे—

"अप्रतीकालम्बनान् नयतीति वादरायण उभयथाऽदोषात् तत्क्रतुश्च" ४।३।१५ इति सूत्रे

"नाम ब्रह्म।" ( छा० ७।१।५ )

"विशेषं च दर्शयति" ४।३।१६ इति सूत्रे

"यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति।" ( छा० ७।१।५ )

"वाग्वाव नाम्नो भूयसी।" ( छा० ७।२।१ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

**( ४ ) कीदृशी अस्य पादसंगतिः भविष्यति।**

( ४ ) पादोऽयम् उपासकानाम् उत्क्रान्तिमार्गनिरूपणपरः इति सूत्रतः श्रुतितश्च अवगम्यते। एतदेव यथा विभिन्नभाष्येषु वर्णितं तद् अधस्तात् प्रदर्श्यन्ते। यथा—

शांकरमतेन—सगुणब्रह्मविदः मृतस्य उत्तरमार्गाभिगमनम्।

भास्करमतेन—प्रायेण तथैव ब्रह्मणः सगुणनिर्गुणभेदानङ्गीकारः इत्येव अत्र मतभेदकारणम्।

रामानुजमतेन — अर्चिरादिगतिः।

निम्बार्कमतेन—विदुषो ब्रह्मप्राप्तये गतिनिरूपणम्।

मध्वमतेन—स्वर्गगम्ययोः निरूपणम्।

श्रीकण्ठमतेन— अर्चिरादिगतिनिरूपणम्।

श्रीकरमतेन—अर्चिरादिना मार्गेण गत्यागतिफलम्।

अत्र शंकरमते यत् "सगुणब्रह्मविदः मृतस्य उत्तरमार्गाभिगमनम्" इति उक्तम्, तत् तु तन्मते ब्रह्मणः तादृशभेदस्वीकारादेव। अन्यैः ब्रह्मणः निर्गुणत्वं न स्वीक्रियते। अतोऽत्र अयं प्रभेदः।

इति चतुर्थाध्याये तृतीयः पादः।

## चतुर्थाध्याये चतुर्थपादः।

### प्रथमं सम्पद्याविर्भावाधिकरणम्।

अत्र "सम्पद्याविर्भावः स्वेन शब्दात्" ४।४।१ (५३४) इति सूत्रस्य "सम्पद्याविर्भावः" इति पदेन अस्य "सम्पद्याविर्भावाधिकरणं" नाम। अत्र श-भा-रा-नि-श्री-श्रीप-भाष्येषु सूत्रत्रयं गृहीतम्। माध्वभाष्ये एकं, वल्लभभाष्ये सूत्रचतुष्टयम् इति। तत् च सूत्रत्रयं—

१। "सम्पद्याविर्भावः स्वेन शब्दात्" ४।४।१ (५३४)
२। "मुक्तः प्रतिज्ञानात्" ४।४।२ (५३५)
३। 'आत्मा प्रकरणात्" ४।४।३ (५३६)

अत्र (१) "सम्पद्याविर्भावः स्वेन शब्दात्" ४।४।१ (५३४) इत्यत्र "सम्पद्याविर्भावः" इति प्रथमान्तपदात् तथा पादारम्भात् अस्य अधिकरणारम्भकत्वं युक्तमेव। ४र्थ सामान्यनियमात् २य विशेषनियमाच्च।

(२) "मुक्तः प्रतिज्ञानात्" ४।४।२ (५३५) इत्यत्र "मुक्तः" इति प्रथमान्तपदात् अस्यापि अधिकरणारम्भकत्वं युक्तमेव, तथापि अर्थतः साकांक्षत्वस्य प्राधान्यात् विधेयान्तरत्वाभावाच्च, तन्न युक्तम्। माध्वभाष्ये तथैव कृतमिति दृश्यते। तथापि नियमानुगृहीतत्वात् सतानाम् आचार्य्याणां मतविरुद्धत्वात् नास्य अधिकरणारम्भकत्वकल्पनं समुचितम्। अतः माध्वभाष्ये अधिकरणारम्भात् दोषः। ४र्थ सामान्यनियमात् ४र्थ विशेषनियमाच्च।

(३) "आत्मा प्रकरणात्" ४।४।३ (५३६) इत्यत्रापि तथैव। "आत्मा" इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणारम्भः समुचितः, माध्वभाष्ये तथैव कृतम्। परन्तु पूर्वसूत्रवत् अस्य साकांक्षत्वसिद्धेः विधेयान्तरत्वाभावाच्च नास्य अधिकरणारम्भकत्वं युक्तम्। ४र्थ सामान्यनियमात्, ४र्थ विशेषनियमाच्च। माध्वभाष्ये अधिकरणस्य आरम्भात् दोषः। परसूत्रे अधिक-सम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

### द्वितीयम् अविभागेन दृष्टत्वाधिकरणम्।

अत्र "अविभागेन दृष्टत्वात्" ४।४।४ (५३७) इति सूत्रस्य पदद्वयात् अस्य "अविभागेन दृष्टत्वाधिकरणं" नाम। अत्र श-भा-रा-नि-म-श्री-भाष्येषु एतदेव एकं सूत्रं

गृहीतम्। श्रीपतिभाष्ये तु एतदारम्य सूत्रचतुष्टयं गृहीतम्। वल्लभभाष्ये अधिकरणं न आरब्धम् । तत्र एतत् सूत्रं तदीयसूत्रचतुष्टयात्मकप्रथमाधिकरणस्य चतुर्थं सूत्रम्। माध्व-भाष्ये अनेन चतुर्थाधिकरणं रचितम् ।

अत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वं युक्तम् । तथापि पूर्वसूत्रात् "मुक्तः" "आत्मा" इति एकस्य प्रथमान्तपदस्य अध्याहरात्, अर्थतः विषयभेदात्, विधेयान्तर-त्वात् ऊहनीयप्रथमान्तपदाच्च तद् युक्तमेव। ५म सामान्यनियमात्, ४र्थ विशेषनियमाच्च; अन्वयप्रकारः वृत्तौ द्रष्टव्यः। अत्र वल्लभभाष्ये अधिकरणस्य अनारम्भात् दोषः एव वाच्यः। परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव तस्य समाप्तिः।

## तृतीयं ब्राह्माधिकरणम्।

अत्र "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" ४।४।५ ( ५३८ ) इति सूत्रस्य "ब्राह्मेण" इति पदात् अस्य "ब्राह्माधिकरणं" नाम। अत्र श-भा-रा-नि-म-श्री-व-भाष्येषु अधिकरणम् आरब्धम्। श्रीपतिभाष्ये तु एतत् सूत्रं तदीयद्वितीयाधिकरणस्य चतुर्षु सूत्रेषु द्वितीयं सूत्रम्। श-भा-रा-म-श्री-भाष्येषु सूत्रत्रयं गृहीतम्। निम्बार्कभाष्ये तु सूत्रपञ्चकं, वल्लभभाष्ये च सूत्राष्टकम् इति विशेषः। श-भा-रा-नि-श्री-भाष्येषु एतद्धि तृतीयम् अधिकरणम्, माध्वभाष्ये तु पञ्चमम् अधिकरणम्, वल्लभभाष्ये च द्वितीयम् अधिकरणम्। तच्च सूत्रत्रयम्—

१। "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" ४।४।५ ( ५३८ )

२। "चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः" ४।४।६ ( ५३९ )

३। "एवमप्युपन्यासात् पूर्वभावादविरोधं वादरायणः" ४।४।७ ( ५४० )

अत्र (१) "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" ४।४।५ (५३८) इत्यत्र "जैमिनिः" इति मतान्तरज्ञापकप्रथमान्त-नाम-पदसत्त्वात् अत्र अधिकरणारम्भः युक्तः। २०श विशेषनियमात्, तथापि अस्य विधेयभेदात् "मुक्तः" इति प्रथमान्तं किञ्चित् पदम् अध्याहृत्य तत् करणीयम्। अन्वयार्थं वृत्तिः द्रष्टव्या, ५म सामान्यनियमात्, ४र्थ विशेषनियमात्। श्रीपतिभाष्ये अधिकरणस्य अनारम्भात् दोषः।

( २ ) "चिति तन्मात्रेण तदात्मकत्वाद् औडुलोमिः" ४।४।६ (५३९) इत्यत्र "औडुलोमिः" इति प्रथमान्तपदसत्त्वेऽपि ४र्थ सामान्यनियमात्, प्रथमान्तनाम-पदेन प्रतिकूल-मतान्तरस्य निर्देशात् नास्य अधिकरणारम्भकत्वं युक्तम्। १०म विशेषनियमात्।

(३) "एवमप्युपन्यासात् पूर्वभावादविरोधं वादरायणः" ४।४।७ (५४०) इत्यत्र "वाद-रायणः" इति प्रथमान्तपदेन पूर्वपक्षवर्णनानन्तरं स्वमतप्रदर्शनात् "एवमपि इति" पदाभ्यां च साकाङ्क्षत्वसिद्धेः नास्य अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात्, ६ष्ठ, १०म विशेष-नियमाभ्याम्। परसूत्रे अधिकसम्मत्या अधिकरणस्य आरम्भात् अत्रैव अधिकरणसमाप्तिश्च।

## चतुर्थं सङ्कल्पाधिकरणम् ।

अत्र "सङ्कल्पादेव तु तच्छ्रुतेः" ४।४।८ (५४१) इति सूत्रस्य "सङ्कल्पात्" इति पदात् अस्य "संकल्पाधिकरणं" नाम । निम्बार्क-वल्लभ-भिन्नेषु सर्वेषु भाष्येषु अत्र अधिकरणं रचितम् । तत्र श-भा-रा-श्री-भाष्येषु तदीयचतुर्थाधिकरणे सूत्रद्वयं गृहीतम् । माध्वभाष्ये तदीयषष्ठाधिकरणस्य एतदेव एकं सूत्रम्, श्रीपतिभाष्ये तदीयपञ्चमाधिकरणे पञ्च सूत्राणि । निम्बार्कभाष्ये सूत्रपञ्चकात्मकतदीयतृतीयाधिकरणस्य चतुर्थं सूत्रम् । वल्लभभाष्ये सूत्राष्टकात्मकतदीयद्वितीयाधिकरणस्य चतुर्थं सूत्रम् । तच्च सूत्रद्वयम्—

१। "संकल्पादेव तु तच्छ्रुतेः" ४।४।८ (५४१)

२। "अतएव चानन्याधिपतिः" ४।४।९ (५४२)

अत्र ( १ ) "संकल्पादेव तु तच्छ्रुतेः" ४।४।८ (५४१) इत्यत्र प्रथमान्तपदाभावेऽपि "आविर्भावः" इति एकं प्रथमान्तपदम् अध्याहृत्य अधिकरणं रचनीयम्, अन्वयानुरोधात् । ५म सामान्यनियमात् । तु-शब्दः अनुक्तपूर्वपक्षस्य व्यावर्त्तकः, अत. अधिकरणारम्भः युक्तः । १८श विशेषनियमात् । निम्बार्कवल्लभभाष्ययोः अधिकरणस्य अनारम्भात् दोषः ।

( २ ) "अतएव चानन्याधिपतिः" ४।४।९ (५४२) इत्यत्र "अनन्याधिपतिः" इति प्रथमान्तपदसत्त्वेऽपि च-कारात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात् । ६ष्ठ विशेषनियमाच्च । माध्वभाष्ये अत्र सप्तमाधिकरणस्य आरम्भात् दोषः । परसूत्रे अधिकसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिश्च ।

## पञ्चमम् अभावाधिकरणम् ।

अत्र "अभावं बादरिराह ह्येवम्" ४।४।१० (५४३) इति सूत्रस्य "अभावं"-पदात् अस्य "अभावाधिकरणं" नाम । अत्र श्रीपतिवल्लभभाष्यद्वयभिन्नेषु सर्वेषु भाष्येषु अधिकरणम् आरब्धम् । श्रीपतिभाष्ये एतत् सूत्रं सूत्रपञ्चात्मकतदीयतृतीयाधिकरणस्य तृतीयं सूत्रम्, वल्लभभाष्ये तु सूत्राष्टकात्मकतदीयद्वितीयाधिकरणस्य षष्ठं सूत्रम् । श-भा-श्री-भाष्येषु सूत्रपञ्चकात्मकतदीयपञ्चमाधिकरणस्य प्रथमं सूत्रम् । रामानुजभाष्ये सूत्रसप्तकात्मकतदीयपञ्चमाधिकरणस्य प्रथमं सूत्रम्, निम्बार्कभाष्ये सूत्रसप्तकात्मकतदीयचतुर्थाधिकरणस्य प्रथमं सूत्रम्, माध्वभाष्ये सूत्रसप्तकात्मकतदीयाष्टमाधिकरणस्य प्रथमं सूत्रम् । तच्च सूत्रपञ्चकम्—

१। "अभावं बादरिराह ह्येवम्" ४।४।१० ( ५४३ )

२। "भावं जैमिनिर्विकल्पामननात्" ४।४।११ ( ५४४ )

३। "द्वादशाहवदुभयविधं बादरायणोऽतः" ४।४।१२ ( ५४५ )

४। "तन्वभावे सन्ध्यवदुपपत्तेः" ४।४।१३ ( ५४६ )

५। "भावे जाग्रद्वत् ४।४।१४ ( ५४७ )

अत्र ( १ ) "अभावं बादरिराह ह्येवम्" ४।४।१० (५४३) इत्यत्र "बादरिः" इति प्रथमान्त-नाम-पदेन पूर्वपक्षावतारणेन विषयान्तरनिर्देशात् अधिकरणारम्भस्य युक्तत्वं, तथैव "एवम्" इति अप्रथमान्तपदेन तस्य युक्ततरत्वं कल्पयितुं शक्यते। ४र्थ सामान्यनियमात् ४र्थ विशेषनियमात् २०श विशेषनियमाच्च। श्रीप-ब-भाष्ययोः अधिकरणस्य अनारम्भात् दोषः।

( २ ) "भावं जैमिनिर्विकल्पामननात्" ४।४।११ (५४४) इत्यत्र "जैमिनिः" इति प्रथमान्तनामपदेन विषयान्तरनिर्देशं विनापि पूर्वपक्षकरणात् नास्य अधिकरणाम्भकत्वम्। ४र्थ सामान्यनियमात्, २०श विशेषनियमाच्च।

( ३ ) "द्वादशाहवदुभयविधं बादरायणोऽतः" ४।४।१२ (५४५) इत्यत्र "बादरायणः" इति प्रथमान्तपदसत्त्वेऽपि "अतः" इति पदेन साकांक्षत्वसिद्धेः नास्य अधिकरणारम्भकत्वम्, विषयान्तरस्य अज्ञापनाच्च १०म विशेषनियमात्, ४र्थ सामान्यनियमात्, ७म विशेषनियमाच्च।

( ४ ) "तन्वभावे सन्ध्यवदुपपत्तेः" ४।४।१३ (५४६) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात्, "सन्ध्यवत्" इत्यस्य प्रथमान्तत्वकल्पनेऽपि साकांक्षत्वम् अनिवार्य्यम्, अतो न अधिकरणारम्भकत्वं युक्तम्, ७म विशेषनियमात्। श्रीप-ब-भाष्ययोः अधिकरणस्य आरम्भात् दोषः।

( ५ ) "भावे जाग्रद्वत्" ४।४।१४ (५४७) इत्यत्रापि तथैव ४र्थ सामान्यनियमात्, ७म विशेषनियमाच्च। अतः नास्य अधिकरणारम्भकत्वम्। परसूत्रे अधिकरणारम्भदर्शनात् अत्रैव अधिकरणसमाप्तिः।

## षष्ठं प्रदीपाधिकरणम्।

अत्र "प्रदीपवदावेशस्तथा हि दर्शयति" ४।४।१५ (५४८) इति सूत्रस्य "प्रदीप"-शब्दात् अस्य "प्रदीपाधिकरणं" नाम। अत्र श-भा-श्री-भाष्येषु सूत्रद्वयेन एतत् षष्ठम् अधिकरणम् आरब्धम्। वल्लभभाष्ये तु एतत्सूत्रद्वयेन चतुर्थम् अधिकरणम् आरब्धम्। रा-भाष्ये सूत्रसप्तकात्मकतदीयपञ्चमाधिकरणस्य षष्ठं सूत्रम्, निम्बार्कभाष्ये सूत्रसप्तकात्मकतदीयचतुर्थाधिकरणस्य षष्ठं सूत्रम्। माध्वभाष्ये तथैव अष्टमाधिकरणस्य। श्रीप-भाष्ये सूत्रचतुष्टयात्मकतदीयचतुर्थाधिकरणस्य तृतीयं सूत्रम्। तेन रा-नि-म-श्रीप-भाष्येषु अधिकरणं न आरब्धम्। तच्च सूत्रद्वयम्—

१। "प्रदीपवदावेशस्तथा हि दर्शयति" ४।४।१५ ( ५४८ )

२। "स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि" ४।४।१६ ( ५४९ )

अत्र ( १ ) "प्रदीपवदावेशस्तथा हि दर्शयति" ४।४।१५ (५४८) इत्यत्र "आवेशः"

इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं युक्तम्। "तथा हि" इति पदेन हेतुप्रदर्शनात्। ४र्थ सामान्यनियमात, १२श विशेषनियमाच्च। रा-नि म-श्रीप-भाष्येषु अधिकरणस्य अनारम्भात् दोषः।

( २ ) "स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि" ४।४।१६ (५४९) इत्यत्र "अन्यतरापेक्षम्" इति प्रथमान्तपदात् अस्यापि अधिकरणारम्भकत्वं युक्तं, तथापि "हि"-शब्देन साकांक्षत्वविधानात् न युक्तम्। ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च। परसूत्रे सर्वसम्मत्या अधिकरणारम्भात् अत्रैव अधिकरणसमाप्तिः संगच्छते।

## सप्तमं जगद्व्यापाराधिकरणम्।

अत्र "जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च" ४।४।१७ (५५०) इति सूत्रस्य "जगद्व्यापार" इति शब्दात् अस्य "जगद्व्यापाराधिकरणं" नाम। अत्र सर्वैः अधिकरणम् आरब्धम्। श-भा-श्री-भाष्येषु सप्तमम् अधिकरणं, रा-भाष्ये षष्ठाधिकरणं, नि-श्रीप-व-भाष्येषु पञ्चमाधिकरणं, माध्वभाष्ये नवमाधिकरणम्। श-भ-रा-व-भाष्येषु षट् सूत्राणि गृहीतानि, नि-श्री-श्रीप-भाष्येषु पञ्च सूत्राणि, माध्वभाष्ये चत्वारि सूत्राणि गृहीतानि। तत्रापि एतत् सूत्रं द्विधाकृतमपि दृश्यते। तानि च षट् सूत्राणि—

१। "जगद्व्यापारवर्ज्जं प्रकरणाद् असन्निहितत्वाच्च" ४।४।१७ ( ५५० )

२। "प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" ४।४।१८ ( ५५१ )

३। "विकारवर्त्ति च तथा हि स्थितिमाह" ४।४।१९ ( ५५२ )

४। "दर्शयतश्चैवं प्रत्यक्षानुमाने" ४।४।२० ( ५५३ )

५। "भोगमात्रसाम्यलिंगाच्च" ४।४।२१ ( ५५४ )

६। "अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" ४।४।२२ ( ५५५ )

अत्र ( १ ) "जगद्व्यापारवर्ज्जं प्रकरणाद् असन्निहितत्वाच्च" ४।४।१७ (५५०) इत्यत्र "जगद्व्यापारवर्ज्जम्" इति प्रथमान्तपदात् अस्य अधिकरणारम्भकत्वं संगतमेव। ४र्थ सामान्यनियमात्, १२श विशेषनियमाच्च। माध्वभाष्ये इत्यनेनैव एकं सूत्रम् उत्तरार्द्धेन अपरं सूत्रं पठ्यते। परन्तु तेन अधिकरणरचनाविषये न कोऽपि लाभालाभः दृश्यते। च-कारात् पृथग्हेतुत्वस्य सूचनात् पृथक्सूत्रत्वं युक्तम्, तथापि विजातीयवैलक्षण्याभावात् तन्न युक्तम्। ४र्थ सामान्यनियमात्।

( २ ) "प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" ४।४।१८ (५५१) इत्यत्र प्रथमान्तपदाभावात् तथा "इति चेन्न" इति पदद्वयसत्त्वात् नास्य अधिकरणारम्भकत्वम्। ४र्थ सामान्यनियमात्, ५म विशेषनियमाच्च।

( ३ ) "विकारावर्त्ति च तथा हि स्थितिमाह" ४।४।१९ (५५२) इत्यत्र "विकारवर्त्ति"

इति प्रथमान्तपदसत्त्वेऽपि च-कारात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च ।

( ४ ) "दर्शयतश्चैवं प्रत्यक्षानुमाने" ४।४।२० (५५३) इत्यत्र "प्रत्यक्षानुमाने" इति प्रथमान्तपदसत्त्वेऽपि च-कारात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च । माध्वभाष्ये सूत्रद्वयात्मकदशमाधिकरणारम्भे तस्य दोषः ।

( ५ ) "भोगमात्रसाम्यलिंगाच्च" ४।४।२१ (५५४) इत्यत्र प्रथमान्तपदाभावात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात्, ६ष्ठ विशेषनियमाच्च ।

( ६ ) "अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" ४।४।२२ (५५५) इत्यत्र "अनावृत्तिः" इति प्रथमान्तपदसत्त्वात् अस्य अधिकरणारम्भकत्वं युक्तमपि, "अनावृत्तिः"-शब्देन साकांक्षत्व-विधानात् नास्य अधिकरणारम्भकत्वम् । ४र्थ सामान्यनियमात् । म-नि-श्री-श्रीप-भाष्येषु यथा-क्रमं षष्ठैकादशाष्टमषष्ठाधिकरणानि रचितानि, तेन तेषामेव दोषः । मुक्तपुरुषरूपोद्देश्यस्य ऐक्यात् अनावृत्तिरूपविधेयस्य प्रकृतात् वैजात्याभावात् नास्य पृथगधिकरणारम्भकत्वं युक्तम्, तथैव ग्रन्थसमाप्तेश्च अधिकरणसमाप्तिश्च सुसङ्गता इति ।

## चतुर्थाध्यायचतुर्थपाद-समालोचनम् ।

इदानीं द्रष्टव्यम् अनेन निबन्धेन अस्मिन् पादे अधिकरणरचनायां—

१। कति कीदृशाः नियमाः अत्र सङ्कलिताः ।

२। कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

३। काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः ।

४। उपजीव्यश्रुतिबलेन कीदृशी च पादसंगतिः संगता इति ।

एते च चत्वारः विषयाः अधस्तात् क्रमेण प्रदर्श्यन्ते, तत्र प्रथमस्तावत्—

### ( १ ) कति च कीदृशाः नियमाः अत्र संकलिताः ।

अत्रापि न कोऽपि नूतनो नियमः संकलितः । अतः द्रष्टव्यम्—

### ( २ ) कति च दोषाः कस्य भाष्यस्य कथं संवृत्ताः ।

तत्र ४।४।१ अधिकरणे माध्वभाष्ये "मुक्तः प्रतिज्ञानात्" ४।४।२ सूत्रे अधिकरणस्य आरम्भात् दोषः ।

तत्रैव माध्वभाष्ये "आत्मा प्रकरणात्" ४।४।३ सूत्रे अधिकरणस्य आरम्भात् दोषः ।

४।४।२ अधिकरणे वल्लभभाष्ये "अविभागेन दृष्टत्वात्" ४।४।४ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।४।३ अधिकरणे श्रीपतिभाष्ये "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" ४।४।५ सूत्रे अधिकरणस्य अनारम्भात् दोषः ।

४।४।४ अधिकरणे निम्बार्कवल्लभभाष्ययोः "संकल्पादेव तु तच्छ्रुतेः" ४।४।८ सूत्रे अधिकरणस्य अनारम्भात् दोषः।

तत्रैव माध्वभाष्ये "अत एव चानन्याधिपतिः" ४।४।९ सूत्रे अधिकरणस्य आरम्भात् दोषः।

४।४।५ अधिकरणे श्रीपतिवल्लभभाष्ययोः "तन्वभावे सन्ध्यवदुपपत्तेः" ४।४।१३ सूत्रे अधिकरणस्य आरम्भात् दोषः।

४।४।६ अधिकरणे रा-नि-म-श्रीप-भाष्येषु "प्रदीपवदावेशस्तथा हि दर्शयति" ४।४।१५ सूत्रे अधिकरणस्य अनारम्भात् दोषः—

४।४।७ अधिकरणे माध्वभाष्ये "दर्शयतश्चैवं प्रत्यक्षानुमाने" ४।४।२० सूत्रे अधिकरणस्य आरम्भात् दोषः।

तत्रैव नि-म-श्री-श्रीप-भाष्येषु "अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" ४।४।२२ सूत्रे अधिकरणस्य रचनायां दोषः।

एवं च अस्मिन् पादे भाष्याणां दोषसमाहारे कृते दृश्यते—

| भाष्यनाम | अधिकरणस्य अरचनायां | अधिकरणस्य रचनायां |
|---|---|---|
| माध्वभाष्ये | १ दोषः | ५ दोषाः |
| वल्लभभाष्ये | २ दोषौ | १ दोषः |
| श्रीपतिभाष्ये | २ „ | २ दोषौ |
| निम्बार्कभाष्ये | २ „ | १ दोषः |
| रामानुजभाष्ये | १ दोषः | ० |
| श्रीकण्ठभाष्ये | ० | १ दोषः |

इति वक्तुं शक्यते। तथा च अस्मिन् पादे शङ्करभास्करभाष्ययोरेव दोषाभावः।

इदानीं द्रष्टव्यम्—

**( ३ ) काश्च श्रुतयः कैश्च सूत्रैः उपजीव्यत्वेन गृहीताः।**

तत्र प्रथमाधिकरणे—

"सम्पद्याविर्भावः स्वेन शब्दात्" ४।४।१ इति सूत्रे

"एष सम्प्रसादः अस्मात् शरीरात् समुत्थाय परं ज्योतिः उपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते" ( छा० ८।१२।३ )

"मुक्तः प्रतिज्ञानात्" ४।४।२ इति सूत्रे

"एतं त्वेव ते भूयः अनुव्याख्यास्यामि" ( छा० ८।९।३ )

"आत्मा प्रकरणात्" ४।४।३ इति सूत्रे

"य आत्मा अपहतपाप्मा" ( छा० ८।७।१ )

**द्वितीयाधिकरणे—**

"अविभागेन दृष्टत्वात्" ४।४।४ इति सूत्रे

"ज्योतिः उपसम्पद्य" ( छा० ८।३।४ )

"ब्रह्मैव सन् ब्रह्माप्येति" (बृ० ४।४।६) 'तत्त्वमसि" (छा० ६।८।७ )

**तृतीयाधिकरणे—**

"ब्राह्मेण जैमिनीरुपन्यासादिभ्यः" ४।४।५ इति सूत्रे

"य आत्मा अपहतपाप्मा" "सोऽन्वेष्टव्यः" ( छा० ८।७।१ )

"तस्य सर्वेषु लोकेषु कामचारो भवति" ( छा० ७।२५।२ )

"यः सर्वज्ञः सर्ववित्" ( मु० १।९, २।२।७ )

**चतुर्थाधिकरणे —**

सङ्कल्पादेव तु तच्छ्रुतेः" ४।४।८ इति सूत्रे

"स यदि पितृलोककामो भवति सङ्कल्पादेव अस्य पितरः समुत्तिष्ठन्ति"
( छा० ८।२।१ )

**पञ्चमाधिकरणे—**

"अभावं वादरिराह ह्येवम्" ४।४।१० इति सूत्रे

"सङ्कल्पादेव" (छा० ८।२।१) "य एते ब्रह्मलोके" (छा० ७।१३।१)

"मनसा एतान् कामान् पश्यन् रमते" ( छा० ८।१२।५ )

"भावं जैमिनिर्विकल्पामननात्" ४।४।११ इति सूत्रे

"स एकधा भवति त्रिधा भवति" ( छा० ७।२६।२ )

"द्वादशावदुभयविधं वादरायणोऽतः" ४।४।१२ इति सूत्रे

"द्वादशाहम् ऋद्धिकामा उपेयुः (?) "द्वादशाहेन प्रजाकामं याजयेत्" (?)

"तन्वभावे सन्ध्यवदुपपत्तेः" ४।४।१३ इति सूत्रे

"मनसा एतान् कामान् पश्यन् रमते ( छा० ८।१२।५ )

**षष्ठाधिकरणे—**

"प्रदीपवदावेशस्तथा हि दर्शयति" ४।४।१५ इति सूत्रे

"स एकधा भवति" ( छा० ७।२६।२ )

"तत् केन कं पश्येत् ( बृ० ४।५।१५ )

"ततोऽन्यद् विभक्तं यत् पश्येत् ( बृ० ४।३।३० )

"स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ४।४।१६ इति सूत्रे

"ततोऽन्यद्" (बृ० ४।३।३० ) "तत् केन" ( ४।५।१५ )

सप्तमाधिकरणे—

"जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" ४।४।१७ इति सूत्रे

"आप्नोति स्वाराज्यम्" ( तै० १।६।२ )

"प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" ४।४।१८ इति सूत्रे

"आप्नोति स्वाराज्यम्" ( तै० १।६।२ )

"आप्नोति मनसस्पतिम्" ( तै० १।६।२ )

"विकारावर्त्ति च तथा हि स्थितिमाह" ४।४।१९ इति सूत्रे

"तावानस्य महिमा ततो ज्यायांश्च पूरुषः" ( छा० ३।१२।६ )

"दर्शयतश्चैवं प्रत्यक्षानुमाने" ४।४।२० इति सूत्रे

"न तत्र सूर्य्यो भाति" ( क० ५।१५ )

"न तद् भासयते सूर्य्यः" ( भ० गी० १५।६ )

"भोगमात्रसाम्यलिंगाच्च" ४।४।२१ इति सूत्रे

"आपो वै खलु मीयन्ते लोकोऽसौ" ( ? )

"स यथा एतां देवतां....सलोकतां जयति" ( बृ० १।५।२१ )

"अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्" ४।४।२२ इति सूत्रे

"न च पुनरावर्त्तते" ( छा० ८।१५।१ )

"तेषां न पुनरावृत्तिः" ( बृ० ६।२।१५ )

इदानीं द्रष्टव्यम् एतादृशसूत्रोपजीव्यश्रुतिबलेन—

**( ४ ) कीदृशी अस्य पादसंगतिर्भवितुमुचिता ।**

उदाहृतश्रुतिसन्दर्भेण तथा सूत्राणाम् अक्षरार्थतः एतत्पादप्रतिपाद्यत्वेन यत् प्रतिभाति, तत् सगुणब्रह्मोपासनचरमफलं तथा निर्गुणब्रह्मज्ञानफलमेव । तत्र प्रथमाद्यधिकरणत्रयेण निर्गुणब्रह्मविदां ज्ञानफलं वर्णितं, शिष्टेषु अधिकरणेषु सगुणब्रह्मविदाम् उपासनफलम् इत्येव विशेषः । अत्र ये खलु निर्गुणब्रह्मणः शास्त्रतात्पर्य्यविषयत्वं न अंगीकुर्वन्ति, तेषां मतेन आपादम् अत्र सगुणोपासकानां चरमावस्थावर्णनमिति बोद्धव्यम् । अतः उभयमतसाधारण्येन अत्र साधकानां साधनचरमफलमेव वर्णितम् इति स्थितम् । तथा हि यथा पृथग्भाष्येषु निर्दिष्टं तत् इत्थम्—

शांकरभाष्ये—पूर्वभागेन निर्गुणब्रह्मविदः विदेहकैवल्यप्राप्तिः उत्तरभागेन च सगुणब्रह्मविदो ब्रह्मलोकस्थितिः इति निरूपणम् ।

भास्करभाष्ये—प्रायेण तथैव, भेदस्तु निर्गुणब्रह्मसद्भावे ।

रामानुजभाष्ये—ब्रह्मप्राप्तिस्वरूपम् अपुनरावृत्तिलक्षणम् ।

निम्बार्कभाष्ये—अर्चिरादिमार्गेण परब्रह्मप्राप्तानाम् आविर्भाववर्णनम् ।

माध्वभाष्ये—परब्रह्मप्राप्तानां भोगनिरूपणम् ।

श्रीकण्ठभाष्ये—मुक्तिस्वरूपनिरूपणम् ।

श्रीकरभाष्ये—मुमुक्षूणां मुक्तिस्वरूपप्रकारं विचिन्त्य स्वाभाविकजीवभावनिवृत्तिपूर्वकशिव-प्राप्तिरूप परमपुरुषार्थफलनिरूपणम् ।

अत्रापि यो भेदः दृश्यते स च प्रायेण नाममात्रेणैव, तन्मूलं च अद्वैतविशिष्टाद्वैतादि मतवादभेदः । इदानीं एतच्चतुर्थाध्यायस्य उपसंहारः चिन्तनीय :—

एवं च एतदध्यायस्य चतुर्षु पादेषु यद् आलोचितं तत् सर्वम् इदानीं संग्रहेण चिन्तनीयम् । विज्ञाते च जिज्ञासितविषये यथा तल्लाभाय इच्छा स्वाभाविकी, साधने च समवधारिते तत्फलजिज्ञासापि तथैव स्वाभाविकी । अतः जीवजगद्ब्रह्मज्ञानतत्साधन-निरूपणानन्तरं तत्साधनफलम् अत्र चतुर्थे अध्याये अभिहितम् । अनुसृतः अतः नैसर्गिकः पन्थाः सूत्रकृद्भिः भगवद्भिः ।

तत्र अस्य प्रथमे पादे श्रवणाद्यावृत्त्या निर्गुणम्, उपासनया सगुणं वा ब्रह्म साक्षात्-कृतवतः जीवतः पुण्यपापलेपविनाशलक्षणायाः मुक्तेः अभिधानम्, द्वितीये च पादे म्रियमाणस्य उत्क्रान्तिप्रकारप्रदर्शनम्, तृतीये च पादे सगुणब्रह्मविदः मृतस्य उत्तरमार्गाभिगमनवर्णनम्, तथा अन्तिमे पादे पूर्वभागे निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिकथनम्, उत्तरभागे च सगुण-ब्रह्मविदो ब्रह्मलोकस्थितेः निरूपणम् । तथापि यथा तृतीयाध्यायारम्भे साधनफलभूतपर-लोकगमनप्रकारवर्णनं दृश्यते, एतच्चतुर्थाध्यायस्य प्रारम्भेऽपि तथा श्रवणाद्यावृत्तिलक्षणं साधनमपि वर्णितं दृश्यते । एतद्धि आपातदृष्ट्या अध्यायसंगतिलङ्घनेन मन्तव्यम् । तथापि यथा तृतीयाध्यायस्य परलोकगमनागमनादिप्रकारवर्णनं नित्यानित्यवस्तुविवेकवैराग्यरूपब्रह्मज्ञानसाधन-चतुष्टयान्तर्गत-प्रथमसाधनद्वयसूचकत्वेन गृह्यते, तथा अत्रापि चतुर्थाध्याये यत् श्रवणाद्यावृत्ति-कर्त्तव्यतादिरूपसाधनवर्णनं, तदपि चतुर्थाध्यायप्रतिपाद्यफलनिरूपणस्य अङ्गत्वेन विवेचनीयम् । तेन च विवेचनप्रकारेण इत्थमेव भवितव्यम्, श्रवणमनननिदिध्यासनरूपं यत् साधनं तत् कर्म्मोपासनादिरूपबहिरङ्गसाधनानां, तथा नित्यानित्यवस्तुविवेकशमदमादिषट्सम्पत्तिमुमुक्षुत्व-रूपसाधनचतुष्टयस्य फलरूपमेव भवति । एवं च श्रवणाद्यावृत्तेः अपि फलरूपत्वं सिध्यति । अतः नात्र अध्यायसंगतिलङ्घनं शंकनीयम् ।

ततश्च अत्र सगुणनिर्गुणभेदेन यत् निरूपणं पादविभागतः कृतं, तत् शंकरभाष्यानु-सारेणेति बोद्धव्यम्, भगवद्भास्कररामानुजादीनां मतेन ब्रह्मणः यः निर्गुणत्वोपदेशः श्रुतिषु दृश्यते सोऽपि सगुणपरत्वेन व्याख्यायते । एतदर्थम् अत्रापि "अविभागो वचनात्" ४।२।१६ तथा "अविभागेन दृष्टत्वात्" ४।४।४ इति सूत्रद्वयमेव पुष्कलं निदर्शनम् । अत्र या व्याख्या भगवद्-

भास्कररामानुजादीनां सम्मता, सा तु तेषां स्वकीयसिद्धान्तानुसारिणी, न तु सूत्राक्षरानुयायिनी, इति अतिस्पष्टतया प्रतिभाति। एतदर्थं तत्तत् भाष्यादिकं द्रष्टव्यम्। स्यादेतत् अधुन एतदध्यायस्य समालोचनफलमत्र समाहर्तव्यम्। तद् यथा—

| भाष्यकाराः | प्रथमपादे | | द्वितीयपादे | | तृतीयपादे | | चतुर्थपादे | | समष्टिः |
|---|---|---|---|---|---|---|---|---|---|
| | अधि॰ रचनायां दोषः | अधि॰ अरचनायां दोषः | अधि॰ रचनायां दोषः | अधि॰ अरचनायां दोषः | अधि॰ रचनायां दोषः | अधि॰ अरचनायां दोषः | अधि॰ रचनायां दोषः | अधि॰ अरचनायां दोषः | |
| शं॰ | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| भा॰ | ० | ० | ० | ० | ० | १ | ० | ० | १ |
| रा॰ | ० | ३ | २ | २ | ० | १ | ० | १ | ९ |
| नि॰ | १ | ५ | १ | ७ | ० | १ | १ | २ | १८ |
| म॰ | ० | ६ | ३ | ४ | १ | १ | ५ | १ | २१ |
| श्रीक॰ | १ | ० | ० | २ | ० | १ | १ | ० | ५ |
| श्रीकर | ० | ४ | २ | २ | ० | १ | २ | २ | १३ |
| व॰ | १ | ८ | २ | ६ | ० | २ | १ | २ | २२ |
| | ३ | २६ | १० | २३ | १ | ८ | १० | ८ | ८९ |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| एवं च भास्कर-भाष्ये | | १ | दोषः, | तत्र रचनायां | | ० | अरचनायां | १ |
| रामानुज- | ,, | ९ | दोषाः | ,, | ,, | २ | ,, | ७ |
| निम्बार्क- | ,, | १८ | ,, | ,, | ,, | ३ | ,, | १५ |
| मध्व- | ,, | २१ | ,, | ,, | ,, | ९ | ,, | १२ |
| श्रीकण्ठ- | ,, | ५ | ,, | ,, | ,, | २ | ,, | ३ |
| श्रीकर- | ,, | १३ | ,, | ,, | ,, | ४ | ,, | ९ |
| वल्लभ— | ,, | २२ | ,, | ,, | ,, | ४ | ,, | १८ |
| | | ८९ | | | | २४ | | ६५ |

अत्रापि केवलं शंकरभाष्ये दोषाभावः परिलक्ष्यते।

ततश्च अस्मिन् अध्याये न एकोऽपि नियमः सङ्कलितः। सर्वेषां नियमानां संग्रहः ग्रन्थोपसंहारप्रस्तावे प्रदर्शनीयः।

इदानीं द्रष्टव्यं समग्रव्यासस्य कतमे सूत्रे कस्य कीदृशः दोषः—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| न प्रतीके न हि सः | ४।१।४ | सूत्रे | वल्लभभाष्ये अधिकरणस्य अरचनायां दोषः | | | | १ |
| ब्रह्मदृष्टिरुत्कर्षात | ४।१।५ | ,, | रा-नि-श्रीप-व-भाष्येषु | ,, | ,, | ,, | ४ |
| आसीनः सम्भवात् | ४।१।७ | ,, | वल्लभभाष्ये | ,, | ,, | ,, | १ |
| यत्रैकाग्रता तत्राविशेषात् | ४।१।११ | ,, | रा-नि-म-श्रीप-भाष्येषु | ,, | ,, | ,, | ४ |
| आप्रायणात् तत्रापि हि दृष्टम् | ४।१।१२ | ,, | नि-श्रीप-भाष्ययोः | ,, | ,, | ,, | २ |
| इतरस्याप्येवमसंश्लेषः पाते तु | ४।१।१४ | ,, | मा-नि-व-भाष्येषु | ,, | ,, | ,, | ३ |
| अनारब्धकार्य्ये एव तु पूर्वे तदवधेः | ४।१।१५ | ,, | नि-म-व ,, | ,, | ,, | ,, | ३ |
| अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात् | ४।१।१६ | ,, | म-व-भाष्ययोः | ,, | ,, | ,, | २ |
| अतोऽन्यापि ह्येकेषामुभयोः | ४।१।१७ | ,, | नि-व ,, | ,, | रच० | ,, | २ |
| यदेव विद्ययेति हि | ४।१।१८ | ,, | रा-म-श्री-श्रीप-व-भाष्येषु | ,, | अर० | ,, | ५ |
| भोगेन त्वितरे क्षपयित्वा सम्पद्यते | ४।१।१९ | ,, | म-व-भाष्ययोः | ,, | ,, | ,, | २ |
| तन्मनः प्राण उत्तरात् | ४।२।३ | ,, | नि-व ,, | ,, | ,, | ,, | २ |
| सोऽध्यक्षे तदुपगमादिभ्यः | ४।२।४ | ,, | नि-व ,, | ,, | ,, | ,, | २ |
| भूतेषु तच्छ्रुतेः | ४।२।५ | ,, | रा-म-श्रीप-व-भाष्येषु | ,, | रच० | ,, | ४ |
| नैकस्मिन् दर्शयतो हि | ४।२।६ | ,, | मध्वभाष्ये | ,, | ,, | ,, | १ |
| तदपीतेः संसारव्यपदेशात् | ४।२।८ | ,, | रा-नि-म-श्रीप-व ,, | ,, | अर० | ,, | ५ |
| प्रतिषेधादिति चेन्न शारीरात् | ४।२।१२ | ,, | रा-नि-म-श्री-श्रीप-व ,, | ,, | ,, | ,, | ६ |
| तानि परे तथा ह्याह | ४।२।१५ | ,, | व-भाष्ये | ,, | ,, | ,, | १ |
| अविभागो वचनात् | ४।२।१६ | ,, | नि-श्री-भाष्ययोः | ,, | ,, | ,, | २ |
| रश्म्यनुसारी | ४।२।१८ | ,, | म-नि ,, | ,, | ,, | ,, | २ |
| निशि नेति चेन्न सम्बन्धस्य यावद् देह-भावित्वात् दर्शयति च | ४।२।१९ | ,, | रा-नि-श्रीप-व-भाष्येषु | ,, | रच० | ,, | ४ |
| अतश्चायनेऽपि दक्षिणे | ४।२।२० | ,, | नि-म-व ,, | ,, | अर० | ,, | ३ |
| योगिनः प्रति च स्मर्य्यते स्मार्त्ते चैते | ४।२।२१ | ,, | म-भाष्ये .... | ,, | रच० | ,, | १ |
| वायुमब्दादविशेषविशेषाभ्याम् | ४।३।२ | ,, | व ,, .... | ,, | अर० | दोषः | १ |
| तडितोऽधि वरुणसम्बन्धात् | ४।३।३ | ,, | म ,, .... | ,, | ,, | ,, | १ |
| वैद्युतेनैव ततस्तच्छ्रुतेः | ४।३।६ | ,, | म ,, .... | ,, | रच० | ,, | १ |
| | | | | | | | ६५ |

| | | | | | | |
|---|---|---|---|---|---|---|
| अप्रतीकालम्बनान् नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च | ४।३।१५ | सूत्रे भा-रा-नि-म-श्री-श्रीप-भाष्येषु | | अधि० | अर० | दोषः ६ |
| मुक्तः प्रतिज्ञानात् | ४।४।२ | ,, म | भाष्ये | ,, | रच० | ,, १ |
| आत्मा प्रकरणात् | ४।४।३ | ,, म | ,, | ,, | ,, | ,, १ |
| अविभागेन दृष्टत्वात् | ४।४।४ | ,, व | ,, | ,, | अर० | ,, १ |
| ब्राह्मेण जैमिनिरुपन्यासादिभ्यः | ४।४।५ | ,, श्रीप | ,, | ,, | ,, | ,, १ |
| सङ्कल्पादेव तु तच्छ्रुतेः | ४।४।८ | ,, नि-व | भाष्ययोः | ,, | ,, | ,, २ |
| अतएव चानन्याधिपतिः | ४।४।९ | ,, म | भाष्ये | ,, | रच० | ,, १ |
| तन्वभावे सन्ध्यवदुपपत्तेः | ४।४।१३ | ,, श्रीप-व | भाष्ययोः | ,, | ,, | ,, २ |
| प्रदीपवदावेशस्तथा हि दर्शयति | ४।४।१५ | ,, रा-नि-म-श्रीप-भाष्येषु | | ,, | अर० | ,, ४ |
| दर्शयतश्चैवं प्रत्यक्षानुमाने | ४।४।२० | ,, म | भाष्ये | ,, | रच० | ,, १ |
| अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् | ४।४।२२ | ,, नि-म-श्री-श्रीप-भाष्येषु | | ,, | ,, | ,, ४ |

एवं च येषु सूत्रेषु प्रत्येकं भाष्यस्य दोषाः ते तावत्— समष्टिः— ८९

वल्लभभाष्यस्य दोषाय—

| | |
|---|---|
| न प्रतीके न हि सः | ४।१।४ |
| ब्रह्मदृष्टिरुत्कर्षात् | ४।१।५ |
| आसीनः सम्भवात् | ४।१।७ |
| इतरस्याप्येवमसंश्लेषः पाते तु | ४।१।१४ |
| अनारब्धकार्य्ये एव तु पूर्वे तदवधेः | ४।१।१५ |
| अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात् | ४।१।१६ |
| अतोऽन्यापि ह्येकेषामुभयोः | ४।१।१७ |
| यदेव विद्ययेति हि | ४।१।१८ |
| भोगेन त्वितरे क्षपयित्वा सम्पद्यते | ४।१।१९ |
| तन्मनः प्राण उत्तरात् | ४।२।३ |
| सोऽध्यक्षे तदुपगमादिभ्यः | ४।२।४ |
| भूतेषु तच्छ्रुतेः | ४।२।५ |
| अपीतेः संसारव्यपदेशात् | ४।२।८ |
| प्रतिषेधादिति चेन्न शारीरात् | ४।२।१२ |
| तानि परे तथा ह्याह | ४।२।१५ |
| निशि नेति चेन्न सम्बन्धात् यावद्देहभावित्वात् दर्शयति च | ४।२।१९ |
| अतश्चायनेऽपि दक्षिणे | ४।२।२० |
| वायुमब्दादविशेषविशेषाभ्याम् | ४।३।२ |
| तडितोऽधि वरुणसम्बन्धात् | ४।३।३ |
| अविभागेन दृष्टत्वात् | ४।४।४ |
| सङ्कल्पादेव तु तच्छ्रुतेः | ४।४।८ |
| तन्वभावे सन्ध्यवदुपपत्तेः | ४।४।१३ |

रामानुजभाष्यस्य दोषाय—

| | |
|---|---|
| ब्रह्मदृष्टिरुत्कर्षात् | ४।१।५ |
| यत्रैकाग्रता तत्राविशेषात् | ४।१।११ |
| यदेव विद्ययेति हि | ४।१।१८ |
| भूतेषु यच्छ्रुतेः | ४।२।५ |
| तदपीतेः संसारव्यपदेशात् | ४।२।८ |
| प्रतिषेधादिति चेन्न शारीरात् | ४।२।१२ |

**रामानुजभाष्यस्य दोषाय—**

| | |
|---|---|
| निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च | ४।२।१९ |
| अप्रतीकालम्बनान् नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च | ४।३।१५ |
| प्रदीपवदावेशस्तथाहि दर्शयति | ४।४।१५ |

**निम्बार्कभाष्यस्य दोषाय—**

| | |
|---|---|
| ब्रह्मदृष्टिरुत्कर्षात् | ४।१।५ |
| तत्रैकाग्रता तत्राविशेषात् | ४।१।११ |
| आप्रायणात् तत्रापि हि दृष्टम् | ४।१।१२ |
| इतरस्याप्येवमसंश्लेषः पाते तु | ४।१।१४ |
| आरब्धकार्य्ये एव तु पूर्वे तदवधेः | ४।१।१५ |
| अतोऽन्यापि ह्येकेषामुभयोः | ४।१।१७ |
| तन्मनः प्राण उत्तरात् | ४।२।३ |
| सोऽध्यक्षे तदुपगमादिभ्यः | ४।२।४ |
| तदपीतेः संसारव्यपदेशात् | ४।२।८ |
| प्रतिषेधादिति चेन्न शारीरात | ४।२।१२ |
| अविभागो वचनात् | ४।२।१६ |
| रश्म्यनुसारी | ४।२।१८ |
| निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च | ४।२।१९ |
| अतश्चायनेऽपि दक्षिणे | ४।२।२० |
| अप्रतीकालम्बनान् नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च | ४।३।१५ |
| संकल्पादेव तु तच्छ्रुतेः | ४।४।८ |
| प्रदीपवदावेशस्तथा हि दर्शयति | ४।४।१५ |
| अनावृत्तिः शब्दात् अनावृत्तिः शब्दात | ४।४।२२ |

**श्रीपतिभाष्यस्य दोषाय—**

| | |
|---|---|
| ब्रह्मदृष्टिरुत्कर्षात | ४।१।५ |
| यत्रैकाग्रता तत्राविशेषात् | ४।१।११ |
| आप्रायणात् तत्रापि हि दृष्टम् | ४।१।१२ |
| यदेव विद्ययेति हि | ४।१।१८ |
| भूतेषु तच्छ्रुतेः | ४।२।५ |
| तदपीतेः संसारव्यपदेशात् | ४।२।८ |
| प्रतिषेधादिति चेन्न शारीरात् | ४।२।१२ |
| निशि नेतिचेन्न सम्बन्धस्य यावद् देहभावित्वात् दर्शयति च | ४।२।१९ |
| अप्रतीकालम्बनान् नयति इति बादरायण उभयथा दोषात् तत्क्रतुश्च | ४।३।१५ |
| ब्राह्मेण जैमिनिरुपन्यासादिभ्यः | ४।४।५ |
| तन्वभावे सन्ध्यवदुपपत्तेः | ४।४।१३ |
| प्रदीपवदावेशस्तथा हि दर्शयति | ४।४।१५ |
| अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् | ४।४।२२ |

**माध्वभाष्यस्य दोषाय—**

| | |
|---|---|
| यत्रैकाग्रता तत्राविशेषात् | ४।१।११ |
| इतरस्याप्यवमसंश्लेषः पाते तु | ४।१।१४ |
| अनारब्धकार्य्ये एव तु पूर्वे तदवधेः | ४।१।१५ |
| अग्निहोत्रादि तु कार्य्यायैव तद्दर्शनात् | ४।१।१६ |
| यदेव विद्ययेति हि | ४।१।१८ |
| भोगेन त्वितरे क्षपयित्वा सम्पद्यते | ४।१।१९ |
| भूतेषु तच्छ्रुतेः | ४।२।५ |
| नैकस्मिन् दर्शयतो हि | ४।२।६ |
| तदपीतेः संसारव्यपदेशात् | ४।२।८ |
| प्रतिषेधादिति चेन्न शारीरात् | ४।२।१२ |
| रश्म्यनुसारी | ४।२।१८ |
| अतश्चायनेऽपि दक्षिणे | ४।२।२० |
| योगिनः प्रति च स्मर्य्यते स्मार्त्ते चैते | ४।२।२१ |
| वैद्युतेनैव ततस्तच्छ्रुतेः | ४।३।६ |
| अप्रतीकालम्बनान् नयतीति बादरायण-उभयथा दोषात् तत्क्रतुश्च | ४।३।१५ |

माध्वभाष्यस्य दोषाय—

मुक्तः प्रतिज्ञानात् ४।४।२
आत्मा प्रकरणात् ४।४।३
अतएव चानन्याधिपतिः ४।४।९
प्रदीपवदावेशस्तथा हि दर्शयति ४।४।१५
दर्शयतश्चैवं प्रत्यक्षानुमाने ४।४।२०
अनावृत्तिः शब्दात् अनावृत्तिःशब्दात् ४।४।२२

श्रीकण्ठभाष्यस्य दोषाय—

यदेव विद्ययेति हि ४।१।१८
प्रतिषेधादिति चेन्न शारीरात् ४।२।१२
अविभागो वचनात् ४।२।१६
अप्रतीकालम्बनान् नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ४।३।१५
अनावृत्तिः शब्दात् अनावृत्तिःशब्दात् ४।४।२२

भास्करभाष्यस्य दोषाय—

अप्रतीकालम्बनान् नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्च ४।३।१५

एवं च अधिकरणरचनानियमानुसारेण विभिन्नभाष्याणां पर्य्यालोचने कृते शंकर-भाष्यस्यैव निर्दोषत्वं तथा च व्यासमतसन्निकृष्टत्वम् उपलभ्यते।

अत्रेदं द्रष्टव्यम्, ब्रह्मजिज्ञासया प्रवृत्तस्य शास्त्रस्य प्रथमाद्यध्यायद्वये स्वपक्षस्थापन-परपक्षखण्डनाभ्याम् यथा साक्षात् तत्त्वनिर्णयः कृतः, तथा साधनफलाख्यतृतीयचतुर्थाध्याय-द्वयेऽपि षड्विधतात्पर्य्यनिर्णयान्तर्गताभ्यासमुखेन प्रसंगतः तत्त्वनिर्देशः कृतः इति। स च तृतीयाध्याये द्वितीयपादे पञ्चम-षष्ठ-सप्तमाधिकरणेषु दृश्यते, तथा चतुर्थाध्याये चतुर्थपादे प्रथमादितृतीयाधिकरणेषु अपि उपलभ्यते। अत्र यत् सूत्रितं भगवता सूत्रकारेण, तेन ब्रह्मणः निर्गुणत्वपक्षः यथा स्फुटीभवति न तथा तस्य सगुणत्वपक्षः, उभयत्वपक्षो वा इति च। तत्र सगुणब्रह्मवादिनां तथा तस्य सगुणत्वनिर्गुणत्वोभयत्वपक्षपातिनां मतेन व्याख्यानं क्लिष्टकल्पनमेव प्रतिभाति। तथापि "अनावृत्तिः शब्दात्" इति उपसंहारसूत्रेण, सगुणब्रह्मविदां ब्रह्मलोकात् अनावृत्तिकथनात् "अथातो ब्रह्मजिज्ञासा" इति उपक्रमसूत्रोक्तं ब्रह्मणः सगुणत्वमेव प्रसज्यते, न तु निर्गुणत्वम् इत्येव सूत्रकाराभिप्रायः इत्येवं शंक्यते। परन्तु एतादृशी शङ्का न समीचीना। उपसंहारे सगुणनिर्गुणब्रह्मविदाम् उभयेषां फलवर्णनस्य उपपत्तेः; "अविभागेन दृष्टत्वात्" इति सूत्रात् निर्गुणब्रह्मविदामेव फलवर्णनं स्पष्टम्। तथापि सगुणब्रह्मविदां सुखभोगसम्भावनायाः प्रकारप्रदर्शनाय कैमुतिकन्यायेन तेषां ब्रह्मलोकप्राप्तानाम् अनावृत्ति-कथनम् इति अयमेव सूत्रकाराणाम् आशयः। अन्यथा अभ्यासापूर्वताप्रभृतिलिंगानां व्यर्थतापत्तिः, श्रुतियुक्तिविरोधापत्तिश्च। ततश्च उपक्रमोपसंहारयोः मध्ये उपक्रमस्यैव बलाधिक्यम् इति प्रसिद्धेः। एतदर्थं महामहोपाध्यायसर्वतन्त्रस्वतन्त्र-अप्पयदीक्षित-विरचितः "उपक्रमपरा-क्रमः" ग्रन्थः अनुसन्धेयः। तत्र प्रथमसूत्रे ब्रह्मजिज्ञासायाः विषयीभूतं यद् ब्रह्म तत् तु निर्गुणम् इत्येव संगतम्। ज्ञानफलम् अज्ञाननिवृत्तिरेव, सा च निवृत्तिः अधिष्ठानज्ञानेनैव सम्भवति। तच्च अधिष्ठानं निर्विशेषमेव स्यात्, सविशेषस्य अधिष्ठानत्वे विरोधाणां ब्रह्मणा

साकं सम्बन्धस्य दुर्निरूपतया, तेषां कल्पितत्वस्य अवश्यम्भावितया सविशेषब्रह्मणि कल्पिते तद्घटकीभूतविशेषाणामपि कल्पनायै विशेषान्तरापेक्षायाम् अनवस्थापत्तेः, निर्विशेषचिन्मात्र-स्यैव अधिष्ठानत्वं युक्तम् । एवं च निर्विशेषब्रह्मज्ञानायैव विचारकर्तव्यता उपक्रमसूत्रे प्रतिज्ञाता इति स्पष्टम् । तेन उपक्रमबलाधिक्यात् उपसंहारसूत्रं तदानुकूल्येन व्याख्येयम् । निर्गुण-ब्रह्मविदां लोकाभावात् सिद्धा एव अपुनरावृत्तिः, सगुणब्रह्मविदां लोकसत्त्वेऽपि अपुनरावृत्तिः, ब्रह्मलोके ब्रह्मणा तारकब्रह्ममन्त्रस्य उपदेशदानश्रवणात् ( नृः ताः उपः ) अतो व्यर्थैव इयमा-शङ्का । अग्रे अन्तिमे उपसंहारे एतत् सविस्तरं वक्ष्यते । एवं च एतदध्यायेऽपि शङ्कर-भाष्यस्यैव निर्दोषत्वं व्यासमतसन्निकृष्टत्वं च प्रसिध्यति ।

इति चतुर्थाध्याय-समालोचनम् ।

## तृतीयपादोपसंहारः

एवं च अधिकसम्मत्यनुसारेण सूत्रकृताम् एतद्ब्रह्मसूत्रग्रन्थस्य यद् रचनाकौशलं प्रतीयते, तदवलम्ब्य अस्य अधिकरणरचनायाः पर्यालोचने कृते यत्प्राप्तं तदेव इदानीं प्रदर्शनीयम् । अधिक-सम्मतनियमानुसारेण प्रत्यध्यायं विभिन्नभाष्यदोषाणां यः पृथक् निर्णयः कृतः स एवात्र इदानीं समाह्रियते । द्वितीयपादान्ते सूत्ररचनानियमनिरपेक्षनिर्णयः मतसाम्याधिक्यानुसारी निर्णयो वा प्रदर्शितः, अधुना एतत्तृतीयपादान्ते सूत्ररचनानियमसापेक्षनिर्णयफलं प्रदर्श्यते । तथाहि—

| भाष्यनाम | प्रथमाध्याये | | द्वितीयाध्याये | | तृतीयाध्याये | | चतुर्थाध्याये | | |
|---|---|---|---|---|---|---|---|---|---|
| भाष्यनाम | अधि० रचनायाम् | अधि० अरचनायां | अधि० रचनायाम् | अधि० अरचनायां | अधि० रचनायाम् | अधि० अरचनायां | अधि० रचनायाम् | अधि० अरचनायां | समष्टिः |
| शं० | ० | ० | ० | ० | ० | ० | ० | ० | |
| भा० | ० | ० | ० | ० | १ | १ | ० | १ | ३ |
| रा० | १ | ४ | ११ | ५ | ४ | १५ | २ | ७ | ४६ |
| नि० | १ | ८ | १० | १० | २ | २० | ३ | १५ | ६१ |
| म० | ४ | ३ | १८ | १४ | ४२ | १९ | ६ | १२ | १२१ |
| श्री० | ३ | ३ | ६ | ६ | ६ | ६ | ३ | ५ | ५७ |
| श्रीप० | ० | ० | २ | ५ | ९ | १३ | ३ | ७ | ३९ |
| व० | २ | २ | १० | ९ | १४ | २१ | ४ | १८ | ८८ |
| | ११ | २० | ६० | ४९ | ८१ | १०६ | २४ | ६५ | ४१६ |

एतेन प्रतीयते—

| | | | | | |
|---|---|---|---|---|---|
| शंकरभाष्ये | दोषाभावः | | माध्वभाष्ये | १२१ | दोषाः |
| भास्कर ,, | ३ | दोषाः | श्रीकण्ठ ,, | ४७ | ,, |
| रामानुज ,, | ४९ | ,, | श्रीपति ,, | ३९ | ,, |
| निम्बार्क ,, | ६९ | ,, | वल्लभ ,, | ८८ | ,, |

एते च नियमसापेक्षदोषाः । अत्र यदि तेन सह द्वितीयपादनिरूपितनियमनिरपेक्षाः दोषाः तुलिताः स्युः, तदा इत्थमेव फलम्—

| भाष्यनाम | नियमनिरपेक्षदोषाः | नियमसापेक्षदोषाः | समष्टिः |
|---|---|---|---|
| शांकरभाष्ये | १३ | ० | १३ |
| भास्करभाष्ये | ११ | ३ | १४ |
| रामानुजभाष्ये | २३ | ४९ | ७२ |
| निम्बार्कभाष्ये | ४३ | ६९ | ११२ |
| माध्वभाष्ये | १०६ | १२१ | २२७ |
| श्रीकण्ठभाष्ये | २८ | ४४ | ७२ |
| श्रीपतिभाष्ये | १९ | ४२ | ६१ |
| वल्लभभाष्ये | ७६ | ८८ | १६४ |
| समष्टिः | ३१६ | ४१६ | ७३५ |

अधुना यदि अत्रोक्त-४१६-दोषाणां विश्लेषणं कृतं स्यात्, केषु केषु सूत्रेषु कस्य कति दोषाः इति पृथक् कृत्वा प्रदर्शिताः स्युः, तदा इत्थमेव फलं लभ्यते—

(१) तत्र प्रथमम् एकैकस्य भाष्यस्य दोषाः —

रामानुज भाष्यदोषाः—१।२।११, १।३।३१, ३।३।३२ सूत्रेषु =३ दोषाः ।

भास्करभाष्यदोषः —३।२।१४क सूत्रे=१ दोषः

निम्बार्कभाष्यदोषाः— १।१।४, १।४।२३, २।३।१०, २।३।११, २।३।१७, २।३।४२, २।३।१७
३।१।२४, ३।२।३८ सूत्रेषु=९ दोषाः

माध्वभाष्यदोषाः—१।१।२५, १।३।४३, १।४।८, १।४।९, १।४।१६, २।१।३, २।१।५, २।१।१२,
२।१।१४ २।१।१७, २।२।५, २।२।६, २।२।९, २।२।२८, २।२।३०, २।३।१६,

२।३।२६, २।३।२८, २।३।३०, २।३।३१, २।३।४१, २।३।५१, २।४।३, २।४।४, २।४।१२, ३।१।२, ३।१।३, ३।१।४, ३।१।५, ३।१।६, ३।१।७, ३।१।९, ३।१।१५, ३।१।१६, ३।१।१८, ३।१।२७, ३।२।५, ३।२।६, ३।२।२८, ३।२।३४, ३।२।३७, ३।३।१३, ३।३।१७, ३।३।२१, ३।३।२८, ३।३।३३, ३।३।३५ ३।३।३७, ३।३।४६, ३।३।५०, ३।३।५१, ३।३।५२, ३।४।१०, ३।४।१३, ३।४।१४ ३।४।३२, ३।४।३४, ३।४।४०, ३।४।४७, ४।२।६, ४।२।२१, ४।३।६, ४।४।२, ४।४।३, ४।४।९, ४।४।२० सूत्रेषु=६६ दोषाः

श्रीकण्ठभाष्यदोषाः—१।१।१६, १।२।३, १।२।१७, २।१।८, २।१।२१, २।४।१४, २।४।१६, ३।३।२२, ३।३।४१, सूत्रेषु=९ दोषाः

श्रीपतिभाष्यदोषाः —३।४।१७, ४।४।५ सूत्रयोः=२ दोषौ

वल्लभभाष्यदोषाः — १।१।३, १।२।५, २।१।२, २।१।१७, २।३।२६, २।४।५, २।४।६, २।४।१५, ३।१।२१, ३।१।२२, ३।२।१०, ३।२।२५, ३।२।२८, ३।३।१०, ३।३।११, ३।३।१९, ३।३।२३, ३।३।२६, ३।३।३०, ३।३।३६, ३।३।५३, ३।३।५४, ३।३।५५, ३।४।४४, ३।४।५१, ४।१।४, ४।१।७, ४।२।५, ४।३।२, ४।३।३, ४।४।४ सूत्रेषु=३१ दोषाः

(२) भाष्यद्वयदोषाः —

रा० नि० भाष्ययोः दोषाः—१।३।४०, २।३।८, २।३।१४ सूत्रेषु=६ दोषाः

रा० म० „ „ २।३।१९ सूत्रे=२ दोषौ

नि० म० „ „ १।४।१९, २।२।२८, ३।३।२७, ३।४।२६, ४।२।१८सूत्रेषु=१०दोषाः

नि० श्री० „ „ १।४।१४, ३।४।५२, ४।२।१६ सूत्रेषु=६ दोषाः

नि० श्रीप० „ „ ३।३।३१, ४।१।१२ सूत्रयोः=४ दोषाः

नि० व० „ „ १।४।२८, ३।२।९, ४।१।१७, ४।२।३, ४।२।४, ४।४।८ सूत्रेषु=१२ दोषाः

म० श्री० „ „ २।२।२६, ३।३।१२ सूत्रयोः=४ दोषाः

म० व० „ „ २।१।७, २।१।२६, २।२।७, २।४।१०, २।४।२१, ३।१।१७, ३।१।२३, ३।१।२६, ३।२।८, ३।२।१४, ३।२।१९, ३।२।२३, ३।३।६, ३।३।२० ३।४।२१, ३।४।२३, ३।४।२५, ३।४।२८, ३।४।३६, ४।१।१६, ४।१।१९ सूत्रेषु=४२ दोषाः

श्रीप० व० „ „ २।१।३२, ३।३।६३, ४।४।१३ सूत्रेषु=६ दोषाः

श्री० व० „ „ ३।४।५० सूत्रे=२ दोषौ

श्री० श्रीप० भाष्ययोः दोषाः ३।४।४६ सूत्रे = २ दोषौ

रा० श्रीप० „ „ २।४।८, ३।३।२८ सूत्रयोः = ४ दोषाः

(३) भाष्यत्रयदोषाः —

रा० नि० श्री०—१।३।२२, १।३।४२, २।३।११, २।३।१२, २।३।१३, २।३।१५ सूत्रेषु = १८ दोषाः

रा० नि० व०—२।१।३४, ३।२।२२ सूत्रयोः = ६ दोषाः

रा० म० व०—२।३।१६ सूत्रे = ३ दोषाः

रा० श्री० श्रीप०—२।२।३२, ३।४।२७ सूत्रयोः = ६ दोषाः

रा० म० श्रीप० ३।२।२७ सूत्रे = ३ दोषाः

नि० म० व०—१।४।१५, ४।१।१४, ४।१।१५, ४।२।२० सूत्रेषु = १२ दोषाः

नि० श्रीप० व०—२।४।१३ सूत्रे = ३ दोषाः

म० श्री० श्रीप०—३।२।३६ सूत्रे = ३ दोषाः

म० श्री० व०—३।४।४८ सूत्रे = ३ दोषाः

म० श्रीप० व०—३।३।६५ सूत्रे = ३ दोषाः

रा० नि० श्रीप०—२।३।९, ३।३।६० सूत्रयोः = ६ दोषाः

(४) भाष्यचतुष्टयदोषाः —

रा० म० श्रीप० व०—४।२।५ सूत्रे = ४ दोषाः

रा० नि० श्री० श्रीप०—३।३।१६, ३।४।४१ सूत्रयोः = ८ दोषाः

रा० नि० श्रीप० व०—३।३।९, ३।३।१४, ४।१।५, ४।२।१९ सूत्रेषु = १६ दोषाः

रा० नि० श्री० व०—२।१।३७, ३।३।५ सूत्रयोः = ८ दोषाः

नि० म० श्री० श्रीप०—४।४।२२ सूत्रे = ४ दोषाः

नि० म० श्री० व०—२।४।९ सूत्रे = ४ दोषाः

रा० नि० म० श्रीप०—३।३।४०, ४।१।११, ४।४।१५ सूत्रेषु = १२ दोषाः

(५) भाष्यपंचकदोषाः —

रा० नि० म० श्री० व०—२।२।१२ सूत्रे = ५ दोषाः

रा० म० श्री० श्रीप० व०—४।१।१८ सूत्रे = ५ दोषाः

रा० नि० म० श्रीप० व०—३।४।१८, ४।२।८ सूत्रयोः = १० दोषाः

रा० नि० म० श्री० श्रीप०—२।१।३०, ३।३।२९, ३।३।४५, ३।४।४१, सूत्रेषु = २० दोषाः

रा० नि० श्री० श्रीप० व०—३।३।३४, ३।२।२७ सूत्रयोः = १० दोषाः

भा० रा० नि० श्री० श्रीप०—३।३।३६ सूत्रे = ५ दोषाः

(६) भाष्यषट्कदोषाः —

भा० रा० नि० म० श्री० श्रीप०— ४।३।१५ सूत्रे = ६ दोषाः

रा० नि० म० श्री० श्रीप० व०--२।३।४०, ४।२।२२ सूत्रयोः = १२ दोषाः

एतेन एकाकी कः कतिषु सूत्रेषु दोषाक्रान्तः, तथा द्वौ मिलित्वा, त्रयः मिलित्वा, चत्वारः पंच षट् च मिलित्वा कतिषु सूत्रेषु दोषग्रस्ताः इति सर्वं ज्ञातुं शक्यते। तथा च कस्य केन सह कीदृशः सम्बन्धः सोऽपि अवगन्तुं शक्यः। नियमनिरपेक्षमतसाम्याधिक्यविचारस्थले द्वितीयपादे एवंरीत्या बहुशः विचारितम्। अत्रापि तथा कर्तुं शक्यते, बाहुल्यभयात् विरम्यते।

अत्र नियमनिरपेक्षं नियमसापेक्षं च यद् द्विविधनिर्णयफलं प्रदर्शितं, तत्र नियमसापेक्षं यत्फलं तदेव मुख्यत्वेन ग्रहणीयम्। यतः तत्र नियमरचनायाम् अष्टानां भाष्याणां मध्ये अधिकसम्मतिरेव निर्दोषत्वस्य व्यासमतसन्निकृष्टत्वस्य च हेतुत्वेन कल्पिता। तादृशनियमनिबद्धैः भाष्याणां दोषादोषनिर्णयः कृतः एव। तेन दोषश्चात्र स्वस्वीकृतनियमलंघनमेव नान्यः। नियमनिरपेक्षदोषादोषनिर्णयकाले यत् तत्निर्णायकत्वेन गृहीतम्, एतद्ग्रन्थस्य द्वितीयपादे, तत्तु आचार्यवर्याणां महत्त्वम् असाधारणत्वादिकमेव गुणजातम्। अत्र तु तथा न कृतमिति बोद्धव्यम्। परन्तु तत्र इदं विचार्यं यत् सिद्धान्तानुसारेणैव भास्करादयः सप्त आचार्याः शंकराचार्यसिद्धान्तविरोधिनः। शंकराचार्यस्तु अद्वैतवादी, भास्कराचार्यादयः सर्वे तद्विरोधिनः। भास्करः द्वैताद्वैतवादी, रामानुजः विशिष्टाद्वैतवादी, निम्बार्कः द्वैताद्वैतवादी, मध्वः द्वैतवादी, श्रीकण्ठः शैवविशिष्टाद्वैतवादी, श्रीपतिः शैवविशिष्टाद्वैतवादी, वल्लभः शुद्धाद्वैतवादी इति। अतः अद्वैतसिद्धान्तविरोधित्वे सर्वे सजातीयाः। यत्र एकस्य विरोधिनः एकाधिकाः भवन्ति, तत्र मतसाम्याधिक्यफलम् एकस्यैव प्रतिकूलं भवति। अतः एतादृशमतसाम्यसार्थक्यं न सम्यक् सफलम्, तथापि कालगतपरत्वापरत्वानुरोधेन शंकरभिन्नानां सर्वेषां शंकरात् अपरत्वं निश्चितमेव। ब्रह्मसूत्रग्रन्थस्य शंकरप्राक्तनभाष्यादीनाम् उपलब्धिः तेषां मध्ये नैकस्यापि अभवत् इति तेषाम् वचनादिभिरेव अनुमातुं शक्यते। शंकरभाष्ये संगृहीतपूर्वपक्षादयः एव भास्करादिपरभविकानाम् आचार्याणाम् प्राचीनमतावगमोपायः आसीत् इत्येव बहुभिः कल्प्यते। यद्यपि भास्कराचार्यः उपवर्षाचार्यमतानुसारीति तदीयभाष्ये उक्तम्, रामानुजाचार्यः बोधायनमतानुगामीति तदीयभाष्ये घोषितम्, एवम् अन्येऽपि निम्बार्क-मध्वाचार्यादयः सर्वे स्वकीयभाष्याणां प्राचीनर्षिमतमूलकत्वादिकं प्रतिपादयितुं प्रयतमानाः आसन् इति दृश्यते, तथापि तत्र कियत्परिमाणं विश्वासार्हत्वं सत्यं वा, तत् नितरां विवादास्पदीभूतमिति निरपेक्षचेतसाम् अनुभवः। अतः साक्षाद्व्यासमूलकमतवादिभिः परवर्तिभिः सह अथवा सम्प्रदायसंरक्षणमतिभिः विरुद्धपक्षावलम्बिभिः

सह मतसाम्याधिक्यमात्रोपायेन व्यासमतविप्रकृष्टत्वरूपदोषविनिर्णयः न सम्यक् पन्थाः भवितुम् अर्हति। अतः अत्र सर्वैः प्रायेण स्वीकृतयुक्त्यनुकूलनियमानुसारेण यः निर्णयः स एव अत्र कथञ्चित् सत्यसमीपवर्त्ती इति कल्पनं विना गत्यन्तरं नास्तीति समीचीनं मतम्। अधिक-स्वीकृतानां तथा स्वस्वीकृतानां नियमानां स्थलान्तरे लंघनमेव अत्र दोषत्वेन गृहीतम्। अवतार-कल्पानाम् अनन्यसाधारणज्ञानसम्पन्नानां, किमधिकं दैवीशक्तिसमन्वितानाम् आचार्याणां यदि दोषत्वेन किमपि सम्भाव्यं स्यात् मेरुसविधे सर्षपतुलितानाम् अस्माकं दृष्टौ तदा तत्र अयमेव एकः पन्थाः विद्यते नान्यः। तेन नियमाधीननिर्णयफलमेव अत्र शरणम्। व्याससम्मतभाष्यनिर्णयकामैः विद्वद्भिः तदनुसारेण शंकरभाष्यस्यैव निर्दोषत्वम्, अथ किं व्यासमतानुमतत्वम् इत्येव सिध्यति। तदनन्तरं भास्कर-श्रीपति-श्रीकण्ठ-रामानुज-निम्बार्क-वल्लभ-माध्वभाष्याणां यथाक्रमं स्थानम्। भास्करे सम्प्रदायानुरोधाल्पत्वात् शंकरसमसामयिकत्वाच्च दोषाल्पत्वमेव आपतितम् इति कल्पयितुं शक्यते। रामानुज-निम्बार्क-माध्वानां सम्प्रदायाः यथा अधुनापि प्राबल्येन उपलभ्यन्ते, भास्करस्य न तथा पूर्वस्मिन् कालेऽपि। ततश्च रामानुजादीनां मध्ये अद्वैतिभिः सह साम्प्रदायिकविरोधः अपि अभवत् इत्यपि प्रवादादिरूपेण श्रूयते; अतस्तेषां भाष्यादिषु शांकरमतानुसरणसम्भावना अतियत्नेन तैः निवारिता। शंकरसमये गृहविवादः नासीत्, भास्करसमये स आरब्धः, रामानुजादीनां समये स च प्रबलो जातः। तेन मतभेदोऽपि शांकरभाष्येण सह तेषां रामानुजादीनां समधिकः समभवत्। भास्करे तु एतेषाम् अभावात् शंकरव्याख्यानेन सह तस्य व्याख्यानं नात्यन्तं पृथक् सञ्जातम्। अतः नियमसापेक्षनिर्णयः एव अत्र कथञ्चित् सत्यसंस्पर्शी भवितुम् अर्हति इति कल्प्यते।

## नियमानां परीक्षणम्

परन्तु तथा सत्यपि, अत्र संकलितनियमानां परीक्षणं कर्त्तव्यम्। नियमसंकलनेऽपि यदि पक्षपातादिकदोषाः प्रसज्येरन् तदा तादृशनियमैः किम् आश्वसनीयम्। अतोऽत्र प्रतिपादं विक्षिप्तान् समग्रान् नियमान् संगृह्य समग्रेषु ५५५ सूत्रेषु कथं ते प्रयुज्यन्ते इत्येव अत्र वयं विचारयामः। एतत् कार्यं प्रतिसूत्रम् अस्माभिः कृतमेव, तदेवात्र पुनः द्रष्टव्यं स्मर्तव्यं वा। दृष्टं च आदितः अन्तपर्यन्तं विंशतिः नियमाः संकलिताः अस्मिन् तृतीये पादे, तथैव एकादशसामान्य-नियमाः एतद्ग्रन्थस्य प्रथमपादरूपभूमिकाभागे ८२—८४ पृष्ठयोः निरूपिताः इति। ते च सामान्यनियमाः, यथा—

## सामान्यनियमाः

१। एकेन वा एकाधिकसूत्रेण वा यथाप्रयोजनम् अधिकरणानि रचयितव्यानि। तेन कियन्ति सूत्राणि प्रत्यधिकरणं वर्तिष्यन्ते तत्र न नियमः। (८२ पृष्ठः द्रष्टव्यः)

२। यत्र एकेन सूत्रेण अधिकरणं रचितं स्यात्, तत्र तदेव सिद्धान्तसूत्रं भवत्येव। न तु पूर्वपक्षसूत्रं क्वचिदपि। तत्र पूर्वाधिकरणस्य सिद्धान्तं दृष्ट्वा पूर्वपक्षः उहनीयः। (८२ पृः)

३। अधिकरणद्वयमध्ये यः सम्बन्धः सोऽत्र संगतिशब्देन व्यवह्रियते। (८२-३ पृः)

४। उद्देश्यतया विधेयतया वा सूत्रस्थप्रथमान्तपदस्यैव अधिकरणारम्भसूचकत्वम्। यथा "जन्माद्यस्य यतः" इति सूत्रे जन्मादिपदम्। ( ८३ पृः )

५। उह्नीयप्रथमान्तपदस्यापि अधिकरणारम्भसूचकत्वम्। यथा—"शास्त्रयोनित्वात्" इति सूत्रे "तद् ब्रह्म सर्वज्ञम्" इति उह्नीयप्रथमान्तपदम्। ( ८३ पृः )

६। यत्र एकाधिकेन सूत्रेण अधिकरणं रचितं स्यात्, तत्र सर्वाणि कचित् सिद्धान्त-बोधकानि, कचित् कतिपयानि तथा, शिष्टानि पूर्वपक्षबोधकानि यथा। विलक्षणत्वाधिकरणम् ( ३।२।३ ) ( ८३ पृः )

७। पूर्वपक्षसूत्रम् अधिकरणारम्भे तन्मध्ये वा दृश्यते, मतान्तरज्ञापनार्थं कचिदन्ते, यथा ४।३।५ कार्याधिकरणे पूर्वपक्षेण अधिकरणसमाप्तिः। यत्र पूर्वपक्षानन्तरं सिद्धान्तपक्षः ततः पूर्वपक्षः मतान्तरज्ञापनार्थम् उक्तः, तत्रैव पूर्वपक्षसूत्रे अधिकरणसमाप्तिः नान्यत्र। ( ८३ पृः )

८। कुत्रचित् सूत्रशृङ्खलामध्ये आक्षेपसमाधानरूपेण एकाधिकवारम् पूर्वपक्षसूत्राणि सिद्धान्तसूत्राणि च दृश्यन्ते। यथा १।३।८ देवताधिकरणम्। ( ८४ पृः )

९। कुत्रचित् एकस्मिन् एव सूत्रमध्ये पक्षद्वयं सन्निवेशितम्। यथा—"गौणश्चेन्नात्म-शब्दात्" इति १।१।६ सूत्रम्। ( ८४ पृः )

१०। एकेन एकाधिकसूत्रेण वा यत्र अधिकरणं भवति, तत्र अधिकरणस्य षडङ्गानि अन्तर्निहितानि विज्ञेयानि। ( ८४ पृः )

११। अधिकरणांगानि षट्, यथा—संगतिः, फलभेदः, विषयः, संशयः, पूर्वपक्षः, सिद्धान्तपक्षः इति। सूत्रकृता तु एतत्क्रमानुसारेण नैकमपि अधिकरणं स्पष्टतया रचितम्, टीकाकृद्भिः सर्वत्र एतत् प्रदर्शितम्। ( ८४ पृः )

## विशेषनियमाः

१। सूत्रान्तर्गतपदानुसारेण अधिकरणनामकरणं सम्पादनीयम्, पुनरुक्तिशंका चेत् प्रतिपाद्यविषयाद्यनुसारेण तत् कर्त्तव्यम्। ( २ भा० २ पृः )

यथा—"अथातो ब्रह्मजिज्ञासा" १।१।१ इति सूत्रस्य जिज्ञासा-पदेन अस्य जिज्ञासाधि-करणं नाम। "अतएव प्राणः" १।१।२३ अत्र प्राणाधिकरणं नाम कृत्वा "प्राणस्तथानुगमात्" १।१।२८ अत्र पुनरुक्तिशंकया प्रतर्दनाधिकरणं नाम कृतं, प्राणशब्दस्य उभयत्र दृष्टत्वात्।

२। अध्यायारम्भे पादारम्भे च अधिकरणारम्भः नियमेन करणीयः। (२ भा० २पृः)

यथा—"आवृत्तिरसकृदुपदेशात्" ४।१।१ इत्यत्र "सर्वत्र प्रसिद्धोपदेशात्" १।२।१ इति अत्र वा अधिकरणम् आरब्धम्।

३। उद्देश्यतया विधेयतया वा निराकांक्षप्रथमान्तपदस्य पुनः प्राप्तिपर्यन्तम् अधि-

करणस्थितिः कल्पनीया । तेन यावत् न अधिकरणारम्भक-तादृशप्रथमान्तपदघटितं सूत्रं पुनः उपलभ्यते तावत् अधिकरणम् असमाप्तम् इत्येव आयातम् । ( २ भा० ३ पृः )

यथा "ईक्षतेर्नाशब्दम्" १।१।५ इति सूत्रस्य अनन्तरम् आनन्दमयोऽभ्यासात् १।१।१२ इति सूत्रात् पूर्वसूत्रपर्यन्तम् ईक्षत्यधिकरणस्य स्थितिः इति गम्यते ।

४। उद्देश्यविधेयान्यतरभेदात् विषयभेदात् वा अधिकरणभेदेन सूत्रभेदः साधीयान्, अथवा अधिकरणावयवभेदबोधनात् विधेयभेदाद् वा सूत्रभेदः युक्तः । किंवा अवयवविशेषस्य वैशिष्ट्यसाधनात् सूत्रभेदः करणीयः । चेत्-पदघटित-सूत्रव्यतिरिक्तस्थले अधिकरणमध्ये पूर्वपक्षसिद्धान्तपक्षभेदात् सूत्रभेदः युक्तः । च-कारादिपदेन अधिकरणावयवहेतु-दृष्टान्तादीनाम् एकैकस्य विजातीयवैलक्षण्यविधानाद् वा सूत्रभेदः साधीयान् । ( २ भा० ४ पृः )

यथा—"शास्त्रयोनित्वात् १।१।३" इति सूत्रे शास्त्रयोनित्वरूपहेतुप्रदर्शनाद् यदेव साध्यत्वेन कल्पनीयं, यथा ब्रह्मणः सर्वज्ञत्वं शास्त्रप्रमाणकत्वं वा, तेन ब्रह्मरूपोद्देश्यस्य जगत्कारणरूपविधेयभिन्नत्वव्यवस्थापनात् अथवा शास्त्रप्रमाणकत्वरूपविधेयभेदसाधनात्—"शास्त्र-योनित्वात्" इति सूत्रेण अधिकरणारम्भः संगच्छते, तेन अस्य पृथक्सूत्रत्वं युक्तम् । अतः "जन्माद्यस्य यतः शास्त्रयोनित्वात्" इति एकसूत्रत्वकल्पनं वल्लभमतेन अवैधं भवति । तथैव निम्बार्कमतेन "शास्त्रयोनित्वात्" इति सूत्रेण सह "तत् तु समन्वयात्" इति सूत्रस्य एकाधि-करणत्वम् अयुक्तं भवेत्, विधेयभेदात् ।

५। यदि सूत्रमध्ये "अथ 'चेत्' 'चेन्न' 'इति चेत्' 'इति चेन्न' इत्यादिपदसत्त्वं तदा अधिकरणं नारम्भणीयम् ।" ( २ भा० ६ पृः )

यथा—"गौणश्चेन्नात्मशब्दात्" १।१।६ इति सूत्रे "गौणः" इति प्रथमान्त-पदसत्त्वेऽपि 'चेत्'-शब्दयोगात् नास्य अधिकरणारम्भकत्वम् ।

६। 'च' 'अपि' 'वा' 'हि' पदयोगात् अधिकरणावयवानां हेतुप्रभृतीनां समुच्चायकत्वेन अध्याहृतस्य अनध्याहृतस्य वा प्रथमान्तपदस्य साकांक्षत्वे सिद्धे नाधिकरणारम्भकत्वम् । ( २ भा० ८ पृः )

यथा—"मान्त्रवर्णिकमेव च गीयते" १।१।१५ इति सूत्रस्य 'च'-कारशब्दात् "मान्त्र-वर्णिकम्" इति प्रथमान्तपदसत्त्वेऽपि नाधिकरणारम्भकत्वम् । 'च'-कारेण अत्र हेतोः समुच्चा-यकत्वविधानात्, न तु उद्देश्यविधेयभेदसाधनात् । "अन्तवत्त्वं सर्वज्ञता वा" २।२।४१ इत्यत्र वा-शब्देन साकांक्षत्वविधानात् । "अपि च स्मर्यते" १।३।२३ इत्यत्र प्रथमान्तपदाध्याहारेऽपि "अपि च" शब्देन साकांक्षत्वात् नाधिकरणारम्भकत्वम् । "देवादिवदपि लोके" २।१।२५ इत्यत्र 'अपि' शब्दयोगात् साकांक्षत्वेन नाधिकरणारम्भः । "भाक्तं वा नात्मवित्त्वात् तथा हि दर्शयति" ३।१।७ इत्यत्र 'वा'-शब्दात् साकांक्षत्वम् ; अतः नाधिकरणारम्भः । "अरूपवदेव हि तत् प्रधानत्वात्"

३।२।१४ इत्यत्र 'हि' शब्दस्य साकांक्षत्वसाधकत्वम्। तेन अत्रापि नाधिकरणारम्भः कृतः।

७। इतरादिशब्दात् अर्थात् 'इतरः' 'अन्यः' 'वाक्यशेषः' 'तद्वत्प्रसंगः' 'अन्यथा' 'अप्राप्तिः' 'गौणी' 'प्रतिज्ञाहानिः' 'अविरोधः' 'व्यतिरेकः' 'एवम्' 'अथ' 'अस्मात्' 'तत्' 'अतः' 'अनेन' 'असार्वत्रिकी' 'विभागः' इत्यादिशब्दवत् स्वरूपतः सापेक्षत्वार्थकप्रथमान्तपदस्य न अधिकरणारम्भकत्वम्।" ( २ भा० ८ पृः )

यथा—"नेतरोऽनुपपत्तेः" १।१।१६ इति सूत्रस्य 'इतरः' इति प्रथमान्तपदस्य 'कस्मात् इतरः' 'कस्य इतरः' इत्यर्थबोधनेन साकांक्षत्वसिद्धेः नाधिकरणारम्भकत्वम्। तेन श्रीकण्ठमतेन अत्र अधिकरणारम्भः न संगतः। तथैव "भेदव्यपदेशाच्चान्यः" १।१।२१ इति सूत्रे 'अन्यः' इति पदात् नास्य अधिकरणारम्भकत्वम्। "प्राणादयः वाक्यशेषात्" १।०।१२ इत्यत्र 'वाक्यशेषात्' इति पदात् साकांक्षत्वविधानात् नाधिकरणारम्भः। "अपीतौ तद्वत्प्रसंगात् असमञ्जसम्" २।१।८ इत्यस्मिन् सूत्रे "तद्वत्प्रसंगात्" इति पदात् साकांक्षत्वात् नाधिकरणारम्भः। "असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा" २।२।२० इत्यत्र 'अन्यथा'-पदेन साकांक्षत्वविधानात् नाधिकरणारम्भः। "प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्" २।२।२२ इति अत्र "अप्राप्तिः"-पदेन साकांक्षत्वस्य विधानात् नाधिकरणारम्भः। "गौणी असम्भवात्" २।३।३ इत्यत्र 'गौणी'-पदेन साकांक्षत्वविधानात् नाधिकरणारम्भः। "प्रतिज्ञाहानिरव्यतिरेकशब्देभ्यः" २।३।६ इत्यत्र "प्रतिज्ञाहानिः"-पदेन साकांक्षत्वविधानात्, "अविरोधश्चन्दनवत्" २।३।२३ इत्यत्र 'अविरोधः'-पदेन साकांक्षत्वात्, "व्यतिरेको गन्धवत्" २।३।२६ इत्यत्र 'व्यतिरेक'-शब्देन साकांक्षत्वात्, "प्रकाशादिवन्नैवं परः" २।३।४६ अत्र 'एवं'-शब्देन साकांक्षत्वविधानात्, "रेतःसिग्योगोऽथ" ३।१।२६ अत्र 'अथ'-शब्दात् साकांक्षत्वात्, "अतः प्रबोधोऽस्मात्" ३।१।८ इति अत्र 'अतः अस्मात्' पदाभ्यां साकांक्षत्वात् "अतोऽनन्तेन तथा हि लिंगम्" ३।२।२६ अत्र "अतः तथा हि"-शब्दाभ्यां साकांक्षत्वात् "अनेन सर्वगतत्वम् आयामशब्दादिभ्यः" ३।२।३७ अत्र 'अनेन'-शब्देन साकांक्षत्वात्, "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" ३।३।३० अत्र 'तत्'-शब्देन साकांक्षत्वात्, "असार्वत्रिकी" ३।०।१० इति अत्र स्वरूपतः साकांक्षत्वात्। "विभागः शतवत्" ३।०।११ अत्र 'विभागः'-शब्दस्य स्वरूपतः साकांक्षत्वात् अत्र नाधिकरणरम्भः।

८। विरोधे सति प्रतिपाद्यानुसारेण अधिकरणनामकरणं करणीयम्। (२ भा० ११ पृः)

यथा—"प्राणस्तथानुगमात्" १।१।२८ इति सूत्रे 'प्राण'-शब्देन नाधिकरणनामकरणम्, किन्तु तत्तात्पर्यानुसारेण। यथा 'प्रतर्दनाधिकरणम्' इति नाम कृतम्। "अत एव प्राणः" १।१।२३ इति सूत्रे प्राणाधिकरणनामकरणात् विरोधापत्तिः।

९। यत्र अनिषेधार्थक 'तु' शब्देन सह प्रथमान्तपदसत्त्वं तत्र तेन नाधिकरणारम्भः करणीयः। ( २ भा० ११ पृः )

यथा "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" १।१।३० इति सूत्रे "उपदेशः" इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्, अनिषेधार्थक-'तु'-शब्दयोगात्। "तत् तु समन्वयात्" १।१।४ इति सूत्रे 'तु'-शब्दस्य निषेधार्थकत्वं यथा दृष्टं नात्र तथा। अत्र अर्थसंकोचस्य विधानात्।

१०। "विषयान्तरसूचनात् ऋते प्रथमान्त-नाम-पदेन सिद्धान्तपक्षभूत-स्वमतानुकूल-मतान्तरज्ञापने तथा स्वनाम्ना स्वमतज्ञापने च तत्प्रथमान्तपदस्य नाधिकरणारम्भकत्वम्। (२ भा० २३ पृ० )

यथा—"साक्षादपि अविरोधं जैमिनिः" १।२।२८ इति सूत्रे "जैमिनिः" इति प्रथमान्तपदसत्त्वेऽपि नास्य अधिकरणारम्भकत्वम्; प्रथमान्त-नाम-पदेन सिद्धान्तभूत-स्वमतानुकूल-मतान्तरज्ञापनात्। तथैव "अभिव्यक्तेरित्याश्मरथ्यः" १।२।२९ "अनुस्मृतेर्बादरिः" १।२।३० "सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति" १।२।३१ इति सूत्राणाम्। तथैव "परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ इति पूर्वपक्षसूत्रेण विषयान्तरसूचनात् "कार्यं बादरिरस्य गत्युपपत्तेः" ४।३।७ इति सिद्धान्तसूत्रेण विषयान्तरसूचनात् अधिकरणारम्भः। तथैव "तदुपर्यपि बादरायणः सम्भवात्" १।३।२६ इति सूत्रेण विषयान्तरसूचनात् अधिकरणारम्भः।

११। प्रथमान्तपदाभावेऽपि उद्देश्यविधेयान्तरसमुच्चायक-हेतुसमुच्चायक-'च'-कारादि-शब्दयोगेऽपि तथा 'चेत्'-शब्दयोगेऽपि एवं च अधिकरणनिषेधेऽपि विषयश्रुतिभेदात् अधिकरणभेदः करणीयः।

यथा—"अनुकृतेस्तस्य च" १।३।२२ इति सूत्रे प्रथमान्तपदाभावात् 'अनुकृतेः' इति हेतुबोधकशब्देन सह 'च'-कारयोगेन हेतुसमुच्चायकत्वबोधनात् नास्य अधिकरणारम्भकत्वम्; तथापि 'न तत्र सूर्यो भाति' ( मुण्डक २।२।१० ) इत्यादि श्रुतेर्विषयत्वात् पूर्वाधिकरणाश्रित-दहरश्रुतितः भेदात् च अत्र अधिकरणारम्भः संगच्छते। तथा "नातिचिरेण विशेषात्" ३।१।२३ इति सूत्रेऽपि बोद्धव्यम्।

१२। प्रथमान्तपदाभावेऽपि यत्र 'अपि' 'च' 'वा' 'हि'-प्रभृति-प्रसंगान्तरत्वबोधक-शब्देन उद्देश्यविधेयान्यतरभेदः प्रसज्येत, तत्र पृथग् अधिकरणं युक्तम्।

यथा—"न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च" १।४।११ इति सूत्रे प्रथमान्त-पदाभावेऽपि 'अपि'-शब्देन तथा 'च'-कारेण प्रसंगान्तरस्य बोधनात् अस्य अधिकरणारम्भकत्वम्।

१३। 'च' 'अपि' प्रभृतिपदेन उद्देश्यविधेयान्यतरातिरिक्तविषयस्य उद्देश्यविधेय-विशेषणरूपेण सन्निवेशे 'अपि'-पदस्य 'च'-कारस्य च नाधिकरणारम्भबाधकत्वम्।

यथा—"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" १।४।२३ इति सूत्रे पूर्वाधिकरणोक्तं ब्रह्मणः निमित्तकारणत्वरूपविधेयत्वविधानं तदनन्तरम् अत्र 'च'-कारेण ब्रह्मणः प्रकृतित्व-

रूपोपादानकारणत्वप्रत्यायनात् विशेषणद्वारा विधेयान्तरस्य विधानात् अधिकरणभेदः युज्यते एव। एतावन्तः नियमाः प्रथमाध्याये संकलिताः इति।

१४। 'चेत्' 'इति चेन्न'-प्रभृतिशब्दसत्त्वेऽपि यत्र शंकाभागे पंचम्यन्त-प्रथमान्त-पदद्वयसत्त्वं तत्र अधिकरणारम्भः युक्तः ।

यथा--"भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" २।१।१३ इति सूत्रे शंकाभागे "भोक्त्रापत्तेः" इति पंचम्यन्तपदस्य तथा 'अविभागः' इति प्रथमान्तपदस्य सत्त्वात् अत्र अधिकरणारम्भः युक्त एव।

१५। यत्र पूर्वसूत्रे 'व्याख्यातम्' 'तदुक्तम्' एवंसजातीयकं प्रसंगसमाप्तिसूचकं पदं, तत्र परसूत्रस्य निराकांक्षत्वबोधकत्वे सति अधिकरणारम्भः करणीयः ।

यथा—"विकरणत्वान्नेति चेत् तदुक्तम्" २।१।३१ इति सूत्रात् परं यत् "न प्रयोजनवत्त्वात्" २।१।३२ इति सूत्रं, तत्र प्रथमान्तपदाभावेऽपि तस्य अधिकरणारम्भकत्वम्। तथा "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" २।१।१२ इति सूत्रात् परं भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" २।१।२३ इति सूत्रे अधिकरणारम्भः।

१६। यत्र हेतुत्रयं 'च'-कारादिपदेन समाह्रियते, तत्र अधिकरणसमाप्तिकल्पनं समुचितम्। तेन तदनन्तरं यत् सूत्रं तत्र प्रथमान्तपदाभावेऽपि तेन अधिकरणारम्भः संगच्छते।

यथा—"उपपद्यते चाप्युपलभ्यते च" २।१।३६ इति सूत्रात् परं "सर्वधर्मोपपत्तेश्च" २।१।३७ इति सूत्रेण अधिकरणारम्भः संगच्छते। तथा "नैकस्मिन्नसम्भवात्" २।२।३३ इति सूत्रे इतः पूर्ववर्त्तिसूत्रद्वये 'च'-कारद्वयस्य वर्तमानत्वात् अधिकरणारम्भकत्वम्।

१७। पूर्वापरसूत्रयोर्मध्ये च-कारयोगात् मध्यपतितसूत्रस्य प्रथमान्तपदस्य साकांक्षत्वम्, तेन तस्य न अधिकरणारम्भकत्वम्। हेतुबोधकप्रवाहान्तःस्थितस्य च-कारस्य मध्येऽपि अध्याहारेण साकांक्षत्वविधानात् मध्यपतितस्य प्रथमान्तपदस्य न अधिकरणारम्भकत्वम्।

यथा—"वैधर्म्याच्च न स्वप्नादिवत्" २।२।२९ इति सूत्रात् अनन्तरं "न भावोऽनुपलब्धेः" २।२।३० इति सूत्रं, ततः "क्षणिकत्वाच्च" २।२।३१ इति सूत्रम्; अत्र "न भावोऽनुपलब्धेः" २।२३० इति मध्यपतितसूत्रस्य प्रथमान्तपदसत्त्वेऽपि अस्य पूर्वापरसूत्रद्वयमध्ये 'च'-कारयोगात् न अधिकरणारम्भकत्वम्। "पञ्चवृत्तिर्मनोवद् व्यपदिश्यते" २।४।१२ इति अत्रापि तथा। "नानुमानमतच्छब्दात्" १।३।३ इति अत्र अपि तथा।

१८। उक्तपूर्वपक्षे प्रथमान्तपदेन सह निषेधार्थक-'तु'-शब्दस्य न अधिकरणारम्भकत्वम्। अनुक्तपूर्वपक्षव्यावर्तकत्वे 'तु'-शब्दस्य न बाधकत्वम्।

यथा—"तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत्" २।३।२९ इति सूत्रे पूर्वपक्षव्यावर्तक-'तु'-शब्दसत्त्वेऽपि 'तद्गुणसारत्वात्' इति पदेन पूर्वपक्षस्य उक्तत्वात् नास्य अधिकरणारम्भकत्वम्।

"तत्तु समन्वयात्" १।१।० इति सूत्रस्य अनुक्तपूर्वपक्षत्वात् पूर्वपक्षव्यावर्तक-'तु'-शब्देन अधिकरणारम्भकत्वम्। अत्र न तथा।

१९। 'तु'-शब्दवर्जित-प्रथमान्तपदात् 'स्यात्'-शब्दसत्त्वम् अधिकरणारम्भकम्।

यथा—"पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत्" ३।३।४५ इति सूत्रे 'पूर्वविकल्पः' इति प्रथमान्तपदसत्त्वेऽपि 'तु'-शब्दयुक्त-'स्यात्'-शब्दस्य अभावात् नास्य अधिकरणारम्भकत्वम्। तथैव "स्मर्यमानमनुमानं स्यादिति" १।२।२५ इति सूत्रे न अधिकरणारम्भः। अत्र प्रथमान्तपदसत्त्वेऽपि 'तु'-युक्त-'स्यात्'-शब्दस्य अभावात्। तथैव "शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्" ३।४।२७ इत्यत्र बोद्धव्यम्। तेन "चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" २।३।१६ इति सूत्रे प्रथमान्तपदात् 'तु'-शब्द-युक्त-'स्यात्'-शब्दस्य वर्तमानत्वात् अधिकरणारम्भकत्वम्, अतः न व्यभिचारः।

२०। पूर्वपक्षसूत्रीय-प्रथमान्त-नाम-पदेन परमतनिर्देशे कृते तेन विषयान्तर-सूचिते अधिकरणारम्भः करणीयः। विषयान्तरस्य अनिर्देशे न करणीयः।

यथा—"स्वामिनः फलश्रुतेरित्यात्रेयः" ३।४।४४ इति सूत्रे अधिकरणारम्भः कृतः। परन्तु "साक्षादप्यविरोधं जैमिनिः" १।२।२८ इति सूत्रस्य स्वमतप्रतिकूलपूर्वपक्षत्वाभावात् अनेन न अधिकरणारम्भः कृतः। अत्र स्वमतानुकूलमतान्तरज्ञापनमात्रस्य कृतत्वात्। तथा "परामर्शं जैमिनिरचोदना चापवदति हि" ३।४।१८ इति सूत्रेण प्रथमान्त-नाम-पदेन स्वमतप्रतिकूलविषयान्तरस्य ज्ञापनात् अधिकरणारम्भः कृतः। इति विशेषनियमाः।

एतैः नियमनिवहैः अष्टानां भाष्याणाम् अधिकरणरचनाविषयकं तुलनाफलं यत् लब्धं तत्तु प्रदर्शितमेव। नियमनिरपेक्षतुलनाफलं तु एतद्ग्रन्थस्य द्वितीये पादे सन्निबद्धम्। सूत्रपाठे, सूत्रयोगे, सूत्रविभागे, अतिरिक्तसूत्रग्रहणे, गृहीतसूत्रवर्जने, तथा सूत्रक्रमविपर्यये च दशानां भाष्याणां तुलना कृता। तत् तुलनाफलमपि द्वितीयपादोपसंहारे प्रदर्शितम्। तत्र नियमादिकं न किंचित् अवलम्बितम्, असम्भावितत्वात्। सूत्रकृतां स्वातन्त्र्यं न सर्वथा युक्तितन्त्रम्। शांकर-भाष्यादपि प्राचीनतरं भाष्यं यदि किंचन प्राप्स्यत, तदा तद्भाष्येण सह तुलयित्वा भाष्याणां दोषादोषविचारः कथंचित् समभविष्यत्। परन्तु तादृशभाष्यादिकम् इदानीं नैकमपि लभ्यते। अतः कतमः पाठः समीचीनः इति जानाति भगवान् वादरायणः स्वयम्। अतः व्याससम्मत-ब्रह्मसूत्रभाष्यविनिर्णये, नियमसापेक्षं यत् अधिकरणरचनातुलनाफलं तदेव अत्र प्रमाणं शरणं च अस्माकम्। सूत्रपाठादिविषयकतुलनाफलं तन्निर्णये अलम्।

## नियमानां प्रकृतिनिर्णयः।

एतेषां सामान्य-विशेषनियमानां मध्ये चतुर्थ-विशेषनियममन्तरेण सर्वे नियमाः अकि-

करणविषयकाः । तत्र कतिचित् अधिकरणप्रकृतिपरिचायकाः, कतिचित् अधिकरणनाम-निर्देशविषयकाः, अपरे च अधिकरणारम्भणीयत्वविषयकाः तन्निषेधविषयकाश्च वर्तन्ते ।

सामान्यनियमानां मध्ये, चतुर्थ-पंचमौ अधिकरणारम्भविषयकौ, अन्ये अधिकरण-परिचायकाः ।

विशेषनियमानां तु तृतीयः एव अधिकरणप्रकृतिपरिचायकः । अधिकरणनाम-निर्देशविषयकौ प्रथमाष्टमौ । अधिकरणारम्भणीयत्वविषयकाः द्वितीय-एकादश-द्वादश-त्रयोदश-चतुर्दश-पंचदश-षोडश-ऊनविंश-विंश-संख्यकाः नियमाः । अधिकरणारम्भणीयत्वनिषेधविषय-कास्तु पंचम-षष्ठ-सप्तम-नवम-दशम-सप्तदश-अष्टादश-संख्यकनियमाः । चतुर्थविशेषनियमस्तु सूत्रविषयकः एव ।

( १ ) तत्रापि प्रकारान्तरेण प्रथमान्तपदसंक्रान्तनियमाः त्रयः, यथा—चतुर्थ-पंचम-साधारण-नियमौ, तथा तृतीयविशेषनियमः इति ।

( २ ) पादारम्भे अधिकरणारम्भ-करणीयत्वनियमः—द्वितीयः विशेषनियमः एकः एव।

( ३ ) च-कारादि-पदसंक्रान्तनियमाः—४र्थः, ६ष्ठः ; ११शः, १२शः, १३शः, १६शः, १७शः इति सप्त ।

( ४ ) 'चेत्' शब्दघटितनियमौ—५मः, १४श इति द्वौ ।

( ५ ) इतरादि-साकांक्षशब्दघटितनियमः ७मः इति एकः एव ।

( ६ ) तु-शब्दघटितनियमौ ९मः १८शश्चेति द्वौ ।

( ७ ) नाम-पदघटितनियमौ १०म २०शश्चेति द्वौ ।

( ८ ) 'व्याख्यातम्' 'तदुक्तम्' इत्यादि-पदघटितनियमः—१५शः इति एकः।

( ९ ) 'स्यात्' पदघटितनियमः—१९श इति एकः एव।

## नियमानां सारसंग्रहः ।

एतेषां नियमानां यत् सारभूतं तद् हि—

१। उद्देश्यतया वा विधेयतया वा यत्र निराकांक्षप्रथमान्तपदम् अथवा तादृशपदस्य अध्याहारः आवश्यकः तत्रैव अधिकरणारम्भः । प्रथमान्तपदस्यैव निर्देशपरत्वात् साकांक्षत्वस्य च अस्वातन्त्र्यं हि प्रसिद्धमेव, तेन तदेव अधिकरणारम्भबाधकम् ।

२। पादारम्भे सर्वत्र अधिकरणारम्भः करणीयः। अधिकरणव्यापकपादभेदात् व्याप्याधि-करणस्यापि भेदस्य अवश्यम्भावित्वात्।

३। विषयश्रुतिभेदस्यापि अधिकरणारम्भकत्वम् । श्रुत्यर्थनिर्णयस्यैव एतद्ग्रन्थस्य मुख्यप्रयोजनत्वात् ।

४। अधिकरणसमाप्तेरपि पराधिकरणस्य आरम्भकत्वम्। समाप्तेरेव सम्बन्धविघटकत्व-प्रसिद्धेः।

५। प्रथमान्तपदस्य विशेषेण पूर्वप्रकृतेन सह साकांक्षत्वम् अधिकरणारम्भस्य बाधकम्। आकांक्षायाः सम्बन्धघटकत्वप्रसिद्धेः।

६। च वा तु हि अपि चेत् नहि इतर अन्य-इत्यादिशब्दानां साकांक्षत्वबोधकत्वम्, समुच्चय-विकल्प-संकोच-निषेधाद्यर्थपरत्वात्। तेन एतेषां सत्त्वम् अधिकरणारम्भस्य बाधकम्।

७। च-कारादिना हेतोः समुच्चये नाधिकरणारम्भः। हेतुसाध्ययोः व्याप्तिसम्बन्धात् साकांक्षत्वसिद्धेः। किंतु प्रकृतोद्देश्यविधेयान्यतरभेदबोधकत्वे निराकांक्षत्वसिद्धेः तदारम्भः विषयान्तरस्य सूचनात्।

८। उपर्युपरि-हेतुत्रयप्रदर्शनम् अधिकरणसमाप्तिसूचकम्। त्रिरुक्तस्य वक्तव्यशेषत्वेन व्यवहारात्, प्रतिज्ञायाः पूर्णरूपत्वाच्च।

९। हेतुबोधकपूर्वापरसूत्रद्वयमध्यपतितसूत्रस्य सहेतुकमध्यमान्तपदसत्त्वं नाधिकरणारम्भकत्वम्। सजातीयबाहुल्यस्य सामर्थ्याधिक्यनियमात्। एतदेव नियमरचनायाः मूलमंत्रः अस्माकम् आसीत्।

## नियमानां साम्प्रदायिकोपदेशाधीनत्वम्।

एवं च सूत्ररचनायां ये च नियमाः सूत्रकृद्भिः अनुसृताः ते सर्वे युक्तिमूलकाः अलोकविरुद्धाः च इति। तथापि साम्प्रदायिकोपदेशस्य आनर्थक्यं न कल्पनीयम्। नियमम् अनुसृत्यापि विप्रतिपत्तेः सम्भवात्। यतः सूत्रोपजीव्यश्रुतिस्मृतिप्रभृतिग्रहणे भाष्यकाराणां मतानैक्यं दृश्यते, तत्रापि हेतुः श्रुत्यादीनां पदाद्यवलम्बनेन सूत्राणाम् अरचितत्वमेव। न वा एतत् सूत्रकृतां न्यूनत्वम् इति कल्पयितुं शक्यते। यतः गुरुशिष्यक्रमेण विद्या समधिगम्या, अन्यथा सा न फलवती भवति इति सज्जनानुभवत्वेन प्रसिद्धमेव। गुरोरेव तत्त्वप्रकाशतत्त्वस्य प्रतीकत्वात्। अतः अत्र साम्प्रदायिकोपदेशस्य आनर्थक्यं न शंकनीयम्। चरमोपसंहारे वैयासिकसाम्प्रदायिकत्वं विचारयिष्यते।

## भाष्याणां मध्ये श्रेष्ठतमत्वनिर्देशो हेत्वन्तरम्।

अत्र अधिकरणरचनानियमानुसारेण शांकरव्याख्यानस्य श्रेष्ठत्वे निर्दोषत्वे वा अपरः एको हेतुः उपलभ्यते। स च हेतुः—आलोच्यमानानां भाष्याणां मध्ये नियमविरुद्धं सत् केवलमेकं शांकरभाष्यमेव एककं, तथा अन्येन सह न अन्येषां प्रतिपक्षत्वेन दृश्यते। सर्वत्र शंकरमतं नियमानुसारि सत् कस्यचित् अपरस्य एकस्यापि अनुकूलमेव भवति इति परिलक्ष्यते। अन्यत् सर्वं भाष्यं नियमविरुद्धं सत् बहुषु स्थलेषु एककमेव स्वकीयव्याख्यानविशेषस्य प्रवर्तकम् इति दृश्यते। तथा च शांकरभाष्ये नियमानुवर्तनेन सह तत्प्रतिपक्षस्यापि अनुमोदनं

समर्थनं वा यथा लभ्यते, न तथा भाष्यान्तरेषु इति अकामेनापि अंगीकर्तव्यम् इति। श्रीपति-भाष्यमपि एककं न कस्यापि विरोधि, तथापि अनेन सह मिलित्वा तथैव भवति। अतः तस्य न शांकरभाष्यसमकक्षत्वम् इत्यपि ध्येयम्।

अत्र अयम् अपरः एकशंकावसरः सोऽपि अत्र निरसनीयः। अत्रेदं शंक्यते कथं व्याससम्मतब्रह्मसूत्रभाष्यनिर्णयार्थं केवलम् अधिकरणरचनाजन्यः दोषगुणविचारः कृतः, सूत्रार्थ-विचारः कथं न सम्पादितः इति। एतदर्थं सूत्रार्थविचारः एव मुख्यं कारणम्। अतः अधिकरण-रचनाविचारद्वारा योऽत्र निर्णयः कृतः स न सम्यक् पन्थाः, स न अविसम्वादी उपायः इति।

अस्योत्तरम् इदम्—एतदर्थम् अधिकरणरचनाविचारः एव उपजी०यत्वेन तथा मुख्यत्वेन समाश्रयणीयः। यतः ग्रन्थोऽयं ब्रह्मसूत्राख्यः आपाततः श्रुत्यध्ययनजन्यसंशयस्य मीमांसामुखेन तत्त्वज्ञानतत्साधनफलादीनां दार्शनिकशैलीम् अनुसृत्य दार्शनिकरीत्या प्रकटनार्थः। एतदर्थमेव सूत्राणि रचितानि, न तु न्यायसांख्यादीनामिव श्रुतिमूलकस्वानुभवसिद्धपृथङ्-मोक्षमार्गप्रदर्शनार्थः। तेन श्रुत्यर्थः एव सूत्रार्थः, श्रुत्यर्थानुसारेणैव च सूत्रार्थः करणीयः। श्रुतितात्पर्यविरुद्धः सूत्रार्थः न कदापि साधनीयः। अतः अत्र व्यासमतं नाम स्वतन्त्रं किंचिदपि नैव सम्भवति। यदेव श्रुतितात्पर्यं तदेव व्यासंमतम्। श्रुतितात्पर्यमपि पूर्वमीमांसादर्शनोक्तलोकवेदसाधारण-नियमनिवहैरेव आविष्करणीयम्। अतश्च श्रुत्यन्तार्थः एव सूत्रार्थः भवितुम् उचितः। तथा सति ग्रन्थेऽस्मिन् व्यासमतं नाम किंचिदपि यदि वर्तते तत् एतद्ग्रन्थरचनायामेव व्यासानुसृतमार्गरूपं यत् किंचित्, अथवा व्यासावलम्बितग्रन्थ-रचनाशैलीरूपं यत् किंचित्, अथवा ग्रन्थप्रतिपाद्यविषयविन्यासरूपं यत् किंचित् भवितुम् अर्हति। एतदेव अत्र मुख्यत्वेन अधिकरणरचनम् अधिकरणविन्यासः वा भवति। अधिकरणविन्यासे तथा अधिकरणारम्भे तत्समापने च व्यासीयवैलक्षण्यं स्वातन्त्र्यं वा यथा प्रकटीभवितुं सम्भा-व्यते, न तथा सूत्रार्थवर्णनेन, तस्य श्रुत्यर्थरूपत्वात्। अतः व्याससम्मतभाष्यनिर्णयार्थम् अत्र अधिकरणरचनाजन्यवैलक्षण्यमेव विचारणीयम्। तेन च एतदेव अत्र सम्यगुपायत्वेन कल्पि-तम् अवलम्बितं च अस्माभिः।

अथ यद्युच्येत, पूर्वपक्षश्रुतिनिर्णये तथा तस्य सिद्धान्तश्रुतिनिर्देशे च व्यासंमतत्वेन किंचिदपि अवधन्तव्यम्। यथा जैमिनिबादरिप्रभृतीनां मतत्वेन कचित् किंचित् किञ्चित् ग्रन्थे-ऽस्मिन्नेव उक्तम्। अतः श्रुतितात्पर्येणैव योऽपि सिद्धान्तः अत्र सन्निवन्धः, स एव व्यासीयः सिद्धान्तः न तु सर्वत्र श्रौत सिद्धान्त इति एवः। नेयं शंका संगता। यतः सिद्धान्तश्रुतिनिर्दे-शोऽपि मीमांसादर्शनावलम्बितमार्गेणैव सम्पादितः, न तु व्यासस्य अलौकिकशक्तिबलेन आविष्कृतः। तेन यत्र कुत्रचित् श्रुत्यर्थमीमांसानियमम् अलंघित्वा एतादृशी सम्भावना व्यासेनैव आशंकिता तत्रैव बादरायण इति स्वनाम्ना तन्निर्देशः कृतः तेनैव। अन्यत्र सर्वत्रैव मीमांसानियमानुसरणफलमेव

प्रदर्शितं सूत्रकृद्भिः। इयं च प्रथा ग्रन्थस्य आदितः अन्तपर्यन्तम् अवलम्बिता इति दृश्यते। अतः अत्र एतादृशशंकावसरः नास्त्येव। ग्रन्थेऽस्मिन् ग्रन्थकृतः स्वकीयमतानुप्रवेशशंकालेशोऽपि नास्ति। एतदेव एतद्ग्रन्थस्य "स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्" २।१।१ इति सूत्रे प्रपंचितम्। अत्र पौरुषेयमतमात्रस्य निषिद्धत्वम् उक्तम्। तथापि एतेन सूत्रार्थ-विचारस्य वैफल्यम् अत्र न कल्पनीयम्। सूत्राक्षरतः एव योऽर्थः येन केनापि लभ्यते, केन-चिदर्थेन अननुरुद्धः सन्, सोऽपि अर्थः श्रुतितात्पर्यरूपव्यासमतनिर्णयार्थं प्रयोजनीयः एव। सोऽपि एकः पन्थाः ग्रन्थस्यास्य तात्पर्यनिर्णये व्यासमतविनिर्णये वा। परंतु अत्रापि स्वकीय-संस्कारप्राधान्यं दुष्परिहरणीयमेव। संस्कारवशात् स्पष्टार्थोऽपि अज्ञातसारेण अन्यथा नीयते। बहूनि सूत्राणि एवंजातीयकानि दृश्यन्ते, यत्र एकतरपक्षविनिर्णयाशा कथंचित् दुराशा इत्येव प्रतिभाति। वागजालविस्तरपटुता यस्य यादृशी भवति, तदुक्तयः एव प्रायेण अभ्रान्तत्वेन गृह्यन्ते। तर्काप्रतिष्ठानता तावत् विभिन्नभाष्याणां तर्कैणैव अवधार्यते। अतः सूत्रार्थविचारम् अपेक्ष्य अधिकरणविचारः एव सुगमः पन्थाः बहूनां मादृशानाम् अल्पबुद्धीनाम्। अत एव अत्र सूत्रपाठादिविविधविषये अधिकसम्मतिनिरूपणेन तथा अधिकरणरचनाविषयक-विचारद्वारैव व्यासाभिमतब्रह्मसूत्रभाष्यनिर्णयाय प्रयत्नोऽयं कृतः। अस्य साफल्यं तदैव भविष्यति यदा विद्वांसः अत्र सूत्रार्थविचारद्वारापि प्रवर्तेरन् इति।

इति श्रीचिद्घनानन्दपुरी-विरचिते व्यासमतब्रह्मसूत्र-
भाष्यनिर्णये तृतीयपादः।